॥ ॐ ॥ नमः सर्वज्ञाय ॥ ॥ जयति नमदमरमुकुटप्रतिबिम्बच्छद्मविहितबहुरूपः ॥ उद्धर्तुमिव समस्तं विश्वं भवपंकतो वीरः ॥ जिनवचनामृतजलधिं
वंदे यद्बिंदुमात्रमादाय ॥ अभवन्नूनं सत्वा जन्मजराव्याधिपरिहीनाः ॥ प्रणमत गुरुपदपंकजमधरीकृतकामधेनुकल्पलतं ॥ यदुपास्तिवशान्निरुपमम
श्नुवते ब्रह्म तनुभाजः ॥ जडमतिरपि गुरुचरणोपास्तिसमुद्भूतविपुलमतिविभवः ॥ समयानुसारतोहं विदधे प्रज्ञापनाविवृतिं ॥ अथ प्रज्ञापनेति कः शब्दा
र्थः उच्यते ॥ प्रकर्षेण निःशेषकुतीर्थितीर्थकरासाध्येन यथावस्थितस्वरूपनिरूपणलक्षणेन ज्ञाप्यंते शिष्यबुद्धावारोप्यंते ॥ जीवाजीवादयः पदार्था अनयेति प्रज्ञा
पना ॥ इयं च समवायाख्यस्य चतुर्थस्यांगस्योपांगं ॥ तदुक्तानुक्तार्थप्रतिपादनात् उक्तप्रतिपादनमनर्थकमिति चेत् न उक्तानामपि विस्तरेणाभिधानस्य मंदमतिविनय
जनानुग्रहार्थतया सार्थकत्वात् ॥ इदं चोपांगमपि प्रायः सकलजीवाजीवादिपदार्थशासनात् शास्त्रं शास्त्रस्य चादौ प्रेक्षावतां प्रवृत्त्यर्थमवश्यं प्रयोजनादित्रितयं
मंगलं च वक्तव्यमुक्तं च प्रेक्षावतां प्रवृत्त्यर्थं फलादित्रितयं स्फुटं मंगलं चैव शास्त्रादौ वाच्यमिष्टार्थसिद्धये इति ॥ तत्र प्रयोजनं द्विधा परमपरं च पुनरेकैकं द्विधा कर्तृग
तं श्रोतृगतं च तत्र द्रव्यास्तिकनयमतपर्यालोचनायामागमस्य नित्यत्वात् कर्तुरभाव एवं तथा चोक्तं मेषा द्वादशांगी न कदाचिन्नासीन्न कदाचिन्न भवति न कदाचि
न्न भविष्यति ध्रुवा नित्या शाश्वती त्यादि ॥ पर्यायास्तिकनयमतपर्यालोचनायां चानित्यत्वाद् वश्यं भावी तत्सद्भावस्ततः पर्यालोचनायां सूत्रार्थोभयरूप
त्वादागमस्यार्थापेक्षया नित्यत्वात् सूत्रापेक्षया चानित्यत्वात् कथंचित् कर्तृसिद्धिः तत्र सूत्रकर्तुरनंतरं प्रयोजनं सत्वानुग्रहः परंपरं त्वपवर्गप्राप्तिः उक्तं च सर्वज्ञोपदेश
नयः सत्वानामनुग्रहं करोति दुःखतप्तानां स प्राप्नोत्यचिरात् शिवं ॥ तदर्थप्रतिपादकस्यार्हतः किं प्रयोजनमिति चेत् न किंचित् कृतकृत्यत्वात् ॥ प्रयोजनमंतरेणार्थ
प्रतिपादनप्रयासो निरर्थक इति चेन्न ॥ नन्वस्य तीर्थकरनामकर्मविपाकोदयप्रभवत्वात् ॥ उक्तं च ॥ तं च कहं वेइज्जइ अगिलाए धम्मदेसणाए उ ॥ इति श्रो
तॄणामनंतरं प्रयोजनं विवक्षिताध्ययनार्थपरिज्ञानं परं निःश्रेयसावाप्तिः तौ हि विवक्षितमध्ययनमर्थतः सम्यगवगम्य संसारात् हि रयंते विरक्ताश्च सं
ते संसाराद्विनिर्ज्जिगमिषवः संयमाध्वनि यथागमं सम्यक्प्रवर्तिमाततत्से प्रवर्त्तमानां च संयमप्रकर्षवशात् उपजायते सकलकर्मक्षयात् निःश्रेयसावा १
प्तिरिति ॥ उक्तं च ॥ सम्यग्भावपरिज्ञानाद्विरक्ता भवतो जनाः ॥ क्रियासक्ता ह्यविघ्नेन गच्छंति परमां गतिमिति ॥ अभिधेयं जीवाजीवस्वरूपं तच्च प्राक्प्रदर्शितनाम

य
व्युत्पत्तिसामर्थ्यमात्रादवगतं ॥ संबंधो द्विधा उपायोपेयभावलक्षणो गुरुपर्वक्रमलक्षणश्च ॥ तत्राद्यस्तर्कानुसारिणः प्रति ॥ तद्यथा वचनरूपापन्नं प्रकरणमुपायस्तत्प
रिज्ञानं चोपेयं गुरुपर्वक्रमलक्षणः ॥ केवलश्रद्धानुसारिणः प्रति तं चाग्रे स्वयमेव सूत्रकृदभिधास्यति इदं च प्रज्ञापनाख्यमुपांगं सम्यग्ज्ञानहेतुत्वादतएवं परं
परया मुक्तिपदप्रापकत्वात् ॥ श्रेयोभूतमतो मा भूदत्र विघ्न इति ॥ विघ्नविनायकोपशांतये शिष्याणां मंगलबुद्धिपरिग्रहाय स्वतो मंगलभूतस्यादिमध्यावसानेषु
मंगलमभिधानव्यं ॥ आदिमंगलं ह्यविघ्नेन शास्त्रपारगमनार्थं मध्यमंगलमवगृहीतशास्त्रार्थस्थिरीकरणार्थमंतमंगलं शिष्यप्रशिष्यपरंपरया शास्त्रस्या
व्यवच्छेदार्थं ॥ उक्तं च ॥ तं मंगलमाईए मज्झे पज्जंतए य सत्थस्स ॥ पढमं सत्थस्साविग्घपारगमणाय निद्दिट्ठं ॥ तस्सेव य थेज्जत्थं मज्झिमयं अंतिमंपि तस्सेव ॥ अव्वोच्छि
त्तिनिमित्तं सिस्सपसिस्साइवंसस्स ॥ तत्र प्रथमपदगतेन ववगयजरमरणभये इत्यादिनाग्रंथेनादिमंगलमभिहितं चतनास्तवस्य परममंगलत्वात् ॥ उपयोगपदगतेन
कइविहेणं भंते उवयोगे पन्नत्ते इत्यादिना मध्यमंगलमुपयोगस्य ज्ञानरूपत्वात् ज्ञानस्य च कर्मक्षयं प्रति प्रधानकारणतात स्यापि सिद्धस्य दाद्यागमे अभिधाना
त् ॥ तथा चागमः जं अन्नाणी कम्मं खवेइ बहुयाइं वासकोडीहिं तं नाणी तिहिं गुत्तो खवेइ उस्सासमेत्तेणं ॥ तथा समुग्घातपदगतेन केवलसमुद्घातपरिसमाप्त्यु
त्तरकालभावना सिद्धाधिकारप्रतिबद्धेन निच्छिन्नसव्वदुक्खा जाइजरामरणबंधणविमुक्का सासयमव्वाबाहं चिट्ठंति सुही सुहंपत्ता इत्यादिना अवसानमंगलं तत्रादि
मंगलमत्र व्याख्यायते ॥ ववगयेत्यादि सिद्धं बद्धमष्टप्रकारं कर्मेंधनं ध्मातं दग्धं जाज्वल्यमानशुक्लध्यानानलेन यैस्ते निरुक्तविधिना सिद्धाः ॥ अथवा षिधु गतौ सेधं
ति स्म अपुनरावृत्त्या निर्वृतिपुरीमगच्छन् ॥ यदि वा षिधु संराद्धौ सिध्यंति स्म निष्ठितार्था भवंति स्म ॥ यद्वा षिधू शास्त्रे मांगल्ये च सेधंति स्म शासितारोभवन् मंगल
रूपतां चानुभवंति स्मेति सिद्धाः ॥ अथवा सिद्धाः नित्या अपर्यवसानस्थितिकत्वात् प्रख्याता वा भव्यैरुपलब्धगुणसंदोहत्वात् उक्तं च ॥ ध्मातं सितं येन पुराणकर्म
यो वा गतो निर्वृतिसौधमूर्ध्नि ॥ ख्यातोनुशास्ता परिनिष्ठितार्थो यः सोस्तु सिद्धः कृतमंगलो मे ॥ सिद्धाश्च नामादिभेदतो नेकधा ततो यथोक्तसि
द्धप्रतिपत्त्यर्थं विशेषणमाह ॥ व्यपगतजरामरणभयान् ॥ जरा वयोहानिलक्षणा मरणं प्राणत्यागरूपं भयमिहलोकादिभेदात् सप्तप्रकारं उक्तं च इहप
रलोकादाणमकम्हा आजीवमरणमसिलोए इति ॥ विशेषतो पुनर्भावरूपतया अपगतानि परिभ्रष्टानि जरामरणभयानि येभ्यस्ते तथा तान् त्रिविधेन मनसा वा

वाकायेनअनेनयोगत्रयव्यापारविकलंद्रव्यवंदनमित्याह अभिमुखंवंदित्वाप्रणम्येत्यर्थः अनेनसमानकर्तृकतयापूर्वकालेक्त्वाप्रत्ययविधानान्नित्यानित्यैकांतप
क्षव्यवच्छेदमाह एकांतनित्यानित्यपक्षेक्त्वाप्रत्ययस्यासंभवात् तथाह्यप्रच्युतानुत्पन्नस्थिरैकस्वभावंनित्यंनस्यकथंभिन्नकालक्रियाद्वयकर्तृत्वोपपत्तिराकालमेकस्व
भावत्वेनैकस्याएवक्रियायाःसदाप्रसंगात् अनित्यमपिप्रकृत्यैकक्षणस्थितधर्मकंततस्तस्याभिन्नकालक्रियाद्वयकर्तृत्वायोगोऽवस्थानाभावादित्यलं
विस्तरेणान्यत्रस्फुटविर्चितत्वात् क्त्वाप्रत्ययश्चोत्तरक्रियासापेक्षत्वादुत्तरक्रियामपेक्षत्वादुत्तरक्रियामाहवंदेजिनवरेंद्रमित्यादि शूरवीरविक्रांतौवीरयतिस्मकषाया
दिशत्रून्प्रतिविक्रांतवानितिवीरः महांश्चासौवीरश्चमहावीरः इदंचमहावीरइतिनामनयादृच्छिकं किंतुयथावस्थितमनन्यसाधारणंपरीषहोपसर्गादि
विषयंतीव्रमपिश्रुत्वापुरस्कृतं उक्तंच अयलोऽपायोरवाणांसर्वनिर्वाणपरीसहोवसम्प्राणं देवेहिंकएमहावीरेत्ति अनेनापायापगमातिशयोऽभ्यधायि
तंकथंभूतमित्याह जिनवरेंद्रंजयंतिरागादिशत्रूनितिजिनाः तेचचतुर्विधास्तद्यथाश्रुतजिनाअवधिजिनामनःपर्यायजिनाः केवलिजिनाश्चकेवलिजिनास्त
केवलिजिनप्रतिपत्तयेवरग्रहणंजिनानांवराःतत्क्षायोपशमिकभावस्वभावाभासिकेवलज्ञानकलितत्वात् जिनानवरास्तेचातीर्थकरा अपिमंतः सामान्यकेवलिनो
भवंतितततीर्थकरप्रतिपत्त्यर्थमिंद्रग्रहणंजिनवराणामिंद्रोजिनवरेंद्रः प्रकृष्टपुण्यस्कंधरूपतीर्थकरनामकर्मोदयात्तीर्थकरइत्यर्थः अनेनज्ञानातिशय
प्रजातिशयमंतरेणजिनेषुमध्येउत्तमत्वस्यप्रजातिशयमंतरेणजिनवराणामपिमध्येइंद्रत्वस्यायोगात् पुनःकिंभूतमित्याह त्रैलोक्यगुरुंयथावस्थितप्रव
चनार्थभणितगुरुःसचभगवान् अधोलोकनिवासिभवनपतिदेवोऽथस्तिर्यग्लोकनिवासिव्यंतरनरपशुविद्याधरज्योतिष्क ऊर्ध्वलोकनिकायनिकृष्टदेवभाषाधर्मोप
देशनंअनेनवागतिशयमाह एवंचापायापगमातिशयादयश्चत्वारोऽतिशयादेहसौगंध्यादीनामतिशयानामुपलक्षणंतानंतरेणदोषाणामभावात्तचतुर्णां
मादतिशयोपेतंभगवंतंमहामहावीरंवंदेइत्युक्तंद्रष्टव्यं आहनचऋषभादीनत्युदस्यकिमर्थंभगवतोमहावीरस्यवंदनंउच्यतेवर्त्तमानतीर्थाधिपति
त्वेनासन्नोपकारित्वात्तदेवासन्नोपकारित्वंदर्शयति ७. मयरयणेत्यादिअत्रअनेनविशेष्यंत्रीणिसामानाधिकरण्येनचविशेषणं जिनवरेणेति २.
जिनाःसामान्यकेवलिनस्तेषामपिप्रवरउत्तमस्तीर्थकरत्वात् जिनवरेणसामर्थ्यात् महावीरेणान्यस्यवर्त्तमानतीर्थपतित्वाभावात्इहछद्मस्थक्षीणमोह

जिनापेक्षयासामान्यकेवलिनोपिजिनवराउच्यंतेतेनतस्तत्कल्पंमाभूदासीदितिनेयनतइतितीर्थकरत्वप्रतिपत्तायाविशेषणांतरमाह भगवताभगःस
मग्रैश्वर्यादिरूपः उक्तंच ऐश्वर्यस्यसमग्रस्यरूपस्ययशसःश्रियः धर्मस्याथप्रयत्नस्यषण्णांभगइतींगनाभगो स्यास्तीतिभगवान् अतिशायनेमतु
प्रत्ययः अतिशायीचभगोवर्द्धमानस्वामिनःशेषप्राणिगणापेक्षयात्रैलोक्याधिपतित्वात् तेनाभगवतापरमार्हन्त्यमहिमोपेतेनेत्यर्थः पुनःकथंभू
तेनेत्याह भव्यजननिर्वृतिकरेणभवस्तथाविधानादिपारिणामिकभावानसिद्धिगमनयोग्यः सचासौजनश्चभव्यजनःनिर्वृतिर्निर्वाणंसकलकर्ममलापगम
नेनस्वस्वरूपस्वरूपलाभतःपरमंस्वास्थ्यंनद्धेतुसम्यक्दर्शनाद्यपिकारणेकार्योपचारान्निर्वृतिस्तत्करणशीलोनिर्वृतिकरःभव्यजनस्यनिर्वृतिकरोभव्यजननिर्वृ
तिकरस्तेनआह भव्यग्रहणमसव्यवच्छेदार्थमन्यथातस्यानिरर्थकप्रसंगात्ततइत्थापतितंभव्यानामेवसम्यग्दर्शनादिकंकरोतिनाभव्यानांतत्वेनदूषणंभगवतोवीत
रागत्वेनपक्षपातासंभवात् नैतत्सारंसम्यकवस्तुतत्वापरिज्ञानात भगवान्हिसवितेवप्रकाशमविशेषेणप्रवचनार्थमातनोतिकेवलभाव्यानांतथास्वाभाव्याद
वतामसस्वगकुलानामिवसूर्यप्रकाशेनप्रवचनार्थउपदिश्यमानोपिउपकारायप्रभवति तथाचाह वादिमुख्यः सद्धर्मबीजवपनानघकौशलस्ययल्लोक
लस्यपल्लोकबांधवतवापिखिलान्यभूवन् तन्नाद्भुतंखगकुलेष्विहतामसेषुसूर्यांशवोमधुकरीचरणावदाताः ततोभव्यानामेवभगवद्वचनायुपकारोज्ञा
यते इतिभव्यजननिर्वृतिकारणेत्युक्तं किमित्याह उवर्दसियत्ति उपसामीप्येनयथाश्रोतॄणांकरोति यथावस्थितवस्तुतत्वावबोधोभवति तथास्फुटवच
नैरित्यर्थः दर्शिताश्रवणगोचरंनीताउपदिष्टाइत्यर्थः कासौप्रज्ञापनाप्रज्ञाप्यंतेधर्मास्तिकायजीवाजीवभावाअनयाशब्दसंहत्याइतिप्रज्ञापनाकिंविशिष्टेत्यत्र
आह श्रुतरत्ननिधानं इहरत्नानिद्विविधानिभवंति तद्यथाद्रव्यरत्नानिभावरत्नानिचद्रव्यरत्नानिवैडूर्यमरकतेंद्रनीलादीनिभावरत्नानिश्रुतज्ञानादीनि ॥
तत्रद्रव्यरत्नानिनतात्त्विकानीतिभावरत्नैरिहाधिकारपूर्ववत्समासः श्रुतान्येवरत्नानिनश्रुतानिचरत्नानिचतानिश्रुतानिरत्नानीचेतिकुतइतिचेत् उच्यते
प्रथमपक्षेश्रुतव्यतिरिक्तोर्द्रव्यरत्नैरिहाधिकाराभावात् द्वितीयपक्षेतुश्रुतानामेवतात्त्विकरत्नत्वात् शेषरत्नैरुपमायाअयोगात्निधानमिवनिधानंश्रुतरत्न
निधानंकेषांप्रज्ञापनेत्यतआह सर्वभावानांसर्वेचतेभावाश्चसर्वभावाः जीवाजीवाश्रवबंधसंवरनिर्जरामोक्षाः तथाह्यस्यांप्रज्ञापनायांषट्त्रिंशत्पदानितत्रप्रज्ञापना

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

बहुवक्तव्या विशेषवरमपरिणामसंज्ञेषुपंचसुपदेषुजीवाजीवानांप्रज्ञापनाप्रयोगपदेवास्त्रवस्यकायवाङ्मनःकर्मयोगआश्रवइतिवचनात् कर्मप्र
कृतिपदेबंधस्यसमुद्घातपदेकेवलिसमुद्घातप्ररूपणायांसंवरनिर्जरामोक्षाणांत्रयाणां शेषेषुस्थानादिषुपदेषुक्वचित्कस्यचिदिति अथवा सर्व
भावानामितिद्रव्यक्षेत्रकालभावानामितव्यतिरेकेणान्यस्यप्रज्ञापनीयस्याभावात् तत्रप्रज्ञापनापदेजीवाजीवद्रव्याणांप्रज्ञापनास्थानपदेजीवाजीवद्र
व्याणांप्रज्ञापनास्थानपदेजीवाधारस्यक्षेत्रस्यस्थितिपदेनारकादिस्थितिनिरूपणात्कालस्यशेषपदेषुसंख्याज्ञानादिपर्यायव्युत्क्रांत्युच्छ्वासादीनां
भावानामिति अस्याश्चगाथायाअज्झयणमिणंचित्तमित्यनयागाथयासहाभिसंबंधकेवलंयेनेयंसत्वानुग्रहायश्रुतसागरादुद्धृताअसावस्यासन्नतरोप
कारित्वादस्मद्विधानांनमस्कारार्हइतितन्नमस्कारविषयमिदमध्यांतरालएवान्यकर्तृकंगाथाद्वयं वायगवरवंसाउइत्यादिव्याचकाः पूर्वविदःवाचकाःपू
र्वविदः वाचकाश्चवाचकाःवाचकप्रधानास्तेषांवंशःप्रवाहोवाचकवंशस्तस्मिन्स्त्रयोविंशतितमपंचमीनिर्देशः प्राकृतत्वात्प्राकृतेहिसर्वासांविभक्तीनांयुक्त
तिगर्वाअपिविभक्तयोयथायोग्यंप्रवर्तंतेतथाचाहपाणिनिःस्वप्राकृतव्याकरणेव्यत्ययोप्यासामिति त्रयोविंशतितमनयथावसधर्मस्वामिनआरभ्यभग
वानार्यश्यामस्त्रयोविंशतितमएव किंभूतेनधीरपुरुषेणधीबुद्धिस्तयाराजंतइतिधीराःधीरश्चासौपुरुषश्चतेनतथादुर्द्धरंगणिप्राणातिपातादिनिवृत्तिलक्षणा
निपंचमहाव्रतानिधारयतीतिदुर्धरस्तेनतथामन्यतेजगतस्त्रिकालावस्थामितिमुनिः तेनविशिष्टसंविसमन्वितेनेत्यर्थः पुनःकथंभूतेनेत्याहपूर्वश्रु
तसमृद्धबुद्धिनापूर्वाणिवततत्श्रुतंचपूर्वश्रुतंतेनसमृद्धाप्रवृद्धिमुपगताबुद्धिर्यस्यसपूर्वश्रुतसमृद्धबुद्धिस्तेन आर्ययावाचकवरवंशांतर्गतःसर्व
श्रुतसमृद्धबुद्धिरेवभवति ततःकिमनेनविशेषणेनसत्यमेतत्किंतुपूर्वविदोपिषट्स्थानकपतिताभवंतितथाचचतुर्दशपूर्वविदामपिमतिमधिकृत्यषट्
स्थानकंवक्ष्यति ततअधिकप्रदर्शनार्थमिदंविशेषणमित्यदोषः समिद्धबुद्धीणेत्यत्रणाशब्दस्यह्रस्वत्वंद्विशब्दस्यचदीर्घता आर्षत्वात् ३
तयाश्रुतमनर्घ्यवास्त्वासंभाषितरत्नयुक्तत्वाच्चसागरइवश्रुतसागरः व्याघ्रादिभिर्गौणैस्तगुणानुक्ताविति समासः तस्मात्विरइऊणंति
दिशावचनमेतत्सांप्रतकालीनपुरुषयोग्यंवीनयित्वादित्यर्थः येनेदंप्रज्ञापनारूपंश्रुतरत्नमुत्तमंप्रधानंप्रधानंचतच्छेषश्रुतरत्नापेक्षयाकिंभूतस्तस्मैनमः

दत्तेगणायतस्मैभगवतेज्ञानैश्वर्यधर्मादिवतेआरात्सर्वहेयधर्मेभ्योयातःप्राप्तोगुणैरित्यार्यः सचासौश्यामश्चआर्यश्यामस्तस्मैस्मैचषष्ठीसर्वत्रचतुर्थ्यर्थेइ
ष्टव्या छट्ठिविभत्तीएभण्णइचउत्थीइतिवचनात् अधुनोक्तसंबंधेचेयंगाथाअज्झयणमित्यादि अध्ययनमिदंप्रज्ञापनाख्यंतचुर्दशांगमध्ययनंकिमित्यस्याश
नुयोगद्वारेषुध्यानेनचित्रंन इत्येते नामनियमोयदवश्यमध्ययनादावुपक्रमाद्युपन्यासःक्रियतेइतिख्यापितंकृत्वा अवसीयतइतिचेतदुच्यतेनंध्ययनादि
षदर्शनात् तथाचित्रार्थाधिगमयुक्तत्वाच्चित्रं श्रुतमेवरत्नंश्रुतरत्नंदृष्टिवादस्यद्वादशस्यांगस्यनिष्यंदइवदृष्टिवादनिष्यंदः स्त्रंजनपुंसकतानिर्देशःप्राकृतत्वात्
यथावर्णितंभगवताश्रीमन्महावीरवर्द्धमानस्वामिनाइंद्रभूतिप्रभृतीनामध्ययनार्थस्यवर्णितत्वात् अध्ययनंवर्णितमित्युक्तं अहमपितथावर्णयिष्यामि आहक
थमस्यछद्मस्थस्यतथावर्णयितुंशक्तिर्नैषदोषः सामान्येनाभिधेयपदार्थवर्णनामात्रमधिकृत्यैवमभिधानात्तथाचअहमपितथावर्णयिष्यामीतिकिमुक्तं भ
वतितदनुसारेणवर्णयिष्यामिनस्वमनीषिकयेति अस्यांचप्रज्ञापनायांषट्त्रिंशत्पदानिभवंतिपदंप्रकरणमर्थाधिकारइतिपर्यायाः तानिचपदान्यमूनि ७ पण्ण
वणेत्यादि गाथाचतुष्टयं तत्रप्रथमंपदंप्रज्ञापनाविषयंप्रश्नमधिकृत्यप्रवृत्तत्वात् प्रज्ञापना १ एवंद्वितीयंस्थानानि २ तृतीयंबहुवक्तव्यं ३ चतुर्थंस्थितिः ४ पं
चमंविशेष ५ षष्ठंव्युत्क्रांतिलक्षणार्थाधिकारयुक्तत्वात् ६ सप्तममुच्छ्वासः ७ अष्टमंसंज्ञा ८ नवमंयोनिः ९ दशमंचरमाणिचरमाणीतिप्रश्नद्विप्रवृत्त
त्वात् १० एकादशंभाषाः ११ द्वादशंशरीरं १२ त्रयोदशंपरिणाम १३ चतुर्दशंकषायं १४ पंचदशमिंद्रियं १५ षोडशंप्रयोगः १६ सप्तदशंलेश्याः १७ अ
ष्टादशंकायस्थितिः १८ एकोनविंशतितमंसम्यक्त्वं १९ विंशतितमंअंतक्रिया २० एकविंशतितममवगाहनास्थानं २१ द्वाविंशतितमंक्रिया २२ त्रयोविंशति
तमंकर्म २३ चतुर्विंशतितमंकर्मणोबंधकःतस्मिन्हियथाजीवःकर्मणोबंधकोभवति तथाप्ररूप्यतेइतितत्तथानाम २४ एवंपंचविंशतितमंकर्मवेदकः
२५ षड्विंशतितमंवेदस्यबंधक इतिवेदयतेअनुभवतीतिवेदस्तस्यबंधएवबंधकःकिमुक्तंभवतिकतिप्रकृतीर्वेदमानस्यकतिप्रकृतीनांबंधोभवतीति
तत्रनिरूप्यतेनतद्वेदस्यावंधइतिनाम २६ एवंकाःप्रकृतिर्वेदयमानःकतिप्रकृतीर्वेदयतिइत्यर्थप्रतिपादकंवेदवेदकनामसप्तविंशतितमं २७ अ
ष्टाविंशतितममाहारप्रतिपादकत्वादाहारः २८ एवमेकोनत्रिंशत्तमभुपयोगः २९ त्रिंशत्तमंपासणत्तिदर्शनता ३० एकत्रिंशत्तमंसंज्ञा ३१ द्वा

त्रिंशत्तमंसंयमः ३२ त्रयस्त्रिंशत्तममवधिः ३३ चतुस्त्रिंशत्तमंप्रविचारणा ३४ पंचत्रिंशत्तमंवेदना ३५ षट्त्रिंशत्तमंसमुद्घातः ॥३६॥ तदेवमुपन्यस्तानिपदा
निसांप्रतयथाक्रमंपदगतानिसूत्राणिवक्तव्यानितत्रप्रथमपदगतमादिसूत्रं ॥७॥ सेकिंतंपन्नवणाइतिअथायमूलस्यकःप्रस्तावः उच्यतेप्रश्नसूत्रमिदमेतच्चादावु
पन्यस्तमिदंज्ञापयतिपृच्छतोमध्यस्तस्यबुद्धिमतार्थिनोभगवदर्हदुपदिष्टतत्त्वप्ररूपणाकार्या ॥ नशेषस्यतथाचोक्तं ॥ मध्यस्थोबुद्धिमानर्थीश्रोतापात्रमितिस्मृ
तः ॥ तत्रसेशब्दोमागधदेशीप्रसिद्धोनिपातस्तत्रशब्दार्थैसचवाक्योपन्यासार्थः ॥ किमितिपरप्रश्नेतंनितावदितिद्रष्टव्यं ॥ नत्वकमोद्योतनेततएषसमुदायार्थः
तिष्ठंतुस्थानादीनिप्रष्टव्यानिवाचःक्रमवर्त्तित्वात्प्रज्ञापनानंतरंचतेषामुपन्यस्तत्वात्तत्रैतावदेवतावत्पृच्छामिकिंप्रज्ञापनेति ॥ अथवाप्राकृतशैल्याअभिधेय
वल्लिंगवचनानियोजनीयानीतिन्यायादेवंद्रष्टव्यं ॥ तत्रकातावत्प्रज्ञापनेतिएवंसामान्येतकेनचिन्प्रश्नेकृतेसतिभगवान्गुरुःशिष्यवचनानुरोधेनादराय
विंचित्शिष्याणांप्रत्युत्तारयति ॥ पण्णवणादुविहापण्णत्ताइति अनेनवाग्दर्शनशिष्याभिधानेननिर्वचनसूत्रेणैतदाचष्टेनसर्वमेवसूत्रंगणधरनिर्वचनरूपंकिं
तुकिंचिदन्यथापिबाहुल्येननुतथारूपंयतउक्तंअत्थंभासइअरहासुत्तंगंथंतिगणहरानिउणमित्यादि ॥ तत्रप्रज्ञापनेतिपूर्ववत्द्विविधाद्विप्रकाराप्रज्ञसाप्ररूपिता
यदातीर्थकरास्तदावनिर्वृत्ताःगणधरादायमर्था ॥ वसंयो ॥ नैरपितार्थकरैर्यदापुनरन्यःकश्चिदाचार्यस्तन्मतानुसारात्तदातीर्थकरगणधरैरिति ॥ द्वैविध्यमेवोपदर्शयति ॥ तंजहा
जीवपण्णवणाय ॥ अजीवपण्णवणाय ॥ तद्यथेतिवक्ष्यमाणभेदकथनप्रकाशनार्थः जीवंतिप्राणान्धारयंतीतिजीवाः प्राणाश्चद्विधाद्रव्यप्राणाश्चद्विधाद्रव्याणा
भावप्राणाश्चतत्रद्रव्यप्राणाज्ज्ञानादीनिद्रव्यप्राणैरपिप्राणिनः संसारसमापन्नानारकादयः केवलभावप्राणैःप्राणिनोव्यपगतसमस्तकर्मसंगाःसिद्धाः जीवा
नांप्रज्ञाजीवप्रज्ञापनातजीवाअजीवा ॥ जीवविपरीतरूपास्तेचधर्माधर्माकाशपुद्गलास्तिकायाः ॥ अद्धासमयरूपास्तेषांप्रज्ञापनाअजीवप्रज्ञापनाचकारौद्व
योरपिप्राधान्यख्यापनार्थौनिरवत्तिहान्यतरस्याःप्रज्ञापनायागुणभावः एवंसर्वत्राप्यक्षरगमनिकाकार्या तदेवंसामान्येनप्रज्ञापनाद्वयमुपन्यस्यसंप्र ४
तिविशेषस्वरूपावगमार्थमादावल्पवक्तव्यतादजीवप्रज्ञापनांप्रतिपिपादयिषुस्तद्विषयंप्रश्नसूत्रमाह सेकिंतंअजीवपण्णवण्णाः अथकिंतत्
अजीवप्रज्ञापनेति ॥ अथवाकासाअजीवप्रज्ञापना ॥ सूरिराह ॥ अजीवपन्नवणादुविहापन्नत्ता ॥ तंइत्यादि ॥ अजीवप्रज्ञापनाद्विविधाप्रज्ञप्तातद्यथा ॥

रूप्यजीवप्रज्ञापनाचअरूप्यजीवप्रज्ञापनाचरूपमेषामस्तीतिरूपिणः रूपग्रहणंगंधादीनामुपलक्षणंतद्व्यतिरेकेणतस्यासंभवात् तथाहिप्रतिपरमाणुरूपरसगं
धस्पर्शाः उक्तंच कारणमेवतदंत्यंसूक्ष्मोनित्यश्चभवतिपरमाणुः एकरसगंधवर्णोद्विस्पर्शःकार्यलिंगश्चतस्मादव्यतिरेकःपरस्परंरूपादीनामिति अ
थवारूपंनामस्पर्शरूपादिसंमूर्छनात्मिकामूर्त्तिस्तदेषामस्तीतिरूपिणः रूपिणश्चतेअजीवाश्चरूप्यजीवास्तेषांप्रज्ञापनारूप्यजीवप्रज्ञापनापुद्गलस्वरूपाजी
वप्रज्ञापनेतियावत्पुद्गलानामेवरूपादिमत्वात् रूपिव्यतिरेकेण ॥ रूपिव्यतिरेकेणारूपिणो धर्मास्तिकायादयस्तेचतेअजीवाश्चअरूप्यजीवास्तेषांप्रज्ञा
पनाअरूप्यअरूप्यजीवप्रज्ञापनाचशब्दौप्राग्वत् तत्राल्पवक्तव्यत्वात्प्रथमतो ॥ रूप्यजीवप्रज्ञापनांविवक्षुरिदमाह सेकिंतमित्यादिसेशब्दो ॥ थशब्दार्थः ॥
अथकासाअरूप्यजीवप्रज्ञापनासूरिराह अरूप्यजीवप्रज्ञापनादशविधादशाकाराप्रज्ञप्ताअरूप्यजीवानांदशविधत्वात्तत्प्ररूपणापिदशविधोक्ता तदेव
दशविधत्वंदर्शयतितंयतितंजहेत्यादि ॥ तद्यथेति वक्ष्यमाणभेदकथनोद्योतनार्थः तत्रदशविधत्वंयदिवातदित्यव्ययंसर्वलिंगवाचनेषुसादशविधाअरूप्य
जीवप्रज्ञापनायथाभवति तथादर्शनेधम्मत्थिकायेइति ॥ जीवानांपुद्गलानांचस्वाभावगतिपरिणामपरिणतानांतत्स्वभावधरणात्तत्स्वभावपोषणाद्धर्म
॥ अस्तयश्चेहप्रदेशास्तेषांकायःसंघातःगणकाएयबंधेक्षुण्णनहेयरासीयइतिवचनात् अस्तिकायःप्रदेशसंघातइत्यर्थः ॥ धर्मश्चासौअस्तिकायश्चधर्मा
स्तिकायः अनेनचसकलमेवधर्मास्तिकायरूपमवयविद्रव्यमाह ॥ अवयवीचनामअवयवानांतथारूपः संघातपरिणामविशेषएवनपुनरवयवद्रव्ये
भ्यःपृथगर्थांतरंद्रव्यं तथानुपलंभात्तंतवएवहि ॥ आतानवितानरूपसंघातपरिणामविशेषमापन्नालोकेपटव्यपदेशभाजउपलभ्यंतेनेनतदतिरिक्तःप
टाख्यंनाम उक्तंचान्यैरपितंत्वादिव्यतिरिकेणनपटाख्यंनाम उक्तंचान्यैरपितंत्वादिव्यतिरिकेणनपटाद्युपलंभनं ॥ तंत्वादयोविशिष्टाहिपटादिव्य
पदेशिनः ॥ कृतंप्रसंगेनान्यत्रचिंतितत्वादेतद्वादस्य ॥ तथाधर्मास्तिकायदेशइतितस्यैवधर्मास्तिकायस्यबुद्धिकल्पिताद्व्यादिप्रदेशात्म
कोविभागधम्मत्थिकायस्सपदेसाइतिधर्मास्तिकायस्यप्रदेशाइतिप्रकृष्टादेशाःप्रदेशानिर्विभागाभागाइतिभावस्तेचासंख्येयालोकाकाशप्रदेश
प्रमाणत्वात्तेषांअतएवबहुवचनं ॥ धर्मास्तिकायप्रतिपक्षभूतो ॥ धर्मास्तिकायःकिमुक्तंभवति ॥ जीवपुद्गलानांस्थितिपरिणामपरिणतानांतत्परिणामो

पत्स्कंधको मूर्त्तो संख्यातप्रदेशसंघातात्मको धर्मास्तिकायः अधर्मास्तिकायस्यदेशइत्यादिपूर्ववत् ॥ तथाआङितिमर्यादयास्वस्वभावापरित्यागरूपया
काशंतेस्वरूपेणइतिभासंते स्मिन्व्यवस्थितापदार्थाइत्याकाशंयदात्वभिविधावाङ्तदाआङितिसर्वभावाभिव्याप्त्याकाशंतेइत्याकाशं अस्तयः प्र
देशास्तेषांकायो स्तिकायः आकाशंचतत्अस्तिकायश्चाकाशास्तिकायः आकाशास्तिकायस्यदेशइत्यादिप्राग्वत् नवरंप्रदेशाअनंताद्रष्टव्याः आलो
कस्यअनंतत्वात् आह्न अद्धेतिकालस्याख्याअद्धाचासौसमयश्चअद्धासमयः अथाअद्धायाःसमयोनिर्विभागोभागः अयंचएकएववर्तमानः
परमार्थतःसन्नातीतानागताःसमयास्तेषांयथाक्रमंविनष्टानुत्पन्नत्वेनासत्वात् ततःकायत्वाभावइतिदेशप्रदेशकल्पनाविरहः ॥ आवलिकादयस्तु
पूर्वसमयनिरोधेनैवोत्तरसमयसद्भावइतिततःसमुदयसमित्यादसंभवेनव्यवहारार्थमेवकल्पिताइतिद्रष्टव्यं ॥ अथामीषामित्थंक्रमोपन्यासकिंप्रयोजन
मुच्यते ॥ इहधर्मास्तिकायइतिपदंमंगलाद्भूतमादौधर्मशब्दात्मित्वात् पदार्थप्ररूपणावसंप्रतिप्रथमतउक्तिसावर्तेत ॥ ततोमंगलार्थमादौधर्मा
स्तिकायस्योपादानंधर्मास्तिकायप्रतिपक्षभूतश्चाधर्मास्तिकायति तदनंतरमधर्मास्तिकायस्यद्वयोरप्यनयोराधारभूतमाकाशमितितदनंतरमा
काशास्तिकायस्यततःपुनरजीवसाधर्म्यादद्धासमयस्य ॥ अथवाइहधर्माधर्मास्तिकायोविभूनभवतस्तर्हिभूत्वेतत्सामर्थ्यतोजीवपुद्गलानामस्खलितप्र
चारप्रवृत्तोलोकालोकव्यवस्थानुपपत्तेरस्तिचलोकालोकव्यवस्था तत्रतत्रप्रदेशेसूत्रेसाक्षाद्दर्शनात्ततोयावतिक्षेत्रे गत्यादौतावत्प्रमाणोलोकः शेषस्त्वलो
कइतिसिद्धं ॥ उक्तंच ॥ धर्माधर्मविभुत्वात्सर्वत्रचजीवपुद्गलविचारात्नीलोकःकश्चित्स्यान्नचसम्मतमेतदार्याणां ॥ तस्माद्धर्माधर्मावगाढौव्या
प्यलोकखंसर्वएवंहिपरिच्छिन्नःसिध्यतिलोकस्तदविभुत्वात् ॥ ततएवंलोकालोकव्यवस्थाहेतुधर्माधर्मास्तिकायावित्यनयोरादावुपादानंत
त्रापिमांगल्यत्वात्प्रथमतोधर्मास्तिकायस्यतत्प्रतिपक्षत्वात् ॥ ततोधर्मास्तिकायस्यततोलोकालोकव्यापित्वादाकाशास्तिकायस्यतद
नंतरंलोकेसमयासमयक्षेत्रव्यवस्थाकारित्वादद्धासमयस्यएवमागमानुसारेणान्यदपियुक्तंतुपातिवक्तव्यमित्यलंप्रसंगेन
प्रकृतोपसंहारमाह सेत्तंअरूविअजीवपण्णवणासेषाअरूप्यजीवप्रज्ञापना ॥ पुनराहविनेयः ॥ ६५ ॥ सेकिंतमित्यादि ॥ अथकासारूप्यजीवप्रज्ञाप

ना ॥ सूरिराह ॥ रूप्यजीवप्रज्ञापनाचतुर्विधाप्रज्ञप्तातद्यथा ॥ स्कंधाःस्कंदंतिशुष्यंतिधार्यंतेपुद्गलानांविचटनेनचटनेनचेतिस्कंधाःपृषोदरादयइतिरूपनिष्पत्तिः
अत्रबहुवचनंपुद्गलस्कंधानामानंत्यख्यापनार्थंनचानंत्यमनुपपन्नमागमेऽभिधानात्तथाचवक्ष्यति ॥ दव्वतोणंपुग्गलत्थिकायेइत्यादि ॥ स्कंधदेशाःस्कंधानामे
वस्कंधत्वपरिणाममजहतोबुद्धिकल्पिताद्व्यादिप्रदेशात्मकाविभागाः अत्रापिबहुवचनमनंतप्रादेशिकेपुनथाविधेषुस्कंधेषुप्रदेशानंतत्वसंभावनार्थं
स्कंधानांस्कंधत्वपरिणामपरिणतानांबुद्धिपरिकल्पिताःप्रकृष्टादेशानिर्विभागाभागाःपरिमाणवइत्यर्थः ॥ स्कंधप्रदेशाःअत्रापिबहुवचनंप्रदेशानंतत्व
संभावनार्थंपरमाणुपुद्गलाइतिपरमाणवश्चपरमाणुपुद्गलाः ॥ स्कंधत्वपरिणामरहिताःकेवलाःपरमाणवइत्यर्थः ॥ तेसमासतोइत्यादि ॥ तेस्कं
धादयोयथासंभवंसमासतःसंक्षेपेणपंचविधाःप्रज्ञप्तास्तद्यथा ॥ वर्णपरिणताःवर्णतःपरिणतावर्णपरिणामभाजइत्यर्थः ॥ ७ ॥ एवंगंधपरिणतारसपरि
णताःस्पर्शपरिणताःस्पर्शपरिणताःसंस्थानपरिणताःपरिणताइति ॥ अतीतकालनिर्देशोवर्तमाना नागतंकालोपलक्षणंवर्तमानानागतत्वमंतरेणातीतत्व
स्यासंभवात् ॥ तथाहि ॥ योवर्त्तमानत्वमपिक्रांतःसोतीताभवति वर्त्तमानत्वंचसो नुभवतियो नागतत्वमतिक्रांतवान् उक्तंच भवतिसनामातीतोयःप्राप्तोना
मवर्त्तमानत्वं एष्यंश्चनामसंभवति यःप्राप्स्यतिवर्त्तमानत्वं ततोवर्णपरिणताइतिवर्णस्वरूपतयापरिणताःपरिणमंतिपरिणमिष्यंतीतिद्रष्टव्यंएवंगंधपरि
णताइत्याद्यपिपरिभावनीयं ॥ जेवण्णपरिणयाइत्यादियेवर्णपरिणतास्तेपंचविधाःप्रज्ञप्तास्तद्यथाकृष्णवर्णपरिणताःकज्जलादिवत् ॥ नीलव
र्णपरिणतानीलयादिवत् ॥ लोहितवर्णपरिणताःहिंगुलादिवत् ॥ हारिद्रवर्णपरिणताहरिद्रादिवत् ॥ शुक्लवर्णपरिणताःशंखादिवत् ॥ येगंधपरिण
तास्तेद्विविधाःप्रज्ञप्तास्तद्यथा सुरभिगंधपरिणताश्चदुरभिगंधपरिणताश्च ॥ चशब्दौपरिणामभवनंप्रतिविशेषाभावख्यापनार्थौतथाहियथाकं
थंचिदवस्थिताःसामग्रीवशतःसुरभिगंधपरिणामंभजंते ॥ तथाकथंचिदवस्थिताएवसमेश्रीनशतोदुरभिगंधपरिणाममपीति ॥ सुरभिगंधप
रिणताश्चयथाश्रीखंडादयः ॥ दुरभिगंधपरिणतालशुनादिवत् ॥ येरसपरिणतास्तेपंचविधाः प्रज्ञप्तास्तद्यथातिक्तरसपरिणताःकोशात
क्यादिवत् ॥ कटुकरसपरिणताःशुंठ्यादिवत् ॥ कषायरसपरिणताअपक्वकपित्थादिवत् ॥ अम्लरसपरिणता अम्लवेतसादिवत् ॥ मधुररसपरिण

ताःशर्करादिवत् ॥ मधुररसेपरिणताःशर्करादिवत् ॥ येस्पर्शपरिणतास्तेअष्टविधाःप्रज्ञप्तास्तद्यथा ॥ कर्कशस्पर्शपरिणताःपाषाणादिवत्मृदुस्पर्शपरिणता
हंसरूतादिवत् ॥ गुरुकस्पर्शपरिणतावज्रादिवत् ॥ लघुकस्पर्शपरिणताअर्कतूलादिवत् ॥ शीतस्पर्शपरिणतामृणालादिवत् ॥ उष्णस्पर्शपरिणतावह्न्या
दिवत् ॥ स्निग्धस्पर्शपरिणताघृतादिवत् ॥ रूक्षस्पर्शपरिणताभस्मादिवत् येसंस्थानपरिणतास्तेपंचविधाःप्रज्ञप्तास्तथापरिमंडलसंस्थानपरिणता
वलकवत् ॥ वृत्तसंस्थानपरिणताःकुलालचक्रादिवत् ॥ त्र्यस्रसंस्थानपरिणताःशृंगाटकादिवत् ॥ चतुरस्रसंस्थानपरिणताःकुंभिकादिवत् ॥ आय
तसंस्थानपरिणतादंडादिवत् ॥ एतानिचपरिमंडलादीनिसंस्थानानिघनप्रतरभेदेतद्द्विविधानिभवंति ॥ पुनःपरिमंडलमपहायशेषाणिउजःप्रदेश
जनितानियुग्मप्रदेशजनितानीतिद्विधा ॥ तत्रोत्कृष्टंपरिमंडलादिसर्वमनंताणुनिष्पन्नमसंख्येयप्रदेशावगाढंचेतिप्रतीतमेवजघन्यंतुप्रतिनियत
संख्यपरमाण्वात्मकमतोनानिर्दिष्टंज्ञातुंशक्यतेइतिविनेयजनानुग्रहायतदुपदर्शनेतत्रोजःप्रदेशप्रतरवृत्तंपंचपरमाणुनिष्पन्नंपंचाकाशप्रदेशाव
गाढंच ॥ तद्यथाएकःपरमाणुर्मध्येस्थाप्यतेचत्वारःक्रमेणपूर्वादिषुचतसृषुदिक्षुस्थापना ॥  युग्मप्रदेशप्रतरवृत्तंद्वादशपरमाण्वात्मकंद्वाद
शप्रदेशावगाढंचचत्वारःपरमाणवःचतुर्ष्वाकाशेषुरुचकाकारेणस्थाप्यंतेततस्तत्परिक्षेपेणशेषाअष्टौउजःप्रदेशघनवृत्तंसप्तप्रदेशावगाढंतत्रैवंतत्रैवपंचप्र
देशप्रतरवृत्तेमध्यस्थितस्यपरमाणोरुपरिष्टादधस्ताच्चएकैकोऽणुरवस्थाप्यते ततएवंसप्तप्रदेशंभवति ॥ युग्मप्रदेशघनवृत्तंद्वात्रिंशत्परमाणुद्वा
त्रिंशत्प्रदेशावगाढंचतत्रचैवंपूर्वोक्तंद्वादशप्रदेशात्मकस्यप्रतरवृत्तस्योपरिद्वादशततउपरिष्टादधश्चान्येचत्वारः२परमाणवइति ॥ उजःप्रदेशप्रतरत्र्यस्रंत्रिप्रदेशंत्रि
प्रदेशावगाढंचतत्रैवंपूर्वतिर्यगणुद्वयंन्यस्यते ॥ ततआद्यस्याधएकोऽणुस्थापना युग्मप्रदेशप्रतरत्र्यस्रंषट्परमाणुनिष्पन्नंषट्प्रदेशावगाढंचतत्रतिर्यग्नि
रंतरंत्रयपरमाणवःस्थाप्यंते ॥ ततआद्यस्याधनुपर्यधोभावेनाणुद्वयंद्वितीयस्याधएकोऽणुस्थापना उजप्रदेशघनत्र्यस्रंपंचत्रिंशत्परमाणुनिष्प ६
नंपंचत्रिंशत्प्रदेशावगाढंच ॥ तत्रैवंतिर्यग्निरंतराःपंचपरमाणवःस्थाप्यंते ॥ तेषांचाधोधःक्रमेणतिर्यगेवचत्वारस्त्रयोद्वावेकश्चेतिपंचदशात्मकः
प्रतरोजातःस्थापना  अस्यैवचप्रतरस्योपरिसर्वपंक्तिषुअंत्यांत्यपरित्यागेनदश ॥ १तथैवतदुपर्युपरिषट्त्रय

एकस्थापना ॥ ३ ॥ एतेःमीलिताःपंचत्रिंशद्भवंति ॥ युग्मप्रदेशघनत्र्यस्रंचतुःपरमाण्वात्मकंचतुःप्रदेशावगाढंचतत्रत्र्यस्रस्यैवत्रिप्रदेशात्मक
स्यसंबंधिनएकस्याणोरुपर्येकोऽणुःस्थाप्यंतेततोमीलिताश्चत्वारोभवंति  ॥ ए ॥ उजःप्रदेशप्रतरंचतुरस्रंनवपरमाण्वात्मकंनवप्रदेशावगाढंच
तिर्यग्निरंतरंत्रिप्रदेशास्तिस्रःपंक्तयःस्थाप्यंतेस्थापना युग्मप्रदेशप्रतरचतुरस्रंचतुःपरमाण्वात्मकंचतुःप्रदेशावगाढंचतत्रतिर्यक्द्विप्रदेशेद्वेपं
क्तीस्थाप्येतेस्थापना  उजःप्रदेशघनचतुरस्रंसप्तविंशतिपरमाण्वात्मकंसप्तविंशतिप्रदेशावगाढंचतत्रनवप्रदेशात्मकस्यैवपूर्वोक्तस्यप्रतरस्याध
उपरिचनवनवप्रदेशाःस्थाप्यंते ॥ ततःसप्तविंशतिपरमाण्वात्मकमोजःप्रदेशघनचतुरस्रंभवतिस्थापनास्यैव ॥ युग्मप्रदेशघनचतुरस्रमष्टपरमाण्वात्
कमष्टप्रदेशावगाढंचतत्रैवंचतुःप्रदेशात्मकस्यपूर्वोक्तस्यप्रतरस्योपरिचत्वारोऽन्येपरमाणवःस्थाप्यंतेइति ॥ उजप्रदेशश्रेण्यायतंत्रिपरमाणुत्रिप्रदेशाव
गाढंचतत्रतिर्यग्निरंतरंत्रयःस्थाप्यंते  युग्मप्रदेशश्रेण्यायतंद्विपरमाणुद्विप्रदेशावगाढंचतत्रतथैवाणुद्वयंस्थाप्यते उजःप्रदेशप्रतरायं
तंपंचदशपरमाण्वात्मकंपंचदशप्रदेशावगाढंचतत्रपंचप्रदेशात्मिकास्तिस्रःपंक्तयस्तिर्यक्स्थाप्यंते युग्मप्रदेशप्रतरायतंषट्परमाण्वात्मकंष
ट्प्रदेशावगाढंचतत्रत्रिप्रदेशपंक्तिद्वयंस्थाप्यते स्थापना उजप्रदेशघनायतंपंचचत्वारिंशत्परमाण्वात्मकंपंचचत्वारिंशत्प्रदेशावगाढंचतत्रपूर्वोक्तस्यैव
प्रतरायतस्यपंचदशप्रदेशात्मकस्याधनुपरितथैवपंचदशपरमाणवःस्थाप्यंते ॥ युग्मप्रदेशघनायतंद्वादशपरमाण्वात्मकंद्वादशप्रदेशावगाढंचतत्रप्राग्
उक्तस्यषट्प्रदेशस्यप्रतरायतस्योपरितथैवतथैवतावंतःपरमाणवःस्थाप्यंते ॥ प्रतरपरिमंडलंविंशतिपरमाण्वात्मकंविंशतिप्रदेशावगाढंचतत्रैवंप्राच्यादि
षुचतसृषुदिक्षुप्रत्येकंचत्वारश्चत्वारोऽणवस्थाप्यंते ॥ विदिक्षुचप्रदेशकमेकैकोऽणुःस्थाप्यंते ॥ घनपरिमंडलंचत्वारिंशत्प्रदेशावगाढंचत्वारिंशत्परमाण्वा
त्मकंचतत्रतस्याएवंविंशतेरुपरितथैवान्याविंशतिःस्थाप्यंते ॥ द्रष्टव्यंचैषांप्ररूपणमितोपिन्यूनप्रदेशैनायांयथोक्तस्थानाभावात् ॥ एतत्संग्राहिकाश्च
माउत्तराध्ययननिर्युक्तिगाथाः ॥ परिमंडलेयवट्टेतंसेचउरंसमायएचेव ॥ घणपयरपढमवज्जंउजपएसेयजुम्मेय ॥ पंचगबारसगंखलुसत्तग
बत्तीसगंचवट्टंमि ॥ तियछक्कपणगतीसाचत्तारियहोंतितंसंमिनवचेवतहाचउरोसत्तावीसायअट्ठचउरंसे ॥ तिगदुगपन्नरसेवयछक्कंचेवयआयएहोंत

ति॥पणयालाबारसगंतहचैवययंमिसंठाणे॥वीसापरिमंडलएयसंठाणे॥इतिसंप्रत्येतेषामेववर्णादीनांपरस्परंबंधमाह॥जेवण्णतोइत्यादि यस्तुधाइयो
वर्णतोवर्णमाश्रित्याकालवर्णपरिणतास्तेगंधतोगंधमाश्रित्यसुरभिगंधपरिणताअपिभवंतिदुरभिगंधपरिणताअपिकिमुक्तंभवति॥गंधमधिकृत्यतेषा
मध्ये:केचित्सुरभिगंधपरिणताभवंतिकेचितदुरभिगंधपरिणतानतुप्रतिनियतैकगंधपरिणामपरिणताएवेति॥एवंचरसतःस्पर्शतःसंस्थानतश्चवा
च्याःतत्रद्वौगंधौपंचरसाअष्टौस्पर्शाःपंचसंस्थानानि॥एतेचमीलितार्विंशतिरिति॥कृष्णवर्णपरिणताएतावतोभंगानलभंते॥२० एवंनीलवर्णपरिणता
अपि २० हारिद्रवर्णपरिणताअपि २० शुक्लवर्णपरिणताअपि २० एवंपंचभिर्वर्णैर्लब्धंशतं १०० गंधमधिकृत्याह॥जेगंधतोइत्यादि॥योगंधतोगंधमधिकृत्य
सुरभिगंधपरिणामपरिणतास्तेवर्णतःकालवर्णपरिणतास्तेवर्णतःकालवर्णपरिणताअपिनीलवर्णपरिणताअपिलोहितवर्णपरिणता॥पिहारिद्रव
र्णपरिणताअपिशुक्लवर्णपरिणताअपि ५ एवंरसतः ५ स्पर्शतः ५ एतेचमीलितास्त्रयोविंशतिरितिसुरभिगंधपरिणतास्त्रयोविंशतिभंगानलभंते
एवंदुरभिगंधपरिणताअपि २३ ततोगंधपदेनलब्धाभंगकानांषट्चत्वारिंशत् ४६ रसमधिकृत्याह येरसतोरसमधिकृत्यतिक्तरसपरिणतास्तेव
र्णतः ५ गंधतः २ स्पर्शतः ८ संस्थानतः ५ एतेसर्वेप्येकत्रमीलिताः विंशतिरितितिक्तरसपरिणताविंशतिभंगानलभंते २० कषायरसपरिणताः २० मधु
रसपरिणताश्च २० एवंरसपंचकसंयोगेलब्धंभंगकानांशतं १०० स्पर्शमधिकृत्याह॥जेफासतोकक्खडफासपरिणयाइत्यादि॥येस्पर्शतःकर्कशस्पर्श
परिणतास्तेवर्णतः ५ गंधतः २ रसतः ५ स्पर्शतः ६ प्रतिपक्षस्पर्शयोगाभावात्संस्थानतः ५ एतेसर्वेएकत्रमीलितास्त्रयोविंशतिः॥एतावतोभंगान्कर्कशस्प
र्शपरिणतालभंते २३ एतावंतएवमृदुस्पर्शपरिणताः २३ लघुस्पर्शपरिणता २३ शीतस्पर्शपरिणताः २३ उष्णस्पर्शपरिणताः २३ स्निग्धस्पर्शपरिणताः
२३ रूक्षस्पर्शपरिणताः २३ एतेषामेकत्रमेलनेजातंभंगकानांचतुरशीत्यधिकंशतं १८४ संस्थानमधिकृत्याह॥जेसंठाणतोपरिमंडलसंठाणपरिण ७
याइत्यादि॥येसंस्थानतःपरिमंडलसंस्थानपरिणतास्तेवर्णतः ५ गंधतः २ रसतः ५ स्पर्शतः ८ एतेसर्वेप्येकत्रमीलिताः २० एतावतोभंगान्
परिमंडलसंस्थानपरिणतालभंतेएवंवृत्तसंस्थानपरिणताः २० त्र्यस्रसंस्थानपरिणताः २० चतुरस्रसंस्थानपरिणताः २० आयतसंस्थान

परिणताः २० अमीषांचैकत्रमीलनेलब्धंभंगकानांशतं॥१००॥एतेषांचवर्णगंधरसस्पर्शसंस्थानानांसकलसंगसकलनेजातानिपंचशतानित्रिंशदधि
कानि ५३० इहयद्यपिबादरेषुस्कंधेषुपंचापिवर्णादावपिगंधौपंचापिरसाःप्राप्यंतेततो॥यथोक्तवर्णादिव्यतिरेकेणशेषवर्णादिभिरपिभंगाःसंभवंति
तथापितेष्वेववादरेषुस्कंधेषुयेत्यवहारतःकेवलकृष्णवर्णाधकंपताअनंतरागमसंधाययोदेहस्कंधएवलोचनस्कंधःकृष्णस्पंदनर्गतएवकश्चिल्लोहितो
॥न्यस्तदंतर्गतएवकश्चिल्लोहितेयदितेइहविवक्ष्यंतेतेषांचान्यत्रवर्णांतरादिनसंभवतिस्पर्शचिंतायांत्वविधाकृतस्पर्शप्रतिप्रतिपक्षतिरेकेणान्येस्पर्शाः
केचनविरोधितोदृश्यंते॥ततोयथोक्तैवभंगसंख्यापिचपरिक्रम्यायसंगीकृत्याभिहितान्यथाप्रत्येकमनंतस्य १ तारतम्येनानंतत्वात्अनंताभंगाःसंभवंति
एतेषांचवर्णादिपरिणामानांजघन्येनावस्थानमेकंसमयमुत्कर्षेणो॥संख्येयंकालमधुनाप्रत्युपसंहारमाह॥सेत्तंरूविअजीवपण्णासेत्तंअजीवपण्णवण्णा
सेयारूप्यजीवप्रज्ञापनासेयाःजीवप्रज्ञापना॥सांप्रतंजीवप्रज्ञापनाप्रतिविधित्सुस्तद्विषयंप्रश्नसूत्रमाह॥७॥सेकिंतमित्यादि॥अथकासाजीवप्रज्ञापना
सूरिराह॥जीवप्रज्ञापनाद्विविधाप्रज्ञप्ता१तद्यथा॥संसारसमापन्नजीवप्रज्ञापनाचअसंसारसमापन्नजीवप्रज्ञापनाचतत्रसंसरणंसंसारोनारकतिर्यङ्नरामर
भवानुभवलक्षणस्तंसम्यगेकीभावेनापन्नाःसंसारवर्त्तिनइत्यर्थः॥तेचतेजीवाश्चतेषांप्रज्ञापनासंसारसमापन्नजीवप्रज्ञापनानसंसारोमोक्षस्तंस
मापन्नाअसंसारसमापन्नामुक्ताइत्यर्थः॥तेचतेजीवाश्चतेषांप्रज्ञापनाअसंसारसमापन्नजीवप्रज्ञापनाचशब्दौप्राग्वत्॥तत्राल्पवक्तव्यत्वात्प्रथमा
तोसंसारसमापन्नजीवप्रज्ञापनामभिधित्सुस्तद्विषयंप्रश्नसूत्रमाह॥सेकिंतमित्यादि॥अथकासाअसंसारसमापन्नजीवप्रज्ञापनासूरिराह॥अ
संसारसमापन्नजीवप्रज्ञापनाद्विविधाप्रज्ञप्तातद्यथाअनंतरसिद्धासंसारसमापन्नजीवप्रज्ञापनाचपरंपरसिद्धासंसारसमापन्नजीवप्रज्ञा
पनाचपरंपरसिद्धासंसारसमापन्नजीवप्रज्ञापनाच॥तत्रनविद्यतेअंतरंव्यवधानमर्थात्समयेनयेषांतेनंतरास्तेचतेसिद्धाश्चानंतरसिद्धाः
सिद्धत्वप्रथमसमयेवर्त्तमानाइत्यर्थः तेचते असंसारसमापन्नजीवाश्च॥अनंतरसिद्धासंसारसमापन्नजीवास्तेषांप्रज्ञापनाअनंतरसिद्धासं
सारसमापन्नजीवप्रज्ञापनाचस्वशब्दःस्वगतोनेकभेदसूचकः॥तथाविवक्षितेप्रथमेसमयेयःसिद्धस्तस्ययोद्वितीयसमयसिद्धःसपरस्तस्यापियस्तृती

यसमयसिद्धः सपरएवमन्येपिवाच्याः॥परंपरंपरेतिवीप्सायांद्वयोश्चोदरादयइतिपरंपरशब्दनिष्पत्तिः परंपराश्चतेसिद्धाश्चपरंपरसिद्धाविवक्षितसिद्धत्वं
प्रथमसमयात्प्राक्द्वितीयादिषुसमयेष्वनंतामतीताद्धांयावत्वर्तमानादितिभावतेचतेअसंसारसमापन्नाश्चपरंपरसिद्धासंसारसमापन्नास्तेचतेजीवाश्च
तेषांप्रज्ञापनापरंपरसिद्धासंसारसमापन्नजीवप्रज्ञापनाअत्रापिचशब्दःस्वगतानेकभेदसूचकः॥ ॥सेकिंतमित्यादि॥अथकासाअनंतरसिद्धासंसा
रसमापन्नजीवप्रज्ञापनासूरिराह॥अनंतरसिद्धासंसारसमापन्नजीवप्रज्ञापनापंचदशविधाप्रज्ञप्ताअनंतरसिद्धानामुपाधिभेदत॥पंचदशविधत्वात्त
देवपंचदशविधत्वंतेषामाहतंजहेत्यादितद्यहेतिपंचदशभेदोपदर्शनसूचकंतीर्थसिद्धाः॥तीर्यतेसंसारसागरोऽनेनेतितीर्थंयथावस्थितसकलजीवा
जीवादिपदार्थसार्थप्ररूपकंपरमगुरुप्रणीतंप्रवचनं॥तच्चनिराधारंनभवतीतिसंघःप्रथमगणधरोवातीर्थं॥उक्तंच॥तित्थंभंतेतित्थंतित्थंकरेतित्थं
गोयमा॥अरिहातावतित्थंकरेतित्थंपुणचाउवण्णोसमणसंघोपढमगणधरोवाइतितस्मिन्उत्पन्नेयेसिद्धास्तेतीर्थसिद्धाः॥तथातीर्थस्याभावोऽतीर्थं
तीर्थस्याभावश्चानुत्पादेऽपांतरालेव्यवच्छेदोवातस्मिन्येसिद्धास्तेअतीर्थसिद्धाः॥तत्रतीर्थस्यानुत्पादेसिद्धामरुदेवीप्रभृतयःनहिमरुदेव्यादिसिद्ध
गमनकालेतीर्थमुत्पन्नमासीत्॥तथातीर्थस्यव्यवच्छेदःसुविधिस्वाम्याद्यपांतरालेषुतत्रयेजातिस्मरणादिनाअपवर्गमार्गमवाप्यसिद्धास्तेतीर्थव्यवच्छेदसि
द्धाः॥तथातीर्थकराःसंतोयेसिद्धास्तेतीर्थकरसिद्धाःसामान्यकेवलिनःसंतोयेसिद्धास्तेऽतीर्थकरसिद्धाः॥तथास्वयंबुद्धाःसंतोयेसिद्धास्तेस्वयंबुद्धसिद्धाः
प्रत्येकबुद्धाःसंतोयेसिद्धास्तेप्रत्येकबुद्धसिद्धाः॥अथस्वयंबुद्धप्रत्येकबुद्धानांकःप्रतिविशेषः॥उच्यतेबोध्युपधिश्रुतलिंगकृतोविशेषःतथाहिस्वयं
बुद्धाबाह्यप्रत्ययमंतरेणैवबुध्यंते॥स्वयमेवबाह्यप्रत्ययमंतरेणैवनिजजातिस्मरणादिनाबुद्धाःस्वयंबुद्धाइतिव्युत्पत्तेः॥तेचद्विधातीर्थकरास्तीर्थकरव्यतिरिक्ता
श्चइहतीर्थकरव्यतिरिक्तैरधिकारः॥आहचनंद्यध्ययनचूर्णिकृत्॥तेदुविहासयंबुद्धातित्थयरातित्थयरवइरित्तायइहवइरित्तेहिंअहिगारोइति
प्रत्येकबुद्धास्तुबाह्यंप्रत्ययमपेक्ष्यप्रत्येकंबाह्यंवृषभादिकंकारणमभिसमीक्ष्यबुद्धाःप्रत्येकबुद्धाइतिव्युत्पत्तेः॥तथाश्रूयतेबाह्यप्रत्य
यसापेक्षाकरकंड्वादीनांबोधिः॥बहिःप्रत्ययमपेक्ष्यचतेबुद्धाःसंतोनियमतःप्रत्येकमेवविहरंति॥नगच्छवासिनइवसंहताआहचनंद्यध्ययन

चूर्णिकृत्॥पत्तेयंबाह्यंवसभादिकंकारणमभिसमीक्ष्यबुद्धाःबहिप्रत्ययंप्रतिबुद्धानांचपत्तेयंनियमाविहारोजम्हायतेपत्तेयबुद्धाइतितथास्वयंबुद्धानामुपधिर्द्वा
दशविधएवपात्रादिकःप्रत्येकबुद्धानांतुद्विधाजघन्यतःतथाउत्कर्षेनतजघन्यतोद्विधाउत्कर्षतोनवविधःप्रावरणवर्जः॥उक्तंच॥पत्तेयबुद्धाणंजहण्णेणंदु
विहोउक्कोसेणंनवविहोनियमा॥पाउरणवज्जोवइइति॥तथास्वयंबुद्धानांपूर्वाधीतंश्रुतंभवतिवानवायदिभवतितर्तोलिंगंदेवताप्रयच्छतिगुरुसन्निधौ
वागत्वाप्रतिपद्यतेयदिचएकाकीविचरणसमर्थइच्छाचतस्यतथारूपातामतो॥ततएकाकीविहरति॥अन्यथागच्छवासेऽवतिष्ठतेअथपूर्वाधीतंश्रुतंतस्य
नभवतितर्हिनियमात्गुरुसंनिधौगत्वालिंगंप्रतिपद्यते॥गच्छंचावश्यंनमुंचति॥तथाचोक्तं॥पुव्वाहीयंसुयंसेहवइ॥जइयाजइसेनत्थितोलिंगंनियमागुरुस
न्निहेपडिवज्जेयगच्छेयविहरइतिअहपुव्वाधीयसुयसंभवोअस्थितोसेलिंगंदेवयापडिच्छइ॥गुरुसन्निहेवापडिवज्जइयागविहारविहरणसमत्थोइच्छा
यसेतोएकोचेवविहरइअन्नयागच्छेविहरइतिप्रत्येकबुद्धानांतुपूर्वाधीतंश्रुतंनियमतोभवति॥तच्चजघन्यतएकादशांगानिउत्कर्षतःकिंचिन्यूनानिदशपू
र्वाणितथालिंगंतस्यैदेवताप्रयच्छतिलिंगरहितोवाकदाचिद्भवतितथाचोक्तं॥पत्तेयबुद्धाणंपुव्वाहीयंसुयंनियमाहवइजहन्नेणंएकारसअंगाउक्कोसे
णंभिन्नदसपुव्विलिंगंचसेदेवयापयच्छइ॥लिंगवज्जिउवाभवतिजाताभणियंरूपयंपत्तेयबुद्धाइति॥तथाबुद्धाआचार्यास्तैर्बोधिताःसंतोयेसिद्धास्तेबुद्ध
बोधितसिद्धाः॥एतेसर्वेपिकेचित्स्त्रीलिंगसिद्धाःस्त्रियालिंगंस्त्रीत्वस्योपलक्षणमित्यर्थः॥तच्चत्रिधावेदःशरीरनिर्वृत्तिःनेपथ्यंच॥तत्रेहशरीर
निर्वृत्त्याप्रयोजनंनवेदनेपथ्याभ्यांवेदेसतिसिद्धत्वाभावात्नेपथ्यस्यचाप्रमाणत्वात्आहचनंद्यध्ययनचूर्णिकृत्॥इत्थीएलिंगंइत्थीएउवलक्खणंतिवुत्तं
भवइ॥तंचतिविहंवेदोसरीरनिव्वत्तीनेवत्थंचइहसरीरनिव्वत्तीएअहिगारोनवेयनेवत्थेहिंतितस्मिन्स्त्रीलिंगेवर्तमानाःसंतोयेसिद्धास्तेस्त्रीलिंगसि
द्धाः॥एतेनयदाहुःदिगंबरानस्त्रीणांनिर्वाणमितितदपास्तंद्रष्टव्यं॥स्त्रीनिर्वाणस्यसाक्षादनेनसूत्रेणाभिधानात्तत्प्रतिषेधस्ययुक्त्यनुपपन्न
त्वात्तथाहिमुक्तिपथोज्ञानदर्शनचारित्राणिसम्यग्दर्शनज्ञानचारित्राणिमोक्षमार्गइतिवचनात्सम्यग्दर्शनादीनिचपुरुषाणामिवस्त्रीणामप्यवि
कलानितथाहिदृश्यंतेस्त्रियोपिसकलमपिप्रवचनार्थमभिरोचयमानाजानतेचषडावश्यककालिकोत्कालिकादिभेदभिन्नंश्रुतंपरिपालयंतिसप्तदशप्रकार

सकलंसंयमंधारयंतिचदेवासुराणामपिदुर्द्धरंब्रह्मचर्यं॥ तप्यंतेचतपांसिमासक्षपणादीनि॥ ततःकथमिवचननासांमोक्षसंभवःस्यादेतदस्तिस्त्रीणांसम्यग्द
र्शनंज्ञानंचनपुनश्चारित्रंसंयमाभावात्तथाहिस्त्रीणामवश्यंवस्त्रपरिभोगेनभवितव्यमन्यथाविवस्त्रांगंस्तास्तिर्यक्स्त्रियइवपुरुषाणामभिभवनीयाभ
वेयुःलोकेचगर्हाविषयत्वयनेततोऽवश्यंताभिर्वस्त्रंपरिभोक्तव्यं॥ वस्त्रपरिभोगेचसपरिग्रहतासपरिग्रहत्वेचसंयमाभावइति॥ तदसमीचीनंसम्यक्
सिद्धांतापरिज्ञानात्परमर्षिप्रोक्तोहिपरमार्थतोमूर्छाभिधीयते॥ मूर्छापरिग्रहोवुत्तोइतिवचनात्॥ तथाहिमूर्छारहितोभरतश्चक्रवर्तीसांतःपुरोप्यादर्शक
गृहेऽवतिष्ठमानोनिष्परिग्रहोगीयतेऽन्यथाकेवलोत्पादासंभवात्अपिचयदिमूर्छायाअभावेपिवस्त्रसंसर्गमात्रपरिग्रहोभवेत्॥ ततोजिनकल्पंप्रति
पन्नस्यकस्यचित्साधोर्हिमतुषारकणानुपंक्तिप्रपतनशीतकालेस्पष्टःकस्यचिद्धर्मार्थिनाशिरसिवस्त्रेप्रक्षिप्तेतस्यसपरिग्र
हताभावेत॥ नचैतदिष्टंतस्मात्रसंसर्गमात्रंपरिग्रहःकिंतुमूर्छाभावस्त्रीणांवस्त्रादिषुनविद्यतेधर्मोपकारणमात्रतयातस्योपादानात्॥ नखलुताःवस्त्रमं
तरेणात्मानंरक्षयितुमीशतेनापिशीतकालादिषुवाग्दशायांस्वाध्यायादिकंकर्तुंततोदीर्घतरसंयमपरिपालनाययतनयावस्त्रंपरिभुंजानानताःपरि
ग्रहवत्यःअथोच्येतसंभवतिनामस्त्रीणामपिसम्यग्दर्शनादिकंरत्नत्रयंपरंनतत्संभवमात्रेणमुक्तिपदप्रापकंभवतिकिंतुप्रकर्षप्राप्तमन्यथादीक्षा
नंतरमेवासर्वेषामप्यविशेषेणमुक्तिपदप्राप्तिप्रसक्तिःसम्यग्दर्शनादिरत्नत्रयप्रकर्षश्चस्त्रीणामसंभवीततोनतासांनिर्वाणमिति॥ तदप्ययुक्तंस्त्री
षुरत्नत्रयप्रकर्षासंभवीकर्षासंग्राहकप्रमाणस्याभावात्नखलुसकलदेशकालव्याप्त्यास्त्रीषुरत्नत्रयप्रकर्षासंभवग्राहकंप्रमाणंविजृंभ
तेदेशकालविप्रकृष्टेषुप्रत्यक्षस्याप्रवृत्तेस्तदप्रवृत्तौचानुमानस्याप्यसंभवात् नापिस्फुरत्नत्रयप्रकर्षासंभवप्रतिपादकंकोप्यागमोविद्यते
प्रत्युतसंभवप्रतिपादकःस्थानेस्थानेस्मिन्यथाइदमेवसूत्रंतस्तत्रंततोननासांरत्नत्रयेप्रकर्षासंभवोऽथमन्यथाःस्वभावएवायमेवच्छा
याविरुध्यतेस्त्रीत्वेनसहरत्नत्रयप्रकर्षस्ततस्तदसंभवोऽनुमीयते इदयुक्तंयुक्तिविरोधात्तथाहिरत्नत्रयप्रकर्षसउच्यतेयतोऽनंतरंमुक्ति
पदप्राप्तिःसचायोग्यवस्थाचरमसमयभावीअयोग्यवस्थाचास्मादृशामप्रत्यक्षाततःकथंविरोधगतिः॥ नहिअदृष्टेनसहविरोधःप्रतिपत्तुंशक्यते

मायापत्पुरुषेष्वपिप्रसंगः ननुजगतिसर्वोत्कृष्टेनाध्यवसायेनान्यथाप्येवमेवयोरप्यौवयोरागमप्रामाण्यबलतःसिद्धंसर्वोत्कृष्टंचद्वयंपदंसर्वोत्कृष्टदुः
खस्थानंसर्वोत्कृष्टसुखस्थानंच॥ ननुसर्वोत्कृष्टदुःखस्थानंसप्तमनरकपृथ्वी अतःपरंपरमदुःखस्थानस्याभावात्॥ सर्वोत्कृष्टसुखस्थानंतुनिःश्रेय
संतत्रस्त्रीणांसप्तमनरकपृथिवीगमनमागमेनिषिद्धंनिषेधस्यचकारणंतद्गमनयोग्यतथाविधसर्वोत्कृष्टमनोवीर्यपरिणत्यभावः ततःसप्तमपृथिवीगम
नवत्वाभावात् सम्मूर्छिमादिवत् अपिचयासांवादलब्धौविकुर्वणत्वादिलब्धौपूर्वगतश्रुताधिगमोचनसामर्थ्यमस्तितासांमोक्षगमनसामर्थ्यमित्यति
दुःश्रद्धेयंतदेतदयुक्तंयतोयदिनामस्त्रीणांसप्तमनरकपृथिवीगमनंप्रतिसर्वोत्कृष्टमनोवीर्यपरिणत्यभावस्ततएतावताकथमवसीयतेनिःश्रेयस
मपिप्रतितासांसर्वोत्कृष्टमनोवीर्यपरिणत्यभावोनहियोन्नभिकर्षणादिकंकर्मकर्तुंनशक्नोतिसशास्त्राण्यपिअवगाढुंनशक्नोतीतिप्रत्येतुंशक्यंप्रत्यक्ष
विरोधात् अथसंमूर्छिमादिष्वभयत्रापिसर्वोत्कृष्टमनोवीर्यपरिणत्यभावोदृष्टस्ततोत्राप्यवसीयते॥ ननुयदितत्रदृष्टस्तर्हिकथमत्रावसीयतेनखलुव
हिर्व्याप्तिमात्रेणहेतुर्गमकोभवति॥ किंत्वंतर्व्याप्त्याअंतर्व्याप्तिश्चप्रतिबंधबलेनचात्रप्रतिबंधोविद्यतेनखलुसप्तमपृथिवीगमनंनिर्वाणगमनस्यका
रणंनापिसप्तमपृथिवीगमनाविनाभाविनिर्वाणगमनंचरमशरीरिणांसप्तमपृथिवीगमनसंतारेणैवनिर्वाणगमनाभावात्तनचप्रतिबंधमंतरे
णएकस्याभावेऽन्यस्यावश्यमभावोमाप्राप्तत् यस्यतस्यवाकस्यचिदभावेसर्वस्याभावप्रसंगः १ यद्येवंतर्हिकथंसंमूर्छिमादिषुनिर्वाणगमनाभावइति
उच्यते तथास्वाभाव्यात् तथाहि तेसंमूर्छिमादयोभवस्वाभावतएवनसम्यग्दर्शनादिकंयथावत्प्रतिपत्तुंशक्यंते ततोनतेषांनिर्वाणसंभवः स्त्रि
यस्तुप्रागुक्तप्रकारेणयथावत्सम्यग्दर्शनादिरत्नत्रयसंपद्योग्यास्ततस्तासांननिर्वाणाभावः अपिच भुजपरिसर्पाद्वितीयामेवपृथिवींयावत्
गच्छंति नपरतःपरपृथिवीगमनहेतुतथारूपमनोवीर्यपरिणत्यभावात् तृतीयांयावत्पक्षिणश्चतुर्थींचतुःपदापंचमीमुरगाःअथचसर्वेष्व
र्द्धमुत्कर्षतःसहस्रारंयावद्गच्छंतितत्राधोगतिविषयेमनोवीर्यपरिणतिवैषम्यदर्शनादूर्ध्व तौगेवपितद्वैषम्यं आहचविषमगत
योप्यधस्तादुपरिशान्तुल्यमासहस्रारंगच्छंतिचतिर्यंचस्तदाधागत्स्ततोऽहेतुःतथावसंतिसिद्धंस्त्रीपुंसानामधोगतिवैषम्येपिनिर्वा

र्णसमं यदप्युक्तंमधियासांवादतद्धावित्यादितदप्यस्त्रीत्वंवादविकुर्वणत्वादिलब्धिविरहेपिविशिष्टपूर्वगतश्रुताभावेपिमाषतुषादीनांनिःश्रेयसपदा
धिगमश्रवणात् आहच वादविकुर्वणत्वादिलब्धिविरहेश्रुतेकनीयसिवजिनकल्पमनःपर्यवविरहेपिनसिद्धिविरहोस्ति अपिच यदिवादादिलब्ध
भावतन्निश्रेयसाभावोपिस्त्रीणामभविष्यत्ततस्तथैवसिद्धांतेप्रत्यपादयिष्यत् यथाजंबूयुगादारात्केवलज्ञानाभावोनचप्रतिपाद्यतेतस्मादुपप
र्वा
द्यतेस्त्रीणांनिर्वाणमितिकृतंप्रसंगेन तथापुंल्लिंगेशरीरनिर्वृत्तिरूपेचव्यवस्थिताःसंतोयेसिद्धास्तेपुंल्लिंगसिद्धाः एवंनपुंसकलिंगसिद्धाः तथास्वलिंगेर
जोहरणादिरूपेव्यवस्थिताःसंतोयेसिद्धास्तेस्वलिंगसिद्धाः तथान्यलिंगेपरिव्राजकादिसंबंधिनिवाल्कलकषायादिरूपेद्रव्यलिंगेव्यवस्थिता
येसिद्धास्तेअन्यलिंगसिद्धाः गृहलिंगसिद्धाःमरुदेवीप्रभृतयस्तथाएकसिद्धाएकस्मिन् समयेएककाएवसंतःसिद्धाएकसिद्धाः अणेगसिद्धाइ
तिएकस्मिनसमयेअनेकसिद्धाःअनेकसिद्धाः [illegible] अनेकेत्वएकस्मिन्समयेसिध्यंतउत्कर्षतोष्टोत्तरसंख्यावेदितव्याः
तस्मादुक्तं वत्तीसाअडयालासट्ठीबावत्तरीयबोद्धव्वा चुलसीइछन्नउइदुरहियमट्ठुत्तरसयंच अस्याविनेयजनानुग्रहायव्याख्याअष्टोसमयानुयावन्निरंत
रंमेकादयोद्वात्रिंशत्पर्यंताःसिध्यंतःप्राप्यंतेकिंमुक्तंभवति प्रथमेसमयेजघन्यतएकोद्वौवाउत्कर्षतोद्वात्रिंशत्सिध्यंतःप्राप्यंतेद्वितीयेपिसमयेजघन्यतए
कोद्वौवाउत्कर्षतोद्वात्रिंशतएवंयावदष्टमेपिसमयेजघन्यतएकोद्वौवाउत्कर्षतोद्वात्रिंशत् ततःपरंभवत्यंतरंतथात्रयस्त्रिंशदादयोष्टाचत्वारिंशत्पर्यंतानि
रंतरंसिध्यंतःसप्तसमयान्यावत्प्राप्यंतेपरतोनियमादंतरं तथाएकोनपंचाशदादयःषष्टिपर्यंतानिरंतरंसिध्यंतउत्कर्षतःषट्समयावदवाप्यंते परतो
ऽवश्यमंतरं तथाएकषष्ट्यादयोद्विसप्ततिपर्यंतानिरंतरंसिध्यंतउत्कर्षतःपंचसमयान्यावदवाप्यंतेततःपरमंतरं त्रिसप्तत्यादयश्चतुरशीतिपर्यंतानिरं
तरंसिध्यंतउत्कर्षतश्चतुरःसमयान्यावत्ततऊर्ध्वमंतरंतथापंचाशीत्यादयः षण्णवतिपर्यंतानिरंतरंसिध्यंतउत्कर्षतस्त्रीन्समयान्यावत्परतोनिय
मादंतरं तथासप्तनवत्यादयोद्व्युत्तरशतपर्यंतानिरंतरंसिध्यंतउत्कर्षतोद्वौसमायौपरतोऽवश्यमंतरंतथात्र्युत्तरशतादयोष्टोत्तरशतापर्यंताःसि १०
ध्यंतोनियमादेकमेवसमयंयावदवाप्यंतेनद्वित्रादिसमयान्ततदेवमेकस्मिन्समयेउत्कर्षतोऽष्टोत्तरशतसंख्याःसिध्यंतःप्राप्यंते इत्यनेकसिद्धा

उत्कर्षतोऽष्टोत्तरशतप्रमाणावेदितव्याः आहतीर्थसिद्धातीर्थसिद्धरूपभेदद्वयएवशेषभेदाअंतर्भवंति तत्किमर्थंशेषभेदोपादानं उच्यते सत्यमंतर्भवंति परंतीर्थ
सिद्धातीर्थसिद्धभेदद्वयोपादानमात्राच्छेषभेदपरिज्ञानंभवतिविशेषपरिज्ञानार्थंचएषशास्त्रारंभप्रयासइतिशेषभेदोपादानं उपसंहारमाह ७ सेत्तमित्यादि सेयमि
त्यादि अनंतरसिद्धासंसारसमापन्नजीवप्रज्ञापना ७ सेकिंतमित्यादि अथकासापरंपरसिद्धासंसारसमापन्नजीवप्रज्ञापनासूरिराह परंपरसिद्धासंसारसमाप
न्नजीवप्रज्ञापनाअनेकविधाप्रज्ञप्ता परंपरसिद्धानामनेकविधत्वात्तदेवानेकविधत्वमाह तंजहेत्यादि तद्यथेत्यनेकविधत्वोपदर्शने अप्रथमसमयसिद्धाइतिनप्रथम
समयसिद्धा अप्रथमसमयसिद्धाःपरंपरसिद्धविशेषणप्रथमसमयवर्तिनःसिद्धत्वसमयानद्वितीयसमयवर्तिनइत्यर्थः आदिशब्दसमयेपुद्वितीयसमय
सिद्धादयश्चोच्यंते यद्वासामान्यतःप्रथमअप्रथमसमयसिद्धाइत्युक्तेततएतद्विशेषतोव्याचष्टेद्विसमयसिद्धास्त्रिसमयसिद्धाश्चतुःसमयसिद्धाइत्यादियावच्छ
ब्दकरणात्पंचसमयसिद्धादयःपरिगृह्यंते सेत्तमित्यादिनिगमदयंसुगमंतदेवमुक्ताअसंसारसमापन्नजीवप्रज्ञापना संसारसमापन्नजीवप्रज्ञापनामभि
धित्सुस्तद्विषयप्रश्नसूत्रमाह ७ सेकिंतमित्यादि अथकासासंसारसमापन्नजीवप्रज्ञापना पंचविधाप्रज्ञप्तातद्यथाएकेंद्रियसंसारसमापन्नजीवप्रज्ञा
पनादीत्यादितत्रएकंस्पर्शनलक्षणमिंद्रियंयेषांतेएकेंद्रियापृथिव्यंबुतेजोवायुवनस्पतयोवक्ष्यमाणस्वरूपास्तेचतेसंसारसमापन्नजीवाश्चतेषांप्रज्ञापनाएकेंद्रिय
संसारसमापन्नजीवप्रज्ञापनाएवंसर्वपदेष्वक्षरघटनाकार्यातिवरद्वेस्पर्शनरसनालक्षणेइंद्रियेयेषांतेद्वींद्रियाः शंखशुक्तिकादयस्त्रीणिस्पर्शनरसनाघ्राण
लक्षणानिइंद्रियाणियेषांतेत्रींद्रियायूकामत्कुणादयश्चत्वारिस्पर्शनरसनाघ्राणचक्षुर्लक्षणानिइंद्रियाणियेषांतेचतुरिंद्रियादंशमशकादयःपंचस्पर्शनरसघ्रा
णचक्षुःश्रोत्रलक्षणानिइंद्रियाणियेषांतेपंचेंद्रियामत्स्यमकरमनुजादयः अमीषांचएकादिसंख्यानामिंद्रियाणांस्पर्शनादीनामसंख्यवहाराशेषात्यमायो
नेनैवक्रमेणलाभइतिसंप्रत्ययार्थमिथंक्रमेणैकेंद्रियाद्युपन्यासःइंद्रियाणिचद्विविधानितद्यथाद्रव्येंद्रियाणिचद्रव्येंद्रियाणि २ निर्वृत्त्युपकरणरूपाणि
तानिचसविस्तरंनंद्यध्ययनटीकायांव्याख्यातानीतिनभूयोव्याख्यायंते भावेंद्रियाणिक्षायोपशमोपयोगरूपाणितानिचानिएकेंद्रियाणामपिक्षा
योपशमोपयोगरूपाभावेंद्रियपंचकसंभवात्केषांचित्तत्फलदर्शनात्तथाहिबकुलादयोपत्तकामिनीगीतध्वनिश्रवणसविलासकटाक्षनिरीक्ष

णमुखक्षिप्तसरागंधाघ्राणरसास्वादस्तनाद्यवयवस्पर्शननः प्रमोदभावेनाकालक्षेपमुपलभ्यंतेपुष्पफलानिप्रयच्छंतः॥ उक्तंच॥ जंकिरबउलाइणंदीसइसे
संदियोवलंभोवि॥ तेनच्छिनदावरणाकयोवसमसंभवोतेसिं॥ ननोनभावेंद्रियाणिलौकिकव्यवहारपथावतीर्णैकेंद्रियादिव्यपदेशनिबंधनंकिंतुद्रव्यें
द्रियाणि॥ तथाहि॥ येषामेकंवाह्यंद्रव्येंद्रियंस्पर्शनलक्षणमस्तितएकेंद्रियाएवंयावत्येषांतेपंचेंद्रियाः॥ आहच॥ पंचेंदिउविवउलोनरोब्बसव्वविस
योवलंभाउ॥ तहविनाभन्नइपंचेंद्रियोत्तिवज्झिंदियाभावा ५ सेकिंतमित्यादि॥ अथकास्तेएकेंद्रियसंसारसमापन्नजीवप्रज्ञापनासूरिराह एकेंद्रि
यसंसारसमापन्नजीवप्रज्ञापनापंचविधाप्रज्ञप्ताएकेंद्रियाणांपंचविधत्वात्तदेवपंचविधत्वमाह तंजहेत्यादि॥ पृथिवीकाठिन्यादिलक्षणाप्रतीता
सैवकायशरीरंयेशरीरंयेषांतेपृथिवीकायाएवपृथिवीकायिकाः स्वार्थेइकप्रत्ययः आपोद्रव्याणिताश्चप्रतीताएवताःकायःशरीरंयेषांतेअप्कायाः॥
अप्कायाएवाप्कायिकास्तेजोवह्निस्तदेवकायःशरीरंयेषांतेतेजस्कायाः॥ तेजस्कायाएवतेजस्कायिकाः॥ वायुःपवनःसएवकायोयेषांतेवायु
कायाः२ एववायुकायिकाः॥ वनस्पतिर्लतादिरूपःसएवकायःशरीरंयेषांतेवनस्पतिकाया॥ वनस्पतिकायाएववनस्पतिकाः॥ इहसर्वभूताधारत्वा
त्पृथिव्याःप्रथमंपृथिवीकायिकानामुपादानंतदनंतरंतत्प्रतिष्ठितत्वादप्कायिकानांअप्कायिकाश्चतेजःप्रतिपक्षभूतास्तदनंतरंतेजस्कायिकानामु
पादानंतेजश्चवायुसंपर्कतःप्रवृद्धिमुपयातिततएतदनंतरंवायुकायिकग्रहणंवायुश्चदूरस्थिनोवृक्षशाखादिकंपनतोलक्ष्यतेततस्तदनंतरंवनस्पतिकायिको
पादानं संप्रतिपृथ्वीकायिकमनवबुध्यमानःसंदिग्धःप्रश्नंकरोति ५ सेकिंतमित्यादि॥ अथकेतेपृथिवीकायिकाःसूरिराह पृथिवीकायिकाद्वि
विधाःप्रज्ञप्तास्तद्यथा॥ सूक्ष्मपृथिवीकाश्चबादरपृथिवीकायिकाश्चसूक्ष्मनामकर्मोदयात्सूक्ष्माबादरनामकर्मोदयाद्बादराःकर्मोदयजनिते
सत्वेनसूक्ष्मबादरत्वेनापेक्षिकेबदरामलकयोरिवसूक्ष्माश्चतेपृथिवीकायिकाः॥ चशब्दःस्वगतपर्याप्तापर्याप्तभेदसूचकः॥ बादराश्चतेपृथि ११
वीकायिकाश्चबादरपृथिवीकायिकाः अत्रापिचशब्दःस्वगतशर्करावालुकादिभेदसंसूचकः॥ तत्रसूक्ष्मपृथिवीकायिकाःसमुद्गकपर्याप्त
प्रक्षिप्तगंधावयववत्सकललोकव्यापिनोबादराःप्रतिनियतदेशचारिणस्तच्चप्रतिनियतदेशचारित्वंद्वितीयपदेप्रकटयिष्यते॥ तत्रसूक्ष्म

तत्रसूक्ष्मपृथिवीकायिकानांस्वरूपंजिज्ञासुरिदमाह॥ सेकिंतमित्यादि॥ अथकेतेसूक्ष्मपृथिवीकायिकाःसूरिराह॥ सूक्ष्मपृथिवीकायिकाद्विविधाः॥ प्रज्ञ
प्तास्तद्यथापर्याप्तसूक्ष्मपृथिवीकायिकाश्चअपर्याप्तसूक्ष्मपृथिवीकायिकाश्च॥ तत्रपर्याप्तिर्नामआहारादिपुद्गलग्रहणपरिणमनहेतुरात्मनःशक्तिविशेषः
सचपुद्गलोपचयादुपजायतेकिमुक्तंभवति॥ उत्पत्तिदेशमागतेनप्रथमंयेगृहीताःपुद्गलास्तेषांतथान्येषामपिप्रतिसमयंगृह्यमाणानांतत्संपर्कतस्तद्रूपतयाजा
तानांयःशक्तिविशेषआहारादिपुद्गलखलरसरूपतापरिणमनहेतुःसाचपर्याप्तिःषोढाआहारपर्याप्तिःशरीरपर्याप्तिःप्राणापानपर्याप्तिर्भाषापर्याप्तिर्मनः
पर्याप्तिश्च॥ तत्रयथाबाह्यमाहारमादायखलरसरूपतयापरिणमयतिसाआहारपर्याप्तिः॥ ययारसीभूतमाहारंरसासृग्मांसमेदोस्थिमज्जाशुक्रलक्षणसप्तधा
तुरूपतयापरिणमयति॥ साशरीरपर्याप्तिः॥ ययाधातुरूपतयापरिणमितमाहारमिंद्रियरूपतयापरिणमयतिसाइंद्रियपर्याप्तिः॥ तथाचायमेवार्थोऽन्यत्रापिभंग्यं
तरेणोक्तःपंचानामिंद्रियाणांप्रायोग्यान्पुद्गलान्गृहीत्वाअनाभोगनिर्वर्तितेनवीर्येणतद्भावनयनशक्तिरिंद्रियपर्याप्तिरितियथापुनरुच्छ्वासप्रायोग्यान्पुद्गलाना
दायउच्छ्वासरूपतयापरिणमय्यालंब्यवमुंचतिसाउच्छ्वासपर्याप्तिर्ययानुभाषायोग्यान्पुद्गलानादायभाषात्वेनपरिणमय्यालंब्यवमुंचति साभाषापर्याप्तिः॥
ययापुनर्मनःप्रायोग्यान्पुद्गलानादायमनस्त्वेनपरिणमय्यालंब्यवमुंचति॥ सामनःपर्याप्तिः॥ एताश्चयथाक्रममेकेंद्रियाणांसंज्ञिवर्ज्यानांद्वींद्रियादीनांसं
ज्ञिनांचचतुःपंचषट्संख्याभवंति॥ उक्तंचप्रज्ञापनामूलटीकाकृताः एकेंद्रियाणांचतस्रोविकलेंद्रियाणांपंचसंज्ञिनांषडितिउत्पत्तिप्रथमसमयएवचैताय
थायथंसर्वाअपियुगपन्निष्पादयितुमारभ्यंते॥ क्रमेणचनिष्ठामुपयांति॥ तद्यथा॥ प्रथममाहारपर्याप्तिस्ततइंद्रियपर्याप्तिरित्यादि॥ आहारपर्याप्तिश्चप्रथमसमय
एवनिष्पत्तिमुपपद्यते॥ शेषास्तुप्रत्येकमंतर्मुहूर्तेनकालेन॥ अथाहारपर्याप्तिःप्रथमसमयएवनिष्पद्यतेइति कथमवसीयते॥ उच्यते॥ यतआहारपदेद्वितीयो
द्देशकेसूत्रमिदंआहारपज्जत्तीएअपज्जत्तएणंभंते किंआहारएअणाहारएगोयमा॥ नोआहारएइतितत्रआहारपर्याप्त्याअपर्याप्तोविग्रहगतावेवोपपद्यतेनोप
पद्यतेनोपपातक्षेत्रमागतोपि॥ उपपातक्षेत्रमागतस्यप्रथमसमयएवाहारकत्वात्ततएकसामायिकीआहारपर्याप्तिनिर्वृत्तिः॥ यदिपुनरुपपातक्षेत्रमागतो
पिआहारपर्याप्त्याअपर्याप्तःस्यात्ततएवंसतिव्याकरणसूत्रमित्थंभवेत्॥ सियआहारएसियअणाहारएयथाशरीरादिपर्याप्तिषुसियआहारएसियअणाहार

एइति॥सर्वासामपिचपर्याप्तीनांपरिसमाप्तिकालोंतर्मुहूर्त्तप्रमाणः पर्याप्तयोविद्यंतेयेषांतेपयाप्ताअभ्रादित्वादइतिमत्वर्थीयोप्रत्ययः॥पर्याप्ताश्चतेसूक्ष्मपृथिवीकायिकाश्चपर्याप्तसूक्ष्मपृथिवीकायिकाश्चशब्दोलब्धिपर्याप्तकरणपर्याप्तरूपस्वगतभेदद्वयसूचकः॥येपुनःस्वयोग्यपर्याप्तिपरिसमाप्तिविकलास्तेअपर्याप्ता॥अपर्याप्ताश्चतेसूक्ष्मपृथिवीकायिकाश्चअपर्याप्तसूक्ष्मपृथिवीकायिकाश्चःशब्दःकरणलब्धिनिबंधनस्वगतभेदद्वयसूचकःतथाहिद्विविधाःसूक्ष्मपृथिवीकायिकाअपर्याप्ताः॥तद्यथा॥लब्ध्याकरणैश्चतत्रयेअपर्याप्तकाएवसंतोम्रियंतेतेलब्ध्यपर्याप्तकायेपुनःकरणानिशरीरेंद्रियादीनिनतावन्निर्वर्तयंतिअथचावश्यंनिर्वर्त्तयिष्यंतितेकरणापर्याप्ताः उपसंहारमाह॥सेत्तमित्यादिएतेसूक्ष्मपृथिवीकायिका॥तदेवंसूक्ष्मपृथिवीकायिका॥नदेवंसूक्ष्मपृथिवीकायिकानभिधायसंप्रतिबादरपृथिवीकायिकानभिधित्सुस्तद्विषयंप्रश्नसूत्रमाह॥७॥सेकिंतमित्यादि॥अथकेतेबादरपृथिवीकाःसूरिराह॥८॥बादरपृथिवीकाद्विविधाःप्रज्ञप्तास्तथाश्लक्ष्णाबादरपृथिवीकायिकाखरबादरपृथिवीकायिकाश्चतत्रश्लक्ष्णनामचूर्णितलोष्टकल्पामृदुःपृथिवीतदात्मकाजीवाअपिउपचारतःश्लक्ष्णस्तेचतेबादरपृथिवीकायिकाश्चश्लक्ष्णबादरपृथिवीकायिका॥अथवाश्लक्ष्णात्वसाबादरपृथिवीचसाकायः॥शरीरंयेषांतेश्लक्ष्णबादरपृथिवीकायाःतएवस्वार्थिकेकप्रत्ययविधानात्॥श्लक्ष्णबादरपृथिवीकायिकाश्चशब्दावक्ष्यमाणस्वगतानेकभेदसूचकःखरानामपृथिवीसंघातविशेषंचापन्नातदात्मकाजीवाअपिखरास्तेचतेबादरपृथिवीकायिकाश्चखरबादरपृथिवीकायिका॥अथवापूर्ववत्प्रकारांतरेणसमासश्चशब्दःस्वगतवक्ष्यमाणचत्वारिंशद्भेदसूचकः सेकिंतमित्यादि॥अथकेतेश्लक्ष्णबादरपृथिवीकायिकाःसूरिराह॥श्लक्ष्णबादरपृथिवीकायिकाःसप्तविधाःप्रज्ञप्ताःसप्तविधत्वंतद्यथेत्यादिनोपदर्शयति॥कृष्णमृत्तिका●रूपाएवंनीलमृत्तिकालोहितमृत्तिका॥हारिद्रमृत्तिकाइत्यंवर्णभेदेनपंचविधत्वमुक्तंपांडुमृत्तिकानामदेशविशेषेयाधूलीरूपासतीपांडुइतिप्रसिद्धातदात्मकाजीवाअप्यभेदोपचारात्पांडुमृत्तिकेत्युक्ता॥पणगमट्टियत्तिनद्यादिपूरप्लाविते देशेनद्यादिपूरेअपगतेयोभूमौश्लक्ष्णःमृदुरूपोजलमलापरंपर्यायपंकःसपनकमृत्तिकातदात्मकाजीवाअप्यभेदोपचारात्पनकमृत्तिका॥निगमनमाह॥सेत्तंसण्हबायरपुढविक्काइयासुगमं॥९॥सेकिंतमित्यादि॥अथकेतेखरबादरपृथिवीकायिकाःसूरिराह॥खरबादरपृथिवीकायिकाअनेकविधाःप्रज्ञप्ताश्चत्वारिंशद्भेदामुख्यतःप्रज्ञप्ताइत्यर्थः॥तानेवचत्वा १२

रिंशद्भेदानाह॥तंजहा॥पुढवीयइत्यादिगाथाचतुष्टयं॥पृथिवीतिभामात्यभामावत्शुद्धपृथिवी।नदीतटभित्यादिरूपा।चशब्दउत्तरभेदापेक्षयासमुच्चये।शर्करालघूपलशकलरूपाः २ वालुकासिकताः ३ उपलःटंकाद्युपकरणपरिकर्मणायोग्यःपाषाणः४शिलाघटनयोग्यंपादेवकुलपीठाद्युपयोगिमहान्पाषाणविशेषः ५ लवणंसामुद्रादि ६ ऊषयदृशादूषरक्षेत्रं ७ अयस्ताम्रत्रपुसीसकरूप्यसुवर्णानिप्रतीतानि १३ वज्रोहीरकः १४ हरितालहिंगुलकमनःसिलाःप्रतीताः १८ सीसगंपारदः १९ अंजनंसौवीरंजनादि १९ प्रवालंविद्रुमः २० अभ्रपटलंप्रसिद्धं २१ अभ्रवालुका २२ बायरकायेइतिबादरपृथिवीकायेअमीभेदाइतिशेषः॥मणिविहाणाइतिचशब्दस्यागम्यमानत्वामणिविधानानिचमणिभेदाश्चबादरपृथिवीकायभेदत्वेनज्ञातव्याः॥तान्येवमणिविधानानिदर्शयति॥गोमेद्यएत्यादि॥गोमेद्यकः २३ चःसमुच्चयेरुचकः २४ अंकः २५ स्फटिकः २६ चःपूर्ववत् लोहिताक्षः २७ मरकतः २८ मसारगल्लः २९ भुजमोचकः ३० इंद्रनीलश्च ३१ चंदनो ३२ गेरिकं ३३ हंसगर्भः ३४ पुलकः ३५ सौगंधिकश्च ३६ चंद्रप्रभा ३७ वैडूर्य ३८ जलकांतः ३९ सूर्यकांतश्च ४० तदेवमाद्यगाथयापृथिव्यादयश्चतुर्दशभेदाउक्ताद्वितीयगाथायाअष्टौहरितालादयः॥तृतीयगाथयागोमेद्यकादयोनचतुर्थ्यागाथयाष्टेतिसर्वसंख्ययाचत्वारिंशत्॥येयावन्येतहप्ययागाद्दतियेपिचान्येतथाप्रकारामणिभेदाःपद्मरागादयस्तेपिखरबादरपृथिवीकायत्वेनवेदितव्याःतेसमासतइत्यादिसामान्यतोबादरपृथिवीकायिकाःसमासतःसंक्षेपेणद्विविधाः॥प्रज्ञप्ताः तद्यथा पर्याप्तकाः अपर्याप्तकाश्च॥तत्रयेपिअपर्याप्तकास्तेस्वयोग्याःपर्याप्तीःसीकल्पेनासंप्राप्ताः अथवाअसंप्राप्ताइतिविशिष्टं वर्णादीन्अनुपगताः तथाहिवर्णादिभेदविवक्षायामेतेनशक्यंते॥कृष्णादिनावर्णभेदेनव्यपदेष्टुंकिंकारणमितिचेत्॥उच्यते इहशरीरादिपर्याप्तिषुपरिपूर्णासुसतीषुबादराणांवर्णादिविभागःप्रकटोभवति॥नापरिपूर्णासुतेचापर्याप्ताअपर्याप्ताएवम्रियंतेततोस्येवर्णादिविभागइत्यसंप्राप्ताइत्युक्तं॥ननुकस्माद्बादरपर्याप्तैवापर्याप्तोम्रियंतेनार्वाक्शरीरेंद्रियपर्याप्तिभ्यामपर्याप्ता अपिउच्यंते॥यस्मादागामिभवायुर्बध्वाम्रियंतेसर्वएवदेहिनोनाबध्वातच्चशरीरेंद्रियपर्याप्तानांबंधमायातिनाधातिनान्यथाइतिअन्येतुव्याचक्षते॥सामान्यतोवर्णादीन्असंप्राप्ताइतिलक्षनयुक्तंयतःशरीरमात्रभाविनोवर्णादयः॥शरीरंचशरीरपर्याप्त्यासंजातमितिनस्पष्टंजैनेपद्मनगाइत्यादि॥तत्रयेतेपर्याप्तका

परिसमाप्तसयोग्यसमस्तपर्याप्तयः॥एतेषांवर्णादेशेनवर्ण्णभेदविवक्षयाएवंगंधादेशेनरसादेशेनस्पर्शादेशेनसहस्राग्रशःसहस्रसंख्याविधानानि
भेदास्तद्यथावर्ण्णात्कृष्णादिभेदात्पंच॥गंधोस्रभीतरभेदात्द्विरसात्तिकाद्यःपंचस्पर्शामृदुकर्कशादयो१ष्टौएकैकस्मिंश्चवर्णादौतारतम्यभेदेनानेके
१वांतरभेदास्तथाहिभ्रमरकोकिलकज्जलादिषुतरतमभावानरुष्णःरुष्णतमइत्यादिरूपातयाअनेकेकृष्णभेदाएवंनीलादिष्वपायोज्यंतथागंधरसस्पर्शेष्वपि
तथापरस्परंवर्ण्णानांयोसंगतोधूसरकर्बुरत्वादयो१नेकसंख्याभेदाएवंगंधादीनामपिपरंगंधादिभिःसमायोगादतोभवंतिवर्ण्णाद्यादेशेःसहस्राग्रशोभे
दाःअसंख्येयादेशेःसहस्राग्रशोभेदाःसंख्येयान्याइंजोणिप्पमुहसयसहस्साइतिसंख्येयानियोनिप्रमुखानिद्राणिशतसहस्राणितथाहिएकैकस्मिन्वर्णगं
धरसेस्पर्शेचसंवृतायोनिःपृथिवीकायिकानांसापुनस्त्रिधासचित्ताअचित्तामिश्राचपुनरेकैकात्रिधाशीताउष्णाशीतोष्णाशीतादीनामपिप्रत्येकंतारतम्य
भेदादनेकभेदत्वंकेवलमेवविशिष्टवर्ण्णादियुक्ताःसंख्यातीताअपिस्वस्थानव्यक्तिभेदेनयोनयोनयोजातिमधिकृत्यएकैवयोनिर्गण्यतेततःसंख्येयानि
पृथिवीकायिकानांयोनिशतसहस्राणिभवंति॥तानित्वसूक्ष्मबादरगतसर्वसंख्ययासप्तघ्नगतिसाएइत्यादि॥पर्याप्तकनिश्रया अपर्याप्तकाव्युत्क्राम
तिउत्पद्यंते॥कियंतइत्याह॥यत्रैकःपर्याप्तकस्तत्रतन्निश्रयाअसंख्येयाःसंख्यातीताअपर्याप्तकाः॥उपसंहारमाह॥सेत्तमित्यादि॥निगमनत्रयंसुगमं॥तदेवमु
क्ताःपृथिवीकायिकाःसप्रत्ययमप्कायिकप्रतिपादनार्थमाह॥५२॥सेकिंतमित्यादि॥सुगमं॥उसाइत्यवश्यायःस्नेहःहिमंस्त्यानोदकंमहिकागर्भमासेषुसू
क्ष्मवर्षकरकोघनोपलः॥हरतनुर्योभुवमुद्भिद्यगोधूमांकुरतृणाग्रादिषुबद्धोबिंदुरूपजायतेशुद्धोदकमंतरिक्षसमुद्भवंनद्यादिगतंवातत्रस्पर्शरसा
दिभेदोदकेनेकभेदंतदेवानेकभेदत्वंदर्शयति॥शीतोदकंनदीतडागा१वटवापीपुष्करण्यादिषुशीतपरिणामं॥उष्णोदकंस्वभावतएवक्वचिन्नि
र्झरादाउष्णपरिणामंक्षारोदकमीषल्लवणस्वभा वंयथालाटदेशादौकेषुचिदवटेषु॥खट्टोदकमीषदम्लपरिणामंअम्लोदकमतीवस्वभाव १३
तएवाम्लपरिणामंकांजिकवत्॥लवणोदकंलवणसमुद्रेवारुणसमुद्रेक्षीरोदकंक्षीरसमुद्रेघृतोदकमिक्षुरसोदकंपुष्करवरसमुद्रादि
षुयेपिचान्येतथाप्रकारास्पर्शादिभेदभिन्नाघृतोदकादयोबादराप्कायिकास्तेसर्वेबादराप्कायिकतयाप्रतिपत्तव्यास्तेसमासतोइत्यादि

प्राग्वत्तनवरंसंख्येयानियोनिप्रमुखानिशतसहस्राणीत्यत्रापिसप्तवेदितव्यानि॥उक्ताअप्कायिकाःसप्रतितेजस्कायिकप्रतिपादयिषुराह॥सेकिंतमित्यादि॥सुगमं
नवरंअंगारोविगतधूमज्वालोज्वालास्यगतःस्वादिरादि॥ज्वालाअनलसंबद्धादीपशिखेत्यन्येमर्मुरःपुंपकादौभस्मामिश्रिताग्निकणरूपः॥अर्चिरनलप्रतिब
द्धाज्वालाअलातमु ल्मुकंशुद्धाग्निरयःपिंडादौउल्कातुदुलीविद्युतीना॥अशनिराकाशेपतन्नग्निमयःकणःनिर्घातोवैक्रियाशनिप्रपातःसंघर्षस
मुत्थितो१रण्यादिकाष्ठनिर्मथनसमुद्भूतःसूर्यकांतमणिनिःश्रितःसूर्यस्वरकिरणसंपर्केसूर्यकांतमणेर्यःसमुपजायतेतेजयावण्णेतह्यप्पगाराइतियेपिचान्ये
तथाप्रकाराएवंप्रकारास्तेजस्कायिकास्तेपिबादरतेजस्कायिकतयावेदितव्यास्तेसमासतोइत्यादिप्राग्वत्नवरमत्रापिसंख्येयानियोनिप्रमुखाणिशतसहस्रा
णिसप्तवेदितव्यानि॥उक्तास्तेजस्कायिकाःवायुकायिकप्रतिपादनार्थमाह॥५४॥सेकिंतमित्यादिप्रतीतंनवरं॥पाईणवाएइतियःप्राच्यादिशःसमागच्छतिवा
तःसप्राचीनवातःएवमपाचीनवातः॥दक्षिणवातउदीचीनवातश्चवक्तव्यःउर्द्ध्वमुद्गच्छन्योवातिवातःसऊर्द्ध्ववातःएवमधोवाततिर्यग्वातावपिपरिभाव
नीयौ॥विदिग्वातोयोविदिग्भ्योवातिवातोभ्रामी॥नवस्थितोवातःवातोत्कलिकासमुद्रस्येववातोत्कलिकावातमंडलीवातोली॥उत्कलिकावातः
उत्कलिकाभिःप्रचुरतराभिः२सम्मिश्रितोयोवातोमंडलिकावातोमंडलिकाभिर्मूलतआरभ्यप्रचुरतराभिःसमुत्थोयोवातःगुंजावातोयोगुंजनशब्दंकुर्वन्
वातिझंझावातःसवृष्टिःअशुभनिष्ठुरइत्यन्यसंवर्त्तकवातस्तृणादिसंवर्तनस्वभावः॥घनवातोघनपरिणामोरत्नप्रभापृथिव्याद्यधोवर्तीतनुवातो
विरलपरिणामोघनवातस्याधःस्थायीशुद्धवातोवस्तित्यादिगतइत्यन्येतेसमासतोइत्यादिप्राग्वत्॥अत्रापिसंख्येयोनिप्रमुखाणिशतसहस्रा
णिसप्तावसेयानि॥उक्तावायुकायिकाःसंप्रतिवनस्पतिकायिकप्रतिपादनार्थमाह॥सेकिंतमित्यादि॥सुगमंयावत्सेत्तंसुहुमवणस्सइकाइयासे
किंतमित्यादि॥अथकेतेबादरवनस्पतिकायिकाद्विविधाःप्रज्ञप्तास्तद्यथाप्रत्येकश रीरबादरवनस्पतिकायिकाश्चसाधारणशरीरबादर
वनस्पतिकायिकाश्च॥तत्रएकमेकंजीवंप्रतिगतंप्रत्येकंशरीरंयेषांतेप्रत्येकशरीराःतेचतेबादरवनस्पतिकायिकाश्च॥प्रत्येकश रीर
बादरवनस्पतिकायिकाश्चशब्दःस्वगतानेकभेदसूचकःसमानंतुल्यप्राणापानाद्युपभोगंयथाभवति॥एवंआसमंतात्एकीभावेनानं

नानांजंतूनांधारणंसंग्रहणंयेनतत्साधारणशरीरंयेषांतेसाधारणशरीराः॥तेचतेबादरवनस्पतिकायिकाश्चसाधारणबादरवनस्पतिकायिकाश्चसाधारणबाद
रवनस्पतिकायिकाःचशब्दोऽत्रापिस्वगतानेकभेदसूचकः।सेकिंतमित्यादि।अथकेतेप्रत्येकशरीरबादरवनस्पतिकायिकाःसूरिराह॥प्रत्येकशरीरबादरव
नस्पतिकायिकाःद्वादशविधाःप्रज्ञप्तास्तद्यथा॥रुक्खेत्यादि।वृक्षाच्चूतादयः।गुच्छावृंताकीप्रभृतयःगुल्मानिनवमालिकाप्रभृतीनिलताश्चंपकलतादयः इह
येषांस्कंधप्रदेशोविवक्षितोर्द्ध्वगनेकशाखातिरेकेणान्यत्रशाखांतरंपरिस्फुटंननिर्गच्छतितेलताविज्ञेयास्तेचचंपकादयइति॥वल्ल्यःकूष्मांडीप्रभृतयः॥
पर्वगाइक्षुवंशादयःतृणानिकुशार्जुनकार्जुनादीनिवलयानिकेतकीकदल्यादीनितेषांहित्वग्वलयाकारेणव्यवस्थितेति।हरितानितंदुलीयकवस्तुलप्रभृ
तीनिऔषध्यःफलपाकांतास्तेचशाल्यादयः।जलेरुहंतीतिजलरुहाउदकावकपनकादयः।कुहणाभूमिस्फोटाभिधानास्तेवायकायप्रभृतयः॥तत्रयथो
द्देशंनिर्देशइतिन्यायात्प्रथमतोवृक्षप्रतिपादनार्थमाह॥सेकिंतमित्यादि।अथकेतेवृक्षाः।सूरिराह॥वृक्षाद्विविधाःप्रज्ञप्तास्तद्यथा॥एकास्थिकाश्चबहु
बीजकाश्चशब्दौवक्ष्यमाणस्वगतानेकभेदसूचकः॥तथाप्रायोऽस्थिबंधमंतरेणएवमेवफलांतर्वर्तीनिबहूनिबीजानियेषांतेबहुबीजकाःशेषादेतिकप्रत्ये
यः॥अत्रापिचशब्दोवक्ष्यमाणस्वगतानेकभेदसूचकः।तत्रैकास्थिकप्रतिपादनार्थमाह॥७॥सेकिंतमित्यादि।अथकेतेएकास्थिकाःअनेकविधाःप्रज्ञप्तास्त
द्यथानिंबंबेत्यादिगाथात्रयं॥तत्रयंनिंबाम्रजंबूकोशंबाःप्रतीताःशालःसर्जःअंकोल्लनिकोल्लोवःप्राकृतत्वाच्चसूत्रेवकारस्यलादेशः॥अंकोल्लइति
वचनात्पीलुःप्रतीतःशेलुःश्लेष्मातकः॥सल्लकीमालुकोदेशप्रतीतां॥बकुलःकेसरःपलाशःकिंशुकः।करंजोनक्तमालः।पुत्रंजीवकोदेशविशेषप्रसि
द्धःअरिष्टः॥पिचुमंदः॥बिभीतकोवृक्षः॥हरीतकःकोंकणदेशप्रसिद्धः॥कषायबहुलः॥भल्लातकोयस्यभल्लातकाभिधानानिफलानिलोकप्रसिद्धानि
उंबभरिकाक्षीरणीधातकीप्रियालप्रतिकरंजश्लक्ष्णशिंशपाऽसनपुन्नागनागश्रीपर्णीशाकालोकप्रतीताः॥जेयावण्णेतहप्पगारेतियेपिचान्येत
थाप्रकाराएवंप्रकारास्तत्तद्देशविशेषभाविनस्तेसर्वेप्येकास्थिकावेदितव्याः॥एतेषामेकानांमूलान्यप्यसंख्येयजीवकानिअसंख्येयप्रत्येक १४
शरीरजीवात्मकानिएवंकंदाअपिस्कंधाअपित्वचोऽपिशाखाअपिप्रवालाअपिप्रत्येकशरीरजीवकाः॥तत्रमूलानियानिकंदस्याधस्तात्भूमेरंतःप्रस

रंतितेषामुपरिकंदास्तेचलोकप्रतीताःस्कंधाः।त्वचःछल्लःशालोःशाखाप्रवालाःपल्लवांकुराः।पत्तापत्तेयजीवियत्ति।पत्राणिप्रत्येकजीवकानिएकैकंपत्रमेकैकंपत्र
मेकैकेनजीवेनाधिष्ठितमितिभावः॥पुष्पाण्यनेकजीवानिप्रायःप्रतिपुष्पमनंतजीवभावात्फलान्येकास्थिकानिउपसंहारमाह॥सेत्तंएठियामुगमंबहुबीजकप्रतिपा
दनार्थमाह॥७॥सेकिंतमित्यादि॥अथकेतेबहुबीजकाः॥सूरिराहबहुबीजकाः॥अनेकविधाःप्रज्ञप्तास्तद्यथाअत्थियेत्यादिगाथात्रयंएतेव अस्थिकतेंदुककल्लु
अम्बाडकमातुलिंगबिल्वामलकपनसदाडिमअश्वत्थदुंबरवटन्यग्रोधनंदिवृक्षपिप्पलीशतरीप्लक्षकादुंबरीकुस्तुंभरिदेवदालितिलकालवकलशेथशरीर
पत्तसप्तपर्णलोध्रदधिपर्णचंदनानीपकुटकदंबानांमध्येकेचिदतिप्रसिद्धाःकेचिद्विशेषतोवेदितव्याः॥नवरमिहामलकादयोनलोकप्रसिद्धाःप्रतिपत्तव्या तेषामे
कास्थिकत्वात्किंतुदेशविशेषप्रसिद्धाबहुबीजकाएवकेचनयेयावन्नेतहप्पगारत्तियेचान्येतथाप्रकाराएवप्रकारास्तेपिचबहुबीजकामंतव्याः॥एते
षामपिमूलकंदस्कंधत्वक्शाखाप्रवालाःप्रत्येकमसंख्येयप्रत्येकशरीरजीवकाः॥पत्राणिप्रत्येकजीवकानिपुष्पाण्यनेकजीवकानिफलानिबहुबीज
कानिउपसंहारमाह॥सेत्तमित्यादिनिगमनदपंसकगमंसप्रतिगुच्छप्रतिपादनार्थमाह॥७॥सेकिंतमित्यादि॥एतेगुल्मादिभेदाःप्रायःस्वरूपतएवप्र
तीताःकेचिद्देशविशेषादवगंतव्याः॥अत्रवृक्षादिषुयस्यैकस्यनामगृहीत्वाऽपरत्रापितन्नामगृहीतंतत्राऽन्योभिन्नजातीयःसहनामाप्रतिपत्तव्याः॥अथ
वाएकोपिकश्चिदनेकजातीयकोभवति॥यथानालिकेरीतरुरेकास्थिकत्वादेकास्थिकस्तथैवलयाकारत्वाद्वलयस्ततोऽनेकजातीयत्वादनेकत्रापितन्नाम
निर्दिश्यमानंनविरुध्यतेसांप्रतमुक्तानुक्तार्थसंग्रहार्थमिदमाह॥णाणाविहेत्यादि॥नानाविधंनानाप्रकारंसंस्थानंआकृतिर्येषांतानिनानाविधसंस्था
नानिवृक्षाणामितिवृक्षग्रहणमुपलक्षणंतेनगुच्छगुल्मादीनामपिद्रष्टव्यंपत्राणिएकजीवकान्येकजीवाधिष्ठितानिवेदितव्यानिस्कंधोपिएकजीव
एकजीवाधिष्ठितःकिंसर्वेषामपीत्याह॥तालसरलनालिकेरीणांग्रहणमुपलक्षणंतेन॥नान्येषामपियथागमनेकजीवाधिष्ठितत्वंस्कंधस्य
प्रतिपत्तव्यं॥अन्येषांतुस्कंधाःप्रत्येकमनेकप्रत्येकशरीरजीवात्मकाइतिसामर्थ्यादवसेयं॥खंधाविअणेगजीवियाइतिपूर्वमभिधानात्।अथ
यदिप्रत्येकमनेकप्रत्येकशरीरजीवाधिष्ठितास्ततःकथमेकखंडशरीराकाराउपलभ्यंतेइति॥तदवस्थानस्वरूपमाह॥७॥जहसगलेत्या

जहसगलेत्यादि॥ यथासकलसर्षपानांश्लेषमिश्राणांश्लेषद्रव्यानिमिश्रितानांवत्तिर्वार्तिरेकरूपाभवति। अथतेसकलसर्षपाःपरिपूर्णशरीराःसंतःपृथक्स्व
स्वावगाहनया२वतिष्ठंते ॥३ तथाअनयैवोपमयाप्रत्येकशरीराणांजीवानांशरीरसंघाताःपृथक्पृथक्स्वस्वावगाहनाभवंति॥ इहश्लेषद्रव्यस्थानीयरागद्वेषोप
चितंतथाविधकर्मसकलसर्षपस्थानीयाःप्रत्येकशरीरःसकलसर्षपग्रहणंसर्षपाणांवैविक्त्यप्रतिपत्त्यापृथक्स्वस्वावह प्रत्येकशरीरवैविक्त्यप्रतिपत्त्यर्थमेत्रे
वार्थेदृष्टांतांतरमाह॥ जहवेत्यादिवाशब्दोदृष्टांतांतरस्त्वनेयथातिलपापडिकातिलप्रधानापिष्टमयीपूपिकाबहुभिस्तिलैर्मिश्रितासतीयथापृथक्स्वस्वा
वगाहतिलात्मिकाभवतिकथंचिदेकरूपाचतथाअनयैवोपमयाप्रत्येकशरीराणांजीवानांशरीरसंघाताःकथंचिदेकरूपाःपृथक्स्वस्वावगाहनाश्चभ
वंतिउपसंहारमाह॥९५॥ सेत्तमित्यादि। सूगमंसंप्रतिसाधारणवनस्पतिकायिकप्रतिपादनार्थमाह॥ सेकिंतमित्यादि॥ अथकेतेसाधारणशरीरबादरव
नस्पतिकायिकाःसूरिराहसाधारणशरीरबादरवनस्पतिकायिकाअनेकविधाःप्रज्ञप्तास्तद्यथा॥ अवणइत्यादि॥ एतेचकेचिदतिप्रसिद्धत्वात्केचिद्दे
शविशेषतःस्वयमवगंतव्याः॥ जेयावन्नेतहाविहाइति॥ येपिचान्येउक्तव्यतिरिक्तास्तथाप्रकाराउक्तप्रकारास्तेपिअनंतजीवाज्ञातव्याः॥ तेणेत्यादितृणमू
लंएतेषांमध्येकेचिज्जातिभेदतोदेशभेदतोवासंख्याताःकेचिदनंताश्चज्ञातव्याः॥९७॥ सिंघाडगस्सेत्यादि॥ शृंगाटकस्ययोगुच्छःसोनेकजीवोभवतिज्ञातव्यः
त्वकशाखादीनामनेकजीवात्मकत्वात्केवलंयान्यपियानिपत्राणितानिप्रत्येकजीवानिफलेपुनःप्रत्येकमेकैकस्मिन्द्वौद्वौजीवौभणितौ॥९८॥ जस्समूलस्सेत्या
दि॥ यस्यमूलस्यभग्नस्यसतःसमएकांतरूपश्चक्राकारोभंगः॥ प्रकर्षेणदृश्यतेतन्मूलमनंतजीवमवसेयं॥ जेयावण्णेतहाविहाइतियान्यपिचान्यानिभग्ना
नितथाप्रकाराणिअधिकृतसमभंगमूलप्रकासणितान्यप्यनंतजीवानिज्ञातव्यानि॥ एवंकंदस्कंधत्वक्शाखाप्रवालपत्रपुष्पफलबीजविषयाअपिनवगा
थाव्याख्येयाःसंप्रतिप्रत्येकशरीरलक्षणाभिधानार्थंगाथादशकमाह॥९९॥ जस्सेत्यादियस्यमूलस्यभग्नस्यसतोभंगभंगप्रदेशोहीरोविषमछेदपुट्
नरंनाप्रदृश्यतेप्रकर्षेणास्पष्टरूपतयालक्ष्यतेतत्स्तलंपरित्तजीवप्रत्येकशरीरजीवात्मकंज्ञातव्यं॥ जेयावण्णेतहाविहाइतियान्यपिचान्यानिभग्ना ३९
नितथाप्रकाराणिअधिकृतसदृशभग्नमूलसदृशानिमूलानितान्यपिप्रत्येकशरीरजीवात्मकानि॥ एवंकंदादिविषयाअपिनवगाथाभावनीयाः॥

यवकुलापिलिंगाव्यत्यय। सप्राकृतलक्षणादवसेयः। अधुनामूलादिगतानांवल्करूपाणांछल्लीनामनंतजीवत्वपरिज्ञानार्थंलक्षणमाह। जस्समूलस्सेत्यादिगाथाच
तुष्टयंयस्यमूलस्यकाष्ठात्मध्यसारात्छल्लीवल्करूपाबहलतराभवतिसाअनंतजीवाज्ञातव्या॥ जेयावन्नातहाविहतियापिचान्याअधिकृतयाअनंतजीवत्वेन
निश्चितयासमानरूपाछल्लीसापितथाविधाअनंतजीवात्मिकाज्ञातव्या॥ एवंस्कंधशाखाविषयाअपितिस्रोगाथाःपरिभावनीयाः॥ अधुनातासामेवछल्ली
नांप्रत्येकजीवत्वपरिज्ञानायलक्षणमाह। जस्समूलस्सेत्यादि॥ गाथाचतुष्टयं॥ यस्यमूलस्यकाष्ठात्मध्यसारात्छल्लीवल्करूपातनुतराभवति। सापरित्तजीवाप्रत्ये
कशरीरजीवात्मिकात्मिकाद्रष्टव्या। जायावन्नातहाविहाइतियापिचान्याअधिकृतयाप्रत्येकशरीरजीवात्मकत्वेननिश्चितयाछल्ल्यासमानरूपाछल्लीसापितथावि
धाप्रत्येकशरीरजीवात्मिकावगंतव्याएवंकंदादिविषयात्रिपितिस्रोगाथाभावनीयाः॥ यदुक्तं॥ जस्सभग्गस्ससमोभंगोपदीसईइत्यादि। तदेवलक्षणंस्प
ष्टंप्रतिपिपादयिषुरिदमाह॥ चक्कागमित्यादि॥ चक्रकंचक्राकारमेकांतेनसमंभंगस्थानंयस्याभज्यमानस्यमूलकंदस्कंधत्वक्शाखापत्रपुष्पादेर्भवति॥
तन्मूलादिकमनंतजीवंविजानीहिइतिसंबंधः॥ तथागंठीचुण्णघणोभवेइतिग्रंथिः॥ एवंसामान्यतोभंगस्थानंवासयस्यभज्यमानस्यचूर्णेनरजसाघनो
व्याप्तोभवतिअथवायस्यपत्रादेर्भज्यमानस्यचक्राकारोभंगरजसाग्रंथिस्थानव्याप्तिंचविनापृथिवीसदृशेनभेदेनभंगस्थानंभवतिसूर्यकरप्रतप्तकेदा
रतरिकाप्रतरखंडस्येवसमोभंगोभवतीतिभावस्तमनंतःकायंविजानीहि॥ पुनरपिलक्षणांतरमाह॥ गूढसिरागमित्यादियत्पत्रंसक्षीरंनिःक्षीरंवागू
ढसिराकमलक्ष्यमाणशिराविशेषंयदपिचप्रनष्टसंधिसर्वथानुपलक्ष्यमाणपत्रार्द्धद्वयसंधि॥ तदनंतजीवंविजानीहि॥ संप्रतिपुष्पादिगतंविशेषमभिशेषमभि
धित्सुराह॥ पुष्पाजलयेत्यादिपुष्पानिचतुर्विधानितद्यथाजलजानिसहस्रपत्रादीनिस्थलजानिकोरंटकादीनिएतान्यपिचप्रत्येकंद्विधानद्यथा॥ कानिचि
चिद्वृंतबद्धानिअतिमुक्तप्रभृतीनिकानिचिन्नालबद्धानिजातिपुष्पप्रभृतीनितत्रएतेषांमध्येकानिचित्पत्रादिगतजीवापेक्षयासंख्येयजीवानिकानि
चिदसंख्येयजीवानिचिदनंतजीवानियथागमंबोद्धव्यानिअत्रैवकंचिद्विशेषमाह॥९८॥ येकेइइत्यादियानिकानिचिन्नालिकाबद्धानिपुष्पा
णिजात्यादिगतानितानिसर्वाण्यपिसंख्यातजीवकानिभणितानि॥ तीर्थकरगणधरैःस्निहूस्निहूपुष्पंपुनरनंतजीवयान्यपिचान्यानिस्निहूपुष्प

यत्यानिनान्यपितथाविधानिअनंतजीवात्मकानिज्ञातव्यानि॥ ७॥ पउमप्पलिनीकंदेइत्यादि॥पद्मिनीकंदः।अनंतरकंदोजलजवनस्पतिविशेषकंदस्तथाजि
ह्लिकावनस्पतिविशेषरूपाएतेसर्वेप्यनंतजीवानवरंपद्मिन्यादीनांविसंमृणालंवएकएकजीवःएकजीवात्मकंविसमृणालइतिभावः॥७॥पलंडूइत्यादिपलांडुकं
दोलशुनकंदःकंदकोवनस्पतिविशेषः।कुस्तुंबुकोप्येवमेवएतेसर्वेपिपरित्तजीवाःप्रत्येकशरीरजीवात्मकाप्रतिपत्तव्याएयपिचान्येएवंप्रकाराअनंतजीवात्म
कलक्षणविरहितास्तेपितथाविधाःप्रत्येकशरीरजीवात्मकाविदितव्याः॥७॥उप्पलपउमेत्यादिगाथाद्वयंपद्मानामुत्पलानांनलिनानांसुभगानांसौगंधिका
अरविंदानांकोकनदानांशतपत्राणांसहस्रपत्राणांप्रत्येकंयत्वृंतंप्रसवबंधनंयानिचबाह्यपत्राणिप्रायोहरितरूपाणियाचकर्णिकापत्राधारभूताएता
नित्रीण्यप्येकजीवात्मकानियानिपुनरभ्यंतराणिपत्राणियानिचकिसराणियाश्चमिंजाःफलानिप्रत्येकमेकैकजीवाधिष्ठितानिवेणुनलइत्यादिगाथा
द्वयंवेणुर्वंशनडस्तृणविशेषः इक्षुवाडियादयोलोकतःप्रत्येतव्याःतृणानिपूर्वादीनियानिचपर्वगानिपर्वोपेतानिएतेषांयदक्षियच्चपर्वयच्चवणिमो
डउत्तिपर्वपरिवेष्टनंचक्रारमेतानिएकजीवस्यसंबंधीनिभवंतिएकजीवात्मकानिभवंतीतिभावःपत्राणिपुनरेतेषांप्रत्येकमेकजीवाधिष्ठितानिपुष्पाण्यने
कजीवात्मकानि॥७॥समपत्लमित्यादि॥पुष्पफलीफलंएवंकालिंगंतुंबंभ्रपुष्पं॥एलवालुक्तिविशेषरूपंचालुकंचिर्भिटंतथाघोषातकंपटोलं॥तंदुकंतंदूसं
चयत्फलंएतेषुप्रत्येकवृंतसमंसकटाहंतिसमांसंसगिरंतथाकटाह॥एतानित्रीण्येकस्यजीवस्याभवंतिएकजीवात्मकान्येतानित्रीणिभवंतीत्यर्थः॥तथाएतेषामेवपु
ष्पफलादीनांतेंदुकपर्यंतानांपत्राणिपृथक्प्रत्येकशरीरादिजीवस्याभवंतिएकजीवात्मकान्येतानित्रीणिभवंतीत्यर्थः॥तथाएतेषामेवपुष्पफलादीनांत
तेंदुकपर्यंतानांपत्राणिपृथक्प्रत्येकशरीराधिष्ठितान्येकैकजीवधिष्ठितानीत्यर्थः॥तथासकेसराअकेसरावामिंजावीजीनिप्रत्येकमेकैकजीवाधि
ष्ठितानि॥७॥सफाएइत्यादि॥एतेकुहनाख्यवनस्पतिविशेषालोकतःप्रत्येतव्याः॥एतेचानंतजीवाअनंतजीवात्मकानवरंकंडुक्केभजनासंहे
कोपिदेशविशेषभावतोऽनंतजीवोभवतिकोप्यसंख्येयजीवात्मकइतिआह।किंवीजजीवएवमूलादिजीवोभवति॥उतान्यस्तस्मिन्नपक्रांतेउत्पद्यते १६
इतिपरप्रश्नमाशंक्याह॥७॥बीएजोणिब्भूएइत्यादि॥बीजेयोनिभूतेयोन्यवस्थांप्राप्तेयोनिपरिणाममजहतीतिभावः॥बीजस्यहिद्विविधावस्था

तद्यथायोन्यवस्थावस्थाचततश्चयदाबीजंयोन्यवस्थांनजहाति॥अथबीजंतंजंतुनानदाततयोनिभूतमित्यभिधीयते।उज्झितंचजंतुनानिश्चयतोनावगंतुंश
क्यतेततोऽनतिशयिनासंप्रतिसचेतनमचेतनंवाअविध्वस्तयोनियोनिभूतमितिव्यवह्रियते॥विध्वस्तयोनितुनियमादचेतनत्वादयोनिभूतमिति अथयोनि
रितिकिमभिधीयते॥उच्यतेजंतोरुत्पत्तिस्थानमविध्वस्तशक्तिकंतत्रच्छजीवपरिणामनशक्तिसंपन्नमितिभावः॥तस्मिन्बीजेयोनिभूतेजीवोव्युत्क्रा
मतिउत्पद्यतेसएवपूर्वकोबीजजीवोऽन्योवाआगत्यतत्रोत्पद्यते।किमुक्तंभवति॥तदाबीजनिर्वर्तकेनजीवेनस्वायुषःक्षयाद्बीजपरित्यागःकृतोभ
वति॥तस्यबीजस्यपुनरंबुकालावनिसंयोगरूपसामग्रीसंभवस्तदाकदाचित्स एवप्राक्तनोबीजजीवोमूलादिनामगोत्रेउपनिबध्यतत्रागत्यपरिणम
तिकदाचिदन्यःपृथिवीकायिकादिजीवःयोपिचमूलेजीवइतियएवमूलतयापरिणतेजीवः॥सोपिचपत्रेप्रथमेथतयेतिसएवप्रथमपत्रतयापिचपरिणम
तेइत्येकजीवकर्तृकेमूलप्रथमपत्रेइतिआह्ययेवंसव्वोविकिसलउग्गममाणोअणंतउभणिउइत्यादिवक्ष्यमाणंकथंनविरुध्यते॥उच्यतेइहबीज
जीवोन्योवाबीजमूलत्वेनोत्पद्यतदुत्सूनावस्थांकरोतिततस्तदनंतरंभाविनींकिसलयावस्थांनियमतोनंताजीवाः॥कुर्वंतिपुनश्चतेषुस्थितिक्षयात्परि
णतेषुअसाविवमूलजीवोऽनंतजीवतनुंस्वशरीरतयापरिणमय्यतावद्वर्द्धतेयावत्प्रथमपत्रमितितनविरोधः॥अन्येतुव्याचक्षतेप्रथमपत्रमिहयासौ
बीजस्यसंमूर्छनावस्थातेनेनएकजीव॥कर्तृकेमूलप्रथमपत्रेइतिकिमुक्तंभवति।मूलच्छूनावस्थेएकजीवकर्तृकेएतच्चनियमप्रदर्शनार्थमुक्तंमूलस
मुच्छूनावस्थेएकजीवपरिणामितेएवशेषंतुकिशलयादिनावश्यंमूलजीवपरिणामाविर्भावितत:सव्वोविकिसलयोखलुउग्गममाणोअ तउभ णं
णितोइत्याद्यपिवक्ष्यमाणमविरुद्धंमूलसमुच्छूनावस्थानिवर्तनारंभकालेकिसलयत्वाभावादिति॥आहप्रत्येकशरीरवनस्पतिकायिकानांसर्वका
लंशरीरावस्थामधिकृत्यकिंप्रत्येकशरीरत्वमुतकस्मिंश्चिदवस्थाविशेषेअनंतजीवत्वमपिसंभवति॥तथासाधारणवनस्पतिकायिकानाम
पिकिंसर्वकालमनंतजीवत्वमुतकदाचित्प्रत्येकशरीरत्वमपिभवति॥तत्रआह॥७॥सव्वोविकिसलउइत्यादिइहसर्वशब्दोऽपरिशब्दोऽपरि
शेषवाचीसर्वोवनस्पतिकायःप्रत्येकशरीरःसाधारणोवाकिसलयावस्थामुपागतःसन्अनंतकायस्तीर्थकरगणधरैर्भणितःसएवकिसल

यरूपेणानंतकायिकः प्रवर्द्धिंगच्छन् अनंतोवाभवतिपरीतोवाकथंउच्यते यदिसाधारणंशरीरंनिर्वर्त्तयेत्तदासाधारणएवति ॥ अथप्रत्येकशरीरंततःप्रत्ये
कइतिकियतः ॥ कालादूर्द्ध्वंप्रत्येकोभवतीतिचेत्उच्यते ॥ अंतमुहूर्तात्तथाहिनिगोदानामुत्कर्षतोप्यंतर्मुहूर्त्तकालंयावत्स्थितिरुक्तात्ततोऽन्तमुहूर्ता
त्परतोविवर्तमानप्रत्येकोभवतीतिसंप्रतिसाधारणलक्षणमाह ॥ समयमित्यादि ॥ गाथाद्वयंसमयंयुगपद्युत्क्रांतानामुत्पन्नानांभवतांतेषांसाधारण
जीवानांसमकमेककालंशरीरनिर्वृत्तिर्भवति ॥ समकंचप्राणापानग्रहणंप्राणापानयोग्यपुद्गलोपादानंततःसममेककालंतदुत्तरकालभाविनोवुच्छ्वासनि
श्वासौतथाएकस्ययत् ६ आहारादिपुद्गलानांग्रहणंतदेवबहूनामपिसाधारणजीवानामवसेयं ॥ किमुक्तंभवति ॥ यत आहारादि वर्मेकोगृण्हातिशेषा
अपितदेवगृण्हंतीतितथायदृष्टंग्रहणंतत्संक्षेपादेवत्रशरीरेसमाघेशात्एकस्यापिग्रहणं ॥ संप्रत्युक्तार्थोपसंहारमाह ॥ ७ ॥ साहारणेत्यादि
सर्वेषामप्येकशरीराश्रितानांजीवानामुक्तप्रकारेणयत्साधारणःसूत्रेनपुंसकतानिर्देशआर्षत्वादाहरः ॥ आहारयोग्यपुद्गलोपादानंउपलक्षण
मेतत्योसाधारणावुच्छ्वासनिश्वासौयावत्साधारणाशरीरनिर्वृत्तिरेतत्साधारणजीवानांलक्षणं ॥ संप्रतियथेकस्मिन्निगोदशरीरेअनंता
जीवाःपरिणताःप्रतीतिपथमवतरंतितथाप्रतिपादयन्नाह ॥ ७ ॥ जहाअयगोलोइत्यादियथाअयोगोलोध्मरतःसन्तप्ततपनीयसंकाशः
सर्वो ६ ग्निपरिणतोभवतितथानिगोदजीवान्जानीहिनिगोदरूपेप्येकैकस्मिन्तच्छरीरेतच्छरीरात्मकतया अनंतानजीवानपरिणतान्जानीहि ॥ एवंसति
छुण्णसेत्यादि ॥ एकस्यद्वयोस्त्रयाणांयावत्संख्येयानांवाशब्दादसंख्येयानांवानिगोदजीवानांशरीराणिद्रष्टुंनशक्यानिकुतइतिचेत्उच्यतेअसा
यात्नहोकादिजीवगृहीतानिअनंतवनस्पतिशरीराणिसंति ॥ अनंतजीवपिंडात्मकत्वात्तेषोकथंतर्हिउपलभ्यानीत्यतआह ॥ दीसंतीत्यादिदृश्यं
ते ॥ शरीराणिनिगोदजीवानांबादरनिगोदजीवानांननुसूक्ष्मनिगोदजीवानांतेषांशरीराणांमनंतजीवसंघातात्मकत्वेप्यनुपलभ्यस्वभावत्वात्
तथासूक्ष्मपरिणामपरिणतत्वात् अथकथमेतदवसीयतेनिगोदरूपंशरीरंनियमादनंतजीवपरिणामाविर्भावितंभवतीतिउच्यतेजिनवच १०
नात्तथेदं ॥ गोलायअसंखिज्जाहोंतिनिगोयाअसंखयागोलेएक्कोक्कायनिगोउअणंतजीवोमुणेयव्वोसंप्रत्येतेषामेवनिगोदजीवानांप्रमा

णमभिधित्सुराह ॥ लोगागासेत्यादि ॥ एकैकस्मिन्लोकाकाशप्रदेशेएकैकंनिगोदजीवंस्थापयएवमेकैकस्मिन्आकाशप्रदेशेएकैकजीवरचनयामीय
माना अनंतलोका अनंतलोकाकाशप्रदेशप्रमाणानिगोदजीवाभवंति ॥ संप्रतिप्रत्येकवनस्पतिजीव ६ प्रमाणमाह ॥ ७ ॥ लोगागासपएसेइत्यादिएके
कस्मिन्लोकाकाशप्रदेशएकैकंप्रत्येकवनस्पतिजीवंस्थापयएवमुक्तप्रकारेणमीयमानाःप्रत्येकतरुजीवाअसंख्येयलोकाकाशप्रदेशप्रमाणाभवंति
संप्रतिपर्याप्तापर्याप्तभेदेनप्रत्येकसाधारणवनस्पतिजीवानांप्रमाणमाह ॥ पत्तेयापज्जत्ताइत्यादिपर्याप्ताःप्रत्येकवनस्पतिजीवाघनीकृतस्यलोकस्यमं
थधिनःप्रतरस्यअसंख्येयभागमात्राअसंख्येयाभागेयावंतआकाशप्रदेशास्तावत्प्रमाणाभवंति ॥ अपर्याप्तानांपुनःप्रत्येकतरुजीवानामसंख्येयालो
काःपरिमाणं ॥ पर्याप्तानांचसाधारणजीवानामनंतालोकाःकिमुक्तंभवति ॥ असंख्येयलोकाकाशप्रदेशप्रदेशप्रमाणाभपर्याप्तप्रत्येकतरवोऽनंतलो
काकाशप्रदेशमाणाः पर्याप्ताअपर्याप्ताश्चसाधारणजीवाइतिज्ञेयावर्णतहप्यगीराइतियेपिचान्ये अमुक्तरूपास्तथातथाप्रकाराःप्रत्येकतरुरूपा
अनंतपिवनस्पतिकायत्वेनप्रतिपत्तव्याः ॥ तेसमासतोइत्यादिप्राग्वत्तनवरंयेचैकोबादरपर्याप्तस्तत्रतन्निश्रयाअपर्याप्ताःकदाचित्संख्येयाःकदाचिदनं
ताःप्रत्येकतरवःसंख्येयाअसंख्येयावासाधारणास्तुनियमादनंताइतिभावः ॥ एएसिणमित्यादि ॥ एतेषांसाधारणप्रत्येकतररूपाणांवनस्पतिवि
शेषाणांवक्ष्यमाणानामिमाविशेषप्रतिपादिकावक्ष्यमाणगाथाअभगंतव्याःप्रतिपत्तव्यास्ताएवाह ॥ तंजहा ॥ कंदायेत्यादिगाथात्रयं ॥ कंदाःसूरणकंदादयःकं
दमूलानिवृक्षमूलानिचसाधारणवनस्पतिविशेषाःगुच्छागुल्मावल्लयश्चप्रतीतावेणुकावंशास्तृणान्यर्जुनादीनिपद्मोत्पलशृंगाटकानिप्रतीतानिहदोज
लजवनस्पतिविशेषः सेवालःप्रसिद्धःकृष्णकाचकपनकश्चभाणीकंदुकाःसाधारणवनस्पतिविशेषाएतेषामेकोनविंशतिसंख्यानांच्छगादि
षुमध्येकस्यापिकापियोनिःकिमुक्तंभवतिकस्यापित्वक्योनिःकस्यापिछल्लीयावत्कस्यापिमूलंकस्याप्यग्रंकस्यापिमध्यंकस्यापिबीजमि
ति ॥ सेत्तमित्यादिनिगमनचतुष्टयंसुगमंतदेवमुक्ताएकेंद्रियाःसंप्रतिद्वींद्रियप्रतिपादनार्थमाह ॥ सेकिंतमित्यादि ॥ अथकेतेद्वींद्रियाःसूरिरा
हद्वींद्रियाअनेकविधाःतद्यथापुलाकिमियाइत्यादिपुलाकिमियानामपायुप्रदेशोत्पन्ना ६ कृमयःकुक्षिप्रदेशोत्पन्नाःशंखाःसमुद्रोद्भवाः

प्रतीताः शंखनकास्तएवलघवः ॥ घुल्लाघुल्लिका॥ खुल्लाघवः शंखाः सामुद्रशंखाकारावराटाः कपर्दकाः सिप्पिसंपुडत्तिसंपुटरूपाः शुक्तयः। चंदनकाअक्षाः
शेषास्तुयथासंप्रदायंवाच्याः॥ जेयावण्णेतहप्पगारादृतियेपिचान्येतथाप्रकाराएवंप्रकारामृतकडेवरसंभूतकृम्यादयस्तेसर्वेद्वींद्रियाज्ञातव्याः॥ तेसंमूर्छिमत्वाः
संमूर्छिमत्वादेवचनपुंसकाःसंमूर्छिमानामवश्यंनपुंसकत्वात् ॥ नारकसंमूर्छिमानपुंसकाइतिवचनात्तेसमासतोइत्यादि॥ तेद्वींद्रियाःसमासतःसंक्षेपे
णद्विविधाः प्रज्ञप्तास्तद्यथापर्याप्तकाश्चअपर्याप्तकाश्चचशब्दोयोनिकुलभेदेनस्वगतानेकभेदस्तवको एतेषांद्वींद्रियाणामेवमादीनांपुनःकृम्यादी
नांद्वींद्रियाणांपर्याप्तानांसर्वसंख्ययासर्वजातिकुलकोटीनां। योनिप्रमुखाणियोनिप्रवाहानिशतसहस्राणिभवंतिसप्तजातिकुलकोटिलक्षाभवंती
तिभावः॥ इत्याख्यातंतीर्थकृद्भिर्गणधरैश्चश्रुतगणिकइयमत्रभावनाइहजातिकुलयोनीनांपरिज्ञानार्थमिदंपरिसरमुदाहरणं। पूर्वाचार्यैरुपदर्शितंतद्य
थाजातिरितिकिलतिर्यग्जातिः नस्याःकुलानिकृमिकीटवृश्चिकादीनिइमानिचकुलानियोनिप्रमुखाणितथाह्येकस्यामवयोनौअनेकानिकुलानिभवंतिय
थाछगणयोनौकृमिकुलंवृश्चिककुलमित्यादिअथवाजातिकुलयोन्योश्चपरस्परंविशेषएकस्यामपियोनिअनेकजातिकुलसंभवात्। यथाएकस्यामेवयो
नौ कृमिजातिकुलंकीटजातिकुलंवृश्चिकजातिकुलमित्यादिएवंचएकस्यामेवयोनाववांतरजातिभेदभावादभावादभेदकानियोनिप्रवाहाणिजाति
कुलानिसंभवंतीत्युपपद्यंतेद्वींद्रियाणांसप्तजातिकुलकोटीनांशतसहस्राणिउपसंहारमाह। सेत्तमित्यादि। स्येषाद्वींद्रियासंसारसमापन्नजीवप्रज्ञापना
ना॥ संप्रतित्रींद्रियसमापन्नजीवप्रज्ञापनार्थमाह ॥ सेकिंतमित्यादि॥ अथकासात्रींद्रियसंसारसमापन्नजीवप्रज्ञापनाभगवानाह॥ त्रींद्रियसंसारसमापन्नजी
वप्रज्ञापनाअनेकविधाप्रज्ञप्तातामेवतद्यथेत्यादिनोपदर्शयति॥ एतेचउपयिकप्रभृतयस्त्रींद्रियादेशविशेषतोलोकतश्चावगंतव्याः॥ नवरंगोम्ही
कणसियालिया ॥ जेयावण्णेतहप्पगाराःयेपिचान्येतथाप्रकाराएवंप्रकारास्तेसर्वेत्रींद्रियाज्ञातव्याइतिशेषः॥ तेसव्वेसंमुच्छिमानपुंसकाइत्यादिपूर्व
त् एतेसिणमित्यादिएतेषांत्रींद्रियाणामेवमादिकानामौपयिकप्रभृतीनांपर्याप्तापर्याप्तानांसर्वसंख्यया अष्टौजातिकुलकोटीनांयोनिप्रमुखाणियोनि १८
प्रवाहाणिशतसहस्राणिभवंति॥ अष्टौकोटिकुललक्षाभवंतीतिभावः॥ इत्याख्यातंतीर्थकृद्भिःउपसंहारमाह॥ सेत्तमित्यादिदेवमुक्तात्रींद्रियसंसारसमा

पन्नजीवप्रज्ञापनासंप्रतंचतुरिंद्रियसंसारसमापन्नजीवप्रज्ञापनामाह। सेकिंतमित्यादि॥ एतेपिचतुरिंद्रियालोकतः प्रत्येतव्याः। एतेषांचपर्याप्तापर्याप्तानांसर्वसंख्यया
जातिकुलकोटीनांनवलक्षाभवंतिशेषाक्षरगमनिकाप्राग्वत्उपसंहारमाह सेत्तमित्यादि। उक्ताचतुरिंद्रियसंसारसमापन्नजीवप्रज्ञापनामाह। सेकिंतमित्यादि
समा
अथकासापंचेंद्रियसमापन्नजीवप्रज्ञापनासूरिराह॥ पंचेंद्रियसंसारसमापन्नजीवप्रज्ञापनाचतुर्विधाप्रज्ञप्तातद्यथानैरयिकेत्यादिअयमिष्टफलंकर्मनिर्गत
मयंयेभ्यस्तेनिरयानरकावासास्तेषुभवानैरयिकास्तेचतेपंचेंद्रियसंसारसमापन्नजीवाश्चनैरयिकपंचेंद्रियसमापन्नजीवास्तेषांप्रज्ञापनातथाअंभृगतौ
तिरोःचीतितिर्यंचस्तिरस्तिर्यंचीतितिरस्तिर्यंचीतितिरस्तिर्यादिशः। तेषांयोनिरुत्पत्तिस्थानंतिर्यग्योनिकाः॥ तेचतेपंचेंद्रियसंसारसमापन्नजीवाश्चते
षांप्रज्ञापनातिर्यग्योनिकपंचेंद्रियसंसारसमापन्नजीवप्रज्ञापना॥ तथामनुष्यशब्दोमनुष्यवाचीयथाराजशब्दोराजन्याभिधायकः मनोरपत्यानिमनु
ष्याः मनोर्याणौषश्चेतियप्रत्ययः। षकारश्चागमः। अयंचप्रत्ययोजातावितिमनुष्यशब्दोजातिवाचीराजन्यशब्दवत्तेचतेपंचेंद्रियसंसारसमापन्नजीवाश्चते
षांप्रज्ञापनामनुष्यपंचेंद्रियसंसारसमापन्नजीवप्रज्ञापना। तथादिव्यंतिस्वेच्छयाक्रीडंतीतिदेवाभवनपत्यादयस्तेचतेपंचेंद्रियसंसारसमापन्नजीवाश्चतेषां
प्रज्ञापनादेवपंचेंद्रियसंसारसमापन्नजीवप्रज्ञापना॥ तत्रनैरयिकप्रतिपादनार्थंप्रश्ननिर्वचनसूत्रेआह। सेकिंतमित्यादिसप्तविधत्वंनैरयिकाणांपृथिवी
भेदेनान्यथाप्रभूतभेदत्वंसंघटतेतैः पृथिवीभेदेनएवसप्तविधत्वंतद्यथेत्यादिनोपदर्शयति। रत्नानिवज्रवैडूर्यानिप्रभाशब्दोःस्वरूपवाची
रत्नानिप्रभास्वरूपंयस्याःसारत्नप्रभारत्नबहुलारत्नमयीतिभावार्थः। साचासौपृथिवीचतस्यांनैरयिकारत्नप्रभापृथिवीनैरयिकाएवंसक्करपभा
पुढविनेरइयाइत्यादिभावनीयमपसंहारमाह॥ सेत्तंनेरइयाअधुनोद्देशक्रमप्रामाण्यानुसरणतस्तिर्यक्पंचेंद्रियान्प्रतिपिपादयिषुराह॥ ७॥
सेकिंतमित्यादि॥ अथकेतेपंचेंद्रियतिर्यग्योनिकाःसूरिराहपंचेंद्रियतिर्यग्योनिकास्त्रिविधाः प्रज्ञप्तास्तथाजलचरेत्यादि। जलेचरंतिपर्यटंती
तिजलचरा। आधारादिनिटप्रत्ययः तेचतेपंचेंद्रियतिर्यग्योनिकाश्चजलचरएवेंद्रियतैर्यग्योनिकाः स्थलेचरंतीतिस्थलचराः। खेआकाशे
चरंतीतिखचरा। प्राकृतत्वादीर्घत्वाच्चखहचराइतिसूत्रेपाठः॥ ततउभयत्रापितिर्यग्योनिकशब्देनसहविशेषणसमासः। सेकिंतमित्यादि

अथकेतेजलचरपंचेंद्रियतैर्यग्योनिकाःसूरिराह।जलचरपंचेंद्रियतैर्यग्योनिकाःपंचविधा५प्रज्ञप्तास्तदेवपंचविधत्वंतद्यथेत्यादिनोपदर्शयति॥मत्स्याःकच्छपाः
सत्रेपकारस्यभकारःप्राकृतत्वान्ग्राहामकाराःशिशुमाराप्राकृतत्वात्सूत्रेसुंमाराइतिपाठः॥मत्स्यादीनांचविशेषलोकतोवेदितव्या॥नवरंमच्छिकच्छपामांस
कच्छपादृतिये॥अस्थिबहुलाःकच्छपास्तेअस्थिकच्छपायेषांसबहुलास्तेमांसकच्छपाः॥तेसमासतोइत्यादि॥तेजलचरपंचेंद्रियतैर्यग्योनिकाःसमास
तःसंक्षेपेणद्विविधाःप्रज्ञप्तास्तथासंमूर्छिमाश्चगर्भव्युत्क्रांतिकाश्च॥वुच्छामोहसमुच्छ्रयेःअस्मात्संपूर्यातेसंमूर्छनंसंमूर्छाः५कर्त्तरितिभावेघञ्प्रत्ययः
गर्भोपपातव्यतिरेकेणएव॥सर्वप्राणिनामुत्पादइतिभावस्तेननिर्वृत्ताःसंमूर्छिमा॥भावादिमइतिइमप्रत्ययः॥गर्भेव्युत्क्रांतिरुत्पत्तिर्येषांव्युत्क्रांतिशब्दो५
त्रोत्पत्तिवाचीनथापूर्वाचार्यप्रसिद्धेर्यदिवागर्भात्गर्भावात्व्युत्क्रांतिनिःक्रमणंयेषांतेगर्भव्युत्क्रांतिकाःशेषाद्वेतिकबुसमासांतःचशब्दोप्रत्येकंस्व
गतानेकभेदसूचकौ॥तत्रतेयेसंमूर्छिमास्तेसर्वेनपुंसकाःसंमूर्छिमभावस्यनपुंसकत्वाविनाभावित्वात्।येतुगर्भव्युत्क्रांतिकास्तेत्रिविधाःप्रज्ञप्तास्तद्यथा
स्त्रियःपुरुषानपुंसकाः॥एतेषांचोभयेषामपिशरीरावगाहनादिषुद्वारेषुयर्वितनंयच्चगर्भव्युत्क्रांतिकानांस्त्रीपुंसपुंसकानांपरस्परमल्पबहुत्वंचिं
तनंतज्जीवाभिगमटीकायांकृतमितिनतोवधार्यं॥एएसिणमित्यादि॥एतेषामेवमादिकानांमुपदर्शितप्रकारादीनांजलचरपंचेंद्रियतिर्यग्योनि
कानांपर्याप्तापर्याप्तानांसर्वसंख्ययाअर्द्धत्रयोदशजातिकुलकोटीनांयोनिप्रमुखाणियोनिप्रवाहाणिशतसहस्राणिभवंतीत्याख्यातं॥भगवद्भिस्ती
र्थकरैः॥उपसंहारमाहसेत्तमित्यादि॥तदेवमुक्ताजलचरपंचेंद्रियतैर्यग्योनिकाःसंप्रतिस्थलचरपंचेंद्रियतिर्यग्योनिकानभिधित्सुरिदमाह॥छ॥से
किंतमित्यादिचत्वारिपदानियेषांतेचतुष्पदाअश्वादयःतेचतेस्थलचरपंचेंद्रियतिर्यग्योनिकाश्चचतुष्पदस्थलचरपंचेंद्रियतिर्यग्योनिकाउर
साभुजाभ्यांवापरिसर्पंतीतिपरिसर्पाःअहिनकुलादयस्ततःपूर्ववत्।स्थलचरपंचेंद्रियतिर्यग्योनिकपदेनसहविशेषणसमासः॥चशब्दोप्रत्येकं १९
स्वगतानेकभेदसूचकौ॥तदेवानेकभेदत्वंक्रमेणप्रतिपिपादयिषुरिदमाह॥सेकिंतमित्यादि॥अथकेतेचतुष्पदस्थलचरपंचेंद्रियतैर्यग्यो
निकाःसूरिराह॥चतुष्पदस्थलचरपंचेंद्रियतिर्यग्योनिकाश्चतुर्विधाःप्रज्ञप्तास्तद्यथा॥एकखुराइत्यादि॥तत्रप्रतिपदमेकःखुरःशफोयेषांते

एकखुराःअश्वादयः॥द्वौद्वौखुरौप्रतिपदंयेषांतेगोमहिषादयः॥तथासनखानि॥दीर्घनखापरिकलितानिपदानियेषांतेसनखपदाःश्वादयः॥प्राकृतत्वा
त्सणप्फयाइतिसूत्रेनिर्देशः॥अधुनाएतानेवएककखुरादीन्भेदतःक्रमेणप्रतिपिपादयिषुरिदमाह॥सेकिंतमित्यादि॥सुगमंनवरंयेकेचिदित्यादयःअनंतिना
स्तेलोकतोवेदितव्याः।तेसमासतोदुविहापन्नत्ताइत्यादिसूत्रंप्राग्वद्भावनीयं॥नवरमत्रजातिकुलकोटीनांयोनिप्रमुखानिदशशतसहस्राणिदशलक्षाणीतिवेदि
तव्यमत्रापिचसंमूर्छिमानांगर्भव्युत्क्रांतिकानांचप्रत्येकंयच्छरीरादिषुद्वारेषुचिंतनंयच्चस्त्रीपुंनपुंसकानांपरस्परमल्पबहुत्वंतज्जीवाभिगमटीकातोवेदितव्यं
सेत्तंचउप्पएत्यादि॥सेकिंतमित्यादि॥अथकेतेपरिसर्पस्थलचरपंचेंद्रियतैर्यग्योनिकाःसूरिराहपरिसर्पस्थलचरपंचेंद्रियतैर्यग्योनिकाद्विविधाद्विप्रकाराःप्रज्ञप्ता
स्तद्यथाउरपरिसर्पेत्यादिउरसापरिसर्पास्तेचतेस्थलचरपंचेंद्रियतिर्यग्योनिकाश्चतुरः॥परिसर्पस्थलचरपंचेंद्रियतिर्यग्योनिकाश्चतुरःपरिसर्पस्थलच
रपंचेंद्रियतिर्यग्योनिकाभुजाभ्यांपरिसर्पंतीतिभुजपरिसर्पास्तेचतेस्थलचरपंचेंद्रियतिर्यग्योनिकाश्च॥भुजपरिसर्पस्थलचरपंचेंद्रियतिर्यग्योनिकाः
चशब्दोप्रत्येकंस्वगतानेकभेदसूचकौतचारःपरिसर्पस्थलचरपंचेंद्रियतिर्यग्योनिकभेदान्पदिदर्शयिषुरिदमाह॥सेकिंतंउरपरिसप्पेत्यादि॥अथके
तेउरःपरिसर्पस्थलचरपंचेंद्रियतिर्यग्योनिकाःसूरिराह॥उरःपरिसर्पस्थलचरपंचेंद्रियतिर्यग्योनिकाश्चतुर्विधाःप्रज्ञप्तास्तद्यथा॥अहयो१अजगराः
आसालिगामहोरगाःएतेषामेवभेदानामवगमायप्रश्ननिर्वचनसूत्राण्याह॥सेकिंतमित्यादि॥अथकेतेअहयोगुरुराह॥अहयोद्विविधाःप्रज्ञप्तास्तद्यथा
दर्वीकराश्चमुकुलिनश्चतत्रदर्वीचदर्वीफणानत्करणशीलाःदर्वीकरामुकुलंफणाविरहयोग्याशरीरावयवविशेषाकृतिःसाविद्यतेयेषांतेमुकुलिनः
फणाकरणशक्तिविकलाइत्यर्थः॥अत्रापिचशब्दोस्वगतानेकभेदसूचकौ॥तत्रदर्वीकरभेदानभिधित्सुराह॥सेकिंतमित्यादि॥आस्योदंष्ट्रास्तासु
विषंयेषांतेआसीविषाः॥उक्तंच॥आसीरादानस्यवित्ताआसीविसामुणेयव्वा॥इतिदृष्टौविषंयेषांतेदृष्टिविषाः॥उग्रंविषंतेउग्रविषाः॥भोगःशरीरं
तत्रविषंयेषांतेभोगविषाःत्वविदिषंयेषांतेत्वग्विषाःप्राकृतत्वाच्चतयाविसाइतिपाठः॥लालामुखभावः॥तत्रविषंयेषांतेलालाविषाःनिश्वासेविषं
येषांतेनिःश्वासविषाः॥कृष्णसर्पादयोजातिभेदालोकतःप्रतिपत्तव्याः॥उपसंहारमाह॥सेत्तंदर्वीकराःमुकुलिनःप्रतिपिपादयिषुरिदमाह॥सेकिंतमि

त्यादि॥एतेपिलोकलोऽवसेया॥अजगराणामवांतरजातिभेदानविद्यंतेततउक्तमेकाकाराअजगराःप्रज्ञप्ताः आसालिकामभिधित्सुराह॥सेकिंतंआसालिगाएवं विधेणप्रश्नेकृतेस्मतिभगवान्‌आर्यस्यामीयदेवग्रंथांतरेषुआसालिगाप्रतिपादकंगोतमप्रश्नभगवन्निर्वचनरूपंस्तत्रमस्तितदेवागमबहुमानतःपठतिकहिणंभं तेइत्यादिकृणमितिवाक्यालंकारेभदंतपरमकल्याणयोगिन्‌आसालिगासंमूर्छतिएषाहिगर्भज्ञानभवतिर्किंतुसंमूर्छिमेवततउक्तंसंमूर्छति॥भगवानाहगो यमेत्यादिगोतमेत्यादिगोतम अंतर्मध्येमनुष्यक्षेत्रेमनुष्यक्षेत्रमनुष्यक्षेत्रस्यनबहिर्नावतामनुष्यक्षेत्राबहिरस्याउत्पादोनभवतीतिप्रतिपादितं॥तत्रापिमनुष्य क्षेत्रेसर्वत्रनभवतिकिंत्वर्द्धतृतीयेषुद्वीपेषुअर्द्धंतृतीयंयेषांतेअर्द्धतृतीयाअवयवेनविग्रहःसमुदायःसमासार्थस्तेषुएतायताल्वणसमुद्रेवानभवतीत्या वेदितं॥निर्व्याघातेनव्याघातस्याभावोनिर्व्याघातंतेनयदिपंचसुभरतेषुपंचस्वैरावतेषुसुषमादिरूपदुःखमादिरूपश्चकालोव्याघातहेतुत्वात्‌॥व्याघातो भवति॥तदापंचदशसुकर्मभूमिषुसंमूर्छतिव्याघातंप्रतीत्यकिंपंचसुकर्मभवति॥यदिपंचसुभारतेषुपंचस्वैरावतेषुयथोक्तरूपोव्याघातोभवति।ततःपंचसुमहा विदेहेषुसंमूर्छति॥एतावताविंशत्यप्यकर्मभूमिषुनोपजायते॥इतिप्रतिपादितंपंचदशसुकर्मभूमिषुपंचसुमहाविदेहेषुनसर्वत्रसंमूर्छतिकिंतुचक्रवर्तिस्कं धावारेषुवावाशब्दःसर्वत्रापिविकल्पार्थोद्रष्टव्यःबलदेवस्कंधावारेषुमांडलिकःसामान्यराजाअल्पर्द्धिकोमहामांडलिकःसएवानेकदेशाधिपतिःतत्स्कंधा वारेषु गामनिवेसेसुइत्यादि॥ग्रसतिबुद्ध्यादीन्‌गुणानितियदिवागम्याःशास्त्रप्रसिद्धानामष्टादशानांकराणामितिनिगमःप्रभूततरव णिग्वर्गावासःपांसुप्राकारनिबद्धंखेटंक्षुल्लप्राकारवेष्टितंकर्वटंअर्द्धतृतीयगव्यूतांतर्ग्रामांतररहितंमडंबंपट्टणंपत्तनंवाउभयत्रापिप्राकृतत्वेननिर्देशस्य समानत्वात्‌॥तत्रयन्नौभिरेवगम्यंतेत्पत्तनंयत्पुनःशकटैर्घोटकैर्नौभिर्वागम्यंतत्पट्टनंयथाभरुकच्छं॥उक्तंच॥पत्तनंशकटैर्गम्यंघोटकैर्नौभिरेव च॥नौभिरेवतुयद्गम्यंपट्टनंतत्प्रचक्ष्यतेद्रोणमुखंबाहुल्येनजलनिर्गमप्रवेशंआकाराहिरण्याकारादिः॥आश्रमस्तापसावसथोपलक्षितआश्रयः संबाधोयात्रासमागतप्रभूतजननिवेशः॥राजधानीराजाधिष्ठानंनगरंएएसिणमित्यादि॥एतेषांचक्रवर्तिस्कंधावारादीनामेवविनाशेषूपस्थ २०
णंतिएतेषुचक्रवर्तिस्कंधावारादीनामेवविनाशेषूपथितेषुएत्थणंतिएतेषुचक्रवर्तिस्कंधावारादीनामेवविनाशेषूएत्थणंतिएतेषुचक्रवर्तिस्कंधावारा

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

दीनामेवविनाशेषूएत्थणंतिएतेषुचक्रवर्तिस्कंधावारादिषुस्थानेषु आशालिकासंमूर्छतिसावजघन्यतोऽगुलासंख्येयभागमात्रया अवगाहनयासमुत्तिष्ठती ष्ठतीतियोगः॥एतच्चोत्पादप्रथमसमयेवेदितव्यं॥उत्कर्षतोद्वादशयोजनानितदनुरूपंद्वादशयोजनप्रमाणदैर्घ्यानुरूपंविष्कंभबाहुल्येणंतिविष्कंभश्चबा हुल्यंसमाहारोद्वंद्वस्तेनविस्तारोबाहुल्यंस्थूलताभूमिंदालित्वाणंविदार्यसमुत्तिष्ठतिचक्रवर्तिस्कंधावारादीनामधस्ताद्भूमेरंतरुत्पद्यतेइतिभावः सावा संज्ञिनी अमनस्कासंमूर्छिमत्वात्‌मिथ्यादृष्टिःसासादनसम्यक्त्वस्यापितस्याअसंभावात्‌ अतएवाज्ञानिनी अंतर्मुहूर्तायुरेवकालंकरोतितदेवं ग्रंथांतरगतंसूत्रंपठित्वासूत्रकृत्संप्रत्युपसंहारमाह॥सेत्तंआसालियासंप्रतिमहोरगानमभिधित्सुराह॥सेकिंतमित्यादि॥एगमंगवरंबिन त्थिदंदशांगुलप्रमाणास्तिहस्तःकुक्षिर्वितस्तिमानोधनुश्चतुर्हस्तंगव्यूतंद्विधनुःसहस्रप्रमाणं॥चत्वारिगव्यूतानियोजनंइदंचवितस्त्यादिउच्छ्रयांगु लापेक्षयाद्रष्टव्यं॥शरीरप्रमाणस्यपरिचिंत्यमानत्वात्तथाल्लीतिनिपातो॥नबहुत्वाभिधायीप्रतिपदंचसंबध्यते तस्यायमर्थः॥संत्येकेकेचनमहोरगायेअंगु लमपिशरीरावगाहनयाभवंतितथासंत्येकाकचनयेअंगुलपृथक्त्वंविद्यतेयेषांतेअंगुलपृथक्त्विका अतोअनेकस्वरादित्वात्कप्रत्ययः तेअपिशरीरावगाह नयाभवंति॥अंगुलपृथक्त्वमानशरीरावगाहनाअपिभवंतीतिभावः॥एवंशेषाण्यपिभावनीयानितेनमित्यादितत्स्वरूपामहोरगास्थलचरविशेषत्वात्‌॥स्थ लेजायंतेस्थलेचजाताःसंतोजलेपिस्थलइवचरंति॥स्थलइवचरंतिस्थलेपिचरंति॥तथाभवस्वाभाव्यात्‌यद्येवंतेकस्मादिहनदृश्यंतेइत्याशंकायामाह॥तेन त्थिइहमित्यादितेयथोक्तस्वरूपामहोरगाइहमानुषक्षेत्रेनसंतिकिंतुबाह्येषुद्वीपसमुद्रेषुभवंतिसमुद्रेष्वपिपर्वतदेवनगर्यादिषुस्थलेषुस्थलत्व त्वात्‌ततइहनदृश्यंते॥येयावण्णेतहप्पगाराइतियेपिचान्येअंगुलदशकादिशरीरावगाहनमानास्तथाप्रकाराःसंतितेपिमहोरगाज्ञातव्याः उपसंहारमाह॥ सेत्तमित्यादितेसमासतोइत्यादिप्राग्वद्भावनीयं॥एतेषामपिदशजातिकुलकोटीनांयोनिप्रमुखाणिशतसहस्राणिएतेषामपिचयतश्शरीरादिषुचिंतनंयत्र स्त्रीपुंनपुंसकानामल्पबहुत्वंचजीवाभिगमटीकातोभावनीयंउरःपरिसर्पवक्तव्यतोपसंहारमाह॥सेत्तंउरःपरिसर्पा अधुनाभुजपरिसर्पानभिधि त्सुराहसेकिंतमित्यादि॥सगमंनवरंयेभुजपरिसर्पविशेषाअप्रतीतास्तेलोकतोऽवसेयाः॥अमीषांचनवजातिकुलकोटीनांयोनिप्रमुखानिशतस

हस्राणि एतेषामपि वचनशरीरादिषु चिंतनं यच्च स्त्रीपुंनपुंसकानामल्पबहुत्वं च जीवाभिगमटीकातो भावनीयं उरःपरिसर्पवक्तव्यतोपसंहारमाह॥ सेत्तं उरःपरि
सर्पा अधुना भुजपरिसर्पानभिधित्सुराह सेकिंतमित्यादि। सुगमं नवरं ये भुजपरिसर्पविशेषा अप्रतीतास्ते लोकतो वसेया॥ अमीषां च नव जातिकुलकोटीनां यो
योनिप्रमुखानि शतसहस्राणि भवंति॥ यत्पुनः शरीरादिषु द्वारेषु चिंतनं स्त्रीपुंनपुंसकानामल्पबहुत्वं तज्जीवाभिगमटीकातो वेदितव्यं॥ सेत्तमित्यादि॥ संप्रति खचरति
र्यग्योनिकानभिधित्सुराह॥ सेकिंतमित्यादि॥ अथ कें ते खचरपंचेंद्रियतैर्यग्योनिकाः सूरिराह॥ खेचरपंचेंद्रियतिर्यग्योनिकाश्चतुर्विधाः प्रज्ञप्तास्तद्यथा चर्मपक्षा
इत्यादि चर्माऽऽत्मकौ पक्षौ चर्मपक्षौ तौ विद्येते येषां ते चर्मपक्षिणः लोमात्मकौ पक्षौ लोमपक्षौ तद्वंतो लोमपक्षिणः॥ तथा गच्छतामपि समुद्गकवत्स्थितौ पक्षौ समुद्ग
पक्षौ तद्वंतः समुद्गपक्षिणः॥ विततौ नित्यमनाकुंचितौ पक्षौ विततपक्षौ॥ तद्वंतो विततपक्षिणः॥ सेकिंतमित्यादि॥ अथ के ते चर्मपक्षिणः चर्मपक्षिणोऽनेकविधा
स्तद्यथा प्रज्ञप्ता वल्गुलीत्यादि नैते भेदा लोकतो वसेयाः॥ जे यावण्णे तहप्पगारा इति येऽपि चान्ये तथाप्रकारा एवंरूपास्ते चर्मपक्षिणो द्रष्टव्याः उपसंहार
माह॥ सेत्तं चम्मपक्खी लोमपक्षिप्रतिपादनार्थमाह सेकिंतमित्यादि॥ एतेऽपि लोमपक्षिभेदा लोकतो वेदितव्याः॥ समुद्गपक्षिप्रतिपादनार्थमाह॥ सेकिंतमित्यादि॥ पा
तसिद्धं॥ एवं विततपक्षिसूत्रमपि नेसमासतो इत्यादि॥ प्राग्वद्भावनीयं तेषां च द्वादशजातिकुलकोटीनां योनिप्रमुखाणि शतसहस्राणि अमीषामपि शरीरा
दिषु द्वारेषु चिंतनं स्त्रीपुंनपुंसकानामल्पबहुत्वं च जीवाभिगमटीकातः प्रतिपत्तव्यमिह तु ग्रंथगौरवभयान्न लिख्यते॥ अधुना विनेयजनान् विनेयजनानुग्र
हाय द्वींद्रियप्रभृतिजातिकुलकोटिशतसहस्रसंख्यासंग्रहणिगाथामाह॥ सत्तट्ठजाइकुलकोडिलक्ख नव अद्धतेरसाइं॥ दसदसयहोंति नवगा तह बारस
चेव बोधव्वा॥ अत्र द्वींद्रियेषु आरभ्य यथासंख्यापदयोजना॥ सा चैवं द्वींद्रियाणां सप्तजातिकुलकोटिलक्षाणि त्रींद्रियाणामष्टौ चतुरिंद्रियाणां नव जलच
रपंचेंद्रियाणामर्द्धत्रयोदशानि चतुष्पदस्थलचरपंचेंद्रियाणां दश उरःपरिसर्पस्थलचरपंचेंद्रियाणां दश भुजपरिसर्पस्थलचरपंचेंद्रियाणां नव
खचरपंचेंद्रियाणां द्वादशेति उपसंहारमाह॥ सेत्तमित्यादि॥ तदेवमुक्ताः पंचेंद्रियतिर्यग्योनिकाः संप्रति मनुष्यानभिधित्सुराह॥ सेकिंतमित्यादि॥ अत्रा २१
पि संमूर्छिममनुष्यविषये प्रवचनबहुमानतः शिष्याणामपि च साक्षाद्भगवतेदमुक्तमिति बहुमानोत्पादार्थं संगांतर्गतमालापकं पठति॥ कहिणंभं

तेइत्यादि सुगमं॥ नवरं सव्वे चेव असुइठाणेसुत्ति अन्यान्यपि यानि कानिचित् मनुष्यसंसर्गवशादशुचीभूतानि स्थानानि तेषु सर्वेष्विति उक्ताः संमूर्छिममनुष्याः अधुना
गर्भव्युत्क्रांतिकमनुष्यप्रतिपादनार्थमाह॥ सेकिंतमित्यादि कर्मभूमगा इति कर्म कृषिवाणिज्यादि मोक्षानुष्ठानं वा कर्मप्रधाना भूमिर्येषां ते कर्मभूमाः॥ आर्षत्वात्स
मासांतो अप्रत्ययः कर्मभूमा एव कर्मभूमकाः॥ एवमकर्मभूमका यथोक्तकर्मविकला भूमिर्येषां ते अकर्मभूमकाः अंतरशब्दो मध्यवाची अंतरे लवणसमुद्रस्य मध्ये द्वीपाः अं
तर्द्वीपास्तत्र भवा अंतरद्वीपगाः अत्र पश्चानुपूर्वीति न्यायख्यापनार्थं प्रथममंतरद्वीपकान् प्रतिपादयति॥ सुगमं नवरं अट्ठावीसतिविधा इति यादृशं वक्ष्यमाणायावदपांतरालायच्चा
मनो हिमवत्पर्वतपूर्वापरदिग्व्यवस्थिता अष्टाविंशतिविधा अंतरद्वीपास्तादृशास्तत्प्रमाणास्तावदपांतरालास्तन्नामानश्च शिखरिपर्वतपूर्वापरदिग्व्यवस्थि
ता अपि न तो त्यंतसदृशतया व्यक्तिभेदमनपेक्ष्यांतरद्वीपा अष्टाविंशतिविधा उक्ताः॥ तानेव नामग्राहमुपदर्शयति तं जहा एगोरूया इत्यादि एते समनुष्या अष्टाविंशतिसं
ख्यत्वात् एते च प्रत्येकं हिमवतिशिखरिणि च॥ तत्र हिमवद्गततया तावद्व्याख्यान्ते॥ इह जंबूद्वीपे भरतस्य हैमवतस्य च क्षेत्रस्य सीमाकारी भूमिनिमग्नपंचविंशतियोज
नशतोच्छ्रयपरिमाणो भरतक्षेत्रापेक्षया द्विगुणविष्कंभो हेममयश्चीनपट्टवर्णो नानावर्णविशिष्टद्युतिमणिनिकरपरिमंडितोभयपार्श्वः सर्वत्र तुल्यविस्तारो गग
नमंडलोल्लेखिरत्नमयैकादशकूटोपशोभितो वज्रमयतलविविधमणिकनकमंडिततटभागदशयोजनावगाढपूर्वपश्चिमयोजनसहस्रायामदक्षिणोत्त
रपंचयोजनशतविस्तारपद्मद्रहशोभितशिरोमध्यभागः सर्वतः कल्पपादपश्रेणिरमणीयः पूर्वापरपर्यंताभ्यां लवणोदार्णवजलसंस्पर्शी हिमवन्नामपर्वतस्तस्य लवणो
दार्णवजलसंस्पर्शादारभ्य पूर्वस्यां पश्चिमायां च दिशि प्रत्येकं द्वे द्वे गजदंताकारे दंष्ट्रे विनिर्गते तत्र ऐशान्यां दिशि या विनिर्गता दंष्ट्रा तस्यां हिमवतः पर्यंतादारभ्य त्री
णि योजनशतानि लवणसमुद्रमवगाह्यात्रांतरे योजनशतत्रयायामविष्कंभः किंचिन्न्यूनैकोनपंचाशदधिकनवयोजनशतपरिरय एकोरुकनामा द्वीपो वर्त्तते अ
यं च धनुःशतप्रमाणविष्कंभया द्विगव्यूतोच्छ्रितया पद्मवरवेदिकया सर्वतः परिमंडितस्तस्याश्च पद्मवरवेदिकाया वर्ण्णको जीवाभिगमटीकायामिव वेदितव्यः
सापि च पद्मवरवेदिका सर्वतः सामस्त्येन वनखंडपरिक्षिप्ता वनाच्च वनखंडस्यायं विशेषः॥ प्रायो बहूनां समानजातीयानां महीरुहाणां समुदायो वनं यथा अ
शोकवनं चंपकवनमिति॥ अनेकजातीयानामुत्तमानां महीरुहाणां समूहो वनखंडः उक्तं च जीवाभिगममूलटीकायां एगजाइएहिं रुक्खेहिं वणं अणेगजाइएहिं उत्तमेहिं

वणसंडेइति॥तस्यवनखंडस्यचक्रवालतयाविष्कंभोदेशोनेद्वेयोजनेपरिक्षेपः॥पद्मवरवेदिकाप्रमाणः।अस्यवनषंडस्यवर्णकप्रतिपादितोस्तिसचातीव
गरीयानितिनोपदर्शितः।केवलंजीवाभिगमटीकातोवसेयः॥तस्यैवहिमवतःपर्वतस्यपर्यंतादारभ्यदक्षिणपूर्वस्यांदिशित्रीणियोजनशतानिलवणसमु
द्रमवगाह्यद्वितीयदंष्ट्रायाउपरिएकोरुकद्वीपप्रमाणआभासिकनामाद्वीपोवर्त्तते।तथातस्यैवहिमवतःपश्चिमायांदिशिपर्यंतादारभ्यदक्षिणपश्चिमायां
नैऋतकोणेइत्यर्थः॥त्रीणियोजनशतानिलवणसमुद्रमवगाह्यदंष्ट्रायाउपरियथोक्तप्रमाणोवैषाणिकनामाद्वीपः॥तथातस्यैवहिमवतःपश्चिमायांदिशि
पर्यंतादारभ्यपश्चिमोत्तरस्यांदिशिवायव्यकोणेइत्यर्थः॥त्रीणियोजनशतानिलवणसमुद्रमध्यदंष्ट्रामतिक्रम्यात्रांतरेपूर्वोक्तप्रमाणोनांगोलिकनामा
द्वीपः॥एवमेतेचत्वारोद्वीपाहिमवतश्चतसृष्वपिविदिक्षुतुल्यप्रमाणाअवतिष्ठंते॥उक्तंच॥चुल्लहिमवंतपुव्वावरेणविदिसासुसागरंतिसए॥गंतूणंतरदीवाति
न्निसएहोंतिविच्छिन्ना॥अउणापन्नवसएकिंतूणंपरिहिनेसिमेनामा॥एगोरुयआभासियवेसाणीचेवनंगूली॥ततएषामेकोरुकादीनांचतुर्णांद्वीपानांपर
तोयथाक्रमंपूर्वोत्तरादिविदिक्षुप्रत्येकंचत्वारियोजनशतान्यतिक्रम्यचतुर्योजनशतायामविष्कंभाः।किंचिन्न्यूनपंचषष्टिसहितद्वादशयोजनशयोजनशतप
रिक्षेपाः॥यथोक्तपद्मवरवेदिकावनखंडमंडितपरिसराःजंबूद्वीपवेदिकांतश्चतुर्योजनशतप्रमाणांतराहयकर्णगजकर्णगोकर्णशकुलीकर्णनामान
श्चत्वारोद्वीपाः।आभासिकस्यपरतोगजकर्णः।वैषाणिकस्यपरतोगोकर्णः॥नांगोलिकस्यपरतःशष्कुलीकर्णइति॥ततएतेषामपिहयकर्णादीनांचतुर्णांद्वीपा
नांपरतःपुनरपियथाक्रमंपूर्वोत्तरादिविदिक्षुप्रत्येकंपंचएवयोजनशतान्यतिक्रम्यपंचयोजनशतमायामविष्कंभाएकाशीत्यधिकपंचदशयोजनश
तपरिक्षेपाःपूर्वोक्तप्रमाणपद्मवरवेदिकावनखंडमंडितबाह्यप्रदेशाजंबूद्वीपवेदिकातःपंचयोजनशतप्रमाणांतराः॥आदर्शमुखमेंढमुखायोमुख
गोमुखनामानश्चत्वारोद्वीपास्तद्यथाहयकर्णस्यपरतआदर्शमुखोगजकर्णस्यपरतआदर्शमुखोगजकर्णस्यपरतोमेंढमुखःगोकर्णस्यपरतोयोमु
खः॥शष्कुलीकर्णस्यपरतोगोमुखः॥इतिएवमग्रेपिभावनाकार्याएतेषामप्यादर्शमुखादीनांचतुर्णांद्वीपानांपरतोभूयोपियथाक्रमंपूर्वोत्तरादिवि २२
दिक्षुप्रत्येकंषट्षट्योजनशतायामविष्कंभाःसप्तनवत्यधिकाष्टादशयोजनशतपरिक्षेपायथोक्तप्रमाणपद्मवरवेदिकावनखंडमंडितपरिसराजंबूद्वीप

वेदिकातःषट्योजनशतप्रमाणांतराअश्वमुखहस्तिमुखसिंहमुखव्याघ्रमुखनामानश्चत्वारोद्वीपाः॥४॥एतेषामप्यश्वमुखादीनांपरतोयथाक्रमंपूर्वोत्तरादिविदिक्षु
प्रत्येकंसप्तसप्तयोजनशतान्यतिक्रम्यसप्तसप्तयोजनशतायामविष्कंभास्त्रयोदशाधिकद्वाविंशतियोजनशतपरिरयाःपूर्वोक्तप्रमाणपद्मवरवेदिकाव
नखंडसमवगूढाजंबूद्वीपवेदिकांतःसप्तयोजनशतप्रमाणांतराअश्वकर्णहरिकर्णाकर्णाप्रावरणनामानश्चत्वारोद्वीपास्ततएतेषामश्वकर्णादीनांचतु
र्णांद्वीपानांपरतोयथाक्रमंपूर्वो- त्तरादिविदिक्षुप्रत्येकमष्टावष्टौयोजनशतान्यतिक्रम्याष्टयोजनशतायामविष्कंभाएकोनत्रिंशतियोजनशतपरिक्षेपाय
थोक्तप्रमाणपद्मवरवेदिकातोष्टयोजनशतप्रमाणांतराउल्कामुखमेघमुखविद्युन्मुखविद्युद्दंताभिधानाअष्टौद्वीपास्ततोअमीषामप्युल्कामुखादीनांच
तुर्णांद्वीपानांपरतोयथाक्रमंपूर्वोत्तरादिविदिक्षुप्रत्येकंनवयोजनशतान्यतिक्रम्यनवनवयोजनशतायामविष्कंभाः॥पंचचत्वारिंशदधिकाष्टाविंशतियोज
नशतपरिक्षेपा॥यथोक्तप्रमाणपद्मवरवेदिकावनखंडसमवगूढाजंबूद्वीपवेदिकातोनवयोजनशतप्रमाणांतराघनदंतलष्टदंतगूढदंतशुद्धदंतनामानश्च
त्वारोद्वीपा॥एवमेतेहिमवतिपर्वतेचतसृषुविदिक्षुव्यवस्थिताः॥सर्वसंख्ययाअष्टाविंशतिः।एवंहिमवत्तुल्यवर्णप्रमाणेपद्मह्रदप्रमाणायामविष्कंभावगाह
पुंडरीकह्रदोपशोभितेशिखरिण्यपिपर्वतेलवणादार्णवजलसंस्पर्शादारभ्ययथोक्तप्रमाणांतराःचतसृषुविदिक्षुव्यवस्थिताएकोरुकादिनामानोतुल्यायां
तरालायामविष्कंभाअष्टाविंशतिसंख्याद्वीपावक्तव्याः।सर्वसंख्ययाषट्पंचाशदंतरद्वीपाएतद्गतामनुष्याअप्येतन्नामानउपचारात्भवंतिचतात्स्थ्यात्तद्व्यप
देशोयथापंचालदेशनिवासिनःपुरुषाःपंचालाइतितेचमनुष्यावज्रर्षभनाराचसंहननिनःकंककुक्षिपरिणामाः॥अनुलोमवायुवेगाः॥समचतुरस्र
संस्थानास्तद्यथासुप्रतिष्ठितकूर्मचारुचरणाःसुकुमालश्लक्ष्णाविरलरोमकुरुविंदवृत्तजंघायुगलाःनिगूढसुबद्धसं धिजानुप्रदेशाःकनिकरसमवृ
त्तोरुजः॥कंठीरवसदृशकटिप्रदेशाःशक्रायुधसमध्यभागाःप्रदक्षिणावर्त्तनाभिमंडलाः॥श्रीवत्सलांछितविशालमांसलवक्षस्थलाःपुरपरि
घानुकारिदीर्घबाहवःमुश्लिष्टमणिबंधारक्तोत्पलपत्रामुकारिशोणिमपाणिपादतलाः॥चतुरंगुलप्रमाणसमवृत्तकंबुग्रीवाः॥शारदशशांक
सौमवदनाःछत्राकारशिरसोस्फुटितस्निग्धकांतिश्लक्ष्णमूर्द्धनाःकमंडलुकलशयूपवापीध्वजपताकासौवस्तिकयवमत्स्यमकरकूर्मरथव
रस्थालांशुकाष्टापदांकुशसुप्रतिष्ठकमयूरश्रीदामाभिषेकतोरणमिदिनिजलधिवरनादर्शपर्वतगजवृषभसिंहचामररूपप्रशस्तोत्तमद्वात्रिं

शह्लक्षणधराः स्त्रियोपिसुजातसर्वांगसुंदर्यः समस्तमहिलागुणसमन्विताः संहितांगुलिदलपद्मवरसुकुमारकूर्मसंस्थानमनोहरचरणाः रोमरहितप्रश
स्तलक्षणोपेतजंघायुगलानिगूढमांसलजानुप्रदेशाः कदलिस्तंभनिभसंहतसुकुमारपीवरोरुकाः॥ वदनायामप्रमाणत्रिगुणमांसलविशालजघनधारि
ण्यः स्निग्धकांतिसुविभक्तश्लक्ष्णरोमराजयः प्रदक्षिणावर्त्ततरंगभंगुरनाभिमंडलाः॥ प्रशस्तलक्षणोपेतकुक्षयः संगतपार्श्वाः॥ कनककलशोपमसंहिता
त्युन्नतरक्ताकृतिपीवरपयोधराः॥ सुकुमारबाहुलतिकाः सौवस्तिकशंखचक्राद्याकृतिरेखालंकृतपाणिपादतलाः॥ वदनत्रिभागोन्नितमांसलकं
बुग्रीवाः॥ प्रशस्तलक्षणोपेतमांसलहनुविभागाः॥ दाडिमपुष्पानुकारिशोणिमाधरोष्ठाः॥ रक्तोत्पलतालुजिह्वाः विकसितकुवलयपत्रायतकांतलोच
नाः॥ आरोपितचापपृष्ठाकृतिसुसंगतभ्रूलताकः प्रमाणोपपन्नललाटफलकाः सुस्निग्धकांतश्लक्ष्णशिरोरुहाः पुरुषेभ्यः किंचिदूनोच्छ्रयाः स्वभावत
उदारशृंगारचारुवेषाः प्रकृत्यैवहसितभणितिविलासविषयपरमनैपुण्योपेतास्तथामनुष्यामनुष्यश्चस्वभावएवसुरभिवदनाः॥ प्रतनुक्रोधमानमायालो
भाः संतोषिणोभाः॥ संतोषिणोनैरुत्सुक्यामार्दवार्जवसंपन्नाः॥ सत्यपिमनोहारिणिमणिकनकमौक्तिकादौममत्वकारणिममत्वाभिनिवेशरहिताः
सर्वथाऽपगतवैरानुबंधाहस्त्यश्वकरभगोमहिषादिसद्भावेपितत्परिभोगपराङ्मुखाः॥ पादविहारिणोज्वरादिरोगयक्षभूतपिशाचादिग्रहमारिव्यस
नोपनिपातादिकलापरस्परप्रेष्यप्रेष्यकभावरहितत्वादहमिंद्राः तेषांपृष्ठकरंडकानिचतुःषष्टिसंख्याकानिचतुर्थातिक्रमेवाहारग्रहणं आहारोपि
चनशाल्यादिधान्यनिष्पन्नंकिंतुपृथिवीमृत्तिकाकल्पद्रुमाणांपुष्पफलानिचतथाहिजायांतरवलुतत्रापिविश्रसातएवशालिगोधूममाषमुद्गादीनि
धान्यानिमनुष्याणामुपभोगंगच्छंति॥ यातुपृथिवीसाशर्करातोप्यनंतगुणमाधुर्यायश्चकल्पद्रुमपुष्पफलनामाश्वादः॥ सचक्रवर्त्तिभोजनादप्यधि
कगुणः॥ तथाचोक्तं॥ तेसिणंभंतेपुप्फफलाणंकेरिसेआसाएपन्नत्तेगोयमा॥ सेजहानामएरन्नोचाउरंतस्सचक्कवट्टिस्सकल्लाणेभोयणंजाएसयसहस्स
निप्फन्नेवन्नेणउववेए गंधेणउववेए रसेणउववेए॥ फासेणउववेए आसायणिज्जेमयणिज्जेविंहणिज्जेसव्विंदियगायपल्हायणिज्जेआसाएणंपन्नत्ते॥ एत्तोएठतराए २३
चेवपन्नत्तेतत्तपृथिवीकल्पद्रुमफलानितेषामाहारः॥ तथाभूतंवाहारमाहार्यप्रासादादिसंस्थानायेग्रहाकाराः कल्पद्रुमास्तेषुयथासुख
मवतिष्ठंते॥ नचतत्रक्षेत्रेदंशकयूकामत्कुणमक्षिकादयः शरीरोपद्रवकारिणोजंतवउपजायंतेयेपिजायंतेभुजंगव्याघ्रसिंहादयः॥ तेपिमनुष्याणां

नबाधायैप्रभवंतिनापितेपरस्परंहिंसकभावेवर्त्तंते॥ क्षेत्रानुभावतोरौद्रभावरहितत्वात्॥ मनुष्ययुगलानिचपर्यवमानसमयेयुगलंप्रसूयतेतच्चयुगलमेकोना
शीतिदिनानिपालयंतितेषांशरीरोच्छ्रयोष्टौधनुःशतानिपल्योपमासंख्येयभागप्रमायुरुक्तंच॥ अंतरदीवेसुनराधणुसयअड्डूसियासयामुइया॥ पा
लिंतिमिहुणधम्मंपल्लस्सअसंखभागाउ॥ चउसठीपिट्ठकरंडयाणमणुयाणंतेसिंमाहारो॥ भत्तस्सचउत्थस्सयगुणसीईदिणाणिपालयास्तोककषा
यतयास्तोकप्रेमानुबंधतयाचतेमृत्वादिवमुपसर्प्पंति॥ मरणंचतेषांजृंभकाकाशक्षुतादिमात्रव्यापारःसरंभवतिनशरीरपीडापुरस्सरमिति
तदेवमुक्ताअंतर्द्वीपगाः॥ सांप्रतमकर्मभूमिकप्रतिपादनार्थमाह॥ सेकिंतमित्यादि॥ अथकेतेअकर्मभूमिकाः सूरिराह॥ अकर्मभूमिकास्त्रिंशद्वि
धाः पंचमास्त्रिंशद्विधत्वंक्षेत्रभेदात्॥ तथाचाह॥ तंजहा॥ पंचहिंहेमवएहिंइत्यादि॥ पंचभिर्हैमवतैः पंचभिर्हैरण्यवतैः पंचभिर्हरिवर्षैः पंचभीरम्यक
वर्षैः॥ पंचभिर्देवकुरुभिः पंचभिरुत्तरकुरुभिर्विद्यमानास्त्रिंशद्विधाभवंतिषण्णांपंचानांत्रिंशत्संख्यात्मकत्वात्तत्रपंचसुहैमवतेषुपंचसुहैरण्यव
तेषुमनुष्यागव्यूतप्रमाणशरीरोच्छ्रयाः पल्योपमायुषोवज्रर्षभनाराचसंहननाः॥ समचतुरस्रसंस्थानाः चतुःषष्टिपृष्ठकरंडकाश्चतुर्थातिक्रमभोजि
नः॥ एकोनाशीतिदिनान्यपत्यपालकाः॥ उक्तंच॥ गाउयमुच्चापलिउवमाउणोवज्जरिसहसंघयणा॥ हेमवएरन्नवएअहमिंदनरामिहुणवासी
चउसठीपिट्ठकरंडयाणमणुयाणतेसिमाहारो॥ भत्तस्सचउत्थस्सयगुणसियदिणवच्चपालणया॥ पंचसुहरिवर्षेषुपंचसुरम्यकेषुद्विपल्योपमा
युषोद्विगव्यूतप्रमाणशरीरोच्छ्रयावज्रर्षभनाराचसंहननाः समचतुरस्रसंस्थानाः षष्ठाक्रातिक्रमाहारग्राहिणोऽष्टाविंशत्यधिकशतसंख्यपृष्ठक
रंडकाश्चतुःषष्टिदिनान्यपत्यपालकाः॥ आहच॥ हरिवासरम्मएसुंआउपमाणंसरीरमुस्सेहो॥ पलिउवमाणिदोन्निउदोन्निउकोसियाभणिया
छट्ठस्सयआहारोचउसठीदिणाणिपालणातेसिं॥ पिट्ठकरंडाणसयंअठावीसंमुणेयव्वं॥ पंचसुदेवकुरुषुत्रिपल्योपमायुषोगव्यूतत्रयमाण
शरीरोच्छ्रयाः ससमचतुरस्रसंस्थानावज्रर्षभसंहनिनः॥ षट्पंचाशदधिकशतद्वयप्रमाणपृष्ठकरंडकाः अष्टमभक्तातिक्रमाहारिणएकोनपंचा
शद्दिनान्यपत्यपालकास्तथाचोक्तं॥ दोसुविकुरासुमणुयातिपल्लपरमाउणोतिकोसुच्चा॥ पिट्ठकरंडसयाइंदोछप्पन्नाइंमणुयाइणं॥ सुसम
मसुसमाणुभावंअणुभवमाणाणवच्चगोवणया॥ अउणापन्नदिणाइंअट्ठमभत्तस्सआहारो॥ एतेषुचसर्वेष्वपिक्षेत्रेष्वंतरद्वीपेष्विवमनुष्याणा

मुपभोगाः कल्पद्रुमसंपादितानवरमंतरद्वीपापेक्षयापंचसुहेमवतेषुपंचसुहैरण्यवतेषुमनुष्याणामुत्थानबलवीर्यादिकंकल्पपादपफलानामास्वादोभूम
माधुर्यमित्येवमादिकाभावाःपर्यायानधिकृत्यानंतगुणाद्रष्टव्याः तेभ्योपिपंचसुहरिवर्षेषुपंचसुरम्यकवर्षेषुअनंतगुणास्तेभ्योपिपंचसुदेवकुरुषुपंचसूत्त
रकुरुष्वनंतगुणाः॥ तदेवमुक्ताअकर्मभूमकाः संप्रतिकर्मभूमकप्रतिपादनार्थमाह॥ ६७॥ सेकिंतमित्यादि अथकेतेकर्मभूमकाःसूरिराह॥ कर्मभूम
काःपंचदशविधाःप्रज्ञप्तास्तच्चपंचदशविधत्वंक्षेत्रभेदात्तथाचाह॥ पंचहिंभरहेहिंइत्यादिपंचभिर्भरतैः पंचभिरैरावतैः पंचभिर्महाविदेहैर्भिद्यमानाः
पंचदशविधाभवंति॥ तेचपंचदशविधाअपिसमासतोद्विविधाःप्रज्ञप्तास्तद्यथा आर्याम्लेच्छाश्च॥ तत्राराद्धेयधर्मेभ्योयाताःप्राप्ताउपादेयधर्मैरित्यार्याः पृ
षोदरादयइतिरूपनिष्पत्तिर्म्लेच्छा अव्यक्तभाषासमाचाराःम्लेछअव्यक्तायांवाचिइतिवचनभाषाग्रहणंचोपलक्षणंतेनशिष्टासम्मतसकलव्यवहाराम्ले
च्छाइतिप्रतिपत्तव्यं॥ तत्राल्पवक्तव्यत्वात्म्लेच्छानाह॥ ६८॥ सेकिंतमित्यादि॥ अथकेतेम्लेच्छा मिलक्खू इतिनिर्देशः प्राकृतत्वादार्षत्वाच्चसूरिराह म्लेच्छाअनेकविधाः
प्रज्ञप्तास्तच्चानेकविधत्वंशकयवनबर्बरादिदेशभेदात्तथाचाह॥ तंजहा॥ सगेत्यादिशकदेशनिवासिनःशकायवनदेशनिवासिनोयवनाएवंसर्वत्रनव
रममीनानादेशालोकतोविज्ञेयाः॥ आर्यप्रतिपादनार्थमाह॥ सेकिंतमित्यादिसुगमंनवरंरायगिहमगहेत्यादिराजगृहंनगरंमगधाजनपदः एवंसर्व
त्राप्यक्षरसंस्कारोविधेयःभावार्थस्त्वयंमगधेषुजनपदेराजगृहंनगरं १ अंगेषुचंपा २ वंगेषुताम्रलिप्ती ३ कलिंगेषुकांचनपुरं ४ काशीषुवाणार
सी ५ कोशलासुसाकेतं ६ कुरुषुगजपुरं ७ कुशार्त्तेषुसौरिकं ८ पांचालेषुकांपिल्यं ९ जंगलेष्वहिछत्रा १० सुराष्ट्रेषुद्वारवती ११ विदेहेषु
मिथिला १२ वत्सेषुकोशांबी १३ शांडिल्येषुनंदीपुरं १४ मलयेषुभद्रिलपुरं १५ वत्सेषुवैराटं १६ वरणेषुअच्छापुरी १७ दशार्णेषुमृत्तिकावती
१८ चेदिषुशौक्तिकावती १९ वीतभयंसिंधुषु २० सौवीरेषुमथुरा २१ सूरसेनेषुपापा २२ भंगेषुमासपुरिवट्टा २३ कुणालेषुश्रावस्ती २४ ला
टासुकोटीवर्षं २५ श्वेतनगरीकेकयजनपदस्यार्द्धं॥ एतावदर्द्धषड्विंशतिजनपदस्यार्द्धं॥ एतावदर्द्धषड्विंशतिजनपदात्मकंक्षेत्रमार्यंभणितंकुतइत्याह २४
इत्थुप्पत्तिइत्यादियस्मादत्रएतेषु अर्द्धषड्विंशतिसंख्येषुजनपदेषुउत्पत्तिर्जिनानांतीर्थकराणांबलदेवानांकृष्णानांवासुदेवानां॥ ततआर्यमेतेनक्षेत्र
तयार्यानार्यव्यवस्थादर्शिता॥ यत्रतीर्थकरादीनामुत्पत्तिस्तदार्यंशेषमनार्यमिति॥ उक्ताःक्षेत्रार्याःसंप्रतिपादनार्थमाह सेकिंतमित्यादिसुगमंनवरंयद्यपिशा

स्त्रांतरेष्वनेकाजातयउपवर्ण्यंतेतथापिलोकेएताएवअम्बष्ठकलंदवैदेहवेदगहरितसुचुणाख्याःषड्जातयो॥ अर्चनीयाजातयःप्रसिद्धास्तएताभिर्जातिभिरुप
पेताजात्यार्यानशेषजातिभिः तुणागाइत्यादितुण्णाकाःसूच्याजीविनः तंतुवायाःकुविंदाःपट्टकाराःपट्टकूलकुविंदाः देयडाइतिकाशारूढाःपिच्छिकाच्छवि
काकटादिकाराः॥ कठपाउयाराकाष्ठपादुकाकाराः एवंमुंजपाउयाराछत्रकाराः॥ एवंशेषाण्यपिपदानिभावनीयानि॥ ६९॥ बंभीजवणादियादुत्या
दिब्राह्मीयवनानीत्यादयोलिपिभेदाः गुरुसंप्रदायावेदितव्याः॥ ७०॥ उक्ताभाषार्याःसंप्रतिज्ञानार्यानाह॥ सेकिंतमित्यादि॥ सुगमंदर्शनार्यानाह
सेकिंतमित्यादि॥ सुगमंदर्शनार्यानाह॥ सेकिंतमित्यादि॥ अथकेतेदर्शनार्याःसूरिराह॥ दर्शनार्याद्विविधाःप्रज्ञप्तास्तद्यथा॥ सरागदर्शनार्याश्च॥ तत्रस
रागःसकषायोयद्दर्शनंतेनार्याः॥ सरागदर्शनार्याः॥ वीतरागदर्शनार्याः॥ वीतरागमुपशांतकषायंक्षीणकषायंवायद्दर्शनंतेनार्याःवीतरागदर्शना
र्याः॥ तत्रसरागदर्शनार्यप्रतिपादनार्थमाह॥ सेकिंतमित्यादि॥ अथकेतेसरागदर्शनार्याःसूरिराह सरागदर्शनार्यादशविधाःप्रज्ञप्तास्तद्यथा॥ निसग्गुव
एसेत्यादि॥ अत्ररुचिशब्दःप्रत्येकमभिसंबध्यतेततोनिसर्गरुचिरितिद्रष्टव्यंतत्रनिसर्गःस्वभावस्तेनरुचिर्जिनप्रणीततत्वाभिलाषरूपायस्यसनिसर्गरु
चिःउपदेशोगुर्वादिनावस्तुतत्वकथनंतेनरुचिःस्वरूपायस्यसउपदेशरुचिः आज्ञासर्वज्ञवचनात्मिकातयारुचिरभिलाषोयस्यसआज्ञारुचिः जिनाज्ञैव
गेतत्वंनशेषंयुक्तिजातमितियोभिमन्यतेसआज्ञारुचिरितिभावार्थः॥ सुत्तबीयरुइमेवत्ति॥ अत्रापिरुचिशब्दःप्रत्येकमभिसंबध्यतेसूत्रमाचारादिकमंगप्रवि
ष्टंअंगबाह्यंवाआवश्यकदशवैकालिकेनरुचिर्यस्यसतथासूत्रमाचारादिकमंगप्रविष्टमंगबाह्यंवावश्यकादिकमधीयानोयःसम्यक्त्वमवगाहते प्रस
न्नप्रसन्नतराध्यवसायश्चभवतिससूत्ररुचिरितिभावार्थः॥ बीजमिवबीजंयदेकमप्यनेकार्थप्रबोधोत्पादकंवचस्तेनरुचिर्यस्यसबीजरुचिः अनयोश्च
पदयोःसमाहारोद्वंद्वः तेननपुंसकनिर्देशः इतिसमुच्चये अहिगमवित्थारमरुइत्ति अत्रापिरुचिशब्दस्यप्रत्येकमभिसंबंधो विगमरुचिर्विस्ताररुचिश्च॥
तत्राधिगमोविशिष्टंपरिज्ञानंतेनरुचिर्यस्यासावधिगमरुचिः॥ विस्तारोव्यासःसकलद्वादशांगस्यनयैःपर्यालोचनमितिभावः॥ तेनोपबृंहि
तारुचिर्यस्यसविस्ताररुचिः किरियासंखेवधम्मरुचित्ति रुचिशब्दस्यात्रापिप्रत्येकंसंबंधात्क्रियारुचिः संक्षेपरुचिर्धर्मरुचिरितिद्रष्टव्यंतत्रक्रिया

संयमकसंयमानुष्ठानं तत्ररुचिर्यस्यसक्रियारुचिः संक्षेपः संग्रहस्तत्ररुचिर्यस्यविस्तरार्थापरिज्ञानात्ससंक्षेपरुचिः॥धर्मोअस्तिकायधर्मः श्रुतधर्मादौवा
रुचिर्यस्यसधर्मरुचिरितिगाथासंक्षेपार्थः॥व्याख्यार्थंतुसूत्रकृदेवस्वतं आह।सूयग्रेणंइतिभाद पदानांनिर्देशस्तोयमर्थः॥भूतार्थत्वेनसद्भूताअमी प
दार्थाइत्येवंरूपेणयस्याधिगताः परिज्ञाताजीवाअजीवापुण्यंपापमाश्रवः॥संवरश्चशब्दाद्बंधादयश्चकथमधिगताइत्याह।सहसमुइयाइति।आर्ष
त्वाद्विभक्तिलोपाच्चसहसम्मत्यासहात्मनायासंगतामतिःसासहसम्मतिस्तयातिसर्गःभवतिपरोपदेशनिरपेक्षयाजातिस्मरणादिरूपयाइत्याह॥नकेवल
मधिगताःकिंतुतान्जीवादीन्पदार्थान्रोचयतेतुरोचयतितत्वरूपतयाआत्मसात्परिणमयतीतिभावः॥एषनिसर्गोनिसर्गरुचिर्विज्ञेयइतिसं
बः॥अमुमेवार्थंस्पष्टतरमभिधित्सुराह॥जोजिणदिठभावेइत्यादियोजिनदृष्टान्भावान्द्रव्यक्षेत्रकालभावैदतोनामादिभेदतोवाचतुर्विधान्स्वयमे
वोपदेशनिरपेक्षःश्रद्धातिकोनाद्देवंनश्रद्धातितत्राह एवमेवएतेनजीवादियथाजिनैर्दृष्टंनान्यथेतिचःसमुच्चयेएषनिसर्गरुचिरितिज्ञातव्यः॥उपदे
शरुचिमाह॥एएचेवउइत्यादि॥एतानेवजीवादीन्भावान्यःपरेणपद्मस्थेनजिनेनवाउपदिष्टान्श्रद्दधातिएषउपदेशरुचिरितिज्ञातव्यः॥आज्ञारुचिमाह
जोहेउमयाणंतोइत्यादियोहेतुंविवक्षितार्थगमकमजानानःप्रवचनमाज्ञयैवतुशब्दएवकारार्थः॥रोचयतिरोचतेकथमित्याह॥एवमेतन्प्रवचनो
क्तमर्थजातंनान्यथेतिएषआज्ञारुचिर्नामसत्वमाह॥जोसुत्तमित्यादि॥यःसूत्रमंगप्रविष्टमंगबाह्यंवाअधीयानस्तेनश्रुतेनांगप्रविष्टेनांगबाह्ये
नवासम्यक्त्वमवगाहतेससूत्ररुचिरितिज्ञातव्यः॥बीजरुचिमाह॥एगपएणेगाईइत्यादिएकेनपदेनतकमानजीवादिनाअनेकानिपदानिप्राकृत
त्वेनभक्तिव्यत्ययादनेकेषुजीवादिषुःसम्यक्त्वमितिधर्मधर्मिणोरभेदोपचारात्सम्यक्त्ववान्आत्माप्रसरतितुशब्दोवधारणार्थःप्रसर
त्येवकथमित्याह॥उदकइवतैलबिंदुःकिमुक्तंभवतियथाउदकैकदेशगतोपितैलबिंदुःसमस्तमुदकमाक्रामति॥तथैकदेशोत्पन्नसचिरप्या
त्मातथाविधक्षयोपशमभावादशेषेषुतत्वेषुरुचिमान्भवतिएवंविधोबीजरुचिरितिज्ञातव्यः॥अधिगमरुचिमाहसोहोइइत्यादि॥यस्यश्रुतज्ञा २५
नमर्थतोदृष्टमेकादशांगानिप्रकीर्णकमित्यत्रजात्यैकवचनंततोयमर्थःप्रकीर्णकानिउत्तराध्ययनादीनिदृष्टिवादश्चशब्दादुपांगानिवसभवत्य

धिगमरुचिःविस्ताररुचिमाह॥दव्वाणेत्यादि॥द्रव्याणांधर्मास्तिकायादीनामशेषाणामपिसर्वेभावाःपर्यायायथायोगंसर्वप्रमाणैःप्रत्यक्षादिभिःसर्वैश्चनयवि
धिभिर्नैगमादिनयप्रकारैरुपलब्धाः सविस्ताररुचिरितिज्ञातव्यः॥सर्ववस्तुपर्यायप्रपंचावगमेनतस्यारुचेरतिविमलरूपतयाभावात्क्रियारुचिमाह
दंसणेत्यादि॥दर्शनंचज्ञानंचचारित्रंचदर्शनज्ञानचारित्रंसमाहारोद्वंद्वस्तस्मिन्तथातपसिविनयेचतथासर्वासुसमितिषुईर्यासमित्यादिषुसर्वा
सुचगुप्तिप्रभृतिषुयःक्रियाभावरुचिः॥किमुक्तंभवतियस्यभावतोदर्शनाद्याचारानुष्ठानेरुचिरस्तिसखलुक्रियारुचिर्नामसंक्षेपरुचिमाह॥७॥
अणभिग्गहिएत्यादि॥नअभिगृहीतानाकुत्सितादृष्टिर्येनासावनभिगृहीतकुदृष्टिरविशारदःप्रवचनेजिनप्रणीतेशेषेषुचकपिलादिप्रणीतेषु
प्रवचनेषुअनभिगृहीतोनविद्यतेआभिमुख्येनउपादेयतयागृहीतंग्रहणमस्येत्य नभिगृहीतकुदृष्टित्वेनेनपरदर्शनांतरपरिग्रहःप्रति
षिद्धोऽनेनपरदर्शनपरिज्ञानमात्रमपिनिषिद्धमितिविशेषाः।सइ थंभूतंसंक्षेपरुचिरितिज्ञातव्यः॥धर्मरुचिमाह॥जोअत्थिकायेत्यादि
यःखलुजीवोऽस्तिकायानांधर्मास्तिकायादीधर्मंसंगपसंभकत्वादिरूपंस्वभावंश्रुतधर्ममेवाचिचधर्मंचजिनाभिहितंश्रद्धातिसधर्मरुचि
रिज्ञातव्यः॥तदेवंनिसर्गा द्युपाधिभेदात्दशधारुचिरूपंदर्शनमुक्तंसंप्रतियैर्लिंगैरिदमुत्पन्नमस्तीतिनिश्चीयातनानिलिंगान्युपदर्शयन्ना
ह॥७॥परमत्थसंथवोइत्यादिपरमश्चेतात्विकाश्चतेअर्थाश्चजीवादयस्तेषुसंस्तवःपरिचयस्तात्पर्येणबहुमानपुरःसरंजीवादिपदार्थावगमायाभ्या
सइतियावत्वाशब्दःसमुच्चयेसुदृष्टसम्यगालादृष्टःपरमार्थोजीवादयोयैस्तेसुदृष्टपरमार्थास्तेषांसेवनंपर्युपास्तिःसुदृष्टपरमार्थसेवनंरूपीतंप्रा
कृतत्वात्वाशब्दोऽनुक्तसमुच्चयेयथाशक्तितद्वैयावृत्यप्रवृत्तिश्च अपिसमुच्चयेतथावावन्नकुदंसणन्निदर्शनशब्दःप्रत्येकमपिसंबध्यते।व्याप
न्नदर्शनानिन्हवादयःतथाकुत्सितंदर्शनंयेषांतेकुत्सितदर्शनंयेषांवर्जनंव्यापन्नकुदर्शनवर्जनंअत्रापिस्त्रीत्वंप्राकृतत्वात्सम्मत्तसद्दहणा
इति॥सम्यक्त्वश्रद्धानमेतैःपरमार्थसंस्तवादिभिःसम्यक्त्वमस्मास्तीतिश्रद्धायतेइत्यर्थः॥अस्यचदर्शनस्यातिचाराआशेतेचसम्यक्परि
पालनीयास्तदतिक्रमंदर्शनस्याप्यतिक्रमभावात्अतस्तान्उपदर्शयितुमाह॥निस्संकियइत्यादि॥शंकनंशंकितंदेशशंकासर्वशंकाचेत्य

र्थः॥निर्गतंशंकितंयस्मादसौनिःशंकितोदेशसर्वशंकारहितइतिभावार्थस्तत्रदेशशंकासमानेजीवत्वेकथमेकोभव्यःपरस्त्वभव्यइतिसर्वशंकाप्राकृतनिबं
धनत्वात्सकल - वेदंप्रवचनंपरिकल्पितंभविष्यतीतितिनचेयंदेशशंकासर्वकावायुक्तायतइहद्विविधाभावास्तद्यथाहेतुग्राह्याअहेतुग्राह्याश्चतत्रहेतु
ग्राह्याअहेतुग्राह्याश्चतत्रहेतुग्राह्याजीवास्तित्वादयस्तत्साधकप्रमाणसद्भावात्अहेतुग्राह्यास्त्वभव्यत्वादयःअस्मदाद्यपेक्षयातत्साधकहेतूनामसं
भवत्वात्प्रकृष्टज्ञानगोचरत्वात्तद्धेतूनामिति॥प्राकृतोपिचनिबंधः॥प्रवचनस्यबालाद्यनुग्रहार्थः॥उक्तंच॥बालस्त्रीमूढमूर्खाणांनृणांचारित्रकांक्षि
णां॥अनुग्रहार्थंतत्वज्ञैःसिद्धांतःप्राकृतःस्मृतः॥अपिचप्राकृतोपिनिबंधःप्रवचनस्यदृष्टेष्टाविरोधीततःकथमवांतरपरिकल्पनाशंका॥सर्वज्ञमं
तरेणान्यस्यदृष्टेष्टाविरोधिवचनासंभवात्॥निःशंकितइतिजीवएवार्हच्छासनप्रतिपन्नोदर्शनाचरणात्ततःप्राधान्यविवक्षायांदर्शनाद्व्यते
एतेनदर्शनदर्शनिनाःकथंचिद्भेदमाह॥एकांततोभेदेतुदर्शनिनइवतत्फलायोगतोमोक्षाभावप्रसंगःएवमुत्तरेष्वपित्रिषुपदेषुभावनाकार्या॥
तथानिःकांक्षितंयस्मादसौनिःकांक्षितोनिशासर्वकांक्षारहितइत्यर्थः॥तत्रदेशकांक्षाएकंदिगंबरादिदर्शनमपिकांक्षतिसर्वकांक्षासर्वाण्यवदर्श
नानिशोभनानीत्येवमनुचिंतनंद्वयंचद्विधाप्ययुक्ताशेषदर्शनेषुषट्जीवनिकायपीडायाअसत्प्ररूपणायाश्चभावात्तथाविचिकित्सामतिवि
भ्रमःफलंप्रतिसंशयइतियावत्तन्निर्गताविचिकित्सायस्मादसौनिर्विचिकित्सः॥साधेवजिनशासनंकिंतुप्रवृत्तस्यममेतोममास्मात्फलंभविष्यतिनवा
क्रियाःकृषीवलादिषुउभयथाप्युपलब्धिरितिविकल्परहितः॥नह्यविकलउपायउपेयवस्तुप्रापकोनभवतीतिसंज्ञातनिश्चयोनिर्विचिकित्सइ
तिभावः॥एतावतांशेनतुनिःशंकितादिवत्॥यद्वानिविदुगुच्छेतिनिर्विदुगुप्सः॥साधुजगुप्सारहितइत्यर्थः॥उदाहरणंचविदुगुप्सायांश्रावक
दुहिता॥तथाअमूढदिठियत्तिचालतयश्चितपोविद्यातिशयदर्शनेमूढास्वाभावाच्चलिताहष्टिःसम्यग्दर्शनरूपायस्यासा^वमूढदृष्टिः॥अत्रोदाह
रणं॥सुलसाश्राविकासाह्यंबडपरिव्राजकसमृद्धिरूपलाभायापिनसम्मोहंगतात्तदेवंगुणिप्रधानआचारउक्तःसंप्रतिगुणप्रधानमाहउववूहेत्या २६.
दि॥उपबृंहणंचस्थिरीकरणंचउपबृंहणस्थिरीकरणेतत्रोपकरणोपबृंहणंनामस^{मान} धार्मिकाणांसद्गुणप्रशंसनेनतद्वृद्धिकरणंधर्मादिर्षीद

तांतेषैवस्थापनंवात्सल्यंचप्रभावनाचवात्सल्यप्रभावनेतत्रवात्सल्यंसमानधार्मिकाणांप्रीत्याउपकारकरणंप्रभावनाधर्मकथादिभिस्तीर्थप्रख्याप
ना॥अयंचगुणप्रधानोनिर्देशोगुणिनोःकथंचिद्भेदख्यापनार्थः॥अन्यथाएकांताभेदेगुणनिवृत्तौगुणिनोपिनिवृत्तेःशून्यतापत्तिः॥एतेअष्टौदर्शनाचा
राः॥तदेवमुक्ताःसरागदर्शनभेदास्तदभिधानाच्चाभिहिताःसरागदर्शनार्यादिभेदानाह॥से किंतमित्यादि॥सुगमंयावत्॥अहवाचरित्तारियापंच
विहापन्नत्ता॥तंजहा॥सामाइयचरित्तारियाइत्यादि॥पढमसमयइतियेनेषामेवोपशांतकषायत्वादीनांविशेषाणांप्रथमेसमयेवर्ततेतेप्रथमसम
यास्ततोद्वितीयादिषुसमयेषुवर्त्तमानाअप्रथमसमयाःतथाचरमसमयअचरमसमयइति॥येषामेवोपशांतकषायत्वादीनांविशेषाणामंतसमयेवर्त्तते॥
चरमसमयाः॥येततोर्वाक्द्विचरमद्विचरमादिषुसमयेषुवर्त्तंतेअचरमाःसामायिकादीनांचचारित्राणांस्वरूपमिदंसमोरागद्वेषरहितत्वादयोगमनंस
मायः॥एषचान्यासामपिसाधुक्रियाणामुपलक्षणंसर्वासामपिसाधुक्रियाणांरागद्वेषरहितत्वात्॥समयेणनिर्वृत्तंसामायिकंसामायिकंयद्वासमानं
ज्ञानदर्शनचारित्राणांमायोलाभःसमायः॥समायएवसामायिकंविनयादिसूत्रेणतयविनयादिभ्यष्ठइत्यनेनस्वार्थिकइकणतद्यसर्वसावद्यविरतिरूपयद्यपि
चसर्वमपिचारित्रविशेषतःसामायिकंतथापिछेदादिविशेषैर्विशिष्यमाणमर्थतःशब्दांतरतश्चनानात्वंभजतेप्रथमंपुनरविशेषणात्सामान्यशब्दएवावतिष्ठ
ते॥सामायिकमितितच्चद्विधाइत्वरंयावत्कथिकंचतत्रेत्वरंभरतैरावतेषुप्रथमपश्चिमतीर्थकरतीर्थेष्वनारोपितमहाव्रतस्यशैक्षकस्यविज्ञेयं॥यावत्कथि
कंप्रव्रज्याप्रतिपत्तिकालादारभ्याप्राणोपरमात्तच्चभरतैरावतभाविमध्यद्वाविंशतितीर्थकरतीर्थांतरगतानांचविदेहतीर्थकरतीर्थांतरगतानांच
साधूनामवसेयंतेषामुपस्थापनायाअभावात्॥उक्तंच॥सव्वमिणंसामाइयंछेयाइविसेसियंपुणविभिन्नं॥अविसेसयमियमाइमसन्नाएसावज्ज
जोगविरइत्तितत्थसामाइयंदुहातंच॥इत्तरमावकहंतियपढमंपढमंतिजि णाणं॥निक्खेऊअणारोवियवयस्सइहसंसेवकालीयं॥सेसाण
मावकहियंतिक्खेऊविदेहयाणंच॥ननुचेत्वरमपिसामायिकंकरेमिभदंतसामायिकंयावज्जीवमित्येवंयावदायुगृहीतंततउपस्थापनाकालेतत्परित्यज
तः॥कथंनप्रतिज्ञाभंगः॥उच्यतेनप्रागेवो - सवमेवेदंचारित्रमविशेषतःसामायिकंसर्वत्रापिसर्वसावद्ययोगविरतियोगसद्भावात्केवलंछेद

दिविशुद्धिविशुद्धिविशेषैर्विशेष्यमाणमर्थतः शब्दांतरश्चनानात्वंभजते ॥ ततोयथावत्कथिकंसामायिकंछेदोपस्थापनंवापरमविशुद्धिविशेषरूपस्यभ्रमसंप
रायादिचारित्रावाप्तौनभंगमास्कंदतितथेत्वरमपिसामायिकंविशुद्धिविशेषरूपछेदोपस्थापनावाप्तौ यदिहिप्रव्रज्यापरित्यज्यतेतर्हितद्भंगआपद्यतेनेनत
स्यैवविशुद्धिविशेषावाप्तौ ॥ उक्तंच ॥ उत्तिरकमनोभंगोजोपुणतंवियकरिमिशुद्धयरं ॥ सन्नामित्तविसिठंसहुमंपिवतस्सकोभंगो ॥ तथाछेदः पूर्वप
र्यायस्यउपस्थापनाचमहाव्रतेषु यस्मिन्चारित्रेतत्छेदोपस्थापनंतच्चद्विधामातिचारंनिरतिचारंचतत्रनिरतिचारंयत्इत्वरसामायिकवतः शिक्षकस्या
रोप्यतेतीर्थांतरसंक्रांतौवायथापार्श्वनाथतीर्थाद्वर्द्धमानतीर्थसंक्रामतः पंचयामप्रति पत्तौसातिचारंयन्मूलगुणघातिनः पुनर्व्रतोच्चारणंउक्तंच ॥ सेह
स्सातिरइयारंतित्थंतरसंकमेवतंहोज्जा ॥ मूलगुणघायिणोमाइयारसभयंचउइक्कयाउभयंचेतिसातिचारंनिरतिचारंचस्थितकल्पेइतिप्रथमपश्चिम
तीर्थकरतीर्थकेतथापरिहरणंपरिहारस्तपोविशेषः ॥ तेनविशुद्धिर्यस्मिन्चारित्रेतत्परिहारविशुद्धिकंतच्चद्विधानिर्विशमानकंनिर्विष्टकायिकंचतत्र
निर्विशमानकाविवक्षितचारित्रासेवकाः निर्विष्टकायिकाआसेवितविवक्षितचारित्रकायाः ॥ तदव्यतिरेकाच्चारित्रमप्येवमुच्यते इहनवकोगणश्चत्वारोनिर्विशमा
नकाश्चत्वारो अनुचारिणः ॥ एकः कल्पस्थितोवाचनाचार्यः यद्यपिचसर्वेपिश्रुतातिशयसंपन्नास्तथापिकल्पत्वात्तेषांमेकः ॥ कश्चित्कल्पस्थितोऽवस्था
प्यतेनिर्विशमानकानांचायंपरिहारः परिहारियाणउतवोजहन्नमज्झिमोतहउक्कोसो ॥ सीउण्हवासकालेभणिउधीरेहिंपत्तेयंतत्थजहन्नोगिम्हेचउत्थ
छठंतुहोइमज्झिमउ ॥ अट्ठमगिहउक्कोसोएत्तोसिसिरेपवक्खामि ॥ सिसिरेउजहन्नाईछट्ठाईदसमचरिमगोहोइ ॥ वासासुअट्ठमाईबारसपज्जंतगोनेउ
पारणगेआयामंपंचसुअग्गहोदोसभिग्गहोभिक्खे ॥ कप्पट्ठियापइदिणंकरेंतिएसेवआयामं ॥ एवंछम्मासतवंचरिउंपरिहारगा अणुचरं
ति अणुचरगेपरिहारियपयट्ठिएजावछम्मासा ॥ कप्पट्ठिएउविएवंछम्मासतवंकरेइसेसाउ अणुपरिहारगाएवंवयंतिकप्पट्ठियत्तंच
एवेसोअट्ठारसमासपमाणोउवण्णिउकप्पो ॥ संखेवउविसेसोविसेससुत्ताउनायव्वो ॥ कप्पसमत्तीएतयंजिणकप्पंवाउवेंतिगच्छंवा
पडिवज्जमाणगापुणजिणस्सगासेपवज्जंति ॥ तित्थयरसमीवासेवगस्सपासेवनोउअन्नस्स ॥ एएसिंजंचरणंपरिहारविसुद्धियंतंतु ॥ अ

थैतेपरिहारविशुद्धिकाः कस्मिन्क्षेत्रेकालेवाभवंति ॥ उच्यतेइहक्षेत्रादिनिरूपणार्थंविंशतिद्वाराणितद्यथाक्षेत्रद्वारं १ कालद्वारं २ चारित्रद्वारं ३ तीर्थद्वारं ४ प
र्यायद्वारं ५ आगमद्वारं ६ वेदद्वारं ७ कल्पद्वारं ८ लिंगद्वारं ९ लेश्याद्वारं १० ध्यानद्वारं ११ गणनाद्वारं १२ अभिग्रहद्वारं १३ प्रव्रज्याद्वारं १४ मुंडापनाद्वारं १५
प्रायश्चित्तविधिद्वारं १६ कारणद्वारं १७ निःप्रतिकर्मताद्वारं १८ भिक्षाद्वारं १९ पथद्वारं २० तत्रक्षेत्रेद्विधामार्गणाजन्मतः सद्भावतश्चयत्रक्षेत्रेजातस्तत्र
जन्मतोमार्गणायत्रचकल्पेस्थितोवर्त्ततेतत्रसद्भावतः उक्तंचखेत्तेदुहेहमग्गणजम्मणउसंतिभावेय ॥ जम्मणतोजहिंजातोसंतिभावोयजहिंकप्पो ॥ तत्रज
न्मतः सद्भावतश्चपंचसुभरतेषुपंचस्वैरावतेषुनतुमहाविदेहेषुनचैतेषांसंहरणमस्तियेनजिनकल्पिकाद्युवसंहरणात् सर्वासुकर्मभूमिषुवाप्राप्येरन् ॥
उक्तंच ॥ खेत्तेभरहेरवएसुहोंतिसंहरणवज्जियानियमा ॥ कालद्वारेअवसर्पिण्यांतृतीयेचतुर्थेवारकेजन्म ॥ सद्भावःपंचमेपि ॥ उत्सर्पिण्यांद्वितीयेतृती
येतृतीयेचतुर्थेवाजन्म ॥ सद्भावःपुनस्तृतीयेचतुर्थेवाउक्तंच ॥ उसप्पिणीएदोसुजम्मणएउतीसुसंतिभावेन ॥ उसप्पिणिविवरीउजम्मणउसंतिभावेय उत्स
र्पिण्यवसर्पिणीसुचतुर्थारकप्रतिभागे ॥ कालेनसंभवंति ॥ महाविदेहक्षेत्रेतेषामसंभवात्चारित्रद्वारेसंयमस्थानद्वारेणमार्गणातत्रसामायिकस्यछेदोपस्था
पनीयस्यचचारित्रस्ययानिजघन्यानिसंयमस्थानानिपरस्परंतुल्यानिसमानपरिणामत्वात् ततोसंख्येयलोकाकाशप्रदेशप्रमाणानिसंयमस्था
नान्यतिक्रम्योर्ध्वयानिसंयमस्थानानितानिपरिहारविशुद्धिकयोग्यानितान्यपिचकेवलिप्रज्ञयापरिभाव्यमानानि असंख्येयलोकाकाशप्रमा
णानितानिप्रथमद्वितीयचारित्राविरोधीनितेष्वपिसंभवात् ततऊर्द्धंयानिसंख्यातीतानिसंयमस्थानानितानिसूक्ष्मसंपरायथाख्यातचारित्रयो
ग्यानि ॥ उक्तंच ॥ तुल्लाजहन्नठाणापदमविइयाणं ॥ ततोअसंखलोएगंतुंपरिहारियठाणा ॥ तेविअसंखालोगाअविरुद्धाचेवपढमबिइयाणं
उवरिंपितत्तोउसंखासंजमठाणाउदोण्हंपि ॥ तत्रपरिहारविशुद्धिककल्पप्रतिपत्तिः स्वकीयेष्वेवसंयमस्थानेषुवर्तमानस्यभवतिनशेषेषुयदन्यती
तनयमधिकृत्य पूर्वप्रतिपन्नोविवक्ष्यतेतदाशेषेष्वपिसंयमस्थानेषुभवतिपरिहारविशुद्धिकल्पसमाप्त्यनंतरमन्येष्वपिचचारित्रेषुसंभवा
ततेष्वपिवर्तमानस्यातीतनयमपेक्ष्यपूर्वप्रतिपन्नत्वाविरोधात् ॥ उक्तंच ॥ सट्ठाणेपडिवत्तीअन्नेसुविहोज्जपुव्वपडिवन्नो ॥ तेसुविवट्टंतो

सोतीतनयंपप्पवृत्तीउ ॥ तीर्थद्वारेपरिहारविशुद्धिकोनियमनस्तीर्थेप्रवर्त्तमानएवर्त्तमानएवसतिभवतिनतद्व्युछेदे ॥ नानुत्पन्नेतीर्थेजातिस्मरणादिना उक्तं
च ॥ तित्थेत्तिनियमतोव्वियहोइसतित्थंमिनउणनदभावे विगएणुप्पन्नेवाजाईसरणाइएहिं ॥ पर्यायद्वारेपर्यायोद्विधागृहस्थपर्यायोयतिपर्यायश्चएकैकोपि
द्विधाजघन्यउत्कृष्टश्च ॥ तत्रगृहस्थपर्यायोजघन्यएकोनत्रिंशत्वर्षाणियतिपर्यायोविंशतिःद्वावपिचोत्कर्षतोदेशोनपूर्वकोटीप्रमाणौ उक्तंच ॥ एयस्सए
सनेउगिहिपरियाउजहण्णाइगुतीसा ॥ जइपरियाउवीसादोसविउक्कोसदेसूणा ॥ आगमद्वारे अपूर्वमागमंसनाधीतेयस्मात्तंकल्पमधिकृ स्य
प्रगृहीतोचितयोगाराधनतएवसत्कृत्यतांभजते ॥ पूर्वाधीतंतुविश्रोतसिकाक्षयनिमित्तंनित्यमेवैकाग्रमनाःसम्यक्प्रायशःस्मरति ॥ आहच ॥ अपुव्वंनाहिज्जइ
आगमंमेसोपद्धुच्चतंकप्पं ॥ जमुचियपगहियजोगाराहणओचेवकयकिच्चो पुव्वाहीयंतुनयंपायंअणुसरइंनिच्चमेवेस ॥ एगग्गमणोसम्मंविस्सोयसियाएख
यट्ठ ॥ वेदद्वारेप्रवृत्तिकालेवेदतःपुरुषवेदोवाभवेत् ॥ नपुंसकवेदोवाभवेत ॥ नपुंसकवेदोवानस्त्रीवेदःस्त्रियाःपरिहारविशुद्धिकल्पाप्रतिपत्त्यसंभ
वात् ॥ अतीतनयमधिकृत्यपुनःपूर्वप्रतिपन्नश्चिंत्यमानःसवेदोवाभवेदोवातत्रसवेदः ॥ श्रेणिप्रतिपत्त्यभावेउपशमश्रेणिप्रतिपत्तौक्षपकश्रेणिप्रतिपत्तौ
वात्ववेदइति ॥ उक्तंच ॥ वेदोपवित्तिकालेइत्थीवज्जोउहोइएगयरो ॥ पुव्वपडिवन्नगोपुणहोज्जसवेहोअवेदोवा ॥ कल्पद्वारेस्थितकल्पए वायंनस्थितक
ल्पेस्थितकल्पमियनियमाइतिवचनात् तत्राचेलत्वादिषुदशस्वपिस्थानेषुयोस्थिताःसाधवस्तत्कल्पःस्थितकल्पउच्यते ॥ येपुनश्चतुर्षुशय्याशय्यातरपिंडा
दिषुवस्थितेषुकल्पेषुस्थिताःशेषेषुचाचेलत्वादिषुषट्सु अस्थितास्तत्कल्पोऽस्थितकल्पः ॥ उक्तंच ॥ ठियअठियकप्पोआचेलक्काइएसुठाणेसु
ठियापदसोचउठियछसुअठि यावीउ ॥ आचेलक्यादीनिचदशस्थानान्यमूनि ॥ अचेलकुद्देसियसज्जायररायपिंडकिइकम्मे ॥ वयजेट्ठपडि
कमणेमासंपज्जोसवणकप्पे ॥ चत्वारश्चावस्थिताःकल्पाइमे ॥ सेज्जायरपिंडंमीचाउज्जामेयपुरिसजेट्ठेय ॥ किइकम्मस्सयकरणेचत्तारिअवठिया
कप्पा ॥ लिंगद्वारेनियमतोद्विविधेपिलिंगेभवति ॥ तद्यथाद्रव्यलिंगेभावलिंगेचएकेनापिविनाविवक्षितकल्पोचितसामाचार्यायोगात् लेश्या ॥ २८
द्वारेतेजःप्रभृतिकासूत्तरासुतिसृषुविशुद्धासुलेश्यासुपरिशुद्धिकंकल्पंप्रतिपद्यंतेपूर्वप्रतिपन्नःपुनःसर्वास्वपिकथंचिद्भवतितत्रापीतरासु

सविशुद्धलेश्यासुनात्यंतंसंक्लिष्टासुवर्त्ततेतथाभूतासुवर्त्तमानोनप्रभूतंकालमवतिष्ठतेकिंतुस्तोकंस्तोकंयतःस्ववीर्यवशात्सद्यएवताभ्योव्यावर्त्तते
॥ अथप्रथमतएवकस्मात्प्रवर्त्तते ॥ उच्यतेकर्मवशात् ॥ उक्तंच ॥ लेसासुविसुद्धासुपडिव तइयासुतइअसंकिलिट्ठासु ॥ पुव्वपडिवन्नउपुव्वपडिवन्नश्चपुणहो
ज्जासव्वासुव्वामुविकहंविणच्चंतसंकिलिट्ठासुथोवंकालंबहंदियइरासु ॥ चित्ताकम्माणगईतहाविविरयंफलंदेइ ॥ ध्यानद्वारेधर्मध्यानेनप्रवर्द्धमानेनपरि
हारविशुद्धिकंकल्पंप्रतिपन्ना ॥ पुनरार्त्तरौद्रयोरपिभवतिकेवलंप्रायेणनिरनुबंधः ॥ आहच ॥ झाणमिवित्तियमेणपडिवज्जइसोपवड्ढमाणेणइयरेसुवि
झाणेसुपुव्वपवन्नोनपडिसिद्धो ॥ एयंचकुसलजोगेउद्दामित्तिव्वकम्मपरिणामोरोद्दट्टेसुविभावोइमस्सपायंनिरणुबंधोगणनाद्वारे ॥ जघन्यतःस्त्रयोग
णाप्रतिपद्यंतेउत्कर्षतःशतसंख्याःपूर्वप्रतिपन्नाजघन्यतउत्कर्षतोवाशतशःपुरुषगणनयाजघन्यतःप्रतिपद्यमानाःसप्तविंशतिरुत्कर्षतःसहस्रंपू
र्वप्रतिपन्नकाःपुनर्जघन्यतःशतशःउत्कर्षतःसहस्रशःआहच ॥ गणिउतिन्नेवगणाजहन्नपडिवत्तिसयसउक्कोसा ॥ उक्कोसजहन्नेणंसयसोच्चियपुव्वपडि
वन्ना ॥ सत्तावीसजहन्नसहस्समुक्कोसउपडिवज्जसयसोसहस्ससोच्चापडिवन्नजहन्नउक्कोसा ॥ अन्यच्चयदापूर्वप्रतिपन्नकल्पमध्यादेकोनिर्गच्छतिअन्यः
प्रविशतितदोनप्रक्षेपेप्रतिपन्नोकदाचिदेकोपिभवति ॥ पृथक्त्वंपूर्वप्रतिपन्नोप्येवंभजनयाकदाचिदेकःप्राप्यंतेपृथक्त्वंवा ॥ उक्तंच ॥ पडिवज्जमाणभयण
एहोयएक्कोविऊणपक्खेव ॥ पुव्वपडिवन्नयाविभइयाएक्कोपुहत्तंवाअभिग्रहद्वारेचतुर्विधास्तद्यथाद्रव्याभिग्रहाः ॥ कालाभिग्रहाभावाभिग्रहाश्चएत
तेषामन्यत्रचर्विनादिनिरतयश्चसंनेनत्रपरि रविशुद्धिकस्यैतेनीपहाताभवंति ॥ यस्मादेतस्यकल्पएवयथोदितरूपोभिग्रहोवर्त्तते ॥ उक्तंच ॥
दव्वाईयअभिग्रहविचित्तरूवानहोतिपुणकेई ॥ एव जीतकल्पावियभियहोजेण ॥ एयंमिगोयराईनियमेणनिरववादाय ॥ तप्पालणंविपरंएयस्स निषया
विसुद्धिवाणंतु ॥ प्रव्रज्याद्वारेनासावन्यंप्रव्राजयति ॥ कल्पस्थितिरेवेतिकृत्वा ॥ आहच ॥ पव्वावेइनएसोअन्नंकप्पट्ठिईतिकाऊण ॥ इत्तिकाऊण
इतिउपदेशंपुनर्यथाशक्तिप्रयच्छति ॥ मुंडापनाद्वारेपिनासावन्यंमुंडयति ॥ अथप्रव्रज्यानंतरंनियमतोमुंडनमिति प्रव्रज्याग्रहणेनैवतद्गृहीतमि
ति ॥ किमर्थंपृथग्द्वारांतरयुक्तंप्रव्रज्याद्वारेनियमतोमुंडनस्यासंभवात् ॥ अयोग्यस्यकथंचिद्दत्तायामपिप्रव्रज्यायांपुनरयोग्यतापरिज्ञानेमुंडना ·

योगादतः पृथगिदंद्वारमिति॥ प्रायश्चित्तविधिद्वारे॥ मनसापिसूक्ष्ममत्यतिचारमान्यत्रस्यनियमतः श्चनुगुरूक्तंप्रायश्चित्तमस्ययतएषकल्पएकाग्रतात्प्रधानमूत
इंगेंगुरुतरोदोषइति॥ कारणद्वारे॥ तथाकारणंनाम आलंबनंतत्पुनःरूपरिशुद्धंज्ञानादिकंनत्वास्यनविद्यतेयेनतदाश्रित्यापवादपदंसेवितास्यानएषहिस
र्वत्रनिरपेक्षःक्लिष्टकर्मक्षयनिमित्तंप्रारब्धमेवस्वंकल्पंयथोक्तविधिनासमापयन्महात्मावर्त्तते उक्तंच॥ कारणमालंबण॥ मासंपुणणाणाइयंरूपरिसुद्धं
एयस्सतंनविज्जइ वियंतपसाहणापायं॥ सव्वत्थःनिरवयरिकाआदत्तंचियदढंसमाणंतो॥ वट्टइएसमहप्पाकिल्लिट्ठकम्मरकयनिमित्तंनिमित्तं॥ निःप्रतिकर्म
ताद्वारेएषमाहात्मानिःप्रतिकर्मशरीरोऽक्षिमलादिकमपिकदाचिन्नापनयतिनचप्राणांतिकेपिसमापतितेव्यसनेद्वितीयपदंसेवते॥ उक्तंच॥ निप्प
डिकम्मसरीरोअच्छिमलाईविनावणेइसया॥ पाणंतिएवियमहावसणंमिनवट्टएवीए॥ अप्पबहुत्तालोयणाविसई उ ईहोइएसत्तिअहयासहभावाउबहु
गपेयंवियइस्सेमं॥ भिक्षद्वारे॥ तथापथद्वारेभिक्षाविहारक्रमश्चास्यतृतीयस्यांपोरुष्यांभवति॥ शेषासुपंचपोरुषीपुवायोत्सर्गीनिद्रापिचास्याःअल्पाद्रष्टव्या॥
यदिपुनःकथमपिजंघाबलमस्यपरिक्षीणंभवति॥ तथाप्येषोऽविहरन्नपिमहाभागोनद्वितीयपदमापद्यते॥ किंतुतत्रैवयथाकल्पमात्मीयंयोगंविदधा
तीति॥ उक्तंच॥ तइयाएपोरसीएभिक्काकालोय॥ सेसासुउवस्सयोपायंअप्पायनिद्दत्ति॥ जंघावलंमिखीणेअविहरमाणोविनवरमावज्जे तत्थेवअहा
कप्पंकुणइयजोगंमहाभागो॥ एतेचपरिहारविशुद्धिकाद्विविधास्तद्यथाइत्वरायावत्कथिकाश्चतत्रयेकल्पसमाप्त्यनंतरंतमेवकल्पंगच्छंवासमुपयास्यंतिते
इत्वराः येपुनःकल्पसमाप्त्यनंतरमव्यवधानेनजिनकल्पंप्रतिपत्स्यंतेतेयावत्कथिकाः॥ उक्तंच॥ इत्तरियथेरकप्पेजिणकप्पेआवकहियत्ति॥ अत्रस्थविर
कल्पग्रहणमुपलक्षणंस्वकल्पेचेतिद्रष्टव्यं॥ तत्रत्वराणांकल्पप्रभावादेवदेवमनुष्यतैर्यग्योनिककृताउपसर्गाः सद्योघातिनःआतंकाद्यतीवावि
षह्याश्चवेदनानप्रादुःषंतियावत्कथिकानांसंभवेयुरपिनेहिजिनकल्पंप्रतिपत्स्यमान्याजिनकल्पभावमनुविदधतिजिनकल्पिकानांचोपसर्गादयःसं
भवंतीति॥ उक्तंच॥ इत्तरियाणुवसग्गाआतंकावेयणायनहवंति॥ आवकहियाणभइयायाणइत्ति॥ ६७॥ तथासूक्ष्मोलोभांशावशेषः संपरायःकषायोदयोयत्रतत्सू २९
क्ष्मसंपरायं॥ तच्चद्विधाविशुद्ध्यमानकंसंक्लिश्यमानकंचतत्रविशुध्यमानकंक्षपकश्रेणिमुपशमश्रेणिंवासमारोहतःसंक्लिश्यमानंतूपशमश्रे

णितःप्रच्यवमानस्य॥ अथाख्यातमिति॥ अथशब्दोयथार्थेआङभिविधौयथातथ्येनअभिविधिनाख्यातंकथितंअकषायंचारित्रमितितदथाख्यातं॥ उक्तं
च॥ अहसद्दोजहत्थेआङोभिविहिएकहियमरकायं चरणमकसाइमुइयंतमहरकायंजहरकायंयथाख्यातमितिद्वितीयंनामतस्यायमर्थः यथासर्वस्मिन्जीवलोके
ख्यातंप्रसिद्धंअकषायंभवतिचारित्रमिति॥ तथैवयत्तत्यथाख्यातंतद्द्विधाछाद्मस्थिकंकेवलिकंच॥ तत्रछाद्मस्थिकमुपशांतमोहगुणस्थानकेक्षीणमोह
गुणस्थानकेवाकेवलिकंसयोगिकेवलिभवसयोगिकेवलिभवंच॥ सेत्तमित्याद्युपसंहारकदम्बकसूत्रंसुगमंदेवंमनुष्याःसंप्रतिदेवप्रतिपादना
र्थमाह॥ सेकिंतमित्यादि॥ अथकेतेदेवाःसूरिराह॥ देवाश्चतुर्विधाःप्रज्ञप्तास्तद्यथाभवनवासिनोव्यंतराज्योतिष्काविमानिकाः॥ तत्रभवनेषुवसंतीत्येवं
शीलाभवनवासिनः एतत्प्राचुर्यतोनागकुमाराद्यपेक्षयाद्रष्टव्यं॥ तेहिप्रायोभवनेषुवसंतिकदाचिदावासेषुअसुरकुमारास्तुप्राचुर्येणावासेषुकदाचि
द्भवनेषु॥ अथभवनानामावासानांचकःप्रतिविशेषउच्यते॥ भवनानिबहिर्वृत्तान्यंतःसमचतुरस्राणिअधःपुष्करकर्णिकासंस्थानानिआवासाःकायमानस्था
नीयामहामंडपाविविधमणिरत्नप्रभाभासिनसकलदिक्चक्रवालाइतिअंतरंनामअवकाशः॥ तच्चेहाश्रयरूपंद्रष्टव्यंविविधंभवननगरावासरूपं
तरंयेषांतेव्यंतराः त्राभवनानिरत्नप्रभायाःप्रथमेरत्नकांडउपर्यधश्चप्रत्येकंयोजनशतमपहायशेषेअष्टयोजनशतप्रमाणमध्यभागेभवंतिनगराण्य
पितत्रतिर्यग्लोकेयथाजंबूद्वीपेद्वाराधिपतेर्विजयदेवस्यान्यस्मिन्जंबूद्वीपेद्वादशयोजनसहस्रप्रमाणानगरीआवासास्त्रिष्वपिलोकेषुतत्रोर्ध्वलोके
पंडकवनादाविति॥ अथवाविगतमंतरंमनुष्येभ्योयेषांतेव्यंतराः॥ तथाहिमनुष्यानपिचक्रवर्त्तिवासुदेवप्रभृतीन्भृत्यवदुपचरंतिकेचित्व्यंतराइतिमनु
ष्येभ्योविगतांतराः॥ यदिवाविविधमंतरंशैलांतरंकंदरांतरंवनांतरंवाआश्रयरूपंयेषांतेव्यंतराःप्राकृतत्वाच्चसूत्रेवाणमंतराइतिपाठः॥ यदिवावानमं
तराइतिपदसंस्कारः॥ तत्रेयंव्युत्पत्तिर्वनानामंतराणितेषुभवावानमंतराः॥ पृषोदरादित्वादुभयपदांतरालवर्त्तिमकारागमः॥ तथाद्योतयंतिप्रकाश
यंतिजगदितिज्योतींषिविमानानिऊणादिकोशब्दव्युत्पत्तिः॥ तेषुभवाज्योतिष्काःअध्यात्मादिभ्यइतीकणतत्रकवर्णोवर्णादेर्मिसकसदितिइक
णआदेरिकारस्यालोपःअनभिधानाच्चवृध्यभावः यदिवाज्योतयंतिशिरोमुकुटोपगूहिभिःप्रभामंडलकल्पैःसूर्यादिमंडलैःप्रकाशयंतीति

ज्योतिषोदेवाः सूर्यादयस्तथाहि सूर्यस्य सूर्याकारं मुकुटाग्रभागे चिन्हं चंद्रस्य चंद्राकारं नक्षत्रस्य नक्षत्राकारं ग्रहस्य ग्रहाकारं तारकस्य तारकाकारं तैः प्रकाशयंतीति
आह च तत्वार्थभाष्यकृत् ॥ ज्योतयंतीइति ज्योतींषि विमानानि तेषु भवा ज्योतिष्का ज्योतिषोदेवा ज्योतिरिति विज्योतिष्का मुकुटैः शिरोमुकुटोपगूहितैः प्रभामंडलैर्य
थास्वं चिन्हैर्विराजमाना द्युतिमंतो ज्योतिष्का भवंतीति ॥ तथा विविधं मान्यंते उपभुज्यंते पुण्यवद्भिर्जीवैरिति विमानानि तेषु भवा वैमानिकाः ॥ संप्रत्येतेषामेव क्रमेण
भेदानभिधित्सुराह ॥ सेकिंतं भवणवासीइत्यादि ॥ असुराश्च ते कुमाराश्च असुरकुमारा एवं नागकुमारा इत्याद्यपि भावनीयं ॥ अथ कस्मादेते कुमारा इत्युप
दिश्यंते कुमारवच्चेष्टनात् तथाहि कुमारा इवैते श्रुतकुमारा मृदुमधुरललितगतयः शृंगाराभिप्रायकृतविशिष्टविशिष्टभरोत्तररूपविक्रियाः कुमारवच्चोद्धतरूपा
वेषाभाषाभरणप्रहरणावरणयानवाहनाः कुमारवच्चोल्बणरागाः क्रीडनपराश्च ततः कुमारा एव कुमारा इति किंनरा इत्यादि किंनरादशविधास्तद्यथा किंनराः किंपु
रुषाः किंपुरुषोत्तमाः किंनरोत्तमाः ५ हृदयंगमाः रूपशालिनः ६ अनिंदिताः ७ मनोरमाः ८ रतिप्रियाः ९ रतिश्रेष्ठाः १० किंपुरुषादशविधास्तद्यथा पुरु
षाः ११ सत्पुरुषाः १२ महापुरुषाः ३ पुरुषवृषभाः ४ पुरुषोत्तमाः ५ अतिपुरुषाः ६ महादेवा ७ मरुतः ८ मेरुप्रभाः ९ यशस्वंतः १० महोरगादशविधास्तद्य
थाभुजगाः भोगशालिनः १ महाकायाः ३ अतिकायाः स्कंधशालिनः ५ मनोरमाः ६ महावेगाः ७ महेशक्षाः ८ मेरुकांताः ९ भास्व तः १० गधर्वाद्वाद
शविधास्तद्यथा हाहा १ हूहू २ तुंबरवं ३ नारदाः ४ ऋषिवादिका ५ भूतवादिका ६ कादंबा ७ महाकादम्बा ८ रेवताः ९ विश्वावसवः १० गीतरतयः ११
गीतयशसं १२ यक्षास्त्रयोदशविधास्तद्यथा पूर्णभद्रा १ माणिभद्राः २ श्वेतभद्राः ३ हरितभद्राः ४ व्यतिपातिकभद्राः ६ सुभद्राः ७ सर्वतोभद्राः ८ मनुष्ययक्षाः ९
वनाधिपतयः १० वनाहाराः ११ रूपयक्षाः १२ यक्षोत्तमाः १३ राक्षसाः सप्तविधास्तद्यथा भीमाः १ महाभीमा २ विघ्नाः ३ विनायकाः ४ जलराक्षसाः ५ राक्षस
राक्षसाः ६ ब्रह्मराक्षसा ७ भूता नवविधास्तथा सुरूपाः प्रतिरूपाः ३ भूतोत्तमाः ४ स्कंदिकाः ५ महास्कंदिकाः ६ महावेगाः ७ प्रतिछन्नाः ८ आकाशगाः
९ पिशाचाः षोडशविधास्तद्यथा कूष्मांडाः १ पटकाः २ जोषा ३ आन्हिकाः ४ कालाः ५ महाकालाः ६ चोक्षाः ७ अचोक्षाः ८ तालपिशाचाः ९ ३०
मुखरपिशाचाः १० अधस्तारकाः ११ देहाः १२ विदेहाः १३ महादेहाः १४ तूष्णीकाः १५ नवपिशाचाः इति कल्पोपगाश्च त्यातीयत्ति कल्पआ

चारः स चेह इंद्रसामानिकत्रायस्त्रिंशादिव्यवस्थारूपः तमुपगाः प्राप्ताः कल्पोपगाः धर्मोधर्मदेवलोकादिदेवलोकनिवासिनः यथोक्तरूपं कल्पमतीता अतिक्रांताः
कल्पातीताः अधस्तनाधस्तनग्रैवेयकादिनिवासिनस्ते हि सर्वेप्यहमिंद्रास्ततो भवंति कल्पातीताः कल्पोपगान्दर्शयति सोहम्मीसाणाइत्यादि सौधर्मदेव
लोकनिवासिनः ईशानाः एवं सर्वत्रापि भावनीयं भवतिवनावस्थानच्छंदेशो यथाबालदेशनिवासिनः पंचालाइति ॥ ५१ ॥ ॥इति श्रीमलयगिरिविरचिता
यां प्रज्ञापनाटीकायां प्रथमं प्रज्ञापनाख्यं पदं समर्थितमिति ॥ ५२ ॥ ॥ग्रंथाग्रं २०००॥ ५२॥ तदेवं व्याख्यातं प्रथमं पदं संप्रति द्वितीयमारभ्यते तस्य
चायमभिसंबंधः प्रथमपदे पृथिवीकायिकादयः प्ररूपिताइह तु तेषामेव स्थानानि प्ररूप्यंते ॥ तत्र चेदमादिसूत्रं ॥ ५३ ॥ कहिणंभंतेत्यादि ॥ कहि ति कस्मिन् णमिति
वाक्यालंकारे भदंतेति परमगुर्वामंत्रणे बादरपृथिवीकायिकानां पर्याप्तानां स्थानानि स्वस्थानादीनि प्रज्ञप्तानि प्ररूपितानि एवं गौतमस्वामिना प्रश्ने कृते
सति भगवानाह ॥ वर्द्धमानस्वामिणा यमासठाणेणा मित्यादि ननु गौतमोपि भगवान् पवित्रकुशलमूलो गणधरस्तीर्थकरभाषितमातृकापदश्रव
णमात्रावाप्तप्रकृष्टश्रुतज्ञानावरणक्षयोपशमश्चतुर्दशपूर्ववित् ॥ सर्वाक्षरसन्निपाती विवक्षितार्थपरिज्ञानसमन्वित एव ततः किमर्थं पृच्छति ॥ न हि चतु
र्दशपूर्वविदः सर्वोत्कृष्टश्रुतलब्धिसमन्वितस्य किंचित् प्रज्ञापनीयमविदितमस्ति ॥ यत उक्तं ॥ संखाईएविभवेसाहइजंवापरोउपुच्छेज्जा ॥ नयणंअणा
इसेसीवियाणई एसछउमत्थे ॥ सत्यमेतत् केवलं जानन्नेव गौतमस्वामी भगवानन्यत्र विनेयेभ्यः प्रतिपाद्यसंप्रत्ययनिमित्तं विवक्षितमर्थं पृच्छति
यदि वा प्रायः सर्वत्र गणधरप्रश्नतीर्थकरनिर्वचनरूपं सूत्रमतो भगवानार्यश्यामोपीत्थमेव सूत्रं रचयति अथवा संभवति तस्यापि गणभृतो गौतमस्वा
मिनो ऽनाभोगः छद्मस्थत्वात् ॥ उक्तं च ॥ न हि नामानाभोगः छद्मस्थस्येह कस्यचिन्नास्ति ॥ ज्ञानावरणीयं हि ज्ञानावरणप्रकृतिकर्म ॥ ततो जातसंशयः
सन् प्रच्छतीति न कश्चिद्दोषः गोयमादृतिलोकप्रथितमहाविशिष्टगोत्राभिधायकमामंत्रणध्वनिः ॥ हे गौतम गोत्रेति भावार्थः ॥ सट्ठाणेणंइतिस्व
स्थानं यत्रासते बादरपृथिवीकायिकाः पर्याप्ताः आसीनाश्च वर्णादिविभागेनादेष्टुं शक्यंते ॥ तत् स्वस्थानमिति भावः ॥ स्वस्थानग्रहणमुपपातस
मुद्घातस्थाननिरासार्थं ॥ तेन स्वस्थानेन स्वस्थानमंगीकृत्येति भाव ॥ अष्टासु पृथिवीषु सर्वत्र बादरपृथिवीकायिकानां पर्याप्तानां स्थानानी

तियोगः ताएवाष्टौपृथिवीर्नामग्रहमाह ॥ तंजहेत्यादिनद्यथारत्नप्रभायांयावदष्टम्यामीषत्प्राग्भारायां॥ तथाअधोलोकेपातालेषुपातालकलशेषुवलयामु
खप्रभृतिषुभवनेषुभवनपतिनिकायावासरूपेषुभवनप्रस्तटेषुभवनभूमिकारूपेषुइहभवनग्रहणेनभवनानामेवकेवलानांग्रहणंभवनप्रस्तट
ग्रहणेनभुवनानामपांतरालस्यापितथानरकेश्वप्रकीर्णकरूपेषुनरकावासेषु॥ नरकावलिकासुआवलिकाव्यवस्थितेषुनरकावासेषुनरकप्रस्तटे
षुनरकभूमिकारूपेषुअत्रापिनरकनारकावलिकाग्रहणेनकेवलाएवनरकावासाःपरिगृह्यंते॥ नरकप्रस्तटग्रहणेनतुनरकापांतरालमपिऊर्द्ध
लोके [illegible] कल्पेषुअनेन
द्वादशदेवलोकपरिग्रहः॥ विमानेषुग्रैवेयकसंबंधिषुप्रकीर्णकरूपेषुविमानावलिकासु॥ आवलिकाप्रविष्टेषुग्रैवेयकादिविमानेषुविमा
नप्रस्तटेषुविमानभूमिकारूपेषुअत्रापिप्रस्तटग्रहणंविमानापांतरालेरोभाविनामपियथासंभवभाविनांबादरपर्याप्तपृथिवीकायिकानांस्था
नपरिग्रहार्थंतथातिर्यग्लोकेटंकेषुछिन्नटंकेषुकूटेषुसिद्धायतनकूटप्रभृतिषुशैलेषुशिखरहीनपर्वतेषुशिखरिषुशिखरयुक्तेषुपर्वतेषु
प्राग्भारेषुईषत्कुब्जेषुविजयेषुकच्छादिषुवक्षस्कारेषुविद्युत्प्रभादिषुपर्वतेषुवर्षेषुभरतादिषुवर्षधरेषुहिमवदादिपर्वतेषुवेलासुसमुद्रादिपानि
यरमणभूमिषुवेदिकासुजंबूद्वीपजगत्यादिसंबंधिनीषुद्वारेषुविजयादिषुतोरणेषुद्वारादिसंबंधिषुकिंबहुनासामस्त्येनसर्वेषुद्वीपेषुसर्वेषुस
मुद्रेषु॥ एत्थणमित्यादिअत्रएतेषुस्थानेषुबादरपृथिवीकायिकानांपर्याप्तानांस्थानानिप्रज्ञप्तानिमयान्यैश्चतीर्थकृद्भिः उववाएणमित्यादि उपपत
नमुपपातोबादरपृथिवीकायिकानांपर्याप्तानांयदनंतरमुक्तंस्थानंतत्प्राप्त्याभिमुख्यमितिभावस्तेनोपपातेनउपपातमंगीकृत्येतिभावः लो
कस्यचतुर्दशरज्ज्वात्मकस्यअसंख्येयभागेअत्रैकेव्याचक्षते॥ ऋजुसूत्रनयोविचित्रस्तोपदापरिस्थितऋजुसूत्रनयदर्शनेनबादरपृथिवीका
यिकाः॥ पर्याप्ताश्चेत्यनेनतदायेस्वस्थानप्राप्ताआहारादिपर्याप्तिपरिसमाप्त्याविशिष्टविपाकतोबादरपृथिवीकायिकायुर्वेदयंतेनरएवद्रष्ट
व्यानापांतरालगताअपितदानींविपाकायुर्वेदनासंभवात् स्वस्थानंचतेषांरत्नप्रभादिकंसमुदितमपिलोकस्यासंख्येयभागेवर्त्तते नतउपपाते

नापिलोकस्यासंख्येयभागवर्त्तनावेदितव्याः अन्येत्वेपिदधतिपर्याप्तादिनामबादरपृथिवीकायिकाःसर्वस्मिल्लोकेऽनंतरमेवअपांतरालगताअपिपरिगृह्यमा
णालोकस्यासंख्येयभागएवेतिनकश्चिद्दोषः नथाचसमुद्घातेनापितेलोकस्यासंख्येयभागएववक्ष्यंतेअन्यथासमुद्घातावस्थायामपिस्वस्थानाति
रेकेणअंतरालवर्त्तित्वसंभवात्संख्येयभागवर्त्तितानोपपद्यतेति तत्वंपुनःकेवलिनोविदंतिविशिष्टश्रुतविदोवा तथासमुग्घाएणंलोगस्सअसंखेज्जइभागे
इतिसमुद्घातेनसमुद्घातमधिकृत्यलोकस्यासंख्येयभागेइयमत्रभावनायदाबादरपर्याप्तपृथिवीकायिकाः सोपक्रमायुषोवात्रिभागाद्यवशेषायु
षःपारभविकमायुर्बद्ध्वामारणांतिकसमुद्घातेनसमवहन्यंते॥ तदातेविक्षिप्तात्मप्रदेशदंडाअपिलोकस्यासंख्येयतमेभागेवर्त्तंतेस्तोकत्वाद्बा
दरपृथिवीकायिकपर्याप्तायुश्चाद्याप्यक्षीणमितिपर्याप्तबादरपृथिवीकायिकाअपिलभ्यंते इहपूर्वंपृथिव्यादिषुस्वस्थानमात्रमुक्तमिदानीं
स्वस्थानेनापिकियतिलोकस्यभागेवर्त्ततेइतिनिरूपयतिसट्ठाणेणं लोगस्सअसंखेज्जइभागेइतिस्वस्थानंरत्नप्रभादिनद्यपिसमुदितमपिलो
कस्यासंख्येयभागवर्त्तितथाहिरत्नप्रभाअशीतियोजनसहस्राधिकलक्षप्रमाणपिंडभावाएवंशेषाअपिपृथिव्यःस्वस्वघनभावेनवक्तव्याःपा
तालकलशाअपियोजनलक्षावगाहानरकावासास्त्रिसहस्रयोजनोच्छ्रयाविमानान्यपिद्वात्रिंशद्योजनशतबाहल्यानिततःसर्वेषामपिपरिमि
तभावात्समुदितानामप्यसंख्येयभागवर्त्तित्वेनिबादरापृथिवीकायिकसूत्रेउववाएणंसव्वलोएसमुग्घाएणंसव्वलोएइतिइहापर्याप्ताबाद
रपृथिवीकायिकाअपांतरालगताअपि॥ स्वस्थानेपिवापर्याप्तबादरपृथिवीकायुर्विशिष्टविपाकतोवेदयंतेनतथादेवनैरयिकवर्जितेभ्यःशेषसर्वकाये
भ्यतेउपपद्यंतेउद्धृताअपिचदेवनैरयिकवर्जेषुशेषुसर्वेष्वपिस्थानेषुगच्छंतिततोऽपांतरालगताअपिवर्त्तमानाअमीगृह्यंतेअतिप्रभूताश्चस्वभाव
तोपीत्युपपातेनसर्वलोकवर्त्तंते अन्येत्वभिदधतिस्थावताएवासौबहवइति उपपातेनसमुद्घातेनचसर्वलोकेव्यापिनः तत्रोपपातःक
थांचित्ऋजुगत्याकेषांचित्वक्रगत्यातत्रऋजुगतिःसुप्रतीताबकस्थापनाचैवं अत्रयदेवप्रथमंवक्रमेकंसंहरंति तदेवापरेतद्देश
देशमापूरयंति ॥एवंद्वितीयवक्रदेशसंहरणेसिन्वक्रोत्पत्तावपिप्रवाहतोनिरंतरमापूरणंभावनीयं ॥ सट्ठाणेणंलोगस्सअसंखेज्जइभा

गेइतियथापर्याप्तानांभावितंतथाअपर्याप्तानामपिभावनीयं॥नन्विश्रयातेषामुत्पादाभावात्॥सूक्ष्मपृथिवीकायिकपर्याप्तापर्याप्तसूत्रेजेपज्जत्ताऽपज्ज
त्ताण्तेसव्वेएकविहाअविसेसाअणाणत्तासव्वलोगपरियावन्नाइतिसूक्ष्मपृथिवीकायिकपर्याप्तायेचापर्याप्तास्तेसर्वेप्येकविधाएकप्रकाराःप्रक
तंस्वस्थानादिविचारमधिकृत्यभेदाभावात्॥अविशेषाविशेषरहितायथापर्याप्तास्तथेतरेपीतिभावः॥अनानात्वानानात्ववर्जितादेशालक्षितनाना
त्वादूत्यर्थः॥किमुक्तंभवति॥येष्वाधारभूतेष्वाकाशप्रदेशेष्वेकेतेष्वेवापरेपीतिसर्वलोकपर्यापन्नाःसर्वलोकव्यापिनउपपातसमुद्घातस्वस्था
नैः॥प्रज्ञापकयाअन्येश्रवणःप्रभादिभिस्तीर्थकृद्भिः॥अनेनागमस्यकथंचिन्नित्यत्वमावेदितं॥हेश्रमणहेआयुष्मनआमंत्रणमिदंभगवत्प्रयुक्तं॥
गौतमस्याप्रमस्कायिकस्त्राण्यपिबादरसूक्ष्मविषयाणिनवरंपर्याप्तबादराप्कायिकस्त्रेसप्तसुघनोदधिवलयेषुनिसप्तघनोदधिवलयानिस्वस्वपृ
थिवीपर्यंतवेष्टकानिवलयाकाराणिअहोलोएपायालेसुत्तिपातालकलशेषुवलयासकृत्प्राभृतिषुपिहितीयविभागेसर्वात्मनाजलभावात्भवनेषुक
लशेषुविमानेषुचजलवाप्यादिषुविमानादीनिचात्मकल्पगतानिवेदितव्यानिग्रैवेयकादिषुवापीनामसंभवतोजलासंभवात्॥अवटाःकूपास्तडागानिप्रतीता
निनद्योगंगासिंधुप्रभृतयोह्रदापद्मह्रदादयः॥वाप्यश्चतुरस्राकारास्ताकारास्तारवृत्ताकाराःपुष्करिणकाः॥यस्विापुष्कराणिपद्मानिविद्यंतेयासुताः
पुष्करिण्यः॥दीर्घिकाकृजुसघुनद्यस्ताएववक्रागुंजालिकाः॥बहूनिकेवलकेवलानिपुष्पावकीर्णानिसरांसिसरांसिसीत्युच्यंते॥तथाबहूनिसरांसिएकपं
क्त्याव्यवस्थितानिसरःपंक्तिस्ताबह्व्यःसरपंक्तयः॥तथायेषुसरस्सुपंक्त्याव्यवस्थितेषुकूपोदकंप्रणालिकयासंचरतिसासरःसरःपंक्तिः॥ताबह्व्यःसरः
सरःपंक्तयःविलानीवविलानिस्वभावनिष्पन्नाजगत्यादिषुक्तपिकाःतेषांपंक्तयोविलपंक्तयोविलपंक्तयःउज्झरागिरिषुभसांप्रस्रवास्तएव
सदावस्थायिनोनिर्झराः॥विहुराणिअरव्यातास्तोकजलाश्रयभूताःयप्रदेशागिरिप्रदेशगवापल्वलानिअरवातानिसरांसिवप्राःकेदाराःकिं ३२
बहुनासर्वेष्वेवजलाशयेषुगतदेवव्याचष्टेजलस्थानेषुशेषभावनाप्राग्वत्॥अधुनापर्याप्ततेजस्कायिकस्थानानिपृच्छति॥८७॥कहिणंभं
तेउक्कायियाणमित्यादिप्रश्नसूत्रंसुगमंभगवानाह॥गोयमेत्यादि॥गौतमस्वस्थानमंगीकृत्यांतरमनुष्यक्षेत्रेमनुष्यक्षेत्रमध्येइत्यर्थः॥अर्द्धतृतीयेषु

षेति अर्द्धतृतीयास्त्रांतर्मनुष्यक्षेत्रस्यार्द्धतृतीयंसमुद्राणांनिद्युनेदनीदंचिद्वोपणंद्वीपानांद्रष्टव्यं॥द्वीपाश्चसमुद्रौचद्वीपसमुद्रास्तेषुनिर्व्याघातेनव्याघा
तस्याभावोनिर्व्याघातंतेननिर्व्याघातेनवातृतीयायाइतिपाक्षिकोःसमादेशाभावः॥व्याघाताभावेनेत्यर्थः॥पंचदशसुकर्मभूमिषुपंचभरतपंचैरवतपंच
महाविदेहरूपासुव्याघातंप्रतीत्यव्याघातमनीतिभावः॥पंचसुमहाविदेहेषुइयमत्रभावनाव्याघातोनामातिस्निग्धोऽतिरूक्षोवाकालस्तस्मिन्सत्यग्नि
व्यवच्छेदात्ततोयदापंचसुभरतेषुपंचस्वैरावतेषुसुषमसुषमदुःषमावावर्त्ततेतदातिस्निग्धःसुषमदुःषमायांचातिरूक्षइत्यग्निव्यवच्छेदस्तस्मिन्
सतिपंचसुमहाविदेहेषुशेषकालंपंचदशस्वपिकर्मभूमिषुएत्थणमित्यादि॥अत्रनंतेषुस्थानकेषुबादरतेजस्कायिकानांस्थानानिप्रज्ञप्तानिउववा
एणमित्यादिउपपातेनयथोक्तस्थानप्राप्त्यानिमुंख्यनायांतरालगताबपीतिभावः॥चिंत्यमानालोकस्यासंख्येयभागेस्तोकत्वात्॥समुद्घातेनापि
चिंत्यमानालोकस्यासंख्येयभागेमारणांतिकेसमुद्घातवशानोविक्षिप्तात्मप्रदेशदंडानामपिस्तोकतयालोकासंख्येयभागमात्रव्यापित्वात्स्व
स्थानेनलोकस्यासंख्येयभागमनुष्यक्षेत्रस्यपंचचत्वारिंशद्योजनलक्षप्रमाणायामविष्कंभतयालोकासंख्येयभागमात्रत्वात्॥अपर्याप्तबादर
तेजस्कायिकस्थानानिपृच्छति॥८८॥कहिणंइत्यादि॥प्रश्नसूत्रंगतार्थंभगवानाहगौतमेत्यादिगौतमयत्रैवबादरतेजस्कायिकानामपर्याप्तानाम
पिस्थानानिप्रज्ञप्तानिपर्याप्तनिश्रयैवापर्याप्तानामवस्थानात्॥उववाएणंलोगस्सदोसुउड्ढकवाडेसुतिरियलोयतट्टेयइतिइहार्द्धतृतीयद्वीपसमु
द्रप्रमाणबाहल्येपूर्वापरदक्षिणोत्तरस्वयंभूरमणपर्यंतेयेकपाटेकेवलिसमुद्घातकपाटवत्॥ऊर्द्ध्वमपिलोकांतंस्पृष्टेनऊर्द्ध्वकपाटेतयोरूर्द्ध्वकपाट
योस्तथातिरियलोयतट्टेयइति॥तट्टंस्थालंतिर्यग्लोकस्थालमिवतिर्यग्लोकतट्टंतस्मिंश्चस्वयंभूरमणसमुद्रवेदिकापर्यंतेषुअष्टादशयोजनशत
बाहल्येसमस्ततिर्यग्लोकेचेत्यर्थः॥उपपातेनबादरतेजस्कायिकानामपर्याप्तानांस्थानानिप्रज्ञप्तानिकेचित्तुतिरियलोयतट्टेइतिपठंतिएवंव्या
चक्षते॥तयोःकपाटयोःस्थितस्तस्थः॥तिर्यग्लोकतस्थःतयोरूर्द्ध्वकपाटयोःस्थितस्तस्थः॥तिर्यग्लोकतस्थःतयोरूर्द्ध्वकपाटयोरंतर्वर्त्तीति
र्यग्लोकइत्यर्थः॥तस्मिंश्चकिमुक्तंभवतिद्वयोरूर्द्ध्वकपाटयोर्यथोक्तस्वरूपयोस्तिर्यग्लोकेपिचतयोरेवकपाटयोरंतर्गतेनान्यत्रशेषतिर्यग्लो

[library stamp: BHAU DAJI MEMORIAL]

कव्यवच्छेदपरमेतद्वाक्यंनविधानपरंविधानस्यकपाटग्रहणेनैवसिद्धत्वात्नत्वपुनःकेवलिनांविशिष्टश्रुतविदांवागम्यं ॥ इयमत्रभावनाइहत्रिविधाःबा
दराःपर्याप्ततेजस्कायिकास्तद्यथाएकभविकाबद्धायुषोऽभिमुखनामगोत्राश्च ॥ तत्रयेकस्मान्नविवक्षिताद्भवातअनंतरंबादरापर्याप्ततेजस्कायिकात्व
नउत्पत्स्यंतेतेएकाभविकायितुपूर्वभवत्रिभागादिसमयेबद्धबादरापर्याप्ततेजस्कायिकायुषस्तेबद्धायुषांयेपुनर्बादरापर्याप्ततेजस्कायिकायुर्नामगो
त्राणिपूर्वभवमोचनानंतरंसाक्षाद्वेदयंतेतेअभिमुखनामगोत्राः तत्रएकभविकाबद्धायुषश्चद्रव्यानाबादरापर्याप्ततेजस्कायिकानाभावतस्तदा
युर्नामगोत्रवेदनाभावात्ततोनतैरिहाधिकारःकिंत्वभिमुखनामगोत्रैस्तेषामेवोपपातस्यस्थानप्राप्त्याभिमुख्यलक्षणस्यलभ्यमानत्वात्तत्रय
द्यपिऋजुसूत्रनयदर्शनेनबादरपर्याप्ततेजस्कायुर्नामगोत्रवेदनात्यथोक्ताकपाटद्वयतिर्यग्लोकबाह्यव्यवस्थिताअपिबादरापर्याप्ततेजस्का
यिकव्यपदेशंलभंतेतथाप्यत्रव्यवहारनयदर्शनाभ्युपगमात्येस्वस्थानसमश्रेणिकपाटद्वयव्यवस्थितायेचस्वस्थानानुगतेतिर्यग्लोकेप्र
विष्टास्तएवबादरापर्याप्ततेजस्कायिकाव्यपदिश्यंतेनशेषाःकपाटांतरालव्यवस्थिताविषमस्थानवर्त्तित्वात्तेनयेअद्यापिकपाटद्वयंनप्रतिना
पितिर्यग्लोकंतेकिलपूर्वभवावस्थाएवेतिनगण्यंते ॥ उक्तंच ॥ पणयाललक्खपिहुलादुण्णिकवाडायछट्टदिसिंपुट्ठा ॥ लोगंतेतेसिंतोजेतेऊते
उघेप्पंति ॥ ततउक्तं ॥ उववाएणंदोसुउद्धकवाडेसुतिरियलोयलोयतट्टेयइतिस्थापना  ॥ तदेवमिदंसूत्रंव्यवहारनयदर्शनेनव्याख्यातं
तथासंप्रदायानयुक्तंचैतत् ॥ विचित्रासूत्रस्यगतिरितिवचनादितिसमुग्घाएणंसव्वलोएइति ॥ इहद्वयोःकपाटयोर्यथोक्तस्वरूपयोर्यथो
क्तस्वरूपयोर्यान्ययांतरालानितेषुयेसूक्ष्मपृथिवीकायिकादयोबादरापर्याप्ततेजस्कायिकेषूत्पद्यमानामारणांतिकसमुद्घातेनसमवह
तास्तेकिंविष्कंभबाहल्याभ्यांशरीरप्रमाणमात्रान्आयामतोऽउत्कर्षतोलोकांतंयावत्आत्मप्रदेशान्विक्षिपंति ॥ तथाचावगाहनासंस्थान
पदेवक्ष्यतिपुढविकाइयस्सणंभंतेसमोहयस्सतेयासरीरपमाणामत्तेविक्खंभबाहल्लेणंआयामेणंजहन्नेणंअंगुलस्सअसंखेज्जइ
भागंउक्कोसेणंलोगंतोइति ॥ ततस्तेसूक्ष्मपृथिवीकादयउत्पत्तिदेशंयावत्विक्षिप्तात्मप्रदेशदंडाअपांतरालगतौवर्त्तमानाबादरापर्याप्ततेज ३३

स्कायिकायुर्वेदनात्लब्धबादरपर्याप्ततेजस्कायिकव्यपदेशाःसमुद्घातगताएवापांतरालगतौवर्त्तमानाइतिसमुद्घातगताश्चसकललोकमापूरयंति ॥
उक्तंच ॥ समुद्घातेनसर्वलोकेइतिअतिबहवःखलुबादरापर्याप्ततेजस्कायिकाएकैकपर्याप्तनिश्रयाअसंख्येयानामपर्याप्तानामुत्पादात्तेचसूक्ष्मे
ष्वपिसमुत्पद्यंतेसूक्ष्माश्चसर्वत्रविद्यंतेइतिबादरापर्याप्ततेजस्कायिकाःस्वस्वभवपर्यंतेकृतमारणांतिकसमुद्घाताःसंतःसकलमपिलोकमापूरयंती
तिनकश्चिद्दोषः ॥ अपित्वनिरुपचरितेतेजस्कायिकसमुद्घातप्ररूपणाः ॥ स्थापना ॥ स्व  स्थाने ॥ तलोकस्यासंख्येय भागेइति
पर्याप्त अयाअपर्याप्तनिश्रयाअपर्याप्तानामुत्पादात्पर्याप्तामानावस्थानंमवुध्यस्वं त्रतश्चलोकासंख्येयतमभागमात्रमिति
सूक्ष्मपर्याप्तापर्याप्ततेजस्कायिकसूत्रंसूक्ष्मपर्याप्तापर्याप्तपृथिवीकायिकासूत्रवत्भावनीयं एवंवायुकायिकवनस्पतिकायिकसूत्रा
ण्यपिप्रत्येकंत्रीणिभावनीयानि ॥ नवरंबादरपर्याप्तवायुकायिकसूत्रेभवनछिद्राणिभवनानामवकाशांतराणिभवनिष्कुटागवाक्षादिकल्पाःकेच
नभवनप्रविशानरकछिद्राणिनरकनिष्कुटागवाक्षादिकल्पानारकावासप्रदेशाःएवंविमानछिद्राणिविमाननिष्कुटाश्चप्रतिपत्तव्याः ॥ उववा
एणंलोगस्सअसंखेज्जेसुभागेसुइत्यादि ॥ वायवोहिपर्याप्ताअतिबहवोयतोयत्रशुषिरंतत्रवायुःशुषिरबहुलश्चलोकइतिशेषपदानादित्युक्तं
कस्यासंख्येयेषुभागेष्वित्युक्तं ॥ अपर्याप्तबादरवायुकायिकसूत्रेनुववाएणंसमुग्घाएणयसव्वलोएइति ॥ इहदेवनारकवर्जेभ्यःशेषकायेभ्यःस
र्वेभ्योपिबादरपर्याप्तवायुकायिकेषुसमुत्पद्यंतेबादरापर्याप्तायांतरालगतावपिलभ्यंतेबहुनिबहुनिस्वस्थानानिपर्याप्तापर्याप्तबादरवायुकायि
कानांततोव्यवहारनयमतेनाप्युपपातमधिकृत्यसकललोकव्यापिताघटतेइतिनकाचित्क्षतिसमुद्घातेनसकललोकव्यापिताप्रतीति
वसर्वेषुसूक्ष्मेषुसर्वत्रवर्त्तिकेषांसमुत्पादसंभवात् ॥ बादरपर्याप्तवनस्पतिकायिकसूत्रेउववाएणसव्वलोएइहबादरपर्याप्तवनस्पति
कायिकानांस्वस्थानंयतोदध्यादितत्रबादरनिगोदानांसेवालादीनांसंभवात्सूक्ष्मनिगोदानांभवस्थितिरंतर्मुहूर्त्तंततस्तेबादरनिगोदे
षुपर्याप्तेषुसमुत्पद्यमानाबादरनिगोदपर्याप्तायुरनुभवंतःऋजुविशुद्धऋजुसूत्रनयदर्शनाभ्युपगमेनलब्धबादरपर्याप्तवनस्पतिकाय

कव्यपदेशाउपपातेनरकलोकस्यासंख्येयभागेवर्तिनतदुक्तं॥उववाएणंलोयस्सअसंखेज्जइभागे इति॥समुग्घाएणंसव्वलोएइतियदाबादरनिगोदाःसूक्ष्मनिगोदेषु
आयुर्बद्धापर्यंतेमारणांतिकसमुद्घातेन गताश्चसकललोकव्यापिनश्चतिसमुद्घातेनसर्वलोकंस्वस्थानेनलोकस्यासंख्येयभागेघनोदध्यादीनां
सर्वेषामपिसमुदितानांलोकस्यासंख्येयभागमात्र॥ग्रंथाग्रं २९५॥वर्तित्वात्॥शेषंकंठ्यंएवंद्वींद्रियत्रींद्रियचतुरिंद्रियसामान्यपंचेंद्रियसूत्राण्य
पिभावनीयानिनवरंद्वींद्रियादयोबहवोजलसंभूताःशंखप्रभृतयइतिसर्वेष्वपिसमुद्रेषुस्थानान्यवगंतव्यानि उक्तानितथाऊर्ध्वलोकेतदेकदेशभागेमंदराद्रि
वाप्यादिषुअधोलोकेतदेशेअधोलौकिकग्रामकूपतडागादिषुशेषमुपयुज्यस्वयंपरिभावनीयं॥अधुनापर्याप्तापर्याप्तनैरयिकस्थानप्ररूप
णार्थमाह॥७॥कहिणंभंतेनेरइयाणमित्यादिकस्मिन्प्रदेशेभदंतनैरयिकाणांपर्याप्तापर्याप्तानांस्थानानिप्रज्ञप्तानिएवंदेवव्यक्तंपृच्छतिय
थान्येष्वपबुध्यंतेकहिणमितिकस्मिन्प्रदेशेणमितिवाक्यालंकारेणंतेनैरयिकाःपरिवसंतिभगवानाह॥गोयमेत्यादिगौतमस्वस्थानेनस
प्तसुपृथिवीषुतायथानामयाह॥तंजहारयणप्पभाएइत्यादिगतार्थंइत्थणमित्यादिअत्रएतासुसप्तसुपृथिवीषुनैरयिकाणांसर्वसंख्ययाचतुरशी
तिनरकावासशतसहस्राणिभवंतितथाहिरत्नप्रभायांत्रिंशन्नरकावासशतसहस्राणिशर्कराप्रभायांपंचविंशति॥वालुकाप्रभायांपंच
दशपंकप्रभायांदशधूमप्रभायांत्रीणितमःप्रभायामेकंशतसहस्रंपंचोनंतमस्तमःप्रभायांपंचतिसर्वसंख्ययाचतुरशीतिर्लक्षानरका
वासानामित्याख्यातंमयाशेषैश्चतीर्थकृद्भिःतेणंनरकावासाइत्यादितेनरकाश्चतुरशीतिलक्षप्रमाणाःसर्वेपियथाप्रत्येकमंतर्मध्यभागे
वृत्ताकाराबहिर्भागेचतुरस्राकाराःइयंचपीठोपरिवर्तनंमध्यभागमधिकृत्यप्रोच्यंतेसकलपीठापेक्षयात्वावलिकाप्रविष्टावृत्तत्र्य
स्रसंस्थानाःपुष्पावकीर्णास्तनानासंस्थानाःप्रतिपत्तव्या॥अहेखुरप्पसंठाणसंठियाइतिअधोभूमितलेक्षुरप्रस्येवप्रहरणविशेष ३४
स्ययत्संस्थानमाकारविशेषस्तीक्ष्णतालक्षणस्तेनसंस्थितास्तथाहितेषुनरकावासेषुभूमितलमसृणत्वाभावतःशर्करिलेपादेषु
न्यस्यमानेषुशर्करामात्रसंस्पर्शेपिक्षुरप्रेणेव कृत्यंते निर्बंधयारतमसाइति॥तमसानित्यांधकाराःउद्योताभावतोयत्तमस्तदिहतम

उच्यंतेतेनतमसानित्यंसर्वकालमंधकारास्तत्रयेवरंकादिष्वपिनामांधकारोस्तिकेवलंबहिःसूर्यप्रकाशेमंदनमोभवतिनरकेषुतीर्थकरजन्मदीक्षादिका
लव्यतिरेकेणान्यदासर्वकालमपिउद्योतलेशस्याप्यभावनाजात्यंधस्येवमेघच्छन्नकालार्द्धरात्रइवचातीवबहलतरोबत्तंतेनेनतउक्तंतमसानित्यांधका
राःतमश्चतत्रसदावस्थितद्योतकारणासंभवात्॥तथाचाह॥ववगयगहचंदसूरनक्खत्तजोइसियपहा॥व्यपगतःपरिभ्रष्टोग्रहचंद्रसूर्यनक्षत्ररू
पाणामुपलक्षणमेतत्तारारूपाणांचज्योतिष्काणांपथामार्गोयेषुतेव्यपगतग्रहचंद्रसूर्यनक्षत्रज्योतिष्कपथाः॥तथामेयवसापूयरुहिरमंसचिक्खल्लि
त्ताणुलेवणतलाइतिस्वभावसंपन्नैर्मेदोवसापूतिरुधिरमांसैर्यश्चिक्खल्लःकर्दमस्तेनलिप्तमुपदिग्धंअनुलेपनेनसकृल्लिप्तस्यपुनःपुनरुपलेपनेनतलं
भूमिकायेषांतेमेदोवसापूतिरुधिरमांसचिक्खल्लिसानुलेपनतलाःअतएवाशुचयोऽपवित्राबीभत्सादर्शनेप्यतिजुगुप्सोत्पत्तेःक्वचिनवीसाइ
तिपाठस्तत्रविश्राम्राममंधिकाःपरमदुरभिगंधामृतगवादिकडेवरेभ्योप्यतीवानिष्टदुरभिगंधाःकाऊगणिवण्णाभाइतिलोहेधम्यमानेयाद्
कृकपोतावह्निरूपारूपोऽग्नेर्वर्णाःकिमुक्तंभवतिया दृशीबहुकृष्णवर्णरूपाअग्निज्वालाविनिर्गच्छतीतितादृशीआभाआकारोयेषांतेकपोताग्नि
वर्णाभाःधम्यमानलोहाग्निज्वालाकल्पाइतिभावः॥नारकोत्पत्तिस्थानव्यतिरेकेणान्यत्रसर्वत्राप्युष्णरूपत्वात्॥एतच्चषष्ठसप्तमपृथिवीवर्जमव
सेयंतथाचवक्ष्यति॥नवरंतमसत्तमीसुणंकाऊअगणिवन्नाभानभवंति॥तथाकर्कशाऽतिदुःसहाऽसिपत्रस्येवस्पर्शोयेषुतेकर्कशस्पर्शाःअत
एव दुरहियासाइतिदुःखेनाध्यास्यंतेसह्यंतेइतिदुरध्यासाःअशुभादर्शनेनोतरकास्तथागंधरसस्पर्शशब्दैरशुभाअतीवासातरूपानरकेषु
वेदणाएयणमित्यादि॥यावत्एत्थणंबहवेनेरइयापरिवसंति काळाइत्यादि॥कालाःकृष्णाः तत्रकोपिनिःप्रतिभनयामंदःकृष्णोपिभवतितत्सद्
शंकाव्यवच्छेदार्थंविशेषणांतरमाह॥कालाभावभासाःकालाःकृष्णोवभासःप्रतिभाविनिर्गमोयेभ्यस्तेकालावभासाः॥कृष्णप्रभापटलोप
चिताइतिभावः॥अतएवःअतएवगंभीरलोमहर्षाःगंभीरोऽतीवोत्कटोलोमहर्षोरोमांचोद्धर्षोभयवशात्येभ्यस्तेगंभीरलोमहर्षाःकिमुक्तंभ
वएवंनामकृष्णाःकृष्णावभासायद्दर्शनमात्रेपिशेषनारकजंतूनांभयसंपादनमात्रातिगलोमहर्षमुत्पादयंतीति॥अ तएवभयानकाभीमाभी

मत्वादिवउल्लोगनका॰॥ उल्लास्यंतेशेषनारकजंतवएभिरित्युल्लासनाउल्लासनका॰किंबहुनावर्ण्णेनवर्णमधिकृत्यपरमकृष्णायनउर्द्धंनकिमपिकृष्णाम
स्तिभयानकंवाबहुलतयैवप्रामकृष्णवर्ण्णाप्रज्ञप्तास्तथाशेषैश्चतीर्थकरैःहेश्रमणहेआयुष्मन्तेणंनिच्चंभीयाइत्यादि॥ तेनैरयिकाणमितिवाक्यालंकारे
नित्यंसर्वकालंक्षेत्रस्वभावजानमहानिविडांधकारदर्शनतोभीतानित्यंसर्वकालंत्रस्ताःपरमाधार्मिकपरस्परोदीरितदुःखपानभयादत्यंतत्रासमुपप
न्नाःतथानित्यंसर्वकालंपरमाधार्मिकैःपरस्परंचात्रासिताःसंग्राहितास्तथानित्यंसर्वकालंयथालंयथायोगंपरमदुःसहशातास्तुवेदनानुभवतःपरमा
धार्मिकपरस्परोदीरितदुःखानुभवतश्चोद्विग्नास्ताद्भूतवासपराङ्मुखचित्ता॥एवंनित्यंसर्वकालंपरमशुभंमेकांतेनाशुभंसंबद्धमनुबद्धंननुज्ञानु
विदपिमनागप्यपांतरालेव्यवच्छिन्नसंतानंनरकभयंनरकदुःखंप्रत्यनुभवंतःप्रत्येकंवेद्यमानाविहरंत्यवतिष्ठंते॥तदेवंसामान्यतोनैरयिकसूत्रंव्या
ख्यातमेवंरत्नप्रभादिविषयाण्यपिसूत्राणियथायोगंपरिभावनीयानिप्रायउक्तव्याख्यानानुसारेणसुगमत्वात्॥केवलंषष्ठपृथिव्यांसप्तमपृथिव्यां
चनरकावासाःकपोताग्निवर्ण्णाभानवक्तव्याः॥नारकोत्पत्तिस्थानव्यतिरेकेणानव्यतिरेकेणान्यत्रसर्वत्रापितेषांशीतपरिणामत्वात्तथाचाहनवरं
छट्ठसत्तमीसुणंकाऊण अगणिवन्नाभानभवंति॥संप्रतियथोक्तपृथिवीबाहल्यपरिमाणप्रतिपादिकांसंग्रहणिगाथामाह॥७९॥आसीयंबत्तीयंबत्ती
समित्यादिआसीतिंअशीतिसहस्राधिकंशतंसहस्रंरत्नप्रभायाबाहल्यंद्वात्रिंशत्सहस्राधिकंशर्कराप्रभायाःअष्टाविंशतिसहस्राधिकंवालुकाप्रभा
याःविंशतिसहस्राधिकंपंकप्रभायाःअष्टादशसहस्राधिकंधूमप्रभायाःषोडशसहस्राधिकं॥तमःप्रभायाःअष्टोत्तरंअष्टसहस्राधिकंछट्ठेसिमियाइ
तिसर्वाधस्तन्यास्तन्यास्तमःप्रभायाइतिसंप्रत्युपर्यधश्चएकैकंयोजनसहस्रंमुक्त्वायावत्प्रमाणंनरकावासयोग्यंपृथिवीबाहल्यंत्यावत्संग्रहानुकामआ
ह॥अउत्तरंचेत्यादिगाथाद्वयंरत्नप्रभायाहिअशीतिसहस्राधिकंलक्षंबाहल्यपरिगणंतस्योपरितनमेकंयोजनसहस्रमेकंचाधोयोजनसहस्रंवर्जयित्वा
शेषंनरकावासाधारभूतमतोरत्नप्रभायानरकावासायोग्यंबाहल्यपरिमाणमष्टसप्ततिसहस्राधिकंलक्षंभवति॥एवंसर्वत्राप्युपयुज्यभावनीयंसांप्रतं ३९.
नरकावाससंख्यासंग्रहणिगाथामाह॥तीसायइत्यादिगतार्था॥तिर्यक्पंचेंद्रियसूत्रंप्राग्वत्॥नवरमूर्द्धलोकेतदेकदेशतिर्यक्पंचेंद्रियागत्यादेषा

मंदरादिवाप्यादिषुअधोलोकेतदेशेअधोलौकिकग्रामादिषुमनुष्यसूत्रमपिसुगमंनवरंसमुग्घाएणंसव्वलोएइतिकेवलिसमुद्घातमधिकृत्यसंप्रतिभ
वनपतिस्थानेप्रतिपादनार्थमाह॥८०॥कहिणंभंतेभवणवासीणंदेवाणमित्यादिअसीउत्तरजोयणसयसहस्सबाहल्लाएइतिअशीतिसहस्राधिक
योजनशतसहस्रंबाहल्यंयस्याःसातथातस्याःसत्तभवणकोडीउबावत्तरिंभवणवाससयसहस्सा॥भवंतीतिमक्खायमिति॥असुरकुमाराणांहिच
तुःषष्टिःशतसहस्राणिभवनानांततःसर्वसंख्ययायथोक्तंभवनसंख्यानंभवति॥तेणंभवणाइत्यादितानिणमितिवाक्यालंकारेपुंस्त्वंप्राकृतत्वात्भ
वनानिबहिर्वृत्तानिवृत्ताकाराणिअंतःसमचतुरस्राणिअधस्तलभागेपुष्करकर्णिकासंस्थानसंस्थितानिकर्णिकानामउन्नतसमचित्रबिंदुकिनी
उक्किन्नंतरविउलगंभीरखायफलिहाइतिउत्कीर्ण्णमिवोत्कीर्ण्णमतीवव्यक्तमित्यर्थः॥उत्कीर्ण्णमंतरंयासांख्यानपरिखाणांताउत्कीर्ण्णांतराःकिमुक्तंभ
वतिखातानांपरिखाणांचस्पष्टंवैविक्त्यंचाभीलनार्थमपांतरालेमहतीपालीसमस्तीतिखातानिवपरिखाश्चखातपरिखा॥उत्कीर्ण्णांतराविपुलावि
स्तीर्णागंभीराअलब्धमध्यभागाःखातपरिखायेषांभवनानांपरितस्तानिउत्कीर्णांतरविपुलगंभीरखातपरिखाणांवायंप्रतिविशेषः॥परिखाउपरि
विशालाअधःसंकुचिताखातंतूभयत्रापिसममितिपागारट्टालककवाडतोरणपडिदुवारदेसभागाइतिप्रतिभवनंप्राकारेषुसालेषुअट्टालककपाट
तोरणप्रतिद्वाराणिअट्टालककपाटतोरणप्रतिद्वाररूपोदेशभागदेशविशेषायेषुतानिप्रकाराट्टालककपाटतोरणप्रतिहारदेशभागानि॥तत्रअट्टा
लकाःप्राकारस्योपरिभृत्याश्रयविशेषाःकपाटानिप्रतोलीद्वारसत्कानितेनप्रतोल्यःसर्वत्रसूचिताअन्यथाकपाटानामसंभवात्तोरणानिप्रतोलीद्वारेषु
प्रतिद्वाराणिस्थूल द्वारापांतरालवर्तीनिमलघुद्वाराणि॥जंतसयग्घिमुसलमुसंढिपरियाइतियंत्राणिनानाप्रकाराणिशतघ्न्योमहायष्टयोमहाशि
लावायाःपातिताःसत्यःपुरुषाणांशतानिघ्नंतिमुशलानिप्रतीतानिमुसंढयःप्रहरणविशेषास्तैःपरितानिसमंततोवेष्टितानिअतएवायोध्यानिप
रियोदुमशक्यानिअयोध्यामित्यादेयवसंदाजयानिसदासर्वजयोयेषुतानिसदाजयानिसर्वकालंजयवंताइत्यर्थः॥तथासदासर्वकालंगुप्तानिप्रहर
त
णैःपुरुषैश्चयोरूभिःसर्वतःसमंततोनिरंतरंपरिवारितत्वात्परेषामसहमानानांमनागपिप्रवेशासंभवात्॥अडयालकोठरइयाइतिअ

ष्टाचत्वारिंशद्भेदभिन्नविछित्तिकलिताः कोष्टकाअपवरकारचिताः स्वयमेवरचनांप्राप्तायेषुतानिअष्टाचत्वारिंशत्कोष्टकरचितानिस्रवादिदर्शनाल्ला
क्षिकोनिष्टांतस्यपरिनिपातः॥तथाअष्टाचत्वारिंशद्भेदभिन्नविछिन्नयः कृतावनामालायेषुतानिअष्टाचत्वारिंशत्कृतवनमालानिअन्येत्वभिदधति
अडयालशब्दोदेशीवचनत्वात्प्रसंसावाचीटत्तोयमर्थः प्रशस्तकोष्टकरचितानिप्रशस्तकृतवनमालानीति॥ तथाक्षेमाणिपरकृतोपद्रवरहितानि
शिवानिसदामंगलोयेतानितथाकिंकराःकिंकरभूतायेअमरास्तैर्दंडैः कृतोपरक्षितानिसर्वतः समंततोरक्षितानिकिंकरामरदंडोपरक्षिता
निलाउल्लोइयमहियाइतिलाइयंनामयत्॥भूमेर्गोमयादिनाउपलेपनंउल्लोइयंकुद्यानांमालास्यचसेटिकादिभिः समृष्टिकरणंलोइयोल्लोइया
भ्यांमहितानिपूजितानिलाइयोल्लोइयमहितानितथागोशीर्षेणगोशीषणगोशीर्षनामकचंदनेनवदर्दरेणबहलेनवापटाप्रकारेणवादत्ताः॥
पंचागुष्यायस्तवलाहस्तकायेषुतानिगोशीर्षरक्तसरसरक्तचंदनदर्दरदत्तपंचांगुलितलानितथाउपचितानिवेशिनाचंदनकलशामांगल्यक
लशायेषुतानिउपचितचंदनकलसानिचंदनघडस्रुकयतोरणपडिदुवारदेसभागाइतिचंदनघटैश्चंदनकलसैः स्रुकृतानिशोभितानीतिता
त्पर्यार्थः॥यानितोरणानिचंदनघटस्रुकृतानितोरणानिप्रतिद्वारदेशभागंद्वारदेशभागेयेषुतानिचंदनघटस्रुकृततोरणप्रतिद्वारदेशभागानि
तथाआसत्तोसत्तविउलवट्टवग्घारियमल्लदामकलावाइतिआअवाड्‌अधोभूमौसत्कआसक्तोभूमौलग्नइत्यर्थः॥ऊर्द्धंसक्तउत्सक्तउल्लोकतले
उपरिसंबद्धइत्यर्थः॥विपुलोविस्तीर्णः वृत्तोवर्त्तुलवग्घारियइतिप्रलंबितोमाल्यदामकलापः॥पुष्पमालासमूहोयेषुतान्यासक्तोत्सक्तविपुलवृ
त्तप्रलंबितमाल्यदामकलापानितथापंचवर्णस्रुरभिमुक्तपुष्पपुंजोपचारकलितानिकालागुरुपवरकुंदुरुक्कतुरुक्केवकालागुरुप्रवरकुंदुरुक्कतु
रुक्कणितेषांधूमधस्ययोमघमघायमानोगंधउद्धुतइतस्ततोविप्रसृतस्ततोविप्रसृतस्तेनाभिरामाणिरमणीयानिकालागुरुकुंदुरुक्कतुरु
क्कधूममघमघेंनगंधुद्धुयाभिरामेइतिकालागुरुः प्रसिद्धः प्रधानः कुंदुरुक्कश्चीडानुसंक्कंसिल्हकंकालागुरुश्चप्रवरकुंदुरुक्कदुतुरु
क्केवंकालागुरुप्रवरकुंदुरुक्कतुरुक्काणितेषांधूमस्ययोमघमघायमानोगंधउद्धुनइतस्ततोविप्रसृतस्तेनाभिरामाणिरमणीयानिकालागु

रुकुंदुरुक्कतुरुक्कधूममघमघेंनगंधुद्धुयाभिरामेइतिकालागुरुः प्रसिद्धः प्रधानः कुंदुरुक्कश्चीडानुसंक्कंसिल्हकंकालागुरुश्चप्रवरकुंदुरुक्कदुतुरुक्केवकालागु
रुप्रवरकुंदुरुक्कतुरुक्काणितेषांधूमस्ययोमघमघायमानोगंधउद्धुतइतस्ततोविप्रसृतस्तेनाभिरामाणिरमणीयानिकालागुरुकुंदुरुक्कतुरुक्कधूपमघम
घायमानगंधोधुताभिरामाणितथाशोभनोगंधोस्तिवतेवरगंधोश्चवासाः स्रुगंधवरगंधास्तेषांगंधः सएवास्तीतिस्रुगंधवरगंधिकानिअतोनोकस्वरादि
तीकप्रत्ययः॥अतएवगंधवर्त्तिभूतानिसौरभ्यातिशयात्गंधद्रव्यगुटिकाकल्पानीतिभावः॥तथाअप्सरोगणाणांसंघः समुदायरः स्तेनसम्यक्रमणीय
तयाकीर्णानिव्याप्तानिअप्सरोगणसंघविकीर्णानितथादिव्यानांत्रुटितानामातोद्यानांवेणुवीणामृदंगादीनांयेशब्दास्तैः संप्रणदितानिसम्यक्श्रोत्रमनो
हारितयाप्रकर्षेण सर्वकालंनदितानिशब्दवंतिसर्वरत्नमयानिसर्वात्मनासामस्त्येननत्वेकदेशेरत्नमयानिवावानि॥आकाशस्फटिकवदतिस्वच्छानिश्ल
क्ष्णानिश्लक्ष्णपुद्गलस्कंधनिष्पन्नानिश्लक्ष्णदलनिष्पन्नघटवत्॥लण्हानिमसृणानिघुंटितपटवत्॥घटाइतिघृष्टानीवघृष्टानि॥खरशान आपाषाणप्रति
मावत्॥मठाइतिमृष्टानिस्रुकुमारशानयापाषाणप्रतिमेव॥अतएवनीरजांसिस्वाभाविकरजोरहि तत्वात्निर्मलान्यागंतुकमलाभावात्॥निःपंकानिक
लंकविकर्दमरहितानिवानिष्कंकडछायाइतिनिष्कंकटानिरावरणानिरूपघातेनिभावार्थः॥छायादीप्तिर्येषांतानिनिष्कंकटछायानिसप्रभानिस्वरूप
तःप्रभावंतिसमरीचीनिबहिर्विनिर्गतकिरणजालानिसाद्योतानिबहिर्व्यवस्थितवस्तुस्तोमप्रकाशनकशनकराणिप्रसादीयानिप्रसादायमनः प्रसत्त्यै
हितानिप्रसादीयानिमनःप्रसत्तिकाराणीतिभावः॥तथादर्शनीयानिदर्शनयोग्यानियानिपश्यनश्चक्षुषीनश्रमंगच्छतइतितात्पर्यार्थः॥अभिरूवाइतिश
णिसर्वेषांद्रष्टृणांमनःप्रसादानुकूलतया अभिमुखंरूपंयेषांतानिरूपाणिअत्यंतकमनीत्यर्थः॥अतएवपडिरूवाइतिप्रतिविशिष्टंरूपंयेषांतानिप्रतिरूपा
णि॥अथाप्रतिक्षणंनवंनवमिवरूपंयेषांतानिप्रतिरूपाणिएतेभवणवासीत्यादि॥एतेअनंतरोक्ताअसुरकुमारादयोभवनवासिनोयथाक्रमंचूडा
म णिमुकुटरत्नाभूषणानियुक्तनागस्फटादिविचित्रचिन्हधराश्च॥तथाहि॥असुरकुमाराभवनवासिनश्चूडामणिमुकुटरत्नाः चूडामणिर्नाममु
कुटरत्नंचिन्हभूतंयेषांतेतथानागकुमाराभूषणनियुक्तनागस्फुटारूपचिन्हधराः विद्युत्कुमाराभूषणनियुक्तवज्ररूपचिन्हधरावर्मनामशब्द

स्यायुधं अग्निकुमारा मुकुटनियुक्तपूर्णकलशरूपचिन्हधराः॥दीपकुमाराभूषणनियुक्तसिंहरूपधराः॥उदधिकुमाराभूषणनियुक्तहयवररूपचिन्ह
धारिणः॥वायुकुमाराभूषणनियुक्तसिंह रूपधराः॥उदधिकुमाराभूषणनियुक्तहयवररूपचिन्हधारिणः॥ वायुकुमाराभूषण नियुक्तमकररूपचिन्हध
राः॥स्तनितकुमाराभूषणनियुक्तवरवर्द्धमानरूपचिन्हधारिणः॥ वर्द्धमानाकंशरावसंपुटं अक्षरगमनिकात्वेवंभूषणेषु नागस्यदागरुडवज्राणियेषांभूषण
नागस्फटागरुडवज्रापूर्णकलशेनांकितउप्फेसामुकुटोयेषांतेपूर्णकलशांकितोप्फेसाः॥तथासिंहहयवरगजाः॥अंकाअर्थात्भूषणेषुयेषांतेसिंहहयवरग
जांकाः॥तथामकरवर्द्धमानकनियुक्तेभूषणेषुनियोजितंचित्रंआश्चर्यभूतंचिन्हंगतंक्तिंतयेषांतेमकरवर्द्धमानकनियुक्ताचिन्हधरास्ततःपूर्वपदेर्द्वंद्वः समासः
पुनःसर्वकर्मधारयइत्याह॥ सरूपाःशोभनंरूपंयेषांतेतथा अत्यंतकमनीयरूपाइत्यर्थः॥तथामहिड्डियाइतिमहतीऋद्धिर्भवनपरिवारादिकायेषांतेमहर्द्धिकाः
तथामहतीद्युतिःशरीरगताआभरणगतावेषामितिमहाद्युतयः तथामहत्बलंशारीरप्राणोयेषांतेमहाबलाः॥ तथामहद्यशः ख्यातिर्येषांतेमहायशसः॥तथाम
हान्अनुभागाः सामर्थ्यंशापानुग्रहविषयंयेषांतेमहानुभागाः॥तथामहेसक्खाइतिमहान्दूईशईश्वरइत्याख्याप्रसिद्धिर्येषांतेमहेशाख्या॥अथवाईशनमीशाभावे
३ घटप्रत्ययः ऐश्वर्यमित्यर्थः॥ इशऐश्वर्येतिवचनात्ततमीशमैश्वर्यमात्मनःख्यांतिप्रतीईतण्यर्थतयाख्यापयंतिइतिईशाख्यामहांतश्चतेइशाख्याश्चमहेशाख्याः क्वचि
न्महासोक्खाइतिपाठः॥नचमहनसोख्यंप्रभूतसद्वेद्योदयवशानयेषांतेमहासौख्याः अन्येपठंतिमहारक्खाइति॥तत्रायंशब्दसंस्कारोमहाश्वाक्षाः॥इयंचात्रापूर्व
सूरिप्रदर्शिताव्युत्पत्तिः आशुगमनादश्वोमनः॥अक्षाणिइंद्रियाणिस्वविषयव्यापकत्वात्॥अश्वश्चअक्षाणिमहांत्यश्वाक्षाणियेषांतेमहाश्वाक्षाः॥हारविरा
इयवच्छाइतिहारेर्विराजितंवक्षोयेषांतेहारविराजितवक्षसः॥कडगतुडियथंभियभुयाइति॥कटकानिकलाचिकाभरणानितुटिनानिबाहुरक्षिकास्तैस्तंभि
तावियस्तंभितौभुजौयेषांतेकटकतुटितस्तंभितभुजाः॥तथाअंगदानिबाहुशीर्षाभरणविशेषरूपाणिकुंडलेकर्णाभरणविशेषरूपेनथामृष्टौमृष्टीकृतौगं
डौकपोलौयैस्तानिमृष्टगंडानिकर्णपीठानिकरणाभरणविशेषरूपेनथामृष्टोमृष्टीकृतौगंडौकपोलौस्तैयैस्तानिमृष्टगंडानिकर्णपीठानिकर्णाभरणविशेष ३७
रूपाणिधारयंतीतिसदशीला॥अंगदकुंडलमृष्टगंडकर्णपीठधारिणः तथाविचित्राणिनानारूपाणिहस्ताभरणानियेषांतेविचित्रहस्ताभरणाः॥तथावि

चित्रमालामउलिमउलिमउडाविचित्रा माला कुसुमस्रक मौलौमस्तकेमुकुटंचयेषांतेविचित्रमालामौलिमुकुटाः॥तथाकल्लाणकंकल्लाणकारिप्रवरंवस्त्रंपरि
हितंयैस्तेकल्याणकप्रवरवस्त्रपरिहिताः कल्याणकदर्शनानिशांतस्यात्रपक्षिकःपरिपातः॥तथाकल्लाणकंकल्लाणकारियत्प्रवरमाल्यंपुष्पदामयथानुक्र
लेपनंतद्धरंतीतिकल्याणकप्रवरमाल्यानुलेपनधराः तथाभासरादेदीप्यमानाबोंदिः शरीरंयेषांतेभास्वरबोंदयः॥तथाप्रलंबतइतिप्रलंबायावनमालातांधरं
तीतिप्रलंबनमालाधराः॥दिव्वेणंसंघयणेणंतिशक्तिविशेषमपेक्षासंहननेनेवसंहननेननतुसाक्षात्संहननेनदेवानांसंहननासंभवात् संहननंहि अस्थिरच
नात्मकंनचदेवानामस्थीनिसंतितथाचोक्तंजीवाभिगमेदेवाअसंघयणीजम्हातेसिंनेवट्ठिराइत्यादि॥दिव्वाएइड्डीएइतिदिव्ययाप्रधानध्यापरिवारादिकया
दिव्ययाद्युत्युइत्यर्थसंप्रतियोगलक्षणयायुक्त अभिगमनेइतिवचनात्दिव्ययाप्रभयाभवनावासगवासगतयादिव्ययासमुदायशोभयादिव्येनार्चिषाश
रीरस्थरत्नादितेजोज्वालयादिव्येसतेजसाशरीरप्रभवेनदिव्ययालेश्यायादेहवर्णसुंदरतयादशदिशउद्योतयंतःसभासेमाणाइतिशोभमानास्ते
भवनवासिनोदेवाणमितिवाक्यालंकारेतत्रस्वरुंनिसाणं॥स्वेषामात्मीयानामित्यर्थ आहेवच्चंपोरेवदमित्यादिअधिपतेःकर्म आधिपत्यंरक्षाइत्यर्थः
साचरक्षासामान्येनाप्यारक्षकेणावलंक्यनेतेनआह॥पुरस्यपतिःपुरपतिस्तस्यकर्मपौरपत्यंसर्वेषामात्मीयानामग्रेसरत्वमितिभावः॥तच्चापिसरत्वंनायकत्व
मंतरेणापिस्वनायकनियुक्ततथाविधगृहचिंतकसामान्यपुरुषस्येवभवतितेनानायकत्वप्रतिपत्यर्थमाहस्वामित्वंस्वगस्यास्तीतिस्वामीतद्भावः स्वामित्वंनाय
कत्वमित्यर्थः॥तदपिचनायकत्वंकस्यचित्पोषकत्वमंतरेणापिभवतियथाहरिणाधिपतेर्हरिणस्यततशुंहार्भत्वंपोषकत्वं अतएवमहत्तरकत्वंकस्यचिदाज्ञावि
कलस्यापिभवति॥यथाकस्यचिद्वणिजःस्वादासीवर्गप्रतिततआह॥आणाईसरसेणावच्चं॥आज्ञयाइश्वरःसेनायापतिःसेनापतिः॥आज्ञेश्वरस्यासौसेनाप
तिस्तस्यकर्मआज्ञेश्वरसेनापत्यंस्वस्वसैन्यंप्रत्यद्भुतमाज्ञाप्राधान्यमितिभावः॥कारयंतोऽन्यैर्नियुक्तकैः पुरुषैःपालयंतः स्वयमेवमहतायत्नेनेतियोगः॥
अहयत्तिआख्यानकप्रतिबद्धानियदिवाअहतानिअव्याहतानिनित्यानुबंधीतिभावः॥येनाद्यगीतेनाट्यंनृत्तंगीतंगायनंयानिचवादितानितं
त्रीतलतालतुटितानितत्रतंत्रीवीणातलौहस्ततलौतालाःकंसिकात्रुटितानिवादित्राणितथायश्चघनमृदंगःपटुनापुरुषेणप्रवादितःतत्रघनमृदंगो

नामघनसमानध्वनिर्योमृदंगस्तत्एतेषांहृद्रस्तेषांखेणदिव्यान्विभवावप्रधानानितिभावः॥भोगार्हाःभोगाःशब्दादयोभोगभोगास्तान्॥भुंजानाविहरंत्या
सते॥असुरकुमारस्तत्रेकालाः॥कृष्णवर्णाःलोहिताक्षरत्नवत्विंबीफलवच्चतुष्टोयेषांलोहिताक्षबिंबोष्टा॥आरक्तोष्टाइतिभावः॥धवलाःपुष्पवत्सामर्था
त्कुंदकलिकाद्ववदंताःअसिताःकृष्णाकेशायेषांतेअसितकेशाः॥दंताःकेशाश्चामीषांवैक्रियाद्रष्टव्याः॥नस्वाभाविकाःवैक्रियशरीरत्वात्॥वामेयकुंडलधराए
ककर्णावसक्तकुंडलधारिणः॥तथार्द्रेणसरसेनचंदनेनानुलिप्तंगात्रंयेषांतेआर्द्रचंदनानुलिप्तगात्रास्तथाईषत्मनाक्शिलिंध्रपुष्पप्रकाशानिशिलिं
ध्रपुष्पसदृशवर्णानिदृषद्रक्तानीत्यर्थः॥असंक्लिष्टानिअत्यंतसुखजनकतयामनागपिसंक्लेशानुत्पादकानिसूक्ष्माणिमृदुलघुस्पर्शान्यच्छानिवेतिभावः॥व
स्त्राणिप्रवराणिअत्रसूत्रेविभक्तिलोपः॥प्राकृतत्वात्परिहिताःपरिहितवंतः॥तथावयःप्रथमंकुमारत्वलक्षणमितिक्रांतास्तत्पर्यंतवर्त्तिनमितिभावः॥द्वितीयं
चमध्यमलक्षणंवयोऽसंप्राप्तास्एतदेवव्यक्तीकरोतिभद्रेअतिप्रशस्येभद्रेयौवनेवर्त्तमानाः॥तलभंगयतुडियवरभूसणनिम्मलमणिरयणमंडियभुयाइति
तलभंगकाबाह्वाभरणविशेषास्तुटितानिबाहुरक्षकाअन्यानिचयानिवराणिभूषणानिबाह्वाभरणानितेषुयेनिर्म्मलामणयश्चंद्रकांताद्यारत्नानिचइंद्रनीलादी
नितैर्मंडितौभुजौयेषांतेतथा॥तथादशभिमुद्राभिर्मंडितोभुजोग्रग्रहस्तोयेषांतेदशमुद्रामंडिताग्रहस्ताः॥चूडामणिचिन्नचिंधगयाइतिचूडामणिनामकंचि
त्रमद्भुतंचिन्हंगतस्थितं॥येषांतेचूडामणिचित्रचिन्हगताः॥चमरबलिसामान्यसूत्रेकालाःकृष्णवर्णाः॥एतदेवोपमानतःप्रतिपदेयतिमहानीलसरि
सामहानीलंयत्किमपिवस्तुजातंलोकेप्रसिद्धंतेनसदृशाः॥एतदेवव्याचष्टेनीलगुडिकानीलगुटिकागवलंमाहिषंशृंगंअतसीकुसुमंप्रतीतंतेषामिव
प्रकाशःप्रतिभायेषांतेनीलगुटिकागवलातसीकुसुमप्रकाशाः॥तथावि कसितशतपत्रमिवनिर्मलेईषद्देशविभागेनमनाक्सितरक्तेताम्रेचनय
नेयेषांतेविकसितशतपत्रनिर्मलेषत्सितरक्तताम्रनयनाः॥गडस्येवायतादीर्घात्रऋज्वीअकुटिलातुंगाउन्नतानासिकायेषांतेगरुडायतर्ज्वतुंगनासाः
स्तथाउयवियर्तजिनंयत्शलाप्रवालंविभद्रुमस्तंयत्तुबिंबफलंबिम्बाःसत्कंफलंतत्संनिभोऽधरनुष्टोयेषांतेतथापांडुरंतनुसंध्याकालभाव्यारक्तशशिशक ३८
लंचंद्रखंडंतदपिचकथंभूतमित्याह॥विमलंरजसारहितंकविकलंवातथानिर्मलोयोदधिघनःशंखोगोक्षीरंयानिकुंदानिकुंदकुसुमानिदकरजः

पानीयकणामृणालिकाचनद्वत्धवलादंतश्रेणिर्येषांतेतथाविशेष्यात्परनिपातःप्राकृतत्वात्तथाहुतवाहनवैश्वानरेणनिध्मातंसत्यद्वजायतधौतंनि
र्मलंतप्तमुत्तप्तंतपनीयमारक्तंसुवर्णंतद्वत्रक्तानिहस्तपादतलानितालुजिव्हेचयेषांतेहुतवहनिध्मातधौततप्ततपनीयरक्ततलतालुजिह्वाः॥तथाअं
जनंसौवीरांजनंघनःप्रावृट्कालभावीमेघस्तद्वत्कृष्णारुचकरत्नवत्रमणीयाःस्निग्धाश्चकेशायेषांतेअंजनघनकृष्णरुचकरमणीयस्निग्धकेशाः
तिसकविलोगस्सअसंखेज्जइभागेइतिस्वस्थानोपपातसमुद्घातरूपेषुत्रिष्वपिलोकस्यासंख्येयतमेभागेवर्त्तंत्यानिचोवठीअसुराणमित्यादिगाथाद्वयं
सामान्यतोऽसुरकुमारादीनांभवनसंख्याप्रतिपादकंसुगमं॥चोतीसाचोयालाइत्यादिगाथादाक्षिणात्यानामसुरकुमारादीनांभवनसंख्याभिधायिकात
स्यास्याव्याख्यादक्षिणतोऽसुरकुमाराणांभवनानिचतुस्त्रिंशतशतसहस्राणिनागकुमाराणांचतुश्चत्वारिंशत्वायुकुमाराणांपंचाशत्द्वीपदिगुदधि
विद्युत्स्तनिताग्निकुमाराणांप्रत्येकंचत्वारिंशत्शतसहस्राणिभवनानांतीसाचचालीसेत्यादिउत्तरउत्तरस्यांदिशिअसुरकुमाराणांभवनानित्रिंशत्स
हस्राणिनागकुमाराणांचतुस्त्रिंशत्वायुकुमाराणांषट्चत्वारिंशत्द्वीपदिगुदधिविद्युत्स्तनिताग्निकुमाराणांप्रत्येकंषट्त्रिंशत्भवनशतसहस्राणि
संप्रतिसामानिकात्मरक्षकदेवसंख्यासंग्रहार्थमाह॥चउसठीसठ्ठइत्यादि॥दाक्षिणात्यस्यासुरकुमारेंद्रस्यसामानिकादेवाश्चतुःषष्टिशतस
हस्राणिउत्तराहस्यषष्ठिसहस्राणिअसुरवर्जानामसुरकुमारेंद्रवर्जानांशेषाणांसर्वेषामपिदाक्षिणात्यानामौत्तराहानांचषट्सहस्राणिप्रत्येकंसा
माणियाउएतेइतिएतेअणंतरोक्तसंख्याकादेवाःसामानिकाज्ञातव्याः आत्मरक्षकाःपुनःसर्वत्रापिसामानिकचतुर्गुणाःप्रतिपत्तव्याः॥इदानींदाक्षिणा
त्यानामौत्तराहानांचासुरकुमारादीनांयथाक्रममिंद्रादीन्निर्दिशति॥७॥चमरेधरणेइत्यादिदाक्षिणात्यानामसुरकुमाराणामधिपतिश्च
मरोनागकुमाराणांवेणुदेवः॥विद्युकुमाराणांहरिकांतः॥अग्निकुमाराणामग्निसिंहःद्वीपकुमाराणांपूर्णः॥उदधिकुमाराणांजलकांतःदि
कुमाराणाममितः॥वायुकुमाराणांविलंबःस्तनितकुमाराणांघोषः॥बलिभूयाणंदइत्यादिउत्तरदिग्वर्तिनामसुरकुमाराणामिंद्रोबलिर्ना
गकुमाराणांभूतानंदः॥सुवर्णकुमाराणांवेणुदालिःविद्युकुमाराणांहरिःसहः॥अग्निकुमाराणामग्निमानवःद्वीपकुमाराणांवशिष्टःउदधिकु

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीस्मारकम्

माराणांजलप्रभः॥ दिकुमाराणांममितवाहनः॥ वायुकुमाराणांप्रभंजनः॥ स्तनितकुमाराणांमहाघोषः॥ संप्रतिवर्णसंग्रहार्थमाह॥ ७५॥ कालाअसुरकुमा
राइत्यादिगाथाद्वयं॥ असुरकुमाराःसर्वेपिकलाःकृष्णवर्णाः नागकुमाराउदधिकुमाराउदधिकुमाराश्चेतउभयेपिपांडुराःश्वेतवर्णाः॥ वरंजात्यं
यत्कनकंतस्यनिघर्षःकषपट्टकेरेखातद्वत्गौराभवंतिसुवर्णकुमाराःस्तनितकुमाराश्चतथाविद्युत्कुमाराअग्निकुमाराद्वीपकुमाराद्वीपकुमारा
श्चभवंत्युत्तप्तकनकवर्णाईषद्रक्तवर्णाइतिभावः॥ वायुकुमाराःश्यामाःश्यामलमेवस्पष्टयतिप्रियंगुवर्णाः॥ संप्रतिवस्त्रगतवर्णप्रतिपादनार्थमा
ह॥ ७५॥ असुरेसुहांतिरत्नाइत्यादिगाथाद्वयं॥ असुरेषुसुरकुमारेषुभवंतिवस्त्राणिरक्तानिनागकुमारेषुचशिलिंध्रपुष्पप्रभाणिनीलवर्णानीत्यर्थः
सुवर्णकुमारादिकुमाराश्चअश्वास्याभगवसनधराः॥ अश्वस्यास्यंमुखंअश्वास्यं॥ तत्रगतोयःफेनःसोअश्वास्यगतस्तद्वत्धवलंयत्वस्त्रंतद्दधतीत्यश्वा
स्यगवसनधराः॥ बाहुल्येनश्वेतवस्त्रपरिधानशीलाइत्यर्थः॥ विद्युत्कुमाराद्वीपकुमाराश्चनीलानुरागवसनावायुकुमाराः॥ संध्यानुरागवसनाः॥ ७५॥ वा
नमंतरसुत्तेतिसूत्रविलोगस्सअसंखेज्जइभागेइतित्रिष्वपिस्थानेषुलोकस्यासंख्येयभागेवक्तव्यानि॥ तथाभुयगवइणोमहाकायामहोरगाःकिंविशिष्टास्ते
इत्याह॥ भुजगपतयःगंधर्वसमुदायाःकिंविशिष्टास्तेइत्याहनिपुणगंधर्वगीतरतयःनिपुणाःपरमकौशलोपेतायेगंधर्वागंधर्वजातीयादेवास्तेषांयत्गी
तंतत्ररतिर्येषांतेतथा॥ एतेव्यंतराण्यामष्टौमूलभेदाइमेवान्येऽवांतरभेदाअष्टौअणपन्नियइत्यादिकथंभूताएतेषोडशापीत्यतआहचंचलचलचपल
चित्तकीलणदवप्पिया॥ चंचलाअनवस्थितचित्ताःसूत्रचलचपलमतिशयेनचपलंयत्॥ क्रीडनंयश्चद्रवःपरिहासस्तौप्रियौयेषांतेचलचपलचि
त्तक्रीडनद्रवप्रियाः॥ ततश्चचलशब्देनविशेषणसमासः॥ तथागहिरहसियगीयणच्चणरतागंभीरेषुहसितगीतनर्त्तनेषुरतिर्येषांतेतथा॥ वणमा
लामेलमउलसच्छंदलसच्छंदविउव्वियाभरणचारुभूसणधराइतिवनमालामयानियानिआमेलमुकुटकुंडलानिआमेलइतिआपीडशब्दस्यप्राकृत
लक्षणवशात्॥ आपीडःशेषरकःतथास्वच्छंदंविकुर्वितानिआभरणानितैर्यत्चारुभूषंमंडनंतद्दधतीतिवनमालापीडमुकुटकुंडलस्वच्छंदविकुर्विताभरण ३९
चारुभूषणधराः॥ तथासर्वर्त्तुकैःसर्वर्त्तुभाविभिःसुरभिकुसुमैःसुरचितासुष्टुनिर्वर्त्तितातथाप्रलंबतेइतिप्रलंबाशोभतेइतिशोभमानाकांताकमनीयावि

कसंतीअमुकुलितामम्लानपुष्पमयीचित्रानानाप्रकाशावनमालारचितावक्षसियैस्तेसर्वर्त्तुकसुरभिकुसुमसुरचितप्रलंबशोभमानकांतविकसच्चित्रवनमाला
रचितवनमालारचितवक्षसः॥ तथाकामंस्वेच्छयागमोयेषांतेकामगमाःस्वेच्छाचारिणः क्वचित्कामकामाइतिपाठः॥ तत्रकामेनस्वेच्छयाकामोमैथुनसेवाये
षांतेकामकामाअनियतकामाइत्यर्थः॥ तथाकामंस्वेच्छयारूपंयेषांतेकामरूपास्तेचतेदेहाश्चकामरूपदेहास्तान्धरंतीत्येवंशीलाःकामरूपदेहधारिणः
स्वेच्छाविकुर्वितनानारूपदेहधारिणइत्यर्थः॥ तथानानाविधैर्वाधारागोरक्ततायेषांतानिनानाविधवर्णरागाणिवराणिप्रधानानिचित्राणिनानाविधानिअ
द्भुतानिवाचिहुलगानिदेशीवचनत्वात्देदीप्यमानानिनिवसनंपरिधानंयेषांतेनानाविधवर्णरागवरवस्त्रचित्तचिहुलकविवसनाः॥ तथाविविधैर्देशी
नेपथ्यैर्गृहीतोवेषोयैस्तेविविधदेशीनेपथ्यगृहीतवेषाः॥ तथापमुइयकंदप्पकलहकेलिकोलाहलप्पियाइतिकंदर्पःकामोद्दीपनंवचनंचेष्टाचकलहोरा
टीकेलिःक्रीडाकोलाहलोबोलः॥ कंदर्पकलहकेलिकोलाहलाप्रियायेषांतेकंदर्पकलहकेलिकोलाहलप्रियाः॥ ततःप्रमुदितशब्देनसहविशेष
णसमासः॥ हासबोलबहुलाइतिहासबोलोबहुलावतिप्रभूतोयेषांतेहासबोलबहुलाः॥ तथाअसिमुद्गरशक्तिकुंताहस्तेयेषांतेअसिमुद्गरशक्तिकुं
त हस्ताः॥ अणेगमणिरयणविविहनिज्जुत्तचित्तचिंधगयाइतिमणयश्चंद्रकांताद्यारत्नानिकर्केतनादीनिअनेकैर्मणिरत्नैर्विविधंनानाप्रकारं
नियुक्तानिचित्राणिनानाप्रकाराणिचिन्हानिगतानिस्थितानियेषांतेतथा॥ वंसगमंनवरंकालेयमहाकालेइत्यादिदक्षिणोत्तराणांवैशाचानांय
थाक्रममिंद्रौकालमहाकालौभूतानांस्वरूपप्रतिरूपौ॥ यक्षाणांपूर्णभद्रमाणिभद्रौराक्षसानांभीममहाभीमौकिंनराणांकिंनरकिंपुरुषौकिंपुरुषाणांस
त्पुरुषमहापुरुषौमहोरगाणांमतिकायमहाकायौगंधर्वाणांगीतरतिगीतयशसौ ७५॥ ज्योतिष्कसूत्रेअद्धकविठगसंठाणसंठियाइति अर्द्धकपित्थं
स्यसंस्थानंतेनसंस्थितानिअत्राक्षेपपरिहारौ॥ चंद्रप्रज्ञप्तिटीकायामभिहिताविति॥ ततोवधार्यौसव्वफालिहामयाइतिसर्वात्मनास्फटिकमयानितथा
अभ्युद्गताअभिमुख्येनसर्वतोविनिर्गतस्तप्रबलतयासर्वासुदिक्षुप्रसृतायाप्राभादीप्तिस्तयासितानिधवलानिअभ्युद्गतसितप्रभासितानि॥
तथाविविधानांमणिकनकरत्नानांयाभक्तयोविच्छित्तिविशेषास्ताभिश्चित्राणिआश्चर्यभूतानिविविधमणिकनकभक्तिचित्राणि॥ वाउद्धुयविजय

वैजयंतीपडागछत्तातिछत्रकलिया वातोद्धूता वायुकंपिता विजयो अभ्युदयस्तत्संसूचिका वैजयंत्यभिधाना या पताका अथवा विजय इति वैजयंतीनां पार्श्वकर्णि
काउच्यंते तत्प्रधाना वैजयंत्यः पताकाः छत्रातिछत्राणि उपर्युपरिस्थितानि पत्राणि तैः कलितानि वातोद्धूतविजयवैजयंतीपताकाछत्रातिछत्रकलितानि तुंगा
निउच्चानि तथा गगनतलं ते अंबरतलं अभुल्लिखन् अतिलंघयन् शिखरं येषां तानि गगनतलानुल्लिखच्छिखराणि तथा जालानि रुं जाकानि तानि च भवनभि
त्तिषु लोके प्रतीतानि तदंतरेषु विशिष्टशोभानिमित्तं रत्नानि यत्र तानि तथा पंजरात् उन्मीलितवत् यथाहि किल किमपि वस्तु पंजरात् वंशादिमयप्रछादनविशेषा
द्बहिः कृतमत्यंतमविनष्टछायत्वात् शोभते तथा तान्यपि विमानानीति भावः तथा मणिकनकानां संबंधिनी स्तूपिका शिखरं येषां तानि मणिकनकास्तूपि
काकानि तत्तः पूर्वपदाभ्यां सह विशेषणसमासः तथा विकसितानि यानि शतपत्राणि पौंडरीकानि च द्वारादौ प्रकृतित्वेन स्थितानि तिलकाश्च भित्त्यादिषु पुंड्रा
णि रत्नमयाश्चार्द्धचंद्रा द्वारादिषु तैश्चित्राणि विकसितशतपत्रपुंडरीकतिलकरत्नार्द्धचंद्रचित्राणि तथा नानामणिमयीभिर्दामभिरलंकृतानि नानामणिम
यदामालंकृतानि तथा अंतर्बहिश्च श्लक्ष्णानि तथा तपनीयं स्वर्णविशेषस्तन्मय्या रुचिराया वालुकायाः सिकतायाः सि प्रस्तट प्रसरो येषु तानि तपनीयरु
चिरवालुकाप्रस्तटानि तथा सुखस्पर्शानि शुभस्पर्शानि शुभस्पर्शानि वा शेषं प्राग्वत् वहस्सई चंदाइत्यादि बृहस्पति चंद्र सूर्य शुक्र शनैश्चर राहु धूमकेतु बु
धांगारकाकथंभूता इत्याह तप्ततपनीयकनकवर्णाः ईषद्रक्तवर्णाः यथा ये ग्रहा उक्तव्यतिरिक्ता ज्योतिषे ज्योतिश्चक्रे चारं चरंति केतवो ये च अगतिरति
कायेचाष्टाविंशतिविधा नक्षत्रदेवगणास्ते सर्वेपि नानासंस्थानसंस्थिताश्च चशब्दात् तप्ततपनीयकनकवर्णाः तारकाः पंचवर्णाः एते च सर्वेपि स्थि
तलेश्या अवस्थितते जो लेश्याकास्तथा ये चारिणश्चारं तरास्ते अविश्रमं मंडलगतिकास्तथा सर्वेपि प्रत्येकं नामांकेन प्रकटितं चिन्हं मुकुटाः कैमु
कंभवति चंद्रस्य स्वमुकुटे चंद्रमंडलं लांछनं स्वनामांकप्रकटितं सूर्यस्य सूर्यमंडलं ग्रहस्य ग्रहमंडलं नक्षत्रस्य नक्षत्राकारं तारकस्य तारकाकार
मिति ॥ ४९ ॥ वैमानिकसूत्रे चतुरशीति विमानलक्षाणि सप्तनवतिर्विमानसहस्राणि त्रयोविंशतिर्विमानानीति ॥ बत्तीसअट्ठवीसाबारसअट्ठच
उरोसयसहस्सा इत्यादि संख्यामीलनेन परिभावनीयानि तेणं मिगमहिसेत्यादि सौधर्मदेवा मृगरूपप्रकटितचिन्हमुकुटाः ईशानदेवा महिषरूप

प्रकटितचिन्हमुकुटाः सनत्कुमारदेवा वराहरूपप्रकटितचिन्हरूपाः माहेंद्रदेवाः सिंहरूपप्रकटितमुकुटचिन्हाः ब्रह्मलोकदेवाः छगलरूपप्रकटितमुकुट
चिन्हाः लांतकदेवा दर्दुररूपमुकुटचिन्हाः शुक्रकल्पदेवा हयरूपमुकुटचिन्हाः सहस्रारकल्पदेवा गजपतिमुकुटचिन्हाः आनंतकल्पदेवा भुजगमुकुट
चिन्हाः खड्गचतुष्पदविशेषस्त्राटव्यः आरणकल्पदेवा वृषभमुकुटचिन्हाः अच्युतकल्पदेवा विडिममुकुटचिन्हाः वरकुंडलुद्योवियाणणाइति वराभ्यां कुं
डलाभ्यामुद्योतितं भास्वरीकृतमाननं येषां ते तथा शेषं तेनथा शक्रगमं सौधर्मकल्पसूत्रे अच्छिमालिभासरासिवण्णाभे इति वज्रपाणीइति वज्रं पाणावस्य वज्र
पाणिः असुरादिपुरदारुणात्पुरंदरः शतक्रतुरिति शतं क्रतूनां प्रतिमानामतिग्रहविशेषाणां श्रमणोपासकपंचमप्रतिमारूपाणां कार्त्तिकश्रेष्ठिभवापेक्ष
या यस्यासौ शतक्रतुः सहस्सक्खे सहस्रमक्ष्णां यस्यासौ सहस्राक्षः इंद्रस्य हि किल मंत्रिणां पंचशतानि संति तदीयानां चाक्ष्णामिंद्रप्रयोजनव्यापृततया इंद्र
घ
संबंधित्वेन विवक्षणात् सहस्राक्षत्वमिंद्रस्य महेवं तं इति मघा महामेघा यस्य वशे संति मघवान् तथा पाको नाम बलवान् रिपुः स शिष्यते निराक्रियायेन स पाकशास
नः अरयंबरवत्थधरे अरजांसि रजोरहितानि स्वछतया अंबरवत् अंबराणि वस्त्राणि धारयंतीति अरजोम्बरवस्त्रधराः आलइयमालमउडे इति मालाच मु
कुटश्च मालामुकुटमालगितमाविद्धं मालामुकुटं येन स आलगितमालामुकुटः नवहिमचारुचित्तचंचलकुंडलविलिहिज्जमाणगंडे नवमिव अत्युत्कट
चारुवर्णतया प्रत्ययमिव हेममयं च ते नवहेमभ्यां चारुचित्राभ्यां चंचलाभ्यां कुंडलाभ्यां विलिख्यमानौ गंडौ यस्य स तथा ५, सनत्कुमारकल्पे सपरकंसपडिदिसं
ति समानाः पक्षाः पूर्वापरदक्षिणोत्तरस्तपार्श्वयस्मिन् दूरमुत्पन्नेन तत्सपक्षं समानस्य धर्मादिषु वेति समानस्य सभावः सपडिदिसिं इति समानाः प्रतिदिशो यत्र त
त् सप्रतिदिक् सामानिकसहस्राणि ईशानेंद्रस्य अशीतिः सनत्कुमारेंद्रस्य द्वासप्ततिः माहेंद्रदेवराजस्य सप्ततिः ब्रह्मलोकेंद्रस्य षष्टिः लांतकेंद्रस्य
पंचाशत् महाशुक्रेंद्रस्य चत्वारिंशत् सहस्रारेंद्रस्य त्रिंशत् आनतप्राणतेंद्रस्य विंशतिः आरणाच्युतेंद्रस्य दश सामानिकसहस्राणि अवतंसका
श्चातिदेशेनोक्ता इति दुरवबोधास्ततो विनेयजनानुग्रहाय वैविक्त्येन मूलतत्रारभ्योपदर्श्यंते सौधर्मे पूर्वस्यामशोकावतंसको दक्षिणतः सप्त
पर्णावतंसकः पश्चिमायां चंपकावतंसकः उत्तरतश्चूतावतंसकः मध्ये सौधर्मावतंसकः एवं पूर्वादिक्रमेण ईशाने अंकावतंसकः स्फटिकावतं

सकोरत्नावतंसकोजातरूपावतंसकः॥मध्येईशानावतंसकः सनत्कुमारे अशोकसप्तपर्णचंपकचूतसनत्कुमारावतंसकाः॥माहेंद्रे अंकस्फटिकरत्नजातरू
पमाहेंद्रावतंसकाः॥ब्रम्हलोके अशोकसप्तपर्णचंपकचूतब्रम्हलोकावतंसकाः॥लांतके अंकस्फटिकरत्नजातरूपलांतकावतंसकाः॥महाशुक्रे अशोक
सप्तपर्णचंपकरत्नमहाशुक्रावतंसकाः॥सहस्रारे अंकस्फटिकरत्नाजातरूपसहस्रारावतंसहस्रारावतंसकाः॥प्राणते अशोकसप्तपर्णचंपकचूतप्राणतावतं
सकाः॥अच्युते अंकस्फटिकरत्नजातरूपाच्युतावतंसकाइति॥६७॥ग्रैवेयकसूत्रेसमध्दयाइति॥समारिध्दिर्येषांतेसमाध्दकाएवंसमजुयायाइत्याद्यपिभावनी
यं॥अणिंदाइतिनविद्यंतेइंद्रोऽधिपतिर्येषांतेअनिंद्राः॥अपेसाइतिनविद्यंतेप्रेषः प्रेष्यत्वंयेषांतेअप्रेषाः॥अपुरोहियाइतिनविद्यतेपुरोहितः शांतिकर्म्मका
रीयेषामशांतेरभावात्तेअपुरोहितः किंरूपाःपुनस्तेइत्याह॥अहमिंद्रानामतेदेवगणाःप्रज्ञप्ताहेश्रमणहेआयुष्मन्सिध्दस्त्रेएगाजोयणकोडीइ
त्यादिपरिमाणंविष्कंभबज्रदहगुणेत्यादिकरणवशान्स्वयमानेतव्यंसुगमत्वाद् क्षेत्रसमासटीकापरिभावनीयातत्रपंचचत्वारिंशल्लक्षप्रमाणवि
ष्कंभम नुष्यक्षेत्रेपरिरयस्यएतावत्प्रमाणस्यविस्तरंभावितत्वात्॥तस्याश्चईषत्प्राग्भारायाःपृथिव्याबहुमध्यदेशभागेअष्टयोजनिकमायामविष्कंभा
भ्यामष्टयोजनप्रमाणंक्षेत्रंअष्टौयोजनानिबाहल्येनचोक्तत्वेनोच्चैस्त्वेनेतिभावःप्रज्ञप्तानदनंतरंसर्वासुदिक्षुविदिक्षुचमात्रयास्तोकयास्तोकयाप्रदेशप्रहा
ण्यापरिहीयमानासर्वेषुचरमांतेषुमक्षिकापत्रतोप्यतितन्वीअंगुलासंख्येयबाहल्येनप्रज्ञप्ता॥६७ स्थापना [box] ईसिइवाइतिपदेकदेशेपदसमुदयोप
चारात्॥इषत्प्राग्भारादितिचातन्वीवाशेषपृथिव्यपेक्षयाअतितनुत्वात्तणुतण्इतितनुभ्योपिजगत्प्रसिध्देभ्यस्त न्वीमक्षिकापत्रतोपिपर्यंतप्रदेशेऽतितनु
त्वात्॥नतुतन्वीसिध्दिरितिवासिध्दक्षेत्रस्यप्रत्यासन्नत्वात्॥सिध्दालयेइति॥सिध्दक्षेत्रस्यप्रत्यासन्नतयोपचारतः॥सिध्दानामालयःसिध्दालयः॥
एवंमुक्तिरितिवामुक्तालयइति॥चेत्यपिपरिभावनीयं॥तथालोकाग्रेवर्त्तमानत्वात्लोकाग्रेवर्त्तमानत्वात्लोकाग्रमितिलोकाग्रस्यस्तूपिकेवलोकाग्र
स्तूपिकातथालोकाग्रेणप्रत्यूह्यतेइतिलोकाग्रप्रतिबाहिनीसव्वपाणभूयजीवसत्तसुहावहाइतिप्राणाद्वित्रिचतुरिंद्रियाइतिभूतास्तरवोजीवाःपंचेंद्रि ४१
याइतिप्राणाद्वित्रिचतुरिंद्रियाइतिभूतास्तरवोजीवाःपंचेंद्रियाःशेषाःप्राणिनःसत्वा उक्तंच॥प्राणाद्वित्रिचतुःप्रोक्ताभूताश्चतरवःस्मृताःजीवाः

पंचेंद्रियाज्ञेयाःशेषाःसत्वाउदीरिताः सर्वेषांप्राणभूतजीवसत्वानांसुखावहाउपद्रवकारित्वाभावात्सर्वप्राणभूतजीवसत्वसुखावहा॥सावईषत्प्राग्भाराप्ट
थिवीश्वेताश्वेनाश्वेनत्वमेवोपमयाप्रकटयतिसंखदलविमलेत्यादिशंखदलस्यशंखचूर्णस्यविमलोनिर्मलःस्वस्तिकःसत्थमृणालंचदकरजश्चतुषारंचहि
मंगाक्षीरंचहारश्चतेषामिववर्णोयस्याःसातथा उत्तानस्तुत्तानीकृतंयच्छत्रंतस्ययत्संस्थानंतेनसंस्थिता॥उत्तानकछत्रसंस्थानसंस्थितत्वंचप्रागु पदर्शितस्थापना
तोभावनीयंसव्वज्जुण्णसुवण्णमयीसर्वात्मनाश्रुतसुवर्णमया॥ईसीपप्राराएणमित्यादि॥ईषत्प्राग्भारायाःपृथिव्याऊर्ध्वंसीयाएइतिनिश्रेणिगत्यायोजनेलोकांतोभवति॥त
स्यचयोजनस्ययदुपरितनंगव्युतंचतुर्थंतस्यचगव्यूतस्य सर्वोपरितनःषड्भागःऽत्रणमितिवाक्यालंकारेसिध्दाभगवंतःसादिकाःकर्मक्षयानंतरंसिध्दत्वभा
वात्एतेनअनादिशुध्दपुरुषप्रवादप्रतिक्षेपआवेदितोद्रष्टव्यःअपर्यवसितारागाद्यभावेनप्रतिपातासंभवात्॥रागादयोहिसिध्दत्वाद्यावयितुंप्रभविष्णवोनच
तेभगवतांसंतितेषांनिर्मूलकाषंकषितत्वात्नवनिर्मूलकाषंकषिताअपिभूयःप्रादुर्भवंति॥बीजाभावादितितथाअनेकैःजातिजरामरणैर्जन्मजरामृत्युभिर्यश्चतासु
योनिषुसंसारःसंसारणंतेनचयःकलंकलीभावःकदर्थमानतायश्चदिव्यसुखमनुप्राप्तानामपिपुनर्भवेसंसारेगर्भवसतिप्रपंचस्तौसमतिक्रांतात्अतएवशाश्वतमनाग
तंकालंतिष्ठंति॥६८॥तत्वविपतेअवेयाइत्यादितत्रापि॥वसिध्दक्षेत्रेगताःसंतस्तेभगवंतोअवेदाःपुरुषवेदादिवेदरहिताअवेदनाःसातासातवेदनाभावात्॥निर्म्म
मामत्वरहिताअसंगाबाह्याभ्यंतरसंगरहिताःकस्मादेवमतआहसंसारविप्रमुक्ताहेतौप्रथमायतःसंसारात्विप्रमुक्तास्तस्मादवेदाअवेदनानिर्म्ममाअसंगाश्च
पुनः कथंभूताइत्याह॥एएसनिव्वत्तसंठाणाप्रदेशैरात्मप्रदेशैर्ननुबाह्यपुद्गलैःसरीरपंचकस्यापिसर्वात्मनात्यक्तत्वात्निर्वृत्तंनिष्पन्नंसंस्थानं
येषांतेप्रदेशनिर्वृत्तसंस्थानाः॥अत्रशिष्यपृच्छन्नाह॥कहिंपडिहयासिध्दाइत्यादिकहिंइत्यत्रसप्तमीतृतीयार्थेप्राकृतत्वात्यथातिसुतेसुअलंकियापुढवी
इत्यादि॥ततोयमर्थःकेनप्रतिहताःकेनस्खलिताःसिध्दामुक्तात्मकस्मिन्स्थानेसिध्दाःप्रतिष्ठिताअवस्थिता॥तथाकस्मिन्क्षेत्रेबोंदिंतनुःशरी
रमित्यनर्थांतरंतांत्यक्त्वाकगत्वासिध्यंतिनिष्ठितार्थाभवंति॥सिध्दइइस्यत्रानुस्वारलोपोद्रष्टव्यः॥अथचैकवचनोपन्यासोपिसूत्रशैल्यानविरोध
भाक्तथाचान्यत्राप्येवंप्रयोगःवत्थगंधमलंकारंइत्थिउसयणाणिय॥अच्छंदाजेनभुंजंतिनसेचाइत्तिवुच्चइइतिएवंशिष्येणप्रश्नेकृतेसूरिरा

ह॥ अलोएपडि ह्यासिद्धाइत्यादि अत्रापिसप्तमीतृतीयार्थेअलोकेनकेवलाकाशास्तिकायरूपेणप्रतिहताःसिद्धाः॥इहतत्रधर्मास्तिकायाद्यभावात्तदानंतर्यंस्त्र
स्विप्रतिस्खलनंनतुसंबंधेसतिविघातोऽप्रतिघत्वात्सप्रतिघानांहिसंबंधेसतिविघातोनान्येषामिति॥ तथालोकस्यपंचास्तिकायात्मकस्य अग्रेमूर्द्धनिप्रतिष्ठिता
अपुनरागत्याव्यवस्थिताः॥तथाइहमनुष्यलोकेबोंदिंतनुं त्यक्त्वातत्रलोकाग्रेसमयांतरप्रदेशांतरस्पर्शनेनगत्वासिध्यंतिनिष्ठितार्थाभवंति॥संप्रतितत्रगतानांयत्सं
स्थानमानंदेनाभिधित्सुराह॥७॥दीहंवाहस्संवाइत्यादि॥दीर्घंवापंचधनुःशतप्रमाणंह्रस्वंवाहस्तद्वयप्रमाणंवाशब्दात्॥मध्यमंवाविचित्रंयच्चरमभवेभवेत्॥संस्थानं
ततस्तस्मात्संस्थानात्त्रिभागहीनावदनोदरादिरंध्रपूरणेनतृतीयेनभागेनहीनासिद्धानामवगाहना अवगाहंते अस्यामित्यवगाहनास्वावस्थैवभणितातीर्थ
करगणधरैरिति अत्रगतसंस्थानप्रमाणात्प्रेक्ष्यात्रिभागहीनंतत्रसंस्थानमितिभावः॥एतदेवस्पष्टतरमुपदर्शयति॥७॥ जंसंठाणंतुइहं इत्यादि॥यत्संस्थानंयावत्प्र
माणंसंस्थानंइहमनुष्यभवे आसीत्तदेवभवंतिप्राणिनःकर्मवशवर्तिनोऽभिनिर्वृत्तिभवंशरीरंत्यजतःपरित्यजतःकाययोगंपरिजिहानस्येतिभावः॥चरमसमये
सूक्ष्मक्रियाप्रतिपातिध्यानबलेनवदनोदरादिरंध्रपूरणात्त्रिभागेनहीनंप्रदेशघनमासीत् तंसंठाणंतहिंतस्सेतदेवंप्रदेशघनंमूलप्रमाणापेक्षयात्रिभागहीनप्रमा
णंसंस्थानंतत्रलोकाग्रेतस्यसिद्धस्यनान्यदिति॥सांप्रतमुत्कृष्टादिभेदभिन्नामवगाहनामभिधित्सुराह॥ तिन्निसयात्तेत्तीसाइत्यादि॥त्रीणिशतानित्रयस्त्रिंशानि
त्रयस्त्रिंशदधिकानिधनुस्त्रिभागश्चभवतिबोद्धव्यः एषा खलुसिद्धानामुत्कृष्टावगाहनाभणितातीर्थकरगणधरैःसाचपंचधनुःशततनुकानामवसेयानतुम
रुदेवीनाभिकुलकरपत्नीनाभेश्चपंचविंशत्यधिकानिपंचधनुःशतानिशरीरप्रमाणंयदेवचतस्यशरीरमानंतदेवमरुदेवाया अपिसंघयणसंठाणंउच्चत्तंचेवकुल
गरेहिंसममितिवचनात्मरुदेवाचभगवतीसिद्धाततस्तस्यादेहमानस्यत्रिभागेपातितेसिद्धावस्थायांसार्द्धानित्रीणिधनुःशतान्यवगाहनाप्राप्नोतिकथमुक्तप्रमाणा
उत्कृष्टावगाहनाघटतेइतिनैषदोषः॥ मरुदेवायानाघटतेइतिनैषदोषः॥ मरुदेवायानाभेःकिंचिदूनप्रमाणत्वात्स्त्रियोह्युत्तमसंस्थानाउत्तमसंस्था
नेभ्यःपुरुषेभ्यःस्वस्वकालापेक्षयाकिंचिदूनप्रमाणाभवंतिततोमरुदेवापिपंचधनुःशत प्रमाणेतिनकश्चिद्दोषः॥अपिचहस्तिस्कंधाधिरूढासंकुचि ४२
तांगासिद्धाततःशरीरसंकोचभावात्नाधिकावगाहाधिकावगाहगाहनासंभवइत्यविरोधः॥ आहचभाष्यकृत्उत्कृष्टमहदेवामाणंनाभी

तोजेणकिंचिदूणासातोविउपंचसयअहावासंकोचतोसिद्धा॥७॥चत्तारियरयणीउइत्यादिचत्वारोरत्नयोरत्नयोरत्निस्त्रिभागोनाबोद्धव्या॥एषाखलुसिद्धाम
वगाहनाभणितामध्यमाआहजघन्यपदसप्तहस्तोच्छ्रितानाभगवतेमिष्टिरुक्ता॥ततएषाजघन्याप्राप्नोतिकथंमध्यमातदयुक्तंवस्तुतत्त्वापरिज्ञानात्जघन्यदेहि
सप्तहस्तानांसिद्धिरुक्तातीर्थकरापेक्षयासामान्यकेवलिनांतुहीनमाणानामपिभवतिइदमपिचावगाहनामानंचिंत्यंतेसामान्यसिद्धापेक्षयाततोनकश्चिद्दो
षः॥७॥एगायहोइइत्यादि॥एकारत्निःपरिपूर्णाअष्टौचांगुलान्यधिकानिएषाभवति सिद्धानामवगाहनाजघन्यासाचकूर्मापुत्रादीनांहिहस्तानामवसेया
यद्विवासप्तहस्तोच्छ्रितानामपियंत्रपीलनादिनासंवर्तितशरीराणामाहचभाष्यकृत्॥ जेगउपंचधणुसयतणुस्समझ्झापसत्तहत्थस्स॥देहत्तिभागहीणाज
हण्णियाजावहत्थस्स॥सत्तूसिएसुसिद्धीजहन्नतोकहमिहंबिहत्थेसुं॥साकिरतित्थयरेसुंसेसाणंसिद्धमाणाणं॥तेपुणहोज्जविहत्थाकुम्मापुत्तादयोजहण्णे
णंअण्णेसंवट्टियसत्तहत्थसिद्धस्सहीणत्ति॥सांप्रतमुक्तानुवादेनैवसंस्थानलक्षणंसिद्धानामभिधित्सुराह॥उगाहणाएइत्यादि॥सगमंनवरं अनित्थंस्थ
मितिइदंप्रकारमापन्नमित्थंइत्थंतिष्ठतीतिइत्थंस्थंनइत्थंस्थमनित्थंस्थंवदनादिशुषिरप्रतिपूरणेनपूर्वाकारान्यथाभावतोऽनियताकारमितिभावःयोपिचसिद्धा
द्विगुणेषुसिद्धेनदीहेनहस्सेइत्यादिनादीर्घत्वादीनांप्रतिषेधःसोपिपूर्वाकारापेक्षयासंस्थानस्यानित्थंस्थत्वात्प्रतिपत्तव्योनपुनःसर्वथासंस्थानस्याभाव
तःआहचभाष्यकृत् सुसिरपडिपूरणाउपुव्वागारन्नहाववत्थाने संठाणमणित्थंथंजंभणियंअणिययागारं॥एत्तोच्चियपडिसेहोसिद्धाइगुणेसुदीहयाइ
णंजंमणित्थंपुव्वागाराविरकाए नाभावो॥नन्वेतेसिद्धाःपरस्परंदेशभेदेनव्यवस्थिताउतनेतिनेतिब्रूमःकस्मादितिचेत्उच्यतेयस्मात्॥७॥ जत्थयइत्यादि
यत्रैवदेशान्तशब्दस्यएवकारार्थत्वात्तदेकःसिद्धोनिर्वृतस्तत्रानंताभवक्षयविमुक्ताअत्रभवक्षयग्रहणेनस्वेच्छयाभवावतरणशक्तिमसिद्धव्यवच्छिदम
हान्योन्यसमवगाढास्तथाविधाचिंत्यपरिणामत्वात् धर्मास्तिकायादिवत्॥तथास्पृष्टालभाःसर्वेपिलोकांते ॥७॥ फुसइइत्यादि स्पृशत्यनंतान्सि
द्धान्सर्वप्रदेशैरात्मसंबंधिभिर्नियमतःसिद्धःतथातेपिसिद्धाःसर्वप्रदेशस्पृष्टेभ्योऽसंख्येयगुणावर्त्तंतेयेप्रदेशाप्रदेशैःस्पृष्टाःकथमिति
चेत्उच्यतेइहएकस्यपदवगाहनक्षेत्रंतस्मिन्नेकस्मिन्नपिपरिपूर्णेअवगाढाअन्येप्यनंताःसिद्धाःप्राप्यंतेअपरितुयेतस्यक्षेत्रस्यपरैकैकंप्रदेशमा

स्यावगाढास्तेपिप्रत्येकमनंताएवंद्वित्रिचतुःपंचादिप्रदेशवृद्ध्यायेअवगाढास्तेपिप्रत्येकमनंताः तथानस्यमूलक्षेत्रस्यएकैकंप्रदेशंपरित्यज्ययेवगाढास्तेपिप्रत्येक
मनंताएवंद्वित्रिचतुःपंचादिप्रदेशहान्यायेअवगाढास्तेपिप्रत्येकमनंताएवंच सतिप्रदेशपरिवृद्धिहानिभ्यांयेसमवगाढास्तेपरिपूर्णेकक्षेत्रावगाढेभ्योऽसंख्येयगुणाभवं
ति। अवगाढप्रदेशानामसंख्यातत्वात् ॥ आह च एगस्थित्तेणंतापएसपरिवड्ढिहाणाउतत्तोहुंति असंखेज्जगुणाअसंख्यपएसोजमवगाहो ॥ संप्रतिसिद्धानेवलक्षणतः
प्रतिपादयति ॥ असरीराइत्यादि ॥ अविद्यमानशरीराअशरीराः औदारिकादिपंचविधशरीररहिताइत्यर्थः ॥ जीवाश्चतेघनाश्चवदनोदरादिशुषिरपूरणात्जीवघनाः ॥
उपयुक्तादर्शनेकेवलदर्शनेज्ञानेकेवलज्ञानेवयद्यपिसिद्धत्वप्रादुर्भावसमयेकेवलज्ञानमितिज्ञानंप्रधानंतथापिसामान्यसिद्धलक्षणमेतदितिज्ञापनार्थमादौ
सामान्यालंबनंदर्शनमुक्तंतथाचसामान्यविषयंज्ञानमितितनः साकारंसामान्यविशेषोपयोगरूपमित्यर्थः। सूत्रेमकारोलाक्षणिकः लक्षणंतदन्यव्यावृत्तस्व
रूपमेतत् अनंतरोक्तंतुशब्दोवक्ष्यमाणनिरुपमसुखविशेषणार्थः ॥ सिद्धानांनिष्ठितार्थानामिति ॥ संप्रतिकेवलज्ञानदर्शनयोरशेषमुपदर्शयति ॥ ७॥ केवल विषयता
णाणुवउत्ताइत्यादिकेवलज्ञानेनोपयुक्तानत्वंतःकरणेनतदभावादितिकेवलज्ञानोपयुक्ताज्ञानंत्यवगच्छंति ॥ सर्वभावगुणभावान्सर्वपदार्थगुणपर्या
यान्प्रथमोभावशब्दः ॥ पदार्थवचनोद्वितीयः पर्यायवचनः ॥ गुणपर्याययोरयंविशेषः सहवर्तिनोगुणाः क्रमवर्तिनः पर्यायाइतितथापश्यंतिसर्वतः खलुखलु
शब्दस्यावधारणार्थत्वात्सर्वतएवकेवलदृष्टिभिरनंताभिःकेवलदर्शनैरित्यर्थः। केवलदर्शनानांधानांतथासिद्धानामनंतत्वात् ॥ इहादौज्ञानग्रहणंप्रथमतयात
दुपयोगस्थासिद्ध्यंतीतिज्ञापनार्थंसंप्रतिनिरुपमसुखभाजस्तेइतिदर्शयति ॥ ७॥ नविअत्थिइत्यादि नैवास्तिमानुषाणांचक्रवर्त्यादीनामपितत्सौख्यंनैवसर्वदे
वानामनुत्तरपर्यंतानामपियत्सिद्धानांसौख्यमव्याबाधामुपगतानांविविधाआबाधातामुपसामीप्येनगतानांप्राप्तानांयथानास्तितथाभंग्योपदर्शयति ७॥
सुरगणसुहमित्यादिसुरगणसुखंदेवसंघातसुखंसमस्तंसंपूर्णंअतीतानागतवर्तमानकालभवमित्यर्थः ॥ पुनः सर्वाद्धापिंडितं सर्वकालसमयगुणितंत
थानंतगुणमिति ॥ तदेवंप्रमाणंकिलासत्कल्पनयैकैकाकाशप्रदेशेस्थाप्यते ॥ इत्येवंसकलाकाशप्रदेशपूरणेनयद्यप्यनंतंभवतितदनंतमप्यनंतैर्वर्ग ४३
वर्गितं ॥ तथापिवंप्रकर्षगतमपिमुक्तिसुखंनप्राप्नोतिएतदेवस्पष्टतरंभंग्यंतरेणप्रतिपादयति ॥ ७॥ सिद्धस्ससुहोराशीइत्यादि सुखानांराशिः सुख

राशिः सुखसंघातः सिद्धस्यसुखराशिः सिद्धसुखराशिः सर्वाद्धापिंडितः सर्वयासाद्यपर्यवसितयायत्सुखंसिद्धः प्रतिसमयमनुभवति ॥ तदेयत्रपिंडीकृतमि
तिभावः ॥ सोऽनंतभक्तोऽनंतैर्वर्गमूलैरपवर्तितः ॥ अनंतैर्वर्गमूलैस्तावदपवर्तितोयावत्सर्वाद्धालक्षणेनगुणनेयदधिकंजातंतस्यसर्वस्याप्यपवर्तनेनसिद्धत्वा
द्यसमयभाविसुखमात्रंप्राप्तमितिभावः सर्वाकाशेनमातिएतावन्मात्रोसर्वाकाशेनमाति ॥ सर्वस्तुदूरापास्तप्रसरएवेतिज्ञापनार्थंपिंडयित्वापुनरपवर्तनं
सुखराशेः इयमत्रभावनाइहकिलविशिष्टाल्हादरूपंसुखंपरिगृह्यते ॥ ततश्चयतआरभ्यशिष्टानांसुखशब्दप्रवृत्तिमूल्याल्हादमधिकृत्यएकैकगुणवृद्धितारतम्येन
तावदसावाल्हादोविशेष्यतेयावदनंतगुणवृद्ध्यानिरतिशयनिष्ठामुपगतः सोयमत्यंतोपमानीतोकांतोभ्रकप्रविनिवृत्तिरूपस्तिमिततमकल्पश्चरमाल्हादः सह
सिद्धानांयस्माच्चारतः प्रथमाद्वोर्द्धमपांतरालवर्तिनोयेगुणास्तारतम्येनाल्हादविशेषरूपास्तेसर्वाकाशप्रदेशेभ्योप्यतिभूयांसस्ततःकिलोक्तंसर्वाकाशेनमाएज्जा
इति ॥ अन्यथायत्सर्वाकाशेनमातिनतत्थमेकस्मिन्सिद्धेमायादितिपूर्वसूरिसंप्रदायः सांप्रतमस्यनिरुपमतांप्रतिपादयति। जहनामित्यादि ॥ यथानामकश्चित्म्ले
च्छोनगरगुणान्गृहनिवासादीन्बहुविधान्अनेकप्रकारान्विजानन्अरण्यगतःसन्अन्यम्लेच्छेभ्योनशक्नोतिपरिकथयितुंकस्मात्नशक्नोतीत्यतआह। उपमा
यांपतासत्यांनिमित्तकारणहेतुषुसर्वासांविभक्तीनांप्रायोदर्शनमितिन्यायात्हेतौसप्तमी। नच्चउपमायाअभावादितिद्रष्टव्यं। एषगाथाक्षरार्थः ॥ भावार्थकथानकादव
सेयस्तच्चेदं ॥ एगोमहारण्णवासीमिच्छोरण्णेचिठइइतोयएआसेणअवहरिओतंअडविंपवेसिओतेणदिठोसक्कारेऊणजणवयंनीओरन्नाविसोनगरंपच्छाउवगारित्ति। गा
ढमुवचरितोजहारायातहाचिठइधवलघरादभोगेणविभासा ॥ कालेनरन्नंसरिउमारद्धोरन्नाविसद्धिउनतोरन्निगापुच्छंतिकेरिसंनयरंतिसोवियाणंतोवितत्थो
यमाभावानसंक्कइनयरगुणेपरिकहेउंएसदितंतोअयमर्थोपनयः ॥ इयसिद्धाणमित्यादि ॥ इतिएवंसिद्धानांसौख्यमनुपमंकिमितितन्नाहयतोनास्तितस्यौपम्यं
तथापिबालजनप्रतिपत्तयेकिंचिद्विशेषेणइत्तोइतिआर्षत्वादस्येत्यर्थः। सादृश्यमिदंवक्ष्यमाणंशृणुत ॥ ७॥ जहसव्वेत्यादि ॥ सर्वेत्युदाहरणोपदर्शनार्थः
भुज्यतेइतिभोजनंसर्वकामगुणितंसकलसौंदर्यसंस्कृतंकोपिपुरुषोभुक्त्वाक्षुत्तृड्विमुक्तः सन्यथाअमृततृप्तस्तथातिष्ठति ॥ इयइत्यादि। इतिएवंनिर्वाणमोक्ष
मुपगताः सिद्धाः सर्वकालंसाद्यपर्यवसितंकालतृप्ताः सर्वतोत्सुक्याविनिवृत्तिभावतः परमसंतोषमधिगताअनुपममनन्यसदृशसुखमानीतत्वाद्शाश्वतंप्रति॥

पानाभावात् अव्याबाधं लेशतोपिव्याबाधायाअसंभवात्सुखंप्राप्ताअतएवसुखेनतिष्टंति॥एतदेवसविशेषतरंभावयतिसिद्धत्तियइत्यादि॥सितंबद्धमष्टप्रकारंकर्म
धर्मातंभस्मीकृतंयैस्तेसिद्धाःपृषोदरादयइतिरूपनिष्पत्तिर्दग्धानेकभवकर्मेंधराइत्यर्थः॥त्वंचसामान्यतःकर्मादिसिद्धाअपिभवंति॥यतउक्तं॥कम्मेसिप्पेयविज्जाए
मंतेजोगेयआगमेअत्थजत्ताअभिप्पाएतवेकम्मक्खएइय॥ततःकर्मादिसिद्धव्यपोहायाहबुद्धाइतिअज्ञाननिद्राप्रसुप्तेजगत्यपरोपदेशेनजीवादिरूपंतत्त्वंबुद्धाः
सर्वज्ञसर्वदर्शिस्वभावबोधरूपाइतिभावः॥एतेपिबसंसारनिर्वाणोभयपरित्यागेनस्थितवंतःकेश्चिदिष्यंतेसंसारेननिर्वाणेस्थितोभुवनसूतयेअचिंत्यःसर्वलोका
नांचिंतारत्नाधिकोमहानितिवचनात्ततस्तन्निरासार्थमाहपारगताइतिपारंपर्यंतंसंसारस्यप्रयोजनव्रातस्यवागताः॥तथाभव्यत्वाक्षिप्तसकलप्रयोजनसमाप्त्या
निरवशेषकर्तव्यशक्तिविप्रमुक्ताइतिभावः इत्थंभूताअपिकेचिदयदृच्छावादिभिरक्रमसिद्धत्वेनापिगीयंते॥यथोक्तं॥नेकादिसंख्याक्रमतोचित्तप्राप्तिनिर्वा
गतः दरिद्रराज्यप्तिरमाप्तइमुक्तिःत्कविभ्रकिं॥ ततस्तन्मतव्यपोहायाहपरंपरागताइतिपरंपरयाइतिज्ञानदर्शनचारित्ररूपयामिथ्यादृष्टिअविरतसम्य
क्दृष्टिदेशविरतिप्रमत्ताप्रमत्तनिवृत्त्यनिवृत्तिबादरसंपरायोपशांतमोहक्षीणमोहसयोगिकेवल्ययोगिकेवलिगुणस्थानभेदभिन्नयागताः परंपराग
ताः॥एतेचकेश्चित्तत्वतोऽनुन्मुक्तकर्मकवचाअभ्युपगम्यंतेतीर्थन्यकारदर्शनादिहागच्छंतीतिवचनतः॥पुनःसंसारावतरणाभ्युपगमादतस्तन्मतापकरणार्थ
माहउन्मुक्तकर्मकवचाः [illegible] उत्पावस्थेनापुनर्भवन
रूपतयामुक्तंपरित्यक्तंकर्मकवचमिवकर्मकवचंयैस्तेउन्मुक्तकर्मकवचाअतएवाजराःशरीराभावतोजरसोऽभावात् अमराः अशरीरत्वादेवभावात्॥उक्तंच
वयसोहाणीहजरापाणच्चाओयमरणमादिठं॥सइदेहंमिनदुभयंतदभावेतंनकस्सेव॥असंगाबाह्याभ्यंतरसंगरहितत्वादर्निथिंचेत्यादि॥निस्तीर्णंलंघितंसर्वदुःखं
यैस्तेनिस्तीर्णसर्वदुःखांकुलइत्याह॥जातिजरामरणबंधणविमुक्काजातिर्जन्मजरावयोहानिलक्षणामरणबंधणरूपाणिकर्माणितैर्विशेषतो
निःशेषापगमनेनमुक्ताजातिजरामरणबंधनविमुक्ताः॥हिताचियंप्रथमायतोजातिजरामरणबंधनविमुक्तास्ततोनिस्तीर्णसर्वदुःखाःका ४४
रणाभावात्॥ ततोअव्याबाधंसौख्यंशाश्वतंसिद्धाअनुभवंति॥ ॥इतिश्रीमलयगिरिविरचितायांप्रज्ञापनाटीकायांद्वितीयंपदंसमाप्तं॥ ॥२॥

Dr. BHAU DAJI MEMORIAL

व्याख्यातंद्वितीयपदमधुनातृतीयमारभ्यते॥तस्यचायमभिसंबंधइहप्रथमपदेपृथिवीकायिकादयप्रज्ञप्ताद्वितीयेतएवस्थानादिनाचिंतिताअस्मिंस्तुतेषांदिग्विभागादिनाअल्पब
हुत्वादिनिरूप्यतेतत्रेदमादौद्वारसंग्रहगाथाद्वयं॥ ८२॥ दिसिगइइंदियकाएइत्यादि॥ प्रथमंदिग्द्वारं१ तदनंतरंगतिद्वारं२ ततइंद्रियद्वारं३ ततकायद्वारं४ ततोयोगद्वारं५ तदनं
तरंवेदद्वारं६ ततःकषायद्वारं७ ततोलेश्याद्वारं८ ततःसम्यक्त्वद्वारं९ तदनंतरंज्ञानद्वारं१० ततोदर्शनद्वारं११ ततःसंयमद्वारं१२ ततउपयोगद्वारं१३ ततआहारद्वारं१४ ततो
भाषकद्वारं१५ ततःपरित्तद्वारंपरीताःप्रत्येकशरीरिणःशुक्लपाक्षिकाश्चतद्वारं१६ तदनंतरंपर्याप्तद्वारं१७ ततःसूक्ष्मद्वारं१८ तदनंतरंसंज्ञिद्वारं१९ ततोभवसिद्धिकद्वारं२०
ततोऽस्तीतिअस्तिकायद्वारं२१ ततश्चरमद्वारं२२ तदनंतरंजीवद्वारं२३ ततःक्षेत्रद्वारं२४ ततोबंधद्वारं२५ ततपुद्गलद्वारं२६ ततोमहादंडकः२७ इतिसर्वसंख्यया
सप्तविंशतिद्वाराणि॥ तत्रप्रथमंद्वारमभिधित्सुराह॥ ८३॥ दिसाणुवाएणंसव्वत्थोवाजीवापच्छिमेणमित्यादि॥ इहदिशःप्रथमेआचारांगेऽनेकप्रकाराव्याख्याताइस्त
चेहक्षेत्रदिशःप्रतिपत्तव्यास्तासांनियतत्वादितरासांचप्रायोऽनवस्थितत्वादनुपयोगित्वाच्चक्षेत्रदिशांचप्रभवस्तिर्यग्लोकमध्यगतादष्टप्रदेशाद्रुचकात्॥यतउक्तं॥
अठपएसोरुयगोतिरियंलोयस्समज्झयारम्मि॥एसपभवोदिसाणंएसेवभवेअणुदिसाणमिति॥दिशामनुपातोदिगनुपातोदिगनुसरणंतेनदिशोधिकृत्येतिता
त्पर्यार्थः सर्वस्तोकाजीवाःपश्चिमेनपश्चिमायांदिशिकथमितिचेतउच्यते॥इदंह्यल्पबहुत्वंबादरानधिकृत्यद्रष्टव्यं॥नसूक्ष्मान्सूक्ष्माणांसर्वलोकापन्नानांप्रा
यःसर्वत्रापिसमत्वात्बादरेष्वपिमध्येसर्वबहवोवनस्पतिकायिकाअनंतसंख्याकतयातेषांप्राप्यमाणत्वात् ततोयत्रबहुत्वंजीवानांयत्रत्वल्पत्वंतत्राल्पत्वंवनस्पत
यश्चतत्रबहवोयत्रप्रभूताआपः जत्थजलंतत्थवणमितिवचनस्ततत्रावश्यंपनकसेवालादीनांभावात्॥ तचपनकसेवालादयोबादरनामकर्मोदयेवर्तमानाअ
पिअत्यंतसूक्ष्मावगाहनत्वादतिप्रभूतपिंडीभावाच्चसर्वत्रसंतोपिनचक्षुषाग्राह्या॥तथाचोक्तमनुयोगद्वारेषुतेणंवालग्गासुहुमपणगजीवस्ससरीरोगाहणा
हिंतोअसंखेज्जगुणाइति॥ततोयत्रापितेनेहइयंतेतत्रापितेसंतीतिप्रतिपत्तव्याःअहवमूलटीकाकारःइहसर्वबहवोवनस्पतयइतिकृत्वायत्रतेसंतितत्रतेसंतितत्र
बहुत्वंजीवानांतेषांचबहुत्वंजत्थआउक्काउतत्थनियमावणस्सइकाइयाइतिपणगसेवालहढाईबायराविहोंतिसुहुमोआणागेज्झेनचक्खुणाइत्ति॥उदकंचत्र
प्रभूतंसमुद्रेषुद्वीपात्द्विगुणविष्कंभत्वात्तेषपिचसमुद्रेषुप्रत्येकंप्राचीप्रतीचिदिशोर्यथाक्रमंचंद्रसूर्यद्वीपाःयावत्तिप्रदेशेचंद्रसूर्यद्वीपाअवगाढास्तावत्सुदका

भावाच्चवनस्पतिकायिकाभावः॥ केवलं प्रतीच्यां दिशि लवणसमुद्राधिपसुस्थितनामदेवावासभूतो गौतमद्वीपो लवणसमुद्रे गौतमद्वीपो लवणसमुद्रेभ्यधिको वर्तते
तत्र च उदकाभावाद्वनस्पतिकायिकानामभावात् सर्वस्तोकाः जीवाः पश्चिमायां दिशि तेभ्यो विशेषाधिकाः पूर्वस्यां दिशि तत्र हि गौतमद्वीपो न विद्यते॥ ततस्तावता विशेषेणा
तिरिच्यंते इति तेभ्योपि दक्षिणस्यां दि   शि विशेषाधिकाः यतस्तत्र चंद्रसूर्यद्वीपा न विद्यंते तदभावे उदकं प्रभूतं तत्प्राभूत्याच्च वनस्पतिकायिका अपि प्रभूता इति विशेषाधिकास्ते
भ्योप्युदीच्यां दिशि विशेषाधिकाः किं कारणमिति चेदुच्यते उदीच्यां हि दिशि संख्येययोजनेषु मध्ये कस्मिंश्चिद्द्वीपे आयामविष्कंभाभ्यां संख्येययोजनकोटीकोटीप्र
माणं मानसं नाम सरस्समस्ति॥ ततो दक्षिणदिगपेक्षया अस्यां प्रभूतमुदकबाहुल्याच्च प्रभूता वनस्पतयः प्रभूता द्वींद्रियाः शंखादयः प्रभूतास्तदलग्नसंस्त्यादिकलेवराश्रि
तास्त्रींद्रियाः पिपीलिकादयः प्रभूताः पद्माद्याश्रितचतुरिंद्रिया भ्रमरादयः प्रभूताः॥ पंचेंद्रियाम   त्स्यादय इति विशेषाधिकाः तदेवं सामान्यतो दिगनुपातेन जीवानामल्पबहुत्व
मुक्तमिदानीं विशेषणत आह॥ ८२॥ दिसाणुवाएणं सव्वत्थोवा पुढविकाइया दाहिणेणमित्यादि॥ दिगनुपातेन दिगनुसारेण दिशोधिकृत्येति भावः॥ पृथिवीकायिकाश्चिं
त्यमानाः सर्वस्तोका दक्षिणस्यां दिशि कथमिति चेदुच्यते इह यत्र घनं तत्र बहवः पृथिवीकायिकाः यत्र शुषिरं तत्र स्तोकाः दक्षिणस्यां दिशि बहूनि भवनपतीनां भव
नानि॥ बहवो नरकावासास्ततः शुषिरप्राभूत्यसंभवात् सर्वस्तोकाः दक्षिणस्यां दिशि पृथिवीकायिकास्तेभ्य उत्तरस्यां दिशि विशेषाधिकाः यत उत्तरस्यां दिशि दक्षिणदि
गपेक्षया स्तोकानि भवनानि स्तोकाश्च नरकावासास्ततो घनप्राभूत्यसंभवाद्बहवः पृथिवीकायिका विशेषाधिकास्तेभ्योपि पूर्वस्यां दिशि विशेषाधिकाः रविशशिद्वीपानां
तत्र भावात् तेभ्योपि पश्चिमायां दिशि विशेषाधिकाः॥ किं कारणमिति चेदुच्यते यावंतो रविशशिद्वीपाः पूर्वस्यां दिशि तावंतः पश्चिमायामपि तत एतावता साम्यं परं ल
वणसमुद्रे गौतमनामा द्वीपः पश्चिमायामधिकोस्ति तेन विशेषाधिकाः॥ अत्रापरस्त्वाह ननु यथा पश्चिमायां दिशि गौतमद्वीपोभ्यधिकः समस्ति तथा तस्यां पश्चि
मायां दिशि॥ अधोलौकिकग्रामा अपि योजनसहस्रावगाहाः संति ततः   खातपूरितन्यायेन तत्र तुल्या एव पृथिवीकायिकाः प्राप्नुवंति विशेषाधिकाः॥ नैतदेवं
तो अधोलौकिकग्रामावगाहो योजनसहस्रं गौतमद्वीपस्य पुनः षट्सप्तत्यधिकं योजनसहस्रमुच्चैस्त्वं विष्कंभस्तस्य द्वादश योजनसहस्राणि यच्च मेरोरारभ्याधोलौ
किकग्रामच्छिद्रेषु बुध्या गौतमद्वीपः प्रक्षिप्यते तथापि स समधिक एव प्रा   प्यते न तुल्य इति तेन समधिकेन विशेषाधिकाः पश्चिमायां दिशि पृथिवीकायिकाः॥ उक्त ४९.

दिगनुपातेन पृथिवीकायिकानामल्पबहुत्वमिदानीमप्कायिकानामल्पबहुत्वमाह॥ दिसाणुवाएणं सव्वत्थोवा आउक्काइया इत्यादि सर्वस्तोका अप्कायिकाः पश्चिमायां दिशि
गौतमद्वीपस्थाने तेषामभावात् तेभ्यो विशेषाधिकाः पूर्वस्यां दिशि गौतमद्वीपाभावात् तेभ्योपि विशेषाधिका दक्षिणस्यां दिशि चंद्रसूर्यद्वीपाभावात् तेभ्योप्यु
त्तरस्यां दिशि विशेषाधिका मानससरःसद्भावात् तथा दक्षिणस्यामुत्तरस्यां च दिशि सर्वस्तोकास्तेजस्कायिका यतो मनुष्यक्षेत्र एव बादरास्तेजस्कायिका नान्य
त्र तत्रापि यत्र बहवो मनुष्यास्तत्र ते बहवो बाहुल्येन पाकारंभसंभवात्॥ यत्र त्वल्पे तत्र स्तोकाः तत्र दक्षिणस्यां दिशि पंचसु भरतेषु उत्तरस्यां दिशि पंचस्वैरवतेषु क्षे
त्रस्याल्पत्वात् स्तोका मनुष्यास्तेषां स्तोकत्वेन तेजस्कायिका अपि स्तोका अल्पपाकारंभसंभवात् ततः सर्वस्तोका दक्षिणोत्तरयोर्दिशोस्तेजस्कायिकाः स्वस्थाने तु प्रा
यः समानाः तेभ्यः पूर्वस्यां दिशि संख्येयगुणाः॥ क्षेत्रसंख्येयगुणत्वात् ततोपि पश्चिमायां दिशि विशेषाधिका अधोलौकिकग्रामेषु मनुष्यबाहुल्यात्॥ ८३॥ दिसा
णुवाएणं सव्वत्थोवा वाउक्काइया पुरच्छिमेणमित्यादि॥ इह यत्र शुषिरं तत्र वायुर्यत्र घनं तत्र वायुर्यत्र च घनं तत्र वाय्वभावाः तत्र पूर्वस्यां दिशि प्रभूतं घनमित्यल्पा वा
यवः पश्चिमायां दि   शि विशेषाधिका अधोलौकिकग्रामसंभवात् उत्तरस्यां दिशि विशेषाधिका भवननरकावासबाहुल्येन शुषिरबाहुल्यात्॥ ततोपि दक्षिणस्यां
दिशि विशेषाधिका उत्तरदिगपेक्षया दक्षिणस्यां दिशि विशेषाधिका उत्तरदिगपेक्षया दक्षिणस्यां दिशि भवनानां नरकावासानां चातिप्रभूतत्वात्॥ यथा पत्रप्रभू
ता अपि तत्र प्रभूताः पनकादयोनंतकायिका वनस्पतयः प्रभूता शंखादयो द्वींद्रियाः प्रभूताः पिंडीभूतसेवालाद्याश्रिताः॥ कुंथ्वादयस्त्रींद्रियाः प्रभूताः पद्मा
द्याश्रिता भ्रमरादयश्चतुरिंद्रिया इति वनस्पत्यादिसूत्राणि चतुरिंद्रियसूत्रपर्यंतानि अप्कायिकसूत्रवद्भावनीयानि॥ ८४॥ नेरयिकसूत्रे सर्वस्तोकाः पूर्वोत्तरप
श्चिमदिग्विभागभाविनो नैरयिकाः पुष्पावकीर्णनरकावासानां तत्राल्पत्वात् बहूनां प्रायः संख्येययोजनविस्तृतत्वात्तेभ्यो दक्षिणदिग्भाविनो संख्येयगुणाः पु
ष्पावकीर्णनरकावासानां तत्र बाहुल्यात् तेषां च प्रायोसंख्येययोजनविस्तृतत्वात् कृष्णपाक्षिकाणां तस्यां दिशि प्राचुर्येणोत्पादाच्च॥ तथा हि द्विविधा जंतवः शु
क्लपाक्षिकाः कृष्णपाक्षिकाश्च तेषां लक्षणमिदं येषां किंचिदूनपुद्गलपरावर्त्तार्द्धमात्रः संसारस्ते शुक्लपाक्षिका अधिकतरसंसारभाजिनस्तु कृष्णपाक्षि
काः॥ उक्तं च॥ जेसिमवड्ढो पुग्गलपरियट्टो सेसओ य संसारो॥ ते सुक्कपक्खिया खलु अहिए पुण कण्हपक्खीओ॥ अत एव च स्तोकाः शुक्लपाक्षिका अल्पसंसारित्वा

स्तोकत्वात्बहवः कृष्णपाक्षिकाः प्रभूतसंसारिणामतिप्रचुरत्वात्कृष्णपाक्षिकाश्च प्राचुर्येण दक्षिणस्यां दिशि समुत्पद्यंते न शेषासु दिक्षु तथास्वाभाव्यात् ॥ तच्च स्वा
भाव्यं पूर्वाचार्यैरेवं युक्तिभिरुपबृंह्यते तद्यथा कृष्णपाक्षिका दीर्घतरसंसारभाजिन उच्यंते दीर्घतरसंसारभाजिनश्च बहुपापोदयाद्भवंति ॥ बहुपापोदयाश्च क्रूरकर्मा
णः क्रूरकर्माणश्च प्रायस्तथास्वाभाव्यात्तद्भवसिद्धिका अपि दक्षिणस्यां दिशि समुत्पद्यंते न शेषासु दिक्षु ॥ यच्चोक्तं ॥ पायमिह क्रूरकम्मा भवसिद्धीयावि दाहिणिल्लेसु
नेरइयमणुयासुराइट्ठाणेसु गच्छंति ॥ १ ॥ ततो दक्षिणस्यां दिशि बहूनां कृष्णपाक्षिकाणामुत्पादसंभवात्पूर्वोक्तकारणद्वयाच्च संभवंति पूर्वोत्तरपश्चिमदिग्भाविभ्यो दाक्षि
णात्या असंख्येयगुणाः ॥ यथा च सामान्यतो नैरयिकाणां दिग्विभागेनाल्पबहुत्वमुक्तमेवं प्रतिपृथिवि वक्तव्यं युक्तेः सर्वत्रापि समानत्वात्तदेवं प्रतिपृथिव्यपि दिग्विभागेना
ल्पबहुत्वमभिहितमिदानीं सप्तापि पृथिवीरधिकृत्य दिग्विभागेनाल्पबहुत्वमाह दाहिणेहिंतो अहेसत्तमपुढविनेरइएहिंतो छट्ठीए तमाए नेरइया इत्यादि सप्तमपृथिव्यां
पूर्वोत्तरपश्चिमदिग्भाविभ्यो नैरयिकेभ्यो ये सप्तमपृथिव्यामेव दाक्षिणात्यास्ते असंख्येयगुणास्तेभ्यः षष्ठपृथिव्यां तमःप्रभाभिधानायां पूर्वोत्तरपश्चिमदिग्भाविनो ऽसंख्येय
गुणाः कथमिति चेदुच्यते ॥ इह सर्वोत्कृष्टपापकारिणः संज्ञिपंचेंद्रियतिर्यग्मनुष्याः सप्तमनरकपृथिव्यामुत्पद्यंते ॥ किंचिद्धीनहीनतरपापकर्मकारिणश्च षष्ठ्यादिषु पृ
थिवीषु सर्वोत्कृष्टपापकर्मकारिणश्च सर्वस्तोका बहवश्च यथोत्तरं किंचिद्धीनहीनतरादिपापकर्मकारिणस्ततो युक्तमसंख्येयगुणत्वं सप्तमपृथिवीदाक्षिणा
त्यनारकापेक्षया षष्ठपृथिव्यां पूर्वोत्तरपश्चिमनारकाणामेवमुत्तरोत्तरपृथिवीरप्यधिकृत्य भावयितव्यं तेभ्योपि तस्यामेव षष्ठपृथिव्यां दक्षिणस्यां दिशि नारकाणाम
संख्येयगुणा युक्तिरत्र प्रागेवोक्ता तेभ्योपि पंचमपृथिव्यां धूमप्रभाभिधानायां पूर्वोत्तरपश्चिमदिग्भाविनोऽसंख्येयगुणाः ॥ तेभ्योपि तस्यामेव पंचपृथिव्यां दाक्षिणात्या
असंख्येयगुणा एवं सर्वास्वपि क्रमेण वाच्यं तिर्यक्पंचेंद्रियसूत्रं तु प्रायः सूत्रवत् ॥ ७ ॥ दिसाणुवाएणं सव्वत्थोवा मणुस्सा दाहिणउत्तरेणमित्यादि सर्वस्तोका मनुष्या
दक्षिणस्यामुत्तरस्यां च पंचानां भरतक्षेत्राणां पंचानामैरावतक्षेत्राणामत्यल्पत्वात् ॥ तेभ्यः पूर्वस्यां दिशि संख्येयगुणत्वात् तेभ्योपि पश्चिमायां दिशि विशेषाधिकाः
स्वभावत एवाधोलौकिकग्रामेषु मनुष्यबाहुल्यभावात् दिसाणुवाएणं सव्वत्थोवा भवणवासीत्यादि ॥ सर्वस्तोका भवनवासिनो देवाः पूर्वस्यां पश्चिमायां ४६
दिशि तत्र भवनानामल्पत्वात् तेभ्य उत्तरदिग्भाविनोऽसंख्येयगुणाः स्वस्थानतया तत्र भवनानां बाहुल्यात् तेभ्योपि दक्षिणादिग्भाविनो दिग्वासि नोऽसंख्येयगुणाः

स्तत्र भवनानामतीव बाहुल्यात् ॥ तथाहि निकायेनिकाये चत्वारि २ भवनशतसहस्राण्यतिरिच्यंते ॥ कृष्णपाक्षिकाश्च बहवस्तत्रोत्पद्यंते ततोऽसंख्येयगुणाः ॥ ७ ॥ व्यंतरसू
त्रे भावना यत्र शुषिरं तत्र व्यंतराः पूर्वस्यां दिशि घनत्वात् स्तोका व्यंतरास्तेभ्योऽपरस्यां दिशि विशेषाधिका अधोलौकिकग्रामेषु शुषिरसंभवात् ॥ तेभ्योप्युत्तरस्यां दिशि विशेषा
धिकाः स्वस्थाननयानगरावासबाहुल्यात् ॥ तेभ्योपि दक्षिणस्यां दिशि विशेषाधिकाः अतिप्रभूतनगरावासबाहुल्यात् ॥ ७ ॥ तथा सर्वस्तोका ज्योतिष्काः पूर्वस्यां पश्चिमायां
च दिशि चंद्रादित्यद्वीपेषु उद्यानकल्पेषु कतिपयानामेव तेषां भावात् तेभ्योपि दक्षिणस्यां दिशि विशेषाधिकाः ॥ यतो मानसे सरसि बहवो ज्योतिष्काः क्रीडास्थानमिति क्रीडनया
प्रताः नित्यमासते मानसे सरसि च ये मत्स्यादयो जलचरास्ते आसन्नविमानदर्शनतः समुत्पन्नजातिस्मरणाः किंचिद्व्रतं प्रतिपद्यानशनादिना कृत्वा कृतनिदानास्तत्रोत्प
द्यंते ततो भवंत्यौत्तराहा दाक्षिणात्येभ्यो विशेषाधिकाः ॥ तथा सौधर्मे कल्पे सर्वस्तोकाः पूर्वस्यां पश्चिमायां च दिशि वैमानिकाः यतो यान्यावलिकाप्रविष्टानि विमानानि तानि चतसृ
ष्वपि दिक्षु तुल्यानि यानि पुनः पुष्पावकीर्णकानि तानि भूतान्यसंख्येययोजनविस्तृतानि च दक्षिणस्यामुत्तरस्यां च दिशि नान्यत्र ततः सर्वस्तोकाः पूर्वस्यां पश्चिमायां दि
शि तेभ्य उत्तरस्यां दिशि असंख्येयगुणाः पुष्पावकीर्णकविमानानां बाहुल्यादसंख्येययोजनविस्तृतत्वाच्च तेभ्योपि दक्षिणस्यां दिशि विशेषाधिकाः कृष्णपाक्षिकाणां
प्राचुर्येण तत्र गमनात् एवमीशानसनत्कुमारमाहेंद्रकल्पसूत्राण्यपि भावनीयानि ॥ ब्रह्मलोककल्पे सर्वस्तोकाः पूर्वोत्तरपश्चिमदिग्भाविनो देवा यतो बहवः कृष्ण
पाक्षिकास्तिर्यग्योनयो दक्षिणस्यां दिशि समुत्पद्यंते शुक्लपाक्षिकाश्च स्तोका इति पूर्वोत्तरपश्चिमदिग्भाविनः सर्वस्तोकाः तेभ्यो दक्षिणस्यां दिशि असंख्येयगुणाः
कृष्णपाक्षिकाणां बहू नां तत्रोत्पादात् एवं लांतकशुक्रसहस्रारसूत्राण्यपि भावनीयानि ॥ आनतादिषु पुनर्मनुष्या एवोत्पद्यंते तेन प्रतिकल्पं प्रतिग्रैवेयकं प्रत्य
नुत्तरविमानं च चतसृषु दिक्षु प्रायो बहुसमा वेदितव्यास्तथा चाह ॥ तेण परं बहुः समोववन्नगा समणाउसो इति ॥ ७ ॥ दिसाणुवाएणं सव्वत्थोवा सिद्धा दाहिणउत्तरेणमित्या
दि सर्वस्तोकाः सिद्धा दक्षिणस्यामुत्तरस्यां च दिशि कथमिति चेदुच्यते ॥ इह मनुष्या एव सिध्यंति नान्ये मनुष्या अपि सिध्यंतो ये ष्वाकाशप्रदेशेष्विह चरमसमये
अवगाढास्तेष्वेवाकाशप्रदेशेषूर्ध्वमपि गच्छंति न मनागपि वक्रं गच्छंति ॥ तत्र दक्षिणस्यां दिशि पंचसु भरतेषूत्तरस्यां दिशि पंचस्वैराव
तेषु मनुष्या अल्पाः ॥ क्षेत्रस्याल्पत्वात् सुषमसुषमादौ च सिध्यभावादिति क्षेत्रसिद्धाः सर्वस्तोकाः तेभ्यः पूर्वस्यां दिशि संख्येयगुणाः ॥ पूर्वविदेहानां भर

तैरावतक्षेत्रेभ्यः संख्येयगुणतयातद्गष्याणामपिसंख्येयगुणत्वात्तेषांचसर्वकालंसिद्धिभावात्तेभ्यःपश्चिमायांदिशिविशेषाधिकाः अधोलौकिकग्रामेषुमनुष्य
बाहुल्यात् गतंदिग्द्वारमिदानींगतिद्वारंतत्रेदमादिसूत्रं॥ ७॥ एएसिणंभंतेनेरइयाणमित्यादिसर्वस्तोकामनुष्याः पष्णवतिछेदनकच्छेद्य राशिप्रमाणत्वात्सचषण्णवति
छेदनकदायीराशिरेषदर्शयिष्यते तेभ्योनैरयिका असंख्येयगुणाः अंगुलमात्रक्षेत्रप्रदेशराशेः संबंधिनि प्रथमवर्गमूलेनतृतीयवर्गमूलेनगुणितेयावान्प्रदेशराशि
र्भवति तावत्प्रमाणासुघनीकृतस्यलोकस्यैकप्रादेशिकीषुश्रेणिषुयावंतोनभःप्रदेशास्तावत्प्रमाणत्वात्तेभ्योदेवाअसंख्येयगुणाव्यंतराणांज्योतिष्काणांचप्र
त्येकंप्रतरासंख्येयभागवर्तिश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात् तेभ्यःसिद्धाअनंतगुणाः अभव्येभ्योऽनंतगुणत्वात्तेभ्यस्तिर्यग्योनिकाः अनंतगुणावनस्प
तिकायिकानांसिद्धेभ्योप्यनंतगुणत्वात् तदेवंनैरयिकतिर्यग्योनिकमनुष्यदेवसिद्धरूपाणांपंचानामल्पबहुत्वमुक्तमिदानींनैरयिकतिर्यग्योनिकामनुष्यमानुषी
देवदेवीसिद्धलक्षणानामष्टानामल्पबहुत्वमभिधित्सुराह एएसिणंभंतेनेरइयाणमित्यादि सर्वस्तोकामनुष्योमनुष्यस्त्रियः संख्येयकोटीकोटीप्रमाणत्वात्ताभ्योम
नुष्या असंख्येयगुणाः इहमनुष्याइतिसंमूर्छनजाअपिगृह्यंतेवेदस्याविवक्षणात्तेचसंमूर्छनजावांतादिषुनगरनिर्द्धमनांतेषुजायमानाअसंख्येयाःप्राप्यंते
तेभ्योनैरयिकाअसंख्येयगुणामनुष्याह्युत्कृष्टपदेपिश्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणाः यतेनैरयिकास्त्वंगुलमात्रक्षेत्रप्रदेशराशिसत्कतृतीय
वर्गमूलगुणितप्रथमवर्गमूलप्रमाणश्रेणिगताकाशप्रदेशराशिप्रमाणास्ततोभवंत्यसंख्येयगुणास्तेभ्यस्तिर्यग्योनिकास्त्रियोऽसंख्येयगुणाः प्रतरासं
ख्येयभागवर्त्यसंख्येयश्रेयश्रेणिनभःप्रदेशराशिप्रमाणत्वात्ताभ्योपिदेवाअसंख्येयगुणा॥ असंख्येयगुणप्रतरासंख्येयभागवर्त्यसंख्येयश्रेणिगतप्रदे
शराशिमानत्वात् तेभ्योपिदेवाः संख्येयगुणाद्वात्रिंशद्गुणत्वात् ताभ्योपिसिद्धाअनंतगुणास्तेभ्योपितिर्यग्योनिकाअनंतगुणाअत्रयुक्तिःप्रागेवोक्तागा
तंगतिद्वारमिदानीमिंद्रियद्वारमधिकृत्याह॥ ७॥ एएसिणंभंतेसइंदियाणइत्यादि सर्वस्तोकाःपंचेंद्रियाः संख्येययोजनकोटीप्रमाणविष्कंभसूचीप्रमितप्रतरा
संख्येयभागवर्त्यसंख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्तेभ्यश्चतुरिंद्रियाविशेषाधिकाविष्कंभसूच्यास्तेषांप्रभूतसंख्येययोजनकोटीकोटीप्रमाण ४०
त्वात्तेभ्योपित्रींद्रियाविशेषाधिकास्तेषांविष्कंभसूच्याःप्रभूततरसंख्येययोजनकोटीकोटीमानत्वात्तेभ्योपिद्वींद्रियाविशेषाधिकास्तेषांविष्कंभसूच्याःप्र

कोटी
भूततमसंख्येययोजनकोटीप्रमाणत्वात् तेभ्योनिंद्रियाअनंतगुणाः सिद्धानामनंतत्वात्तेभ्योप्येकेंद्रियाअनंतगुणावनस्पतिकायिकानांसिद्धेभ्योप्यनंतगुणत्वा
त् तेभ्योपिसेंद्रियाविशेषाधिकाद्वींद्रियादीनामपितत्रप्रक्षेपात्तदेवमुक्तमेकमौघिकानामल्पबहुत्वमिदानीमेतेषामेवापर्याप्तानांद्वितीयमल्पबहुत्वमा
ह॥ ७॥ एएसिणंभंतेसइंदियाणमित्यादि सर्वस्तोकाःपंचेंद्रियाअपर्याप्ताः एकस्मिन्प्रतरेयावंत्यंगुलासंख्येयभागमात्राणिखंडानितावत्प्रमाणत्वात्तेषांतेभ्य
श्चतुरिंद्रियाअपर्याप्ताविशेषाधिकाः प्रभूतप्रतरांगुलासंख्येयभागखंडप्रमाणत्वात् तेभ्यस्त्रींद्रियाअपर्याप्ताविशेषाधिकाः प्रभूततरप्रतरांगुलासंख्येय
भागखंडप्रमाणत्वात् तेभ्यस्त्रींद्रियाअपर्याप्ताविशेषाधिकाः प्रभूततरप्रतरांगुलासंख्येयभागखंडमानत्वात्तेभ्योपिद्वींद्रियाअपर्याप्ताविशेषाधिकाःप्र
भूततमप्रतरांगुलासंख्येयभागखंडप्रमाणत्वात् तेभ्यएकेंद्रियाअपर्याप्ताअनंतगुणावनस्पतिकायिकानामनंततयासदाप्राप्यमाणत्वात् तेभ्योपिसेंद्रियाअप
र्याप्ताविशेषाधिकाः द्वींद्रियाद्यपर्याप्तानामपितत्रप्रक्षेपात्गतंद्वितीयमल्पबहुत्वमधुनैतेषामेवपर्याप्तानामल्पबहुत्वमाह एएसिणंभंतेसइंदियाणमित्या
दि सर्वस्तोकाश्चतुरिंद्रियाःपर्याप्तायतोऽल्पायुषश्चतुरिंद्रियास्ततःप्रभूतकालमवस्थानाभावात्पृच्छसमयेस्तोकाअवाप्यंतेतेचस्तोकाअपिप्रतरेयावंत्यंगुलसं
ख्येयभागमात्राणिखंडानितावत्प्रमाणाविदितव्याः तेभ्यःपंचेंद्रियाःपर्याप्ताविशेषाधिकाः प्रभूतप्रतरांगुलसंख्येयभागखंडमानत्वात्द्वींद्रियाःपर्याप्ताविशेषा
धिकाःप्रभूततरप्रतरांगुलसंख्येयभागखंडमानत्वात्तेभ्योपित्रींद्रियाःपर्याप्ताविशेषाधिकाद्वींद्रियादीनामपिपर्याप्तानांतत्रप्रक्षेपात्गतंतृतीयमल्पबहु
त्वंसंप्रत्येतेषामेवसेंद्रियादीनांप्रत्येकंपर्याप्तापर्याप्तगतान्यल्पबहुत्वान्याह॥ ७॥ एएसिणंभंतेइत्यादि॥ सर्वस्तोकाः सेंद्रियाःअपर्याप्तकाः इहसेंद्रियेषु
मध्येएकेंद्रियेषुमध्येएकेंद्रियाएवंचबहवस्तत्रापिचसूक्ष्मास्तेषांसर्वलोकापन्नत्वात्॥ सूक्ष्माश्चपर्याप्ताः सर्वस्तोकाःपर्याप्ताः संख्येयगुणाइतिसेंद्रियाअ
पर्याप्ताःसर्वस्तोकाःपर्याप्ताःसंख्येयगुणाएवमेकेंद्रियाअपर्याप्ताःसर्वस्तोकाःपर्याप्ताःसंख्येयगुणाभावनीया॥ तथासर्वस्तोकाद्वींद्रियाःपर्याप्त
कायावंतिप्रतरेअंगुलस्यसंख्येयभागमात्राणिखंडानितावत्प्रमाणत्वात्तेषांतेभ्योऽपर्याप्ताःअसंख्येयगुणाः॥ प्रतरगतांगुलासंख्येयभागखंडप्रमा
णत्वात्एवंत्रिचतुरिंद्रियाल्पबहुत्वान्यपिवक्तव्यानि॥ गतंषडल्पबहुत्वात्मकंचतुर्थमल्पबहुत्वंसंप्रत्येतेषांसेंद्रियादीनांसमुदितानांपर्याप्तापर्याप्तानाम

ल्पबहुत्वमाह॥ एएसिणंभंतेइत्यादि॥ इदंप्रागुक्तद्वितीयतृतीयाल्पबहुत्वभावनानुसारेणस्वयंभावनीयं॥ तच्चप्रागेवभावितत्वात्॥ गतमिंद्रियद्वारमिदानींकायद्वार
मधिकृत्याह॥ एएसिणंभंतेसकाइयाणमित्यादि॥ सर्वस्तोकास्त्रसकायिकाद्वींद्रियादीनामेवत्रसकायत्वात्॥ तेषांचशेषकायापेक्षयात्यल्पत्वात्तेभ्यस्तेज
स्कायिकाअसंख्येयगुणाअसंख्येयलोकाकाशप्रदेशप्रमाणत्वात्तेभ्यःपृथिवीकायिकाविशेषाधिकाःप्रभूतासंख्येयलोकाकाशप्रदेशप्रमाणत्वात्तेभ्योऽप्कायिका
विशेषाधिकाः॥ प्रभूततरासंख्येयलोकाकाशप्रदेशप्रमाणत्वात्तेभ्योवायुकायिकाविशेषाधिकाःप्रभूततरासंख्येयलोकाकाशप्रमाणत्वात्॥ तेभ्योवायु
कायिकाविशेषाधिकाःप्रभूततमासंख्येयलोकाकाशप्रदेशमानत्वात् तेभ्योऽकायिकाअनंतगुणाःसिद्धानामनंतत्वात्तेभ्योवनस्पतिकायिकाअनं
तगुणाअनंतलोकाकाशप्रदेशराशिमानत्वात्तेभ्यःसकायिकाविशेषाधिकाः॥ पृथिवीकायिकादीनामपितत्रप्रक्षेपात्उक्तमौघिकानामल्पबहुत्वमिदा
नींमेतेषामेवापर्याप्तानांद्वितीयमल्पबहुत्वमाह॥ एएसिणंभंतेसकायिगणमित्यादिसुगमं॥ संप्रत्येतेषामेवपर्याप्तानांतृतीयमल्पबहुत्वमाह॥ एएसिणं
भंतेसकायियाणमित्यादिसुगमंसांप्रतमेतेषामेवसकायिकादीनांप्रत्येकंपर्याप्तापर्याप्तगतमल्पबहुत्वमाह॥ एएसिणंभंतेसकायाणंपज्जत्तापज्ज
त्ताणमित्यादि॥ सुगमंसंप्रत्येतेषामेवसकायिकादीनांसमुदितानांपर्याप्तापर्याप्तानामल्पबहुत्वंपंचममाह॥ एएसिणंभंतेसकायिकाणमित्यादि॥ स
र्वस्तोकायिकाःपर्याप्तकास्तेषांयस्त्रसकास्त्रियस्त्रसकायिकाएवापर्याप्तकाःअसंख्येयगुणाःद्वींद्रियादीनामपर्याप्तानांपर्याप्तद्वींद्रियादिभ्योऽसंख्येयगु
णत्वात्॥ ततस्तेजस्कायिकाअपर्याप्ताअसंख्येयगुणाःअसंख्येयलोकाकाशप्रदेशप्रमाणत्वात्३ ततःपृथिव्यंबुवायवोऽपर्याप्तकाःक्रमेणविशे
षाधिकास्ततस्तेजस्कायिकाःपर्याप्ताःसंख्येयगुणाः॥ सूक्ष्मेष्वपर्याप्तेभ्यःपर्याप्तानांसंख्येयगुणत्वात्॥ ७॥ ततःपृथिव्यब्वायवपर्याप्ताःक्रमेणविशेषाधि
का १० स्ततोवनस्पतयोऽपर्याप्ताःअनंतगुणाः ११ पर्याप्तासंख्येयगुणास्तदेवंकायद्वारेसामान्येनपंचसूत्राणिप्रतिपादितानि॥ संप्रत्यस्मिन्नेवद्वा
रेसूक्ष्मबादरादिभेदेनपंचदशसूत्राण्याह॥ एएसिणंभंतेसुहुमाणमित्यादिसर्वस्तोकाःसूक्ष्मास्तेजस्कायिकाअसंख्येयलोकाकाशप्रमाणत्वात् ४८
तेभ्यःसूक्ष्मपृथिवीकायिकाविशेषाधिकाः॥ प्रभूतासंख्येयलोकाकाशप्रदेशप्रमाणत्वात्तेभ्यःसूक्ष्माप्कायिकाविशेषाधिकाःप्रभूततरासंख्येयलो

लोकाकाशप्रदेशमानत्वात्॥ तेभ्यःसूक्ष्मवायुकायिकाविशेषाधिकाःप्रभूततमासंख्येयलोकाकाशप्रदेशराशिमानत्वात्॥ तेभ्यःसूक्ष्मनिगोदाअसंख्येयगुणाः॥
यथाग्रं ३००० सूक्ष्मग्रहणंबादरव्यवच्छेदार्थंद्विविधाहिनिगोदाःसूक्ष्माबादराश्चतत्रबादराःसूरणकंदादिषुसूक्ष्माःसर्वलोकापन्नाःतेचप्रतिगोलकमसंख्येयाइति
सूक्ष्मवायुकायिकेभ्योऽसंख्येयगुणाः॥ तेभ्यःसूक्ष्मवनस्पतिकायिकाअनंतगुणाः॥ प्रतिनिगोदमनंतानांजीवानांभावात्तेभ्यः॥ सामान्यतःसूक्ष्मजीवाविशेषाधिकाःसू
क्ष्मपृथिवीकायिकादीनामपितत्रप्रक्षेपात्गतमौघिकानामिदमल्पबहुत्वमिदानीमेतेषामेवापर्याप्तानामाह॥ एएसिणंभंतेसुहुमअपज्जत्तगाणमित्यादि॥ सर्वं
प्राग्वद्भावनीयंसंप्र॥ त्येतेषामेवपर्याप्तानांतृतीयमल्पबहुत्वमाह॥ ७॥ एएसिणंभंतेसुहुमपज्जत्तगाणमित्यादि॥ इदमपिप्रागुक्तक्रमेणेवभावनीयं॥ अधुना
अमीषामेवसूक्ष्मादीनांप्रत्येकंपर्याप्तापर्याप्तगतानिअल्पबहुत्वान्याह॥ एएसिणंभंतेसुहुमाणंपज्जत्तापज्जत्ताणमित्यादि॥ इहबादरेषुपर्याप्ताअसंख्येयगुणाए
केकपर्याप्तनिश्रयाअसंख्येयानामपर्याप्तानामुत्पादात्तथाचोक्तंप्राक्प्रथमेप्रज्ञापनाख्येपदेपज्जत्तगनिस्साएअपज्जत्तगाणमित्यादि॥ इहबादरेषुपर्याप्तेभ्योऽपर्या
प्ताअसंख्येयगुणाएकैकपर्याप्तनिश्रयाअसंख्येयानामपर्याप्तानामुत्पादात्तथाचोक्तंप्राक्प्रथमेप्रज्ञापनाख्येपदेपज्जत्तगनिस्साएअपज्जत्तगावक्कमं
तिजत्थएगोतत्थनियमाअसंखेज्जाइतिसूक्ष्मेषुपुनर्नायंक्रमःपर्याप्ताश्चापर्याप्तापेक्षयाचिरकालावस्थायिनइतिसंदेवतेबहवोलभ्यंते॥ ततउक्तंसर्वस्तोकाःसू
क्ष्माअपर्याप्तास्तेभ्यःसूक्ष्माःपर्याप्तकाःसंख्येयगुणाः॥ एवंपृथिवीकायादिष्वपिप्रत्येकंभावनीयंसर्वेषांसमुदितानांपर्याप्तागतंपंचममल्पबहुत्वमाह॥ एएसिणंभं
तेसुहुमाणंसुहुमपुढविकाइयाणमित्यादि॥ सर्वस्तोकाःसूक्ष्मतेजस्कायिकाअपर्याप्ताःकारणंप्रागेवोक्तं॥ तेभ्यःसूक्ष्मपृथिवीकायिकाअपर्याप्ताविशेषाधिका
स्तेभ्यःसूक्ष्माअप्कायिकाअपर्याप्ताविशेषाधिकाः॥ तेभ्यःसूक्ष्मवायुकायिकाअपर्याप्तकाविशेषाधिकाः॥ अत्रापिकारणंप्रागेवोक्तं॥ तेभ्यःसूक्ष्मतेजस्कायिकाः
पर्याप्ताःसंख्येयगुणाअपर्याप्ताःसंख्येयगुणाइत्यनंतरंभावितंतत्रसर्वस्तोकाःसूक्ष्मतेजस्कायिकाअपर्याप्ताइत्युक्तेतेभ्यःसूक्ष्मापर्याप्तपृथिवीकायिकादयो
विशेषाधिकायिकाविशेषाधिकत्वंचमनागधिकत्वंनद्विगुणत्वंचततःसूक्ष्मतेजस्कायिकेभ्योऽपर्याप्तेभ्यःपर्याप्ताःसूक्ष्मतेजस्कायिकाःअसंख्येयगुणाः
संतःसूक्ष्मवायुकायिकापर्याप्तेभ्योऽपिसंख्येयगुणाभवंति॥ तेभ्यःसूक्ष्मपृथिवीकायिकापर्याप्ताविशेषाधिकाः॥ तेभ्यःसूक्ष्मनिगोदाअपर्याप्ताअसंख्येयगु

गोस्तेषामतिप्राचुर्यात् ॥ तेभ्यः सूक्ष्मनिगोदाः पर्याप्ताः संख्येयगुणाः ॥ सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानामोघतः संख्येयगुणत्वात्तेभ्यः सूक्ष्मवनस्पतिकायिकाश्चपर्याप्तकाश्च
नंतगुणाः प्रतिनिगोदमनंतानांतेषांभावात्तेभ्यः सामान्यतः सूक्ष्माश्रपर्याप्तकाविशेषाधिकाः सूक्ष्मपृथिवीकायिकादीनामपितत्रप्रक्षेपात् ॥१२॥ तेभ्यः सूक्ष्मवनस्पतिका
यिकाः पर्याप्तकाः संख्येयगुणाः ॥ सूक्ष्मेषुत्वपर्याप्तेभ्यः पर्याप्तकाः संख्येयगुणाः ॥ यद्यापांतरालविशेषाधिकत्वंतदत्रमितिनसंख्येयगुणत्वव्याघातः ॥ तेभ्यः सूक्ष्माःप
र्याप्तकाविशेषाधिकासूक्ष्मपृथिव्यादीनामपिपर्याप्तानांतत्रप्रक्षेपात् ॥ १४ तेभ्यः सूक्ष्माविशेषाधिका ॥ अपर्याप्तानामपितत्रप्रक्षेपात् १४ तदेवमुक्तानिसूक्ष्माश्रितानि
पंचसूत्राणिसंप्रतिबादराश्रितानिपंचोनत्रकमेणाभिधित्सुराह ॥ ७ ॥ एएसिणंभंतेबायरपुढविकाइयाणमित्यादि ॥ सर्वस्तोकाबादरत्रसकायिकाद्वींद्रियादीनामेव
बादरत्रसत्वात्तेषांचशेषकायेभ्यो ऽल्पत्वात् १६ तेभ्योबादरतेजस्कायिकाश्चसंख्येयगुणाः ॥ असंख्येयलोकाकाशप्रमाणत्वात् २ तेभ्योपिप्रत्येकशरीर
बादरवनस्पतिकायिकाश्चसंख्येयगुणाः स्थानस्यासंख्येयगुणत्वात्बादरतेजस्कायिकाहिमनुष्यक्षेत्रएवभवंति ॥ तथाचोक्तं ॥ द्वितीयस्थानाख्यपदेकहिणंभंते
बायरतेउक्काइयाणंपज्जत्तगाणंठाणापन्नत्ता ॥ गोयमासठाणेणंअंतोमणुस्सखेत्ते अड्ढाइज्जेसुदीवसमुद्देसु निव्वाघाएणंपन्नरसकम्मभूमीसुवाघाएणंपंचसुमहाविदेहेसुए
त्थणंपंचसुमहाविदेहेसुएत्थणंबायरतेउकाइयाणंपज्जत्तगाणंठाणापन्नत्ता ॥ तथाजत्थेवबायरतेउकाइयाणंपज्जत्तगाणंठाणापन्नत्तातत्थेवबायरतेउकाइयाण
मपज्जत्तगाणंठाणापन्नत्ताइति ॥ बादरवनस्पतिकायिकास्तुत्रिष्वपिलोकेषुभवनादिषुतथाचोक्तं ॥ तस्मिन्नेवद्वितीयस्थानाख्यपदेकहिणंभंतेबायरवणस्सइ
काइयाइणंपज्जत्तगाणंठाणापन्नत्ता ॥ गोयमासठाणेणंसत्तसुघणोदहिवलएसुअहोलोएपायालेसुभवणपत्थडेसुउड्ढलोएकप्पेसुविमाणेसुविमाणाव
लियासुविमाणपत्थडेसुतिरियलोएअगडेसुतलाएसुनदीसुदहेसुवावीसुपुक्खरणीसुदीहियासुगुंजालियासुसरेसुसरपंतियासुसरसरपंतियासुबिलपं
तियासुउज्झरेसुनिज्झरेसुचिल्ललेसुपल्ललेसुवप्पिणेसुदीवेसुसमुद्देसु ॥ सव्वेसुचेवजलासएसुजलठाणेसुएत्थणंबायरवणस्सइकाइयाणंपज्जत्तगाणंठाणपन्न ४९
त्ता तथाजत्थेवबायरवणस्सइकाइयाणं ॥ पज्जत्तगाणंठाणातत्थेवबायरवणस्सइकाइयाणंअपज्जत्तगाणंठाणापन्नत्ता ॥ इतिततः क्षेत्रस्यासंख्येयगुणत्वादुपपद्यंते
बादरतेजस्कायिकेभ्योऽसंख्येयगुणाः प्रत्येकशरीरबादरवनस्पतिकायिकास्तेभ्योबादरनिगोदाअसंख्येयगुणास्तेषामत्यंतसूक्ष्मावगाहनत्वात्जलेषुचसर्वेष्वपिच

भावात् ॥ पनकसेवालादयोहिजलेअवश्यंभाविनस्तेचबादरानंतकायिकाइति ५ तेभ्योपिबादरपृथिवीकायिकाअसंख्येयगुणाअष्टासुपृथिवीषुसर्वेषुविमानभ
वनपर्वतादिषुभावात्तेभ्यो ऽसंख्येयगुणाबादराप्कायिकाः समुद्रेषुजलप्राचुर्यात् तेभ्यो ऽसंख्येयगुणाबादराप्कायिकाः समुद्रेषुजलप्राभूत्यात् ॥ तेभ्योबादरवायुकायि
काअसंख्येयगुणाः शुषिरेसर्वत्रवायुसंभवात् ७ तेभ्योबादरवनस्पतिकायिकाअनंतगुणाः प्रतिबादरनिगोदमनंतानांजीवानांभावात् ८ ॥ तेभ्यः सामान्यतोबा
दराजीवाविशेषाधिकाबादरत्रसकायादीनामपितत्रप्रक्षेपात् ९ गतमेकमोघिकानांबादराणामल्पबहुत्वमिदानींतेषामेवापर्याप्तानांद्वितीयमाह ॥ ७ ॥ एएसिणंभं
तेबायरापज्जत्तगाणमित्यादिसर्वस्तोकाबादरत्रसकायिकाअपर्याप्तकायुक्तिरत्रप्रागुक्तैवतेभ्योबादरतेजस्कायिकाअपर्याप्तकायुक्तिरत्रप्रागुक्तैव ॥ तेभ्योबा
दरतेजस्कायिकाअपर्याप्ताअसंख्येयगुणाः ॥ असंख्येयलोकाकाशप्रदेशप्रमाणत्वादित्येवंप्रागुक्तक्रमेणमध्यल्पबहुत्वंभावनीयं ॥ गतंद्वितीयमल्पबहुत्व
मिदानींमेतेषामेवपर्याप्तानांतृतीयमल्पबहुत्वमाहुत्वमाह ॥ ७ ॥ एएसिणंभंतेबादरेपज्जत्तगाणमित्यादि ॥ सर्वस्तोकाबादरतेजस्कायिकाः पर्याप्ताआवलि
कासमयवर्गस्यकतिपयसमयन्यूनैरावलिकासमयैर्गुणितस्ययावान् ॥ समयराशिर्भवतितावत्प्रमाणत्वात्तेषां ॥ उक्तंच ॥ आवलिवग्गोऊणावलिएगुणिउहु
बायरतेऊइति १ तेभ्योबादरत्रसकायिकाः पर्याप्ताअसंख्येयगुणाः ॥ प्रतरेयावंत्यंगुलसंख्येयभागमात्राणिखंडानितावत्प्रमाणत्वात्तेषां २ तेभ्यः प्रत्येक
शरीरबादरवनस्पतिकायिकाः पर्याप्ताः असंख्येयगुणाः प्रतरेयावंत्यंगुलासंख्येयभावमात्राणिखंडानितावत्प्रमाणत्वात्तेषांउक्तंच ॥ पत्तेयपज्जवणका
इयाउपयरंहरंतिलोगस्स ॥ अंगुलअसंखभागेणलाइयमिति ३ तेभ्योबादरनिगोधदापर्याप्तकाअसंख्येयगुणाः ॥ तेषामत्यंतसूक्ष्मावहगाहनत्वात्जला
शयेषुचसर्वत्रभावात् ॥ ४ तेभ्योबादरपृथिवीकायिकाः पर्याप्ताअसंख्येयगुणाः तेषामत्यंतसूक्ष्मावगाहनत्वात्जलाशयेषुचसर्वत्रभावात् ४ तेभ्योबा
दरपृथिवीकायिकाः पर्याप्ताअसंख्येयगुणाअतिप्रभूतसंख्यप्रतरांगुलासंख्येयभागखंडमानत्वात् ५ तेभ्योपिबादराप्कायिकाः पर्याप्ताअसंख्येयगुणाः
अतिप्रभूततरसंख्येयभागखंडसंख्यत्वात् ॥ ६ तेभ्योबादरवायुकायिकाः पर्याप्ताअसंख्येयगुणाः घनीकृतस्यलोकस्यासंख्येयेषुप्रतरेषुसंख्या
तसमभागवर्तिषुयावंतआकाशप्रदेशास्तावत्प्रमाणत्वात्तेषां ७ तेभ्योबादरवनस्पतिकायिकाः पर्याप्ताअनंतगुणाः ॥ प्रतिबादरैकैकनिगोदमनंतानांजी

वानांभावात् ८ तेसामान्यतोबादरपर्याप्तकाविशेषाधिकाःबादरतेजस्कायिकादीनामपिपर्याप्तानांतत्रप्रक्षेपात् ९ गतंतृतीयमल्पबहुत्वमिदानीयमल्पबहु
त्वमिदानींमेतेषामेवप्रत्येकपर्याप्तापर्याप्तगतान्यल्पबहुत्वान्याह ८७ एएसिणंभंतेबायराणंपद्यत्तापद्यत्ताणमित्यादिइहबादरैकैकपर्याप्तनिश्रया
असंख्येयाबादराअपर्याप्ताउत्पद्यंतेपद्यत्तगनिस्साएअपद्यत्तवक्कमंतिजथ्थएगोतथ्थनियमाअसंखेद्याइतिवचनात्॥ ततःसर्वत्रपर्याप्तेभ्योऽपर्याप्ताअसंख्ये
यगुणावक्तव्यात्रसकायिकसूत्रंप्रागुक्तयुक्त्याभावनीयं॥ गतंचतुर्थमल्पबहुत्वंसंप्रत्येतेषामेवसमुदितानांपर्याप्तानांपंचममल्पबहुत्वमाह॥ एएसिणंभंते
बायरणंभंतेबायरणंभंतेबायरपुढविकाइयाणंमित्यादि॥ सर्वस्तोकाबादरतेजस्कायिकाःपर्याप्तकास्तेभ्योबादरत्रसकायिकाःपर्याप्त
कास्तेभ्योबादरत्रसकायिकाःपर्याप्ताअसंख्येयगुणा। २ स्तेभ्योबादरत्रसकायिकाअपर्याप्ताअसंख्येयगुणात्॥ तेभ्योबादरप्रत्येकवनस्पतिकायिकाः
पर्याप्ताअसंख्येयगुणाः ४ तेभ्योबादरनिगोदाःपर्याप्तकाअसंख्येयगुणाः ५ तेभ्योबादरपृथिवीकायिकाःपर्याप्तकाअसंख्येयगुणाः ६ तेभ्योबादरा
कायिकाःपर्याप्ताअसंख्येयगुणाः ७ स्तेभ्योबादरवायुकायिकाःपर्याप्ताअसंख्येयगुणाः॥ एतेषुपदेषुयुक्तिःप्रागुक्ताअनुसरणीयाः ८ तेभ्योबादरते
जस्कायिकाअपर्याप्तकाअसंख्येयगुणा॥ यतोवाबादरवायुकायिकाःपर्याप्ताःअसंख्येयेषुप्रतरेषुयावंतआकाशप्रदेशास्तावत्प्रमाणाबादरतेजस्का
पर्याप्ताअसंख्येयलोकाकाशप्रमाणास्ततोभवंत्यसंख्येयगुणाः ९ ततःप्रत्येकबादरवनस्पतिकायिका १० बादरनिगोद ११ बादरवायुकायिकाअ
पर्याप्तायथोत्तरमसंख्येयगुणावक्तव्याः॥ यद्यपिचैतेप्रत्येकमसंख्येयलोकाकाशप्रदेशप्रमाणस्तथाप्यसंख्यातस्यासंख्यातभेदभिन्नत्वादित्थंयथोत्त
रमसंख्येयगुणत्वंनविरुध्यते १४ तेभ्योबादरवायुकायिकापर्याप्तेभ्योबादरवनस्पतिकायिकाजीवाःपर्याप्ताअनंतगुणाःप्रतिबादरैकैकनिगोदमनंत
भावात् १५ तेभ्यःसामान्यतोबादराःपर्याप्तकाःविशेषाधिकाःबादरतेजस्कायिकादीनामपिपर्याप्तानांतत्रप्रक्षेपात् १६ तेभ्योबादरवनस्पतिकायिकाअप
र्याप्तकाअसंख्येयगुणाएकैकपर्याप्तबादरवनस्पतिकायिकनिगोदनिश्रयाअसंख्येयानामपर्याप्तबादरवनस्पतिकायिकनिगोदानामुत्पादात् १७ ५०
तेभ्यतोबादराःअपर्याप्ताविशेषाधिकाःबादरतेजस्कायिकादीनामप्यपर्याप्तानांतत्रप्रक्षेपात् १८ तेभ्यपर्याप्तापर्याप्तविशेषणरहिताःसामान्यतो

Dr. BHAU DAJI MEMORIAL

बादराविशेषाधिकाः॥ बादरपर्याप्ततेजस्कायिनामपितत्रप्रक्षेपात् १९ गतानिबादराश्रितान्यपिपंचसूत्राणिसंप्रतिसूक्ष्मबादरसमुदायगतंपंचसूत्रीमभिप्रित्सुःप्र
थमतओघिकंसूक्ष्मबादरसूक्ष्ममाह ८७ एएसिणंभंतेइत्यादिइहप्रथमंबादरगतमल्पबहुत्वंबादरगतमल्पबहुत्वंबादरपंचसूत्र्यायत्प्रथमंसूत्रंतद्वद्भावनीयं
यावद्वादरवायुकायपदं ० तदनंतरंयत्सूक्ष्मगतमल्पबहुत्वंतत्सूक्ष्मपंचसूत्र्यायत्॥ प्रथमंसूत्रंतद्वत्॥ सूक्ष्मनिगोदचिंता १२ तेनंतरंबादरवनस्पति
कायिकाअनंतगुणाःप्रतिबादरनिगोदमनंतानांभावात् १३ तेभ्योबादराविशेषाधिकाः॥ बादरतेजस्कायिकादीनामपितत्रप्रक्षेपात् १४ तेभ्यःसूक्ष्मवनस्पति
कायिकाअसंख्येयगुणा॥ बादरनिगोदेभ्यःसूक्ष्मनिगोदानामसंख्येयगुणत्वात् १५ ताभ्यःसामान्यतःसूक्ष्माविशेषाधिकाः॥ सूक्ष्मतेजस्कायिकादीनामपितत्रप्र
पात् १६ गतमेकमल्पबहुत्वमिदानीमेतेषामेवापर्याप्तानांद्वितीयमाह ८७ एएसिणंभंतेइत्यादिसर्वस्तोकाबादरत्रसकायिकाअपर्याप्ता १ स्ततोबादरतेज
स्कायिकबादरनिगोदबादरपृथिवीकायिकबादराप्कायिकबादरवायुकायिकाअपर्याप्ताः क्रमेणयथोत्तरमसंख्येयगुणाःअत्रभावनाबादरपंचसूत्र्या
यद्द्वितीयपर्याप्तकसूत्रंतद्वत्कर्त्तव्या ७ ततोबादरवायुकायिकेभ्योऽपर्याप्तेभ्योऽसंख्येयगुणाःसूक्ष्मतेजस्कायिकाअपर्याप्ताअतिप्रभूतासंख्येयलो
काकाशप्रमाणत्वात् ८ तेभ्यःसूक्ष्मपृथिवीकायिकसूक्ष्मनिगोदाअपर्याप्तायथोत्तरमसंख्येयगुणाअत्रभावना॥ सूक्ष्मपंचसूत्र्यायद्द्वितीयंसूत्रं
तद्वत् १२ तेभ्यःसूक्ष्मनिगोदापर्याप्तेभ्योबादरवनस्पतिकायिकाजीवाअपर्याप्ताःअनंतगुणाःप्रतिबादरैकैकनिगोदमनंतानांसद्भावात् १३ तेभ्यःसा
मान्यतोबादराअपर्याप्तकाविशेषाधिकाःबादरत्रसकायिकापर्याप्तादीनामपितत्रप्रक्षेपात् १४ तेभ्यःसूक्ष्मवनस्पतिकाअपर्याप्ताअसंख्येयगुणाः
बादरनिगोदापर्याप्तेभ्यःसूक्ष्मनिगोदापर्याप्तानामसंख्येयगुणत्वात् १५ तेभ्यःसामान्यतःसूक्ष्माअपर्याप्ताविशेषाधिकाः सूक्ष्मतेजस्कायिकापर्या
प्तादीनामपितत्रप्रक्षेपात् १६ गतंद्वितीयमल्पबहुत्वमधुनाएतेषामेवपर्याप्तानांतृतीयमल्पबहुत्वमाह ८७॥ एएसिणंभंतेसुहुमपद्यत्तयाणमित्यादि
सर्वस्तोकाबादरतेजस्कायिकाःपर्याप्ताःतेभ्योबादरत्रसकायिकाबादरप्रत्येकबादरप्रत्येकवनस्पतिकायिकबादरनिगोदबायरपृथिवीकायि
कबादरवायुकायिकाःपर्याप्तायथोत्तरमसंख्येयगुणाअत्रभावनाबादरपंचसूत्र्यायत्तृतीयंपर्याप्तसूत्रंतद्वत्कर्त्तव्या ७ बादरपर्याप्तवायुका

यिकेभ्यः सूक्ष्मतेजस्कायिकाः पर्याप्ता असंख्येयगुणाः बादरवायुकायिका हि असंख्येयप्रतरप्रदेशराशिप्रमाणाः सूक्ष्मतेजस्कायिकास्तु पर्याप्ता असंख्येयलोका
काशप्रदेशप्रमाणास्ततोसंख्येयगुणाः १० ततः सूक्ष्मपृथिवीकायिकासूक्ष्माप्कायिकसूक्ष्मवायुकायिकाः पर्याप्ताः क्रमेणयथोत्तरंविशेषाधिकाः ११ ततः सूक्ष्म
वायुकायिकेभ्यः पर्याप्तेभ्यः सूक्ष्मनिगोदाः पर्याप्तका असंख्येयगुणाः स्तेषामतिप्रभूततयाप्रतिगोलकंभावात् १२ तेभ्योबादरवनस्पतिकायिकाजीवाः पर्याप्त
काः अनंतगुणाः प्रतिबादरैकैकनिगोदमनंतानांभावात् १३ तेभ्यः सामान्यतोबादराः पर्याप्तकाविशेषाधिकाः बादरतेजस्कायिकादीनामपिपर्याप्तानांत
त्रप्रक्षेपात् १४ तेभ्यः सूक्ष्मवनस्पतिकायिकाः पर्याप्ता असंख्येयगुणाः बादरनिगोदपर्याप्तेभ्यः सूक्ष्मनिगोदपर्याप्तानामसंख्येयगुणत्वात् १५ तेभ्यः सा
मान्यतः सूक्ष्मापर्याप्ताविशेषाधिकाः सूक्ष्मतेजस्कायिकादीनामपिपर्याप्तानांतत्रप्रक्षेपात् १६ गतंतृतीयमल्पबहुत्वमिदानींमेतेषामेवसूक्ष्मबादरा
दीनांप्रत्येकंपर्याप्तापर्याप्तानां ॥ पृथक्पृथगल्पबहुत्वमाह ॥ ७५ ॥ एएसिणंभंतेसुहुमाणंबायराणपज्जत्ताणयमित्यादि ॥ सर्वत्रेयंभावनासर्वस्तो
काबादराः पर्याप्ताः परिमितक्षेत्रवर्तित्वात्तेभ्योबादरा अपर्याप्ता असंख्येयगुणाएकैकबादरपर्याप्तनिश्रया असंख्येयानांबादरापर्याप्तानामुत्पादात्
तेभ्यः सूक्ष्मा अपर्याप्ता असंख्येयगुणाः ॥ सर्वलोकापन्नतयातेषांक्षेत्रस्यासंख्येयगुणत्वात् तेभ्यः सूक्ष्मपर्याप्तकाः संख्येयगुणाः चिरकालावस्थायि
तयातेषांसदैवसंख्येयगुणतयाथमानत्वात् ॥ गतंचतुर्थमल्पमिदानींमेतेषामेवसूक्ष्म २ पृथिवीकायिकादीनांचप्रत्येकंपर्याप्तानांचासमुदायेनपंचम
मल्पबहुत्वमाह ॥ ७७ ॥ एएसिणंभंतेसुहुमाणंसुहुमपुढविकाइयाणमित्यादि ॥ सर्वस्तोकाबादरतेजस्कायिकाः पर्याप्ताः आवलिकासमयवर्गैःकतिप
यसमयन्यूनैरावलिकासमयैर्गुणितेयावान्समयराशिस्तावान्प्रमाणत्वात्तेषांतेभ्योबादरत्रसकायिकाः पर्याप्ताः असंख्येयगुणाः ॥ प्रतरेयावंत्यंगु
लसंख्येयभागमात्राणिखंडानितावत्प्रमाणत्वात्तेषां २ तेभ्योबादरत्रसकायिका अपर्याप्ता असंख्येयगुणाः प्रतरेयावंत्यंगुलासंख्येयभागमा
त्राणिखंडानितावत्प्रमाणत्वात्तेषां ३ ततः प्रत्येकबादरवनस्पतिकायिकबादरनिगोदबादरपृथिवीकायिकबादराप्कायिकबादरवायुकायि ५१
काः पर्याप्तायथोत्तरमसंख्येयगुणाः ॥ यद्यप्येतेप्रत्येकंप्रतरेयावंत्यंगुलासंख्येयभागमात्राणिखंडानितावत्प्रमाणास्तथाप्यंगुलासंख्येयभाग

स्यसंख्येयभेदभिन्नत्वादिदंयथोत्तरमसंख्येयगुणत्वमपिधीयमानंनविरुध्यते ८ तेभ्योबादरतेजस्कायिका अपर्याप्ता असंख्येयगुणाः ॥ असंख्येयलो
काकाशप्रमाणत्वात् ९ ततः प्रत्येकशरीरबादरवनस्पतिकायिकबादरनिगोदबादरपृथिवीकायिकबादराप्कायिकबादरवायुकायिका अपर्याप्ता
यथोत्तरमसंख्येयगुणा १४ स्ततोबादरवायुकायिकेभ्योऽपर्याप्तेभ्यः सूक्ष्मतेजस्कायिका अपर्याप्ता असंख्येयगुणा १५ स्ततः सूक्ष्मपृथिवीकायिकसूक्ष्माप्का
यिकसूक्ष्मवायुकायिका अपर्याप्तायथोत्तरंविशेषाधिकाः १८ ततः सूक्ष्मपर्याप्तास्तेजःस्कायिकाः संख्येयगुणाः ॥ सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानामोघ
तएवसंख्येयगुणत्वात् १९ ततः सूक्ष्मपृथिवीकायिकासूक्ष्माप्कायिकासूक्ष्मवायुकायिकापर्याप्तायथोत्तरंविशेषाधिकाः २२ तेभ्यः सूक्ष्मनिगोदा अ
पर्याप्तका असंख्येयगुणास्तेषामतिप्राभूत्येनसर्वलोकेषुभावात् २३ सूक्ष्मनिगोदाः पर्याप्तकाः संख्येयगुणाः ॥ सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानामोघतए
एसदासंख्येयगुणत्वात् ॥ एतेचबादरापर्याप्ततेजस्कायिकादयः पर्याप्तसूक्ष्मनिगोदपर्यवसानाः षोडशपदार्थायद्यप्यन्यत्राविशेषेणासंख्येयलोका
काशप्रदेशप्रमाणतयासंगीयंतेतथाप्यसंख्येयत्वस्यासंख्यभेदभिन्नत्वादित्थमसंख्येयगुणत्वंविशेषाधिकत्वंसंख्येयगुणत्वंप्रतिपद्यमानंनवि
रोधभागिति २४ तेभ्यः पर्याप्तसूक्ष्मनिगोदेभ्योबादरवनस्पतिकायिकाः पर्याप्ताः अनंतगुणाः ॥ प्रतिबादरैकैकनिगोदमनंतानांजीवानांभावात् २५ तेभ्य
सामान्यतोबादराः पर्याप्ताविशेषाधिकाः बादरपर्याप्ताविशेषाधिकाः बादरपर्याप्ततेजस्कायिकादीनामपितत्रप्रक्षेपात् २६ तेभ्योबादरवनस्पतिकायिका अ
पर्याप्तिका असंख्येयगुणाः ॥ एकैकपर्याप्तबादरनिगोदनिश्रया असंख्येयानांबादरनिगोदापर्याप्तानामुत्पादात् २७ तेभ्यः सामान्यतोबादरा अप
र्याप्ताविशेषाधिकाबादरतेजस्कायिकादीनामप्यपर्याप्तानांतत्रप्रक्षेपात् २८ तेभ्यः सामान्यतोबादराविशेषाधिकाः पर्याप्तानामपितत्रप्रक्षेपा
त् २९ तेभ्यसूक्ष्मवनस्पतिकायिका अपर्याप्ता असंख्येयगुणाः बादरनिगोदेभ्यः सूक्ष्मनिगोदानामपर्याप्तानामप्यसंख्येयगुणत्वात् ३०
ततः सामान्यतः सूक्ष्माऽपर्याप्तकाविशेषाधिकाः सूक्ष्मपृथिवीकायिकादीनामप्यपर्याप्तानांतत्रप्रक्षेपात् ३१ तेभ्यः सूक्ष्मवनस्पतिकायिकाः
पर्याप्ताः संख्येयगुणाः सूक्ष्मवनस्पतिकायिकापर्याप्तासंख्येयगुणाः सूक्ष्मेष्वोघतोऽपर्याप्तेभ्यः पर्याप्तानांसंख्येयगुणत्वात् ततः सूक्ष्मापर्याप्तेभ्यो

पिसूक्ष्मवनस्पतिकायिकाः पर्याप्ताः संख्येयगुणाः विशेषाधिकत्वस्यसंख्येयगुणत्वबाधनायोगात् ३२ तेभ्यः सामान्यतः सूक्ष्माः पर्याप्ताविशेषाधिकाः
पर्याप्तसूक्ष्मपृथिवीकायिकादीनामपितत्रप्रक्षेपात् ३३ ततः सामान्यतः सूक्ष्माः पर्याप्तापर्याप्तविशेषणरहिताविशेषाधिकाअपर्याप्तानामपितत्रप्र
क्षेपात् ३४ गतसूक्ष्मबादरसमुदायगतंपंचममप्यल्पबहुत्वंतद्गतौसमर्थितानि पंचदशापिसूत्राणीतिगतंकायद्वारमिदानींयोगद्वारमाह ७ एएसिणं
भंतेजीवाणंसयोगीणमित्यादि सर्वस्तोकामनोयोगिनः संज्ञिनः पर्याप्ताएवहिमनोयोगिनस्तेचस्तोकाइतितेभ्योवाग्योगिनोऽसंख्येयगुणाः द्वीं
द्रियादीनांवाग्योगिनांसंज्ञिभ्योऽसंख्यातगुणत्वात्तेभ्योअयोगिनोऽनंतगुणाः सिद्धानामनंतत्वात् तेभ्यः काययोगिन्योऽनंतावनस्पतीनामनंतत्वा
त् यद्यपिनिगोदजीवानामेकंशरीरंतथापितेनैकेनशरीरेणसर्वेप्याहारादिग्रहणंकुर्वंतीतिसर्वेषामपिकाययोगित्वानंतगुणत्वव्याघातः तेभ्यः सा
मान्यतः सयोगिविशेषाधिकाद्वींद्रियादीनामपिवाग्योग्यादीनांतत्रप्रक्षेपात् गतंयोगद्वारमिदानींवेदद्वारमाह ७ एएसिणंभंतेजीवाणंसवेयगा
णमित्यादिसर्वस्तोकाः पुरुषवेदाः संज्ञिनामेवतिर्यग्मनुष्याणांदेवानांचपुरुषवेदभावात्तेभ्यः स्त्रीवेदाः संख्येयगुणाः यतउक्तंजीवाभिगमेतिरि
क्खजोणियपुरिसेहिंतोतिरिक्खजोणियइत्थीउतिगुणाउतिरूवाहियाउयतहामणुस्सपुरिसेहिंतोमणुस्सइत्थीउ सत्तावीसगुणाउसत्तावीसरूवुत्तराउ
यतथादेवपुरिसेहिंतोदेविथीसगुणातोबत्तीसरूवुत्तराउयइति वृद्धाचार्यैरप्युक्तंतिगुणातिरूवअहियातिरियाणंइत्थियामुणेयव्वासत्तावीसगु
णापुणमणुयाणंतदहियाचेवबत्तीसगुणाबत्तीसरूवअहियायतहयदेवाणं देवीउपन्नत्ता जिणेहिंजियरागदोसेहिं अवेदकाअनंतगुणाः
सिद्धानामनंतत्वात्तेभ्योनपुंसकवेदाअनंतगुणाः वनस्पतिकानांसिद्धेभ्योप्यनंतगुणत्वात्सामान्यतः सवेदाविशेषाधिकाः स्त्रीवेदकानामपि
तत्रप्रक्षेपात्गतंवेदद्वारमिदानींकषायद्वारमाह ७ एएसिणंभंतेजीवाणंसकसाईणमित्यादि सर्वस्तोकाअकषायिणः सिद्धानांकतिप
यानांचमनुष्याणामकषायित्वात् तेभ्योमानकषायिणोमानकषायपरिणामवंतोऽनंतगुणाः षड्वपिजीवनिकायेषुमानकषायपरिणामस्या ५२
वाप्यमानत्वात् तेभ्यः क्रोधकषायिणोविशेषाधिकास्तेभ्योपिमायाकषायिणोविशेषाधिकास्तेभ्योपिलोभकषायिणोविशेषाधिकाः मानकषायप

रिणामकालापेक्षयाक्रोधादिकषायपरिणामकालस्ययथोत्तरंविशेषाधिकतयाक्रोधादिकषायिणामपियथोत्तरविशेषाधिकत्वभावात् लोभकषा
यिभ्यः सामान्यतः सकषायिणोविशेषाधिकामानादिकषायिणामपितत्रप्रक्षेपात् सकषायिणइत्यत्रैवंचव्युत्पत्तिः कषायशब्देनकषायोदयः परिगृ
ह्यतेतथाचलोकेव्यवहारः सकषायोदयंकषायोदयवानित्यर्थः सहकषायेणकषायोदयेनयेवर्तंतेतेसकषायोदयापिपाकावस्थाप्राप्ताः स्वोदयमु
पदर्शयंतः कषायकर्मपरमाणवस्तेषुसत्सुजीवस्यावश्यंकषायोदयसंभवात् सकषायाविद्यंतेयेषांतेसकषायिणः कषायोदयसहिताइतिताव
दर्थः गतंकषायद्वारमिदानींलेश्याद्वारं ७ एएसिणंभंतेकण्हलेसाणमित्यादि सर्वस्तोकाः शुक्ललेश्यालांतकादिष्वेवानुत्तरपर्यवसानेषु
वैमानिकेषुदेवेषुकतिपयेषुचगर्भव्युत्क्रांतिकेषुकर्मभूमकेषुसंख्येयवर्षायुष्केषुमनुष्येषुतिर्यक्स्त्रीपुंसेषुचकतिपयेषुसंख्येयवर्षायुष्केषुतस्याः
संभवात् तेभ्यः पद्मलेश्याकाः संख्येयगुणाः साहिपद्मलेश्यासनत्कुमारामाहेंद्रब्रह्मलोककल्पवासिषुदेवेषुतथाप्रभूतेषुगर्भव्युत्क्रांतिकेषुकर्म
भूमिजेषुसंख्येयवर्षायुष्केषुमनुष्यस्त्रीपुंसेषुतथागर्भव्युत्क्रांतिकतिर्यग्योनिकस्त्रीपुंसेषुसंख्येयवर्षायुष्केषुवायतेसनत्कुमारादिदेवादयश्च
समुदितालांतकादिदेवादिदेवेभ्यः संख्येयगुणाइतिभवंतिशुक्ललेश्याकेभ्यः पद्मलेश्याकाः संख्येयगुणाः तेभ्यस्तेजोलेश्याकाः संख्येयगुणाः सर्वे
षांसौधर्मेशानज्योतिष्कदेवानांकतिपयानांचभवनपतिव्यंतरगर्भव्युत्क्रांतिकतिर्यक्पंचेंद्रियमनुष्याणांबादरापर्याप्तैकेंद्रियाणांचतेजोलेश्या
भावात् नत्वसंख्येयगुणाः कस्मान्नभवंति कथंभवंतीतिचेत् उच्यते इहज्योतिष्काभवनवासिभ्योप्यसंख्येयगुणाः किंपुनः सनत्कुमारा
दिदेवेभ्यस्तेचज्योतिष्कातेजोलेश्याकास्तथासौधर्मेशानकल्पदेवाश्चनतप्रानुवंत्यसंख्येयगुणास्तदयुक्तं वस्तुतत्वापरिज्ञानात् लेश्यापदे
हिगर्भव्युत्क्रांतिकतिर्यग्योनिकानांचकृष्णलेश्याद्यल्पबहुत्वेसूत्रंवक्ष्यति सव्वत्थोवागब्भवक्कंतियतिरिक्खजोणियासुक्कलेसातिरिक्खजोणि
णीउसंखेज्जगुणातो पम्हलेसागब्भवक्कंतियतिरिक्खजोणियासंखेज्जगुणातिरिक्खजोणिणीतासं खेज्जगुणातो तेउलेसागब्भवक्कंतियतिरि
क्खजोणियासंखेज्जगुणातेउलेसातिरिक्खजोणिणीउसंखेज्जगुणाउइतिमहादंडकेवतिर्यग्योनिकस्त्रीभ्योव्यंतराज्योतिष्काश्चसंख्येयगु

णावश्यंते ततोयद्यपिभ्यवनर्नसिभ्योप्यसंख्येयगुणाज्योतिष्काः। तथापिपद्मलेश्याकेभ्यस्तेजोलेश्याकाः संख्येयगुणाइव। इदमत्रतात्पर्यंयदि
केवलान्देवानेवपद्मलेश्यानधिकृत्यदेवाएवतेजोलेश्याकाश्चिंत्यंतेततोभवत्यसंख्येयगुणाः यावतातिर्यक्सन्मिश्रयापद्मलेश्याकोयस्ति
र्यक्समन्मिश्राएवतेजोलेश्याकाश्चिंत्यंतेतिर्यंचश्चपद्मलेश्याअप्यतिबहवस्ततः संख्येयगुणाएव। ऽसंख्येनासंख्येयगुणाइति। तेभ्योऽलेश्याकाअ
नंतगुणाःसिद्धान्यमनंतत्वात्तेभ्यः कापोतलेश्याअनंतगुणाः। वनस्पतिकायिकानामपिकापोतलेश्यायाः संभवात्वनस्पतिकायिकानांचसिद्धे
भ्योप्यनंतगुणत्वात्। तेभ्योपिनीललेश्याविशेषाधिकाः। प्रभूततराणांनीललेश्यासंभवात्। तेभ्योपिकृष्णलेश्याकाविशेषाधिकाः। प्रभूततमा
नांकृष्णलेश्याकत्वात्। तेभ्यः सामान्यतः सलेश्याविशेषाधिकाः। नीललेश्याकादीनामपितत्रप्रक्षेपात्गतंलेश्याद्वारमिदानींसम्यक्त्वद्वारमाह
७। एएसिणंभंतेजीवाणंसम्मदिट्ठिणमित्यादि। सर्वस्तोकाः सम्यग्मिथ्यादृष्टयः सम्यग्मिथ्यादृष्टिपरिणामकालस्यांतर्मुहूर्त्तप्रमाणतयातिस्तो
कत्वेनतेषांपृच्छासमयेस्तोकानामेवलभ्यमानत्वात्। तेभ्यः सम्यग्दृष्टयोऽनंतगुणाःसिद्धानामनंतत्वात्। तेभ्योपिमिथ्यादृष्टयोअनंतगुणावनस्प
तिकायिकानांसिद्धेभ्योप्यनंतगुणत्वात्तेषांचमिथ्यादृष्टित्वादितिगतंसम्यक्त्वद्वारमधुनाज्ञानद्वारमाह। एएसिणंभंतेजीवाणंआभिणिबोहिय
नाणीणमित्यादि। सर्वस्तोकामनःपर्यवज्ञानिनः संयतानामेवामर्षौषध्याद्यृद्धिप्राप्तानांमनःपर्यवज्ञानसंभवात्। तेभ्योसंख्येयगुणाअवधिज्ञा
निनोनैरयिकतिर्यक्पंचेंद्रियमनुष्यदेवानामप्यवधिज्ञानसंभवात्। तेभ्यआभिनिबोधिकज्ञानिनःश्रुतज्ञानिनश्चविशेषाधिकाःसंज्ञितिर्य
क्पंचेंद्रियमनुष्याणामेवावधिज्ञानविकलानामपिकेषांचिदाभिनिबोधिकश्रुतज्ञानभावात्स्वस्थानेतुद्वयेपिपरस्परंतुल्याः। जत्थमइनाणं
तत्थसुयनाणंजत्थमइनाणंतत्थमइनाणमितिवचनात्तेभ्यःकेवलज्ञानिनोऽनंतगुणाःसिद्धानामनंतत्वात्। उक्तंज्ञानिनामल्पबहुत्वमि
दानींतत्प्रतिपक्षभूतानामज्ञानिनामल्पबहुत्वमाह। ७। एएसिणंभंतेजीवाणंमइअन्नाणीणमित्यादि। सर्वस्तोकाविभंगज्ञानिनःकति ५३
पयानामेवनैरयिकतिर्यक्पंचेंद्रियमनुष्याणांविभंगभावात्। तेभ्योमत्यज्ञानिनःश्रुताज्ञानिनोऽनंतगुणावनस्पतीनामपिमत्यज्ञानभा

वात्तेषांचानंतत्वात्स्वस्थानेतुपरस्परंतुल्याः। जत्थमइअन्नाणंतत्थसुयअन्नाणंजत्थमइअन्नाणंतत्थसुयअन्नाणंतत्थमइअन्नाणमितिवचनात्। संप्रत्यु
भयेषांज्ञानिनांसमुदायेनाल्पबहुत्वमाह। ७। एएसिणंभंतेजीवाणमित्यादि। सर्वस्तोकामनःपर्यवज्ञानिनःस्तेभ्योसंख्येयगुणाअवधिज्ञानिनःते
भ्यआभिनिबोधिकज्ञानिनःश्रुतज्ञानिनश्चविशेषाधिकाःस्वस्थानेतुद्वयोपिपरस्परंतुल्याः। अत्रभावनाप्रागिवोक्ता। तेभ्योअसंख्येयगुणाविभंगज्ञानि
नोयस्मात्सुरगतौनिरयगतौचसम्यग्दृष्टिभ्योमिथ्यादृष्टयोऽसंख्येयगुणाः। यद्यपितेदेवनैरयिकाश्चसम्यग्दृष्टयोऽवधिज्ञानिनोमिथ्यादृष्टयोविभंगज्ञानि
नइत्यसंख्येयगुणास्तेभ्यःकेवलिज्ञानिनोऽनंतगुणाःसिद्धानामनंतत्वात्। तेभ्योमत्यज्ञानिनःश्रुताज्ञानिनश्चानंतगुणावनस्पतिकायिकानांसिद्धेभ्योप्य
नंतत्वात्। तेषांचमत्यज्ञानिश्रुताज्ञानित्वात्। स्वस्थानेतुद्वयेपिपरस्परंतुल्याः। गतंज्ञानद्वारमिदानींदर्शनद्वारमाह। ७। एएसिणंभंतेजीवाणंचक्खुदंसिणी
णमित्यादि। सर्वस्तोकाअवधिदर्शनिनःदेवनैरयिकाणांकतिपयानांचसंज्ञितिर्यक्पंचेंद्रियमनुष्याणामवधिदर्शनभावात्। तेभ्यश्चक्षुर्दर्शनिनोसंख्ये
यगुणाः सर्वेषांदेवनैरयिकगर्भजमनुष्याणांसंज्ञितिर्यक्पंचेंद्रियाणामसंज्ञितिर्यक्पंचेंद्रियाणांअसंज्ञितिर्यक्पंचेंद्रियाणांचचक्षुर्दर्शनाभावात्। तेभ्यः
केवलदर्शनिनोऽनंतगुणाःसिद्धानामनंतत्वात्। तेभ्योऽचक्षुर्दर्शनिनोऽनंतगुणाःवनस्पतिकायिकानांसिद्धेभ्योप्यनंतत्वात्। गतंदर्शनद्वारमधुनासंय
तद्वारमाह। ७। एएसिणंभंतेजीवाणमित्यादिसर्वस्तोकाः संयतानुत्कृष्टपदेपितेषांकोटिसहस्रपृथक्त्वप्रमाणतयालभ्यमानत्वात्। कोटिसहस्सपु
हुत्तंमणुयलोएसंजयाणमितिवचनात्। तेभ्यःसंयतासंयतादेशविरताअसंख्येयगुणास्तिर्यक्पंचेंद्रियाणामसंख्यातानांदेशविरतिसद्भावात्। तेभ्यो
नोसंयतानोसंयतासंयताअनंतगुणाःप्रतिषेधत्रयवृत्ताहिसिद्धास्तेचानंताइति। तेभ्योसंयताअनंतगुणाः। वनस्पतीनांसिद्धेभ्योप्यनंतत्वात्
गतंसंयतद्वारंसंप्रत्युपयोगद्वारमाह। ७। एएसिणंभंतेजीवाणंसागारोवउत्ताणमित्यादि। इहानाकारोपयोगकालःसर्वस्तोकः साकारोपयोग
कालःसर्वस्तोकःसाकारोपयोगकालस्तुसंख्येयगुणस्ततोजीवाअप्यनाकारोपयोगोपयुक्ताःसर्वस्तोकाःपृच्छासमयेतेषांस्तोकानामेवावाप्यमा
नत्वात्। तेभ्यःसाकारोपयोगोपयुक्ताःसंख्येयगुणाःसाकारोपयोगकालस्यदीर्घतयातेषांपृच्छासमयेबहूनांप्राप्यमाणत्वात्। गतंमुपयोगद्वारमिदा

नींमाहारद्वारं ॥ ७, एएसिणंभंतेआहारगाणमित्यादिसर्वस्तोकाजीवाअनाहारकाःविग्रहगत्यापन्नादीनामेवानाहारकत्वात् उक्तंच ॥ विग्रहगतिमा
वन्नाकेवलिणोसमुहयाअजोगीय ॥ सिद्धायअणाआहारासेसाआहारगाजीवा ॥ तेभ्यआहारकाअसंख्येयगुणाः ॥ ननुवनस्पतिकायिकानांसिद्धेभ्योप्य
नंतत्वात् तेषांचाहारकतयापिलभ्यमानत्वात् कथमनंतगुणानभवंतितदयुक्तंवस्तुतत्वापरिज्ञानात् इहसूक्ष्मनिगोदाःसर्वसंख्येयाप्यसंख्येयाः ॥ तत्रा
प्यंतर्मुहूर्तसमयराशितुल्याः सूक्ष्मनिगोदाःसर्वकालंविग्रहेवर्त्तमानालभ्यंतेततोऽनाहारकाअप्यतिबहवःसकलजीवराशेरसंख्येयभागतुल्याइतिते
भ्यआहारकाअसंख्येयगुणाएवनानंतगुणाः एतमाहारद्वारमिदानींभाषकद्वारमाह ॥ ७, एएसिणंभंतेजीवाणंभासगाणमित्यादिसर्वस्तोकाभाषकाः भा
षालब्धिसंपन्नाःद्वींद्रियादीनामेवभाषकत्वात् अभाषकाभाषलब्धिहीनाअनंतगुणावनस्पतिकायिकानामनंतत्वात् ॥ गतंभाषकद्वारंसंप्रतिपरीत्तद्वार
माह एएसिणंभंतेजीवाणमित्यादि इहपरीत्ताद्विविधाभवपरीत्ताःकायपरीत्ताश्च ॥ तत्रभवपरीत्तायेषांकिंचिदूनोऽपार्द्धपुद्गलपरावर्तमात्रसंसारः ॥
कायपरीत्ताःप्रत्येकशरीरिणःतत्रउभयेपिपरीत्ताःसर्वस्तोकाःशुक्लपाक्षिकाणांप्रत्येकशरीरिणांचाशेषजीवापेक्षयाऽतिस्तोकत्वात् ततोनाअपरीत्ता
अनंतगुणाःउभयप्रतिषेधवर्त्याहिसिद्धास्तेचानंताइतितेभ्योअपरीत्ताअनंतगुणाःकृष्णपाक्षिकाणांसाधारणवनस्पतीनांचसिद्धेभ्योप्यनंतगु
णत्वात् ॥ गतंपरीत्तद्वारंप्रतिपर्याप्तद्वारं ॥ ७ एएसिणंभंतेजीवाणंपज्जत्तगाणमित्यादि ॥ सर्वस्तोकानोअपर्याप्तकाः उभयप्रतिषेधवर्तिनोहिसिद्धा
स्तेचापर्याप्तकादिभ्यःसर्वस्तोकाइतितेभ्योअपर्याप्तकाअनंतगुणाः ॥ साधारणवनस्पतिकायिकानांसिद्धेभ्योप्यनंतगुणानांसर्वकालमपर्याप्तत्वेनल
भ्यमानत्वात् तेभ्यःपर्याप्तकाःसंख्येयगुणाःइहसर्वबहवोजीवाःसूक्ष्माःसूक्ष्माश्चसर्वकालमपर्याप्तेभ्यःपर्याप्ताःसंख्येयगुणाइतिसंख्येयगुणाउक्ताः
गतंपर्याप्तद्वारंसंप्रतिसूक्ष्मद्वारं ॥ ७, एएसिणंभंतेजीवाणंसुहुमाणमित्यादि सर्वस्तोकाजीवानोसूक्ष्मानोबादराःसिद्धाइत्यर्थः ॥ तेषांसूक्ष्मजीवराशे
श्चानंतभागकल्पत्वात् तेभ्योबादराअनंतगुणाबादरनिगोदजीवानांसिद्धेभ्योऽनंतगुणत्वात् तेभ्यःसूक्ष्माअसंख्येयगुणाः ॥ बादरनिगोदे ५४
भ्यःसूक्ष्मनिगोदानामसंख्येयगुणत्वात् तेभ्योबादराअनंतगुणाबादरनिगोदजीवानांसिद्धेभ्योऽनंतगुणत्वात् तेभ्यःसूक्ष्माअसंख्येयगुणाः

बादरनिगोदेभ्यःसूक्ष्मनिगोदानामसंख्येयगुणत्वात् ॥ गतंसूक्ष्मद्वारमिदानींसंज्ञिद्वारं ॥ ७, एएसिणंभंतेजीवाणंसन्नीणमित्यादि सर्वस्तोकाः
संज्ञिनःसमनस्कानामेवसंज्ञित्वात् तेभ्योनोसंज्ञिनोऽनंतगुणाःउभयप्रतिषेधवर्तीहिसिद्धास्तेचसंज्ञिभ्योऽनंतगुणाएवेति तेभ्योऽसंज्ञिनोऽ
नंतगुणावनस्पतीनांसिद्धेभ्योप्यनंतगुणत्वात् गतंसंज्ञिद्वारमिदानींभवसिद्धिकद्वारमाह ७, एएसिणंजीवाणंभवसिद्धियाणमित्यादिसर्व
स्तोकाअभव्याजघन्ययुक्तानंतकपरिमाणत्वात् उक्तंचानुयोगद्वारेषुउक्कोसएपरित्ताणंतपक्खेवपक्खित्तेजहन्नयंजत्ताणंतयंहोइअभव
सिद्धियावितत्तियाचेवेति तेभ्योनोभवसिद्धिकानोअभवसिद्धिकाअनंतगुणायतउभयप्रतिषेधवर्तनयः सिद्धास्तेजघन्योत्कृष्टयुक्तानंतक
परिमाणाइत्यनंतगुणाः तेभ्योपिभवसिद्धिकाअनंतगुणाः यतोभव्यनिगोदस्यैवस्यानंतभागकल्पाः सिद्धाभव्यजीवराशिनिगोदाश्चासंख्येया
लोकेइति ॥ गतंभवसिद्धिकद्वारंसांप्रतमस्तिकायद्वारमाह ७, एएसिणंभंतेधम्मत्थिकायेत्यादि ॥ धर्मास्तिकायोधर्मास्तिकायआकाशास्तिकायए
तेत्रयोपिद्रव्यार्थतयाद्रव्यमेवार्थो ॥ द्रव्यार्थतातयाद्रव्यरूपतयाइत्यर्थः तुल्याःसमानाःप्रत्येकमेकसंख्याकत्वादतएवसर्वस्तोकास्तेभ्योजीवास्ति
कायोद्रव्यार्थतयानंतगुणःजीवानांप्रत्येकंद्रव्यत्वात्तेषांचजीवास्तिकायेअनंतत्वात् ॥ तस्मादपिपुद्गलास्तिकायोद्रव्यार्थतयाऽनंतगुणःकथमि
तिचेतुउच्यते ॥ इहपरमाणुद्विप्रदेशकादीनिपृथक्पृथक्द्रव्याणितानिचसामान्यतस्त्रिधातद्यथाप्रयोगपरिणतानिमिश्रपरिणतानिविश्रसा
परिणतानि ॥ तत्रप्रयोगपरिणतान्यपितावत्जीवेभ्योऽनंतगुणानिएकैकस्यजीवस्यानंतैःप्रत्येकंज्ञानावरणीयदर्शनावर्णीयादिकर्मपुद्गलस्कंधे
रावेष्टितत्वात् किंपुनःशेषाणि ॥ ततःप्रयोगपरिणतेभ्योमिश्रपरिणतान्यनंतगुणानितेभ्योपिविश्रसापरिणतान्यनंतगुणानि ॥ तथाचोक्तं प्रज्ञप्तौ
सव्वत्थोवापुद्गलापयोगपरिणयामीसपरिणयाअनंतगुणाइतितोभवतिजीवास्तिकायात्पुद्गलास्तिकायोद्रव्यार्थतयाअनंतगुणः तस्मादप्यद्धा
समयोद्रव्यार्थतयाअनंतगुणः ॥ अथमितिचेत्तुउच्यतेइहएकस्यैवपरमाणोरनागतेकालेत्तद्विप्रदेशकयावद्दशकसंख्यातप्रदेशकासंख्या
तप्रदेशकानंतप्रदेशकस्कंधांतःपरिणामितयाअनंताभाविनःसंयोगाः पृथक्पृथक्कालाः केवलवेदसोपलब्धाः ॥ तथायैकस्यपरमाणोस्तथा

सर्वेषांप्रत्येकंद्विप्रदेशकादिस्कंधानांचानंताःसंयोगाःपुरस्कृताःपृथक्पृथक्कालाउपलब्धाः सर्वेषामपिमनुष्यक्षेत्रांतर्वर्त्तितयापरिणामसंभवा
त् तथाक्षेत्रतोप्ययंपरमाणुरमुष्मिन्आकाशप्रदेशेऽमुष्मिन्कालेअवगाहिष्यतेइत्येवमनंताएकस्यपरमाणोर्भाविनःसंयोगायथैकस्यपरमाणो
स्तथासर्वेषांपरमाणूनांतथाद्विप्रदेशकादीनामपिस्कंधानामनंतप्रदेशस्कंधपर्यंतानांप्रत्येकंतत्तदेकप्रदेशावगाहभेदतोभिन्नकालाअनंता
भाविनःसंयोगा स्तथाकालतोप्ययं परमाणुरमुष्मिन्नाकाशप्रदेशएकसमयस्थितिकोद्विसमयस्थितिकइत्येवमेकस्यापिपरमाणोरेकस्मि
न्नाकाशप्रदेशेऽसंख्येयाभाविनःसंयोगाः एवंसर्वेष्वप्याकाशप्रदेशेषुप्रत्येकमसंख्येयाभाविनःसंयोगाः ततोभूयोभूयस्तेष्वाकाशप्रदेशेषु
परावृत्तौकालस्यानंतत्वादनंताः कालतोभाविनःसंयोगायथैवैकस्यपरमाणोस्तथासर्वेषांपरमाणूनांसर्वेषांचप्रत्येकंद्विप्रदेशकादीनांस्कंधानां
तथाभावतोप्ययंपरमाणुरमुष्मिन्कालेएकगुणकालकोभावीत्येवमेकस्यापिपरमाणोभिन्नभिन्नकालाअनंताःसंयोगाःयथैवैकस्यपरमाणो
स्तथासर्वेषांपरमाणूनांसर्वेषांचद्विप्रदेशकादीनांस्कंधानांपृथक्अनंताभावतःपुरस्कृतायोगाः तदेवमेकस्यापिपरमाणोर्द्रव्यक्षेत्रकालभाववि
शेषसंबंधवशादनंताभाविनःसमयाउपलब्धायथैकस्यपरमाणोस्तथासर्वेषांपरमाणूनांसर्वेषांप्रत्येकंद्विप्रदेशकादीनांस्कंधानां नचैत
त्परिणामिकालस्तुव्यतिरेकेपरिणामिपुद्गलास्तिकायादिव्यतिरेकेचोपपद्यतेततःसर्वमिदंनात्विकमवसेयं उक्तंच संयोगपुरस्कारा
श्चनामभाविहियुत्पत्तिकालेनहिसंयोगपुरस्काराह्यसतांकेषांचिदुपपन्नइतियथाचसर्वेषांपरमाणूनांसर्वेषांचद्विप्रदेशकादीनांप्रत्येकं
द्रव्यक्षेत्रकालभावविशेषसंबंधवशादनंताभाविनोऽद्धासमयास्तथाऽतीताअपीतिसिद्धःपुद्गलास्तिकायादनंतगुणोऽद्धासमयोद्रव्या
र्थतयेति उक्तंद्रव्यार्थतयापरस्परमल्पबहुत्वमिदानीमेतेषामेवप्रदेशार्थमभयातदाह ७, एएसिणंभंतेधर्मास्तिकायोऽधर्मास्ति
कायएतोद्वावपिपरस्परंप्रदेशार्थतयातुल्यावुभयोरपिलोकाकाशप्रदेशपरिमाणप्रदेशत्वात्शेषास्तिकायाद्धासमयापेक्षयाचस ५५
र्वस्तोकौततोजीवास्तिकायःप्रदेशार्थतयाअनंतगुणाः जीवास्तिकायेजीवानामनंतत्वात् एकैकस्यचजीवस्यलोकाकाशप्रदेशपरि

माणप्रदेशत्वात् तस्मादपिपुद्गलास्तिकायःप्रदेशार्थतयाअनंतगुणाःकथमितिचेत्उच्यतेइहकर्मस्कंधप्रदेशाअपितावत्सर्वजीवप्रदेशेभ्योऽनंतगुणाए
कैकस्यजीवप्रदेशस्यानांतानंतैःकर्मपरमाणुभिरावेष्टितपरिवेष्टितत्वात्किंपुनःसकलपुद्गलास्तिकायप्रदेशाः ततोभवतिजीवास्तिकायात्पुद्गला
स्तिकायःप्रदेशार्थतयाअनंतगुणः तस्मादप्यद्धासमयःप्रदेशार्थतयाअनंतगुणाः एकैकस्यपुद्गलास्तिकायप्रदेशस्यप्रागुक्तक्रमेणतत्तद्द्रव्यक्षेत्र
कालभावविशेषसंबंधभावतोऽनंतानामतीताद्धासमयानामनंतानामनागतसमयानांभावात्तस्मादाकाशास्तिकायःप्रदेशार्थतयाअनंतगुणः अलोकस्य
सर्वतोप्यंताभावात् गतंप्रदेशार्थतयाल्पबहुत्वमिदानींप्रत्येकंद्रव्यार्थप्रदेशार्थतायाअल्पबहुत्वमाह एएसिणंभंतेइत्यादि सर्वस्तोकोधर्मास्तिका
योद्रव्यार्थतयाएकत्वात्प्रदेशार्थतयाअसंख्येयगुणः लोकाकाशप्रदेशपरिमाणप्रदेशात्मकत्वादेवमधर्मास्तिकायस्सूत्रमपिभावनीयं आकाशा
स्तिकायोद्रव्यार्थतयासर्वस्तोकएकत्वात् प्रदेशार्थतयाअनंतगुणोऽपरिमितत्वात् जीवास्तिकायोद्रव्यार्थतयासर्वस्तोकःप्रदेशार्थतयाअ
संख्येयगुणः प्रतिजीवंलोकाकाशप्रदेशभावात्तथासर्वस्तोकःपुद्गलास्तिकायोद्रव्यार्थतयाद्रव्याणांसर्वत्रापिस्तोकत्वात् सएवपुद्गलास्ति
कायःस्वद्रव्यापेक्षयाप्रदेशार्थतयाचिंत्यमानोऽसंख्येयगुणः ननुबहवःखलुजगत्यनंतप्रदेशकाअपिस्कंधाविद्यंतेततोऽनंतगुणाःकस्मान्न
भवंतितदयुक्तंवस्तुतत्वापरिज्ञानाद्(हि)इहस्वल्पाअनंतप्रदेशकास्कंधाःपरमाण्वादयस्त्वतिबहवस्तथाचवक्ष्यतिसूत्रं सव्वत्थोवाअणंतपएसियाखंधा
दव्वट्ठयाएपरमाणुपोग्गलादव्वट्ठयाएअणंतगुणासंखेज्जपएसियाखंधादव्वट्ठयाएसंखेज्जगुणा असंखेज्जपएसियाखंधादव्वट्ठयाएअसंखेज्जगु
णाइति ततोयदासर्वएवपुद्गलास्तिकायःप्रदेशार्थतयाचिंत्यतेतदाअनंतप्रदेशकानांस्कंधानामतिस्तोकत्वात्परमाणूनांचातिबहुत्वात्तेषांच
पृथक्पृथक्द्रव्यत्वात्असंख्येयप्रदेशकानांचस्कंधानांपरमाण्वापेक्षयाअसंख्येयगुणत्वादसंख्येयगुणएवोपपद्यतेनानंतगुणः अद्धासम
एनपुच्छिज्जइइतिअद्धासमयाद्रव्यार्थप्रदेशार्थतयानपृच्छ्यतेकुतइत्याह प्रदेशाभावात्आहकोयमद्धासमयानांद्रव्यार्थतानियमोयावताप्रदेशार्थतापि
तेषांविद्यतेएव तथाहि यथाअनंतानांपरमाणूनांसमुदायःस्कंधोभण्यतेसचद्रव्यंतदवयवाश्चप्रदेशास्तथेहापिसकलःकालोद्रव्यंतदवयवाश्च

समयाः प्रदेशाइति ॥ तदयुक्तं दृष्टांतदार्ष्टांतिकवैषम्यात् परमाणूनां समुदायस्तदा स्कंधो भवति यदा ते सपरस्परसापेक्षतया परिणमंते परस्परनिरपेक्षा
णां केवलकेवलपरमाणूनां स्कंधत्वायोगात् अद्धासमयास्तु परस्परनिरपेक्षा एव वर्त्तमानसमयभावे पूर्वापरसमययोरभावात् ॥ ततो न स्कंधत्वमपि णाम
स्तदभावाच्च नाद्धासमयाः प्रदेशाः किंतु पृथग् द्रव्याण्येवेति ॥ संप्रत्यमीषां धर्मास्तिकायादीनां सर्वेषां युगपत् द्रव्यार्थप्रदेशार्थतयाल्पबहुत्वमाह ॥ एएसि
णं भंते इत्यादि धर्मास्तिकायोऽधर्मास्तिकाय आकाशास्तिकाय एते त्रयोपि द्रव्यार्थतया तुल्याः सर्वस्तोकाश्च प्रत्येकमेकसंख्याकत्वात् ३ तेभ्यो धर्मा
स्तिकायोऽधर्मास्तिकाय एतौ द्वावपि प्रदेशार्थतयासंख्येयगुणौ स्वस्थाने तु परस्परं तुल्या ५ ताभ्यां जीवास्तिकायो द्रव्यार्थतयाऽनंतगुणः अनंता
नां जीवद्रव्याणां भावात् ६ स एव जीवास्तिकायः प्रदेशार्थतयासंख्येयानां प्रदेशानां भावात् ७ तस्मादपि प्रदेशार्थतया जीवास्तिकायात् पुद्गला
स्तिकायो द्रव्यार्थतया अनंतगुणः ॥ प्रतिजीवप्रदेशं ज्ञानावरणीयादिकर्मपुद्गलस्कंधानामप्यनंतानां भावात् ८ स एव पुद्गलास्तिकायः प्रदेशार्थत
या असंख्येयगुणः अत्र भावना प्रागेव ९ तस्मादपि प्रदेशार्थतयात् अद्धासमयाद्रव्यार्थप्रदेशार्थतया अनंतगुणाः ॥ अत्रापि भावना प्रागिव १०
तस्मादप्याकाशास्तिकायः प्रदेशार्थतयाऽनंतगुणः सर्वास्वपि दिक्षु विदिक्षु तस्यांताभावात् ॥ अद्धासमयस्य मनुष्यक्षेत्रमात्रभावात् ११ गतं म
स्तिकायद्वारमिदानीं चरमद्वारमाह ॥ ७ ॥ एएसि णं भंते जीवाणं चरिमाणमित्यादि इह येषां चरमो भवः संभवी योग्यतयापि ते चरमा उच्यंते चार्थात्
भव्या इतरे अचरमा अभव्याः ॥ सिद्धाश्च उभयेषामपि चरमभवाभावात् ॥ तत्र सर्वस्तोकाश्चरमा अभव्यानां सिद्धानां च समुदितानामप्य जघन्योत्कृ
ष्टयुक्तानंतकपरिमाणत्वात् ॥ तेभ्योऽनंतगुणाश्चरमा अजघन्योत्कृष्टानंतानंतकपरिमाणत्वात् गतं चरमधुना जीवद्वारमाह ॥ ९ ॥ एएसि णं भंते जी
वाणं पोग्गलाणमित्यादि सर्वस्तोका जीवास्तेभ्यः पुद्गला अनंतगुणा २ तेभ्योद्धासमया अनंतगुणा अत्र भावना प्रागेव कृता ३ तेभ्योद्धासमया अनं
तगुणा त्रेभ्यः सर्वद्रव्याणि विशेषाधिकानि कथमिति चेदुच्यते ॥ इह येऽनंतरमद्धासमयाः पुद्गलेभ्योऽनंतगुणा उक्तास्ते प्रत्येकं द्रव्याणि ततो ५६
द्रव्यचिंतायां तेपि परिगृह्यंते तेषु च मध्ये सर्वजीवद्रव्याणि सर्वपुद्गलद्रव्याणि धर्माधर्माकाशास्तिकायद्रव्याणि च प्रक्षिप्यंते तानि च

समुदितान्यप्यद्धासमयानामनंतभागकल्पानीति तेषु प्रक्षिप्तेष्वपि मनागधिकत्वं जातमित्यद्धासमयेभ्यः सर्वद्रव्याणि विशेषाधिकानि ॥ तेभ्यः सर्वप्रदे
शाश्चानंतगुणाः आकाशानंतत्वात् ५ तेभ्यः सर्वपर्यवा अनंतगुणा एकैकस्मिन्नाकाशप्रदेशे अनंतानामगुरुलघुपर्यायाणां भावात् ६ गतं जीवद्वारम
धुना क्षेत्रद्वारमाह ॥ ९ ॥ खेत्ताणुवाएणं सव्वत्थोवा जीवा उड्ढलोयतिरियलोए इत्यादि ॥ क्षेत्रस्यानुपातोऽनुसारः क्षेत्रानुपातस्तेन चिंत्यमाना जीवाः सर्वस्तो
का ऊर्द्ध्वलोकतिर्यग्लोके इह ऊर्द्ध्वलोकस्य यदधस्तनमाकाशप्रदेशप्रतरं यच्च तिर्यग्लोकस्य सर्वोपरितनमाकाशप्रतरमेष ऊर्द्ध्वलोकतिर्यग्लोकस्त
था प्रवचनप्रतिद्धिसूत्रइयमत्र भावना इह सामस्त्येन चतुर्द्दशरज्ज्वात्मको लोकः स च त्रिधा भिद्यते तद्यथा ऊर्द्ध्वलोकस्तिर्यग्लोकोऽधोलोकश्च
रुचकाच्चैतेषां विभागस्तथाहि रुचकस्याधस्तान्नवयोजनशतानि स च क सोपरिष्टान्नवयोजनशतानि तिर्यग्लोकस्तस्य च तिर्यग्लोकस्या
धस्तादधोलोक उपरिष्टादूर्ध्वलोकः देशोनसप्तरज्जुप्रमाण ऊर्ध्वलोकः समधिकसप्तरज्जुप्रमाणोऽधोलोको मध्येष्टादशयोजनशतोच्छ्रय
स्तिर्यग्लोकस्तत्र रुचकसमाद्भूतलाद्भागान्नवयोजनशतानि गत्वा यत् ज्योतिश्चक्रस्योपरितनं तिर्यग्लोकसंबंधि एकप्रादेशिकमाकाशप्रतरं
तिर्यग्लोकप्रतरं तस्य चोपरि यदेकप्रादेशिकमाकाशप्रतरं तदूर्द्ध्वलोकप्रतरं एते च द्वे अपि ऊर्द्ध्वलोकतिर्यग्लोक इति व्यवह्रियेते तथानादिप्रवच
नपरिभाषाप्रसिद्धेः ॥ तत्र वर्त्तमाना जीवाः स्तोकाः कथमिति चेदुच्यते इह चेऊर्द्ध्वलोके समुत्पद्यमाना विवक्षितं प्रतरद्वयं स्पृशंति ये च तत्रस्था
एव केचन तत्प्रतरद्वयाध्यासिनो वर्त्तंते ते किल विवक्षितप्रतरद्वये वर्त्तंते नान्ये ये पुनरूर्द्ध्वलोकात् अधोलोके समुत्पद्यमानास्तत्प्रतरद्वयं
स्पृशंति न गण्यंते तेषां सूत्रांतरविषयत्वात् ततः स्तोका एवाधिकृतप्रतरद्वयवर्त्तिनो जीवा न खूर्द्ध्वलोकगतानामपि सर्वजीवानामसंख्येयो भा
गोऽनवरतं म्रियमाणोऽवाप्यंते तेन च तिर्यग्लोके समुत्पद्यमाना विवक्षितं प्रतरद्वयं स्पृशंतीति कथमधिकृतप्रतरद्वयसंस्पर्शिनः स्तोकास्तदयुक्तं व
स्तुतत्वापरिज्ञानात् तथाहि यद्यपि नाम ऊर्द्ध्वलोकगतानां सर्वजीवानामसंख्येयो भागोऽनवरतं म्रियमाणोऽवाप्यते ॥ तथापि ते सर्व एव
तिर्यग्लोके समुत्पद्यंते प्रभूततराणामूर्द्ध्वलोकेऽधोलोके च समुत्पादात् ततोऽधिकृतप्रतरद्वयस्पर्शिनः सर्वस्तोका एव तेभ्योऽधोलोकति

Dr. BHAU DAJI

र्यग्लोके विशेषाधिकाः इह यदधोलोकस्योपरितनमेकप्रादेशिकमाकाशप्रदेशप्रतरं यच्च तिर्यग्लोकस्य सर्वाधस्तनमेकप्रादेशिकमाकाशप्रदे
शप्रतरमेतत् द्वयमप्यधोलोकतिर्यग्लोक इत्युच्यते तथाप्रवचनप्रसिद्धेः तत्र ये विग्रहगत्या तत्र ऋजुतया वा वर्त्तन्ते ते विशेषाधिकाः कथमितिचेत्
उच्यते इह ये अधोलोकात्तिर्यग्लोके तिर्यग्लोकाद्वा धोलोके इलिकागत्या समुत्पद्यमाना अधिकृतं प्रतरद्वयं स्पृशंति ये च तत्र स्थाण्वकेवन तत्प्रतरद्वय
मध्यासीना वर्त्तन्ते ते विवक्षितप्रतरद्वयवर्त्तिनो ये पुनरधोलोकादूर्द्ध्वलोके समुत्पद्यमानास्तत् प्रतरद्वयं स्पृशंति तेन परिगृह्यंते न परिगृह्यंते तेषां सूत्रांत
रविषयत्वात् केवलमूर्द्ध्वलोकादधोलोको विशेषाधिक इत्यलोकात्तिर्यग्लोके इलिकागत्या समुत्पद्यमाना ऊर्द्ध्वलोकापेक्षया विशेषाधिका अ
वाप्यंते ततो विशेषाधिकाः २ तेभ्यस्तिर्यग्लोकवर्त्तिनोऽसंख्येयगुणाः उक्तक्षेत्राद्धि कस्तिर्यग्लोकक्षेत्रस्यासंख्येयगुणत्वात् तेभ्यस्त्रैलोक्ये त्रिलो
कसंस्पर्शिनोऽसंख्येयगुणाः इह ये केवल ऊर्ध्वलोकाधोलोकतिर्यग्लोके वा वर्त्तंते ये च विग्रहोर्द्ध्वलोकतिर्यग्लोकाधोलोकतिर्यग्लोको स्पृशं
ति ते न गण्यंते किंतु ये विग्रहगत्यापन्नास्त्रीनपि लोकान् स्पृशंति ते परिग्राह्याः सूत्रस्य विशेषविषयत्वात् ते च तिर्यग्लोकवर्त्तिभ्योऽसंख्येयगुणाए
व कथमितिचेत् उच्यते इह बहवः प्रतिसमयमूर्द्ध्वलोकेऽलोके च सूक्ष्मनिगोदा उद्वर्त्तन्ते ये तु तिर्यग्लोकवर्त्तिनः सूक्ष्मनिगोदा उद्वर्त्तन्तेऽर्थादधोलो
के ऊर्ध्वलोके वा केचित्तस्मिन्नेव वा तिर्यग्लोके समुत्पद्यंते ततो न ते लोकत्रयसंस्पर्शिन इति नाधिकृतसूत्रविषयाः तत्रोर्द्ध्वलोकाधोलोकगता
नां सूक्ष्मनिगोदानां मुद्वर्त्तमानानां मध्ये केचित् स्वस्थान एव ऊर्ध्वलोके धोलोके वा समुत्पद्यंते केचित्तिर्यग्लोके तेभ्योऽसंख्येयगुणा अधोलोकगता ऊर्द्ध्वलोकग
ता अधोलोके समुत्पद्यंते ते च तथोत्पद्यमानास्त्रीनपि लोकान् स्पृशंतीत्यसंख्येयगुणाः कथं पुनरेतदवसीयते यदुत एवं प्रमाणा बहवो जीवाः सदा विग्रह
गत्यापन्ना लभ्यंते इति चेत् उच्यते युक्तिवशात्तथाहि प्रागुक्तमिदमत्रैव सूत्रं पर्याप्तद्वारे सव्वत्थोवा जीवा नोपपद्यत्ता अपज्जत्ता अणंतगुणा पज्जत्ता
संखेज्जगुणा इति ततएवं नामापर्याप्ता बहवो ये नैते यः पर्याप्ताः संख्येयगुणानाऽसंख्येयगुणानामप्यनंतगुणास्तेचापर्याप्ता बहवोऽनंतरं
तो वर्त्तमाना लभ्यंते इति ४ तेभ्य ऊर्द्ध्वलोके ऊर्द्ध्वलोकस्थिता असंख्येयगुणा उपपातक्षेत्रस्यातिबहुत्वात् असंख्येयानां च भागानामुद्वर्त्तमा ५७

नाभ्यसंभवात् तेभ्योऽप्यधोलोकवर्त्तिनो विशेषाधिकाः ऊर्द्ध्वलोकक्षेत्रादधोलोकक्षेत्रस्य विशेषाधिकत्वात् तदेवं सामान्यतो जीवानां क्षेत्रानुपपाते
नाल्पबहुत्वमुक्तमिदानीं चतुर्गतिदंडकक्रमेण तदभिधित्सुराह ५७, खित्ताणुवाएणं सव्वत्थोवा नेरइया तेलोक्के इत्यादि क्षेत्रानुपातेन क्षेत्राणुसारेण नेर
यिकाश्चिंत्यमानाः सर्वस्तोकास्त्रिलोके लोकत्रयसंस्पर्शिनः कथं लोकत्रयसंस्पर्शिनो नैरयिकाः कथं वा ते सर्वस्तोका इति चेत् उच्यते इह ये मेरुशि
खरे अंजनदधिमुपर्वतशिखरादिषु वा वापीषु वर्त्तमाना मत्स्यादयो नरकेषूत्पित्सव इलिकागत्या प्रादेशान् विक्षिपंति ते किल त्रैलोक्यमपि स्पृ
शंति नारकव्यपदेशं च लभंते तत्कालमेव नरकेषूत्पत्तेर्नारकायुष्कप्रतिसंवेदनात् ते च भूताः कतिपये इति सर्वस्तोकाः अन्ये तु व्याचक्षते नारका एव य
थोक्तवापीषु तिर्यक्पंचेंद्रियतयोत्पद्यमानाः समुद्घातवशतो विक्षिप्तनिजात्मप्रदेशदंडाः परिगृह्यंते ते हि किल तदा नारका एव निर्विवादं तदायुष्क
प्रतिसंवेदनात् त्रैलोक्यसंस्पर्शिनश्च यथोक्तवापीयावदात्मप्रदेशदंडस्य विक्षिप्तत्वादिति तेभ्योऽधोलोकतिर्यग्लोकसंज्ञप्रागुक्तप्रतरद्वयस्य संस्प
र्शिनोऽसंख्येयगुणाः यतो बहवोऽसंख्येयेषु द्वीपसमुद्रेषु पंचेंद्रियतिर्यग्योनिका नरकेषूत्पद्यमाना यथोक्तं प्रतरद्वयं स्पृशंति ततस्ते भवंति पूर्वोक्तेभ्योऽसंख्ये
यगुणाः क्षेत्रस्यासंख्यातगुणत्वात् मंदरादिक्षेत्रादसंख्येयद्वीपसमुद्रात्मकक्षेत्रमसंख्येयगुणमितस्ते भवंत्यसंख्येयगुणाः अन्ये त्वभिदध
ति नारका वा संख्येयेषु द्वीपसमुद्रेषु तिर्यक्पंचेंद्रियतयोत्पद्यमाना मारणांतिकसमुद्घातेन विक्षिप्तनिजात्मप्रदेशदंडा द्रष्टव्यास्ते हि नारकायुः
प्रतिसंवेदनान्नारका उद्वर्त्तमानाश्चापि असंख्येयाः प्राप्यंते इति प्रागुक्तेभ्योऽसंख्येयगुणास्तेभ्योऽधोलोकेऽसंख्येयगुणास्तस्य तेषां स्वस्थानत्वा
त् ३ उक्तं नारकगतिमधिकृत्य क्षेत्रानुपातेनाल्पबहुत्वमिदानीं तिर्यग्गतिमधिकृत्याह ५७, खेत्ताणुवाएणं सव्वत्थोवा तिरिक्खजोणिया उड्ढलोयतिरियलो
ए इत्यादि इदं सर्वमपि सामान्यतो जीवसूत्रमिव भावनीयं तदपि तिरश्च एव सूक्ष्मनिगोधदानधिकृत्य भावितमधुना तिर्यग्योनिकस्त्रीविष
यमल्पबहुत्वमाह ५७, खेत्ताणुवाएणं सव्वत्थोवा उ तिरिक्खजोणीणीउ उड्ढलोए इत्यादि क्षेत्रानुपातेन तिर्यग्योनिकस्त्रियश्चिंत्यमानाः सर्वस्तोका
ऊर्ध्वलोके इह मन्दरादिवापीप्रभृतिष्वपि हि पंचेंद्रियतिर्यग्योनिकाः स्त्रियो भवंति ताश्च क्षेत्रस्याल्पत्वात् सर्वस्तोकाः ता ऊर्द्ध्वलोके ऊर्ध्वलो

लोकतिर्यग्लोकसंज्ञप्रतरद्वये वर्त्तमाना असंख्येयगुणाः कथमिति चेत् उच्यते यावद् ब्रह्मारदेवलोकस्तावद् देवा अपि गर्भव्युत्क्रांतिकतिर्यक्पंचेंद्रिययोनिषूत्प
द्यंते किं पुनः शेषकायास्तिर्यंच स्तथासंभवमुपरिवर्त्तिनो पि तत्रोत्पद्यंते ततोयो सहस्रारांता देवा अन्ये पि च शेषकाया ऊर्द्ध्वलोकात् तिर्यग्लोके तिर्यक्पंचेंद्रियस्त्रीत्वेन तदा
युः प्रतिसंवेदयमाना उत्पद्यंते ये वा तिर्यग्लोकवर्त्तिन्यस्तिर्यक्पंचेंद्रियस्त्रिय ऊर्द्ध्वलोके देवत्वेन शेषकायत्वेन वोत्पद्यमाना मारणांतिकसमुद्घातेनोत्पत्तिदेशं निज
निजात्मप्रदेशदंडान् विक्षिपंति ता यथोक्तं प्रतरद्वयं स्पृशंति तिर्यग्योनिकस्त्रियश्च ताः स्तोका असंख्येयगुणाः क्षेत्रस्यासंख्येयगुणत्वात् ताभ्यः स्त्रै
लोक्ये संख्येयगुणा इस्माद् अधोलोकात् भवनपति व्यंतर नारकाः शेषकायाश्च अपि च ऊर्द्ध्वलोके पि तिर्यक्पंचेंद्रियस्त्रीत्वेनोत्पद्यंते ऊर्द्ध्वलोका
द्वा देवा अधोलोके ते च समवहतास्तथा निजनिजात्मप्रदेशदंडैस्त्रीनपि लोकान् स्पृशंति प्रभूताश्चैते न तथा तिर्यग्योनिकस्त्र्यनिकयुः प्रतिसंवेदना तिर्यग्योनि
कस्त्रियश्च ततः संख्येयगुणाः ३ ताभ्यो ऽधोलोके तिर्यग्लोके अधोलोकतिर्यग्लोकसंज्ञप्रतरद्वये वर्द्धमानाः संख्येयगुणाः बहवो हि नारकाद
यः समुद्घातमंतरेणापि तिर्यग्लोके तिर्यक्पंचेंद्रियस्त्रीत्वेनोत्पद्यंते तिर्यग्लोकवर्तिनश्च जीवा तिर्यग्योनिकस्त्रीत्वेनाधोलौकिकग्रामेषु अपि च तेन
तथोत्पद्यमाना यथोक्तं प्रतरद्वयं स्पृशंति तिर्यग्योनिकस्त्र्यायुः प्रतिसंवेदनाश्च तिर्यग्योनिस्त्रियो पि तथा ऽधोलौकिकग्रामा योजनसहस्रावगाहाः प
र्यंते अर्वाक् क्वचित् प्रदेशेन व योजनशतावगाहा अपि तत्र काश्चित् तिर्यग्योनिकस्त्रियो ऽवस्थानेनापि यथोक्तं प्रतरद्वयाध्यासिन्यो वर्त्तिनस्ता भ
वंति पूर्वोक्ताभ्यः संख्येयगुणाः ४ ताभ्यो ऽधोलोके संख्येयगुणाः यतो ऽधोलौकिकग्रामाः सर्वे पि च समुद्रा योजनसहस्रावगाहास्ततो नव
योजनशतानामधस्तात् वर्तंते मत्सीप्रभृतिकास्तियस्ताः स्वस्थानत्वात् प्रभूता इति संख्येयगुणा स्ताभ्यो पि तिर्यग्लोके संख्येयगुणाः क्षेत्र
स्य संख्येयगुणत्वात् उक्तं तिर्यग्गतिमप्यधिकृत्याल्पबहुत्वमिदानीं मनुष्यगतिविषयमाह ॥ ७॥ खेत्ताणुवाएणं मित्यादि ॥ क्षेत्रानुपातेन मनु
ष्याश्चिंत्यमानास्त्रैलोक्ये त्रैलोक्यसंस्पर्शिनः सर्वस्तोकाः यतो ये ऊर्द्ध्वलोकादधोलौकिकग्रामेषु समुत्पित्सवो मारणांतिकसमुद्घातेन समवहता भ ५८
वंति ते केचित् समुद्घातवशाद् बहिर्निर्गतैः स्वात्मप्रदेशैस्त्रीनपि लोकान् स्पृशंति ये पि च वैक्रियसमुद्घातमाहारकसमुद्घातं वा गतास्तथाविधप्रयत्न

विशेषात् दूरतरमूर्द्ध्वाधो विक्षिप्तात्मप्रदेशा ये च केवलिसमुद्घातगतास्ते पि त्रीनपि लोकान् स्पृशंति स्तोकाश्चेति सर्वस्तोकाः तेभ्य ऊर्द्ध्वलोकतिर्यग्लोके
संज्ञप्रतरद्वयसंस्पर्शिनो भवंति विद्याधराणामपि च मंदरादिषु गमनं ते च शुक्ररुधिरादिपुद्गलेषु संमूर्छिममनुष्याणामुत्पाद इति विद्याधररुधि
रादिपुद्गलसंमिश्राय दा गच्छंति तदा संमूर्छिममनुष्या अपि यथोक्तप्रतरद्वयस्पर्शं च तत उपजायंते चातिबहव इत्यसंख्येयगुणाः तेभ्यो ऽधोलोकति
र्यग्लोके अधोलोकतिर्यग्लोकसंज्ञप्रतरद्वये संख्येयगुणा यतो ऽधोलौकिकग्रामेषु स्वभावत एव बहवो मनुष्यास्ततो ये तिर्यग्लोकान् मनुष्येभ्यः शेष
कायेभ्यो वा ऽधोलौकिकग्रामेषु गर्भव्युत्क्रांतिकमनुष्यत्वेन संमूर्छिममनुष्यत्वेन वा समुत्पित्सवो ये चाधोलोकादधोलौकिकग्रामरूपात् शेषाद्वा मनुष्ये
भ्यः शेषकायेभ्यो वा तिर्यग्लोके गर्भव्युत्क्रांतमनुष्यत्वेन वा संमूर्छिममनुष्यत्वेन वा समुत्पत्तुकामास्ते यथोक्तं कि लप्रतरद्वयं स्पृशंति बहुतराश्चैते न तथा
स्वस्थानतो पि केचिदधोलौकिकग्रामेषु यथोक्तप्रतरद्वयस्पर्शिन इति प्रागुक्तेभ्यः संख्येयगुणाः तेभ्य ऊर्द्ध्वलोके संख्येयगुणाः सौमनसादिषु
क्रीडार्थं चैत्यवंदननिमित्तं वा प्रभूततराणां विद्याधरचारणमुनीनां भावात् तेषां च यथायोगं रुधिरादिपुद्गलयोगतः संमूर्छिममनुष्यसंभवा
त् तेभ्य अधोलोके संख्येयगुणाः स्वस्थानत्वेन बहुलभावात् तेभ्यस्तिर्यग्लोके संख्येयगुणाः क्षेत्रस्य संख्येयगुणत्वात् स्वस्थानत्वाच्च संप्रति क्षे
त्रानुपातेन मानुषीविषयमल्पबहुत्वमाह ॥ ७॥ खेत्ताणुवाएणमित्यादि ॥ क्षेत्रानुपातेन मानुष्यश्चिंत्यमाना सर्वस्तोकास्त्रैलोक्यस्पर्शिन्य ऊर्द्ध्व
लोकादधोलोके समुत्पित्सूनां मारणांतिकसमुद्घातवशविनिर्गतदूरतरात्मप्रदेशानामथवा वैक्रियसमुद्घातगतानां केवलिसमुद्घातगतानां
वा त्रैलोक्यसंस्पर्शानुतासां चातिस्तोकत्वमिति सर्वस्तोकाः ताभ्य ऊर्द्ध्वलोके तिर्यग्लोकसंज्ञप्रतरद्वये संख्येयगुणाः तिर्यग्लोकान् मनुष्यस्त्रीभ्यः
शेषेभ्यो वा ऽधोलौकिकग्रामेषु यदि वा ऽधोलौकिकग्रामरूपात् शेषाद्वा तिर्यग्लोके मनुष्यस्त्रीत्वेनोत्पित्सूनां काश्चिदधोलौकिकग्रामेषु व
स्थानतो पि यथोक्तप्रतरद्वयसंस्पर्शसंभवात् तासां च प्रागुक्ताभ्यो ऽतिबहुत्वात् ताभ्यो ऽतिबहुत्वात् ताभ्यो पि ऊर्द्ध्वलोके संख्येयगुणाः क्री
डार्थं चैत्यवंदनानिमित्तं वा सौमनसादिषु प्रभूततराणां संभवात् ताभ्यो पि अधोलोके संख्येयगुणाः स्वस्थानत्वेन तत्रापि बहुतराणां भावात् ताभ्य

स्तिर्यग्लोकेसंख्येयगुणा॥ क्षेत्रस्यसंख्येयगुणत्वात्स्वस्थानत्वाच्च गतंमनुष्यगतिमधिकृत्याल्पबहुत्वमिदानींदेवगतिमधिकृत्याह॥ ७६॥ खेत्ता
णुवाएणंसवथोवादेवाउड्ढलोएइत्यादिक्षेत्रानुपातेनचिंत्यमानादेवाः सर्वस्तोकाऊर्द्धलोकेवैमानिकानामेवतभावात्तेषांचाल्पत्वात्॥ यद्य
पिभवनपतिप्रभृतयोजिनेंद्रजन्ममहादौमंदरादिषुगच्छंति॥ नेथिस्वल्पाएवेतिसर्वस्तोकाः॥ तेभ्यऊर्द्धलोकतिर्यग्लोकेऊर्द्धलोकतिर्यग्लोकसंज्ञे
प्रतरद्वयेअसंख्येयगुणास्तद्धिज्योतिष्काणांप्रत्यासन्नमितिस्वस्थानंतथाभवनपतिव्यंतरज्योतिष्कामंदरादौसौधर्म्मादिकल्पगताः स्वस्थानेगमागमेन
तथासौधर्म्मादिषुदेवत्वेनोत्पित्सवोदेवायुःप्रतिसंवेदयमानाःस्वोत्पत्तिदेशमभिगच्छंतितेयथोक्तंप्रतरद्वयंस्पृशंतितनःसामस्त्येनयथोक्तप्रतरद्वयसं
स्पर्शिनःपरिभाव्यमानाअतिबहवइतिपूर्वोक्तेभ्योऽसंख्येयगुणाः॥ तेभ्यस्त्रैलोक्यसंस्पर्शिनःसंख्येयगुणायतोभवनपतिव्यंतरज्योतिष्कवैमा
निकादेवास्तथाविधप्रयत्नविशेषवशतोवैक्रियसमुद्घातेनसमवहताःसंतस्त्रीनपिलोकान्स्पृशंति॥ नेचेत्थंसमवहताःप्रागुक्तप्रतरद्वयस्प
र्शिभ्यःसंख्येयगुणाःकेवलवेदसोपलभ्यंतेइतिसंख्येयगुणाः॥ तेभ्योऽधोलोकतिर्यग्लोकेअधोलोकतिर्यग्लोकसंज्ञेप्रतरद्वयेवर्तमानाः॥
संख्येयगुणास्तद्धिप्रतरद्विकंभवनपतिव्यंतरदेवानांप्रत्यासन्नतयास्वस्थानंतथाबहवोभवनपतयःस्वभवस्थास्तिर्यग्लोकगमागमेनतथाऽ
द्धर्तमानास्तथावैक्रियसमुद्घातेनसमवहतास्तथातिर्यग्लोकवर्तिनस्तिर्यक्पंचेंद्रियमनुष्याबाभवनपतित्वेनोत्पद्यमानाभवनपत्यायुरनुभवंतो
यथोक्तप्रतरद्वयसंस्पर्शिनोऽतिबहवइतिसंख्येयगुणाः तेभ्योऽधोलोकेसंख्येयगुणाभवनपतीनांस्वस्थानमितिकृत्वा॥ तेभ्यस्तिर्यग्लोकेसंख्ये
यगुणाज्योतिष्कव्यंतराणांस्वस्थानत्वात्॥ ध्रुअंनादेवीरधिकृत्याल्पबहुत्वमाह॥ ७७॥ खेत्ताणुवाएणंसवथोवाउदेवीउउड्ढलोएइत्यादि॥ सर्वंदेवसू
त्रमिवाविशेषेणभावनीयं॥ तदेवमुक्तंदेवविषयमौघिकमल्पबहुत्वमिदानींभवनपत्यादिविशेषविषयंप्रतिपिपादयिषुःप्रथमाभवनप
तिविषयमाह॥ ७८॥ खेत्ताणुवाएणंसवथोवादेवाभवणवासीउड्ढलोएइत्यादि॥ क्षेत्रानुपातेनभवनवासिनोदेवाश्चिंत्यमानाःसर्वस्तोका ५९
ऊर्द्धलोकेतथाहि॥ केषांचित्सौधर्म्मादिष्वपिकल्पेषुपूर्वसांगतिकनिश्रयागमनंभवतिकेषांचिन्मंदरेतीर्थकरजन्ममहिमानिमित्तमजनद

धिमुखेष्वष्टाह्निकानिमित्तमपरेषांमंदरादिषुक्रीडानिमित्तंगमनमेतेचसर्वेपिस्वल्पाइतिसर्वस्तोकाऊर्द्धलोकेतेऊर्द्धलोकतिर्यग्लोकसंज्ञेप्रतरद्वयेऽसं
ख्येयगुणाःकथमितिचेदुच्यते॥ इहतिर्यग्लोकस्थावैक्रियसमुद्घातेनसमवहताऊर्द्धलोकंतिर्यग्लोकंचस्पृशंति॥ तथायेतिर्यग्लोकस्थाएवमारणां
तिकसमुद्घातेनसमवहताऊर्द्धलोकेसौधर्म्मादिषुदेवलोकेषुबादरपर्याप्तपृथिवीकायिकतयाबादरपर्याप्तप्रत्येकवनस्पतिकायिकतयाचशुभेषु
मणिविधानादिषुस्थानेषूत्पत्तुकामाअद्यापिस्वभवायुःप्रतिसंवेदयमानानपारभविकंपृथिवीकायिकाद्यायुः॥ द्विविधाह्निमारणांतिकसमुद्घातस
मवहताः॥ केचित्पारभविकमायुःप्रतिसंवेदयंतेकेचिन्नेतितथाचोक्तंप्रज्ञप्तौ॥ जीवेणंभंतेमारणंतियसमुग्घाएणंसमोहएसमोहणित्ताजेभ
विएमंदरस्सपव्वयस्सपुरच्छिमेणंबायरपुढविकाइयत्ताएउववज्जित्तएसेणंभंतेकिंतिथगएउववज्जेज्जाउयाहुपडिनियत्तित्ताउववज्जेज्जा गोयमा अ
त्थेगइएतत्थगएचेवउववज्जेज्जा॥ अत्थेगइएततोपडिनियत्तित्तादोच्चंपिमारणंतियसमुग्घाएणंसमोहण्णत्तिसमोहण्णित्ता॥ ततोपच्छाउववज्जेज्जाइइस्व
भवायुःप्रतिसंवेदनाच्चतेभवनवासिनएवलभ्यंतेतेनइत्थंभूताउत्पत्तिदेशेविक्षिप्तात्मप्रदेशदंडास्तथाऊर्द्धलोकेगमनागमनतस्तत्प्रतरद्वयप्रत्या
सन्नक्रीडास्थानतस्तथायथोक्तंप्रतरद्वयंस्पृशंतिततःप्रागुक्तेभ्योऽसंख्येयगुणाः॥ तेभ्यस्त्रैलोक्येत्रैलोक्यसंस्पर्शिनःसंख्येयगुणाः॥ यतोयेऊर्द्ध
लोकेतिर्यक्पंचेंद्रियाभवनपतित्वेनोत्पत्तुकामायेचस्वस्थानेवैक्रियसमुद्घातेनमारणांतिकप्रथमसमुद्घातेनवातथाविधतीव्रप्रयत्नविशेषेण
समवहतास्तेत्रैलोक्यसंस्पर्शिनइतिसंख्येयगुणाः॥ परस्थानसमवहतेभ्यःस्वस्थानसमवहतानांसंख्येयगुणत्वात्॥ तेभ्योऽधोलोकतिर्यग्लोके
अधोलोकतिर्यग्लोकसंज्ञेप्रतरद्वयेऽसंख्येयगुणाःस्वस्थानप्रत्यासन्नतयातिर्यग्लोकगमनागमनभावतः॥ स्वस्थानस्थितक्रोधादिसमुद्घा
तगमनश्चबहूनांयथोक्तप्रतरद्वयसंस्पर्शभावात्॥ तेभ्यस्तिर्यग्लोकेअसंख्येयगुणाः समवसरणादौवंदननिमित्तंद्वीपेषुरमणीयेषुक्रीडानि
मित्तमागमनसंभवादागतानांचचिरकालमप्यवस्थानात्॥ तेभ्योऽधोलोकेसंख्येयगुणाभवनवासिनामधोलोकस्यस्वस्थानत्वात्॥ एवंभवनवासि
देवीगतमप्यल्पबहुत्वंभावनीयंसंप्रतिव्यंतरगतमल्पबहुत्वमाह॥ खेत्ताणुवाएणमित्यादि॥ क्षेत्रानुपातेनचिंत्यमानाव्यंतराःसर्वस्तोका

ऊर्द्धलोकेकतिपयानामेवपंडकवनादौतेषांभावात् ॥ तेभ्यऊर्द्धलोकतिर्यग्लोकेप्रतरद्वयरूपेऽसंख्येयगुणाः केषांचित्स्वस्थानांतवर्तितयाअ
परेषांस्वस्थानप्रत्यासन्नतयाअन्येषांबहूनांमंदरादिषुगमनागमनभावतोयथोक्तप्रतरद्वयसंस्पर्शात् तेषाचसर्वेषांसमुदायेनचिंत्यमानाना
मतिबहुत्वभावात् ॥ तेभ्यस्त्रैलोक्येसंख्येयगुणायतोलोकत्रयवर्त्तिनोपिव्यंतरास्तथाविधप्रयत्नविशेषवशतोवैक्रियसमुद्घातेनसमवहताःसं
तस्त्रीनपिलोकानात्मप्रदेशैःस्पृशंतितेचप्रागुक्तेभ्योऽतिबहवइतिसंख्येयगुणास्तेभ्योऽधोलोकतिर्यग्लोकेप्रतरद्वयरूपेऽसंख्येयगुणास्तस्मि
बहूनांव्यंतराणांस्वस्थानतेतत्स्पर्शिनोबहवइत्यसंख्येयगुणाःअधोलोकेसंख्येयगुणाः ॥ अधोलौकिकग्रामेषुतेषांस्थानभावात्ब
हूनामधोलोकेक्रीडार्थंगमनभावात्तेभ्यस्तिर्यग्लोकेसंख्येयगुणास्तिर्यग्लोकस्यतेषांस्वस्थानत्वात् ॥ एवंव्यंतरविषय मप्यल्पबहुत्वं देवी
कव्यं संप्रतिज्योतिष्कविषयमल्पबहुत्वमाह ॥ ७७ ॥ खेत्ताणुवाएणंसव्वत्थोवाजोइसियाइत्यादि ॥ क्षेत्रानुपातेनज्योतिष्काश्चिंत्यमानाःसर्वस्तोका
ऊर्द्धलोकेकेषांचिद्देवमंदरेतीर्थकरजन्ममहोत्सवनिमित्तमपरेषांचित्मंदरादिषुक्रीडानिमित्तंगमनसंभवात् ॥ तेभ्यऊर्द्धलोकतिर्यग्लोकेप्र
तरद्वयरूपेअसंख्येयगुणास्तद्धिप्रतरद्वयंकेचित्स्वस्थानेस्थिताअपिस्पृशंतिप्रत्यासन्नत्वादपरेवैक्रियसमुद्घातसमवहताअन्येऊर्द्धलो
गमनागमनभावतस्ततोऽधिकृतप्रतरद्वयस्पर्शिनःपूर्वोक्तेभ्योयगुणास्तेभ्यस्त्रैलोक्येत्रैलोक्यसंस्पर्शिनःसंख्येयगुणाःयेहिज्योतिष्कास्त
थाविधतीव्रप्रयत्नवैक्रियसमुद्घातसमवहतास्त्रीनपिलोकान्स्वप्रदेशैःस्पृशंतितेस्वभावतोप्यतिबहवइतिपूर्वोक्तेभ्यःसंख्येयगुणाःतेभ्यो
ऽधोलोकतिर्यग्लोकेप्रतरद्वयेवर्तमानाअसंख्येयगुणायतोबहवोधोलौकिकग्रामेषुसमवसरणादिनिमित्तमधोलौकिकक्रीडानिमित्तं
गमनागमनभावतोबहवश्चाधोलोकान्ज्योतिष्केषुसमुत्पद्यमानायथोक्तंप्रतरद्वयंस्पृशंतिततोघटंतेपूर्वोक्तेभ्यःसंख्येयगुणाः तेभ्यःसंख्ये ६०
यगुणाअधोलोकेबहूनामधोलोकेक्रीडानिमित्तंमधोलौकिकग्रामेषुसमवसरणादिषुचिरकालमवस्थानात्तेभ्योऽसंख्येयगुणास्तिर्य
ग्लोकेतिर्यग्लोकस्यतेषांस्वस्थानत्वात् ॥ एवंज्योतिष्कदेवीसूत्रमपिभावनीयंसंप्रतिवैमानिकदेवविषयमल्पबहुत्वमाह ॥ ७८ ॥ खेत्ताणु

वाएणंसव्वत्थोवावेमाणियादेवाउड्ढलोयतिरियलोएइत्यादि ॥ क्षेत्रानुपातेनक्षेत्रानुसारेणचिंत्यमानावैमानिकादेवाःसर्वस्तोकाऊर्ध्वलोकतिर्यग्लोकेऊर्ध्व
लोकतिर्यग्लोकसंज्ञेप्रतरद्वयेयतोयेऽधोलोकेतिर्यग्लोकेवावर्त्तमानाजीवावैमानिकेषूत्पद्यंतेयेवातिर्यग्लोकेवैमानिकागमनागमनंकुर्वंति ॥ येचविव
क्षितप्रतरद्वयाध्यासिक्रीडास्थानसंस्थितायेनतिर्यग्लोकस्थिताएववैक्रियसमुद्घातंमारणांतिकसमुद्घातंवाकुर्वाणास्तथाविधप्रयत्नविशेषादूर्द्धमा
त्मप्रदेशदंडंनिसृजंतितेविवक्षितंप्रतरद्वयंस्पृशंतितेचाल्पाइतिसर्वस्तोकाः तेभ्यस्त्रैलोक्येसंख्येयगुणाःकथमितिचेत्उच्यतेइहयेऽधोलौकिक
ग्रामेषुसमवसरणादिनिमित्तमधोलोकेवाकृीडादिनिमित्तंगताःसंतोवैक्रियसमुद्घातंमारणांतिकसमुद्घातंवाकुर्वाणास्तथाविधप्रयत्नविशेषा
दूरतरमूर्द्ध्वविक्षिप्तात्मप्रदेशदंडायेचवैमानिकभवादिलिकागत्याच्यवमानाअधोलौकिकग्रामेषुमगुत्पद्यंतेतेकिलत्रीनपिलोकान्स्पृशंति बहवश्च
पूर्वोक्तेभ्यइतिसंख्येयगुणाःतेभ्योऽधोलोकतिर्यग्लोकेप्रतरद्वयसंज्ञेसंख्येयगुणाः ॥ अधोलौकिकग्रामे षुसमवसरणादौगमनागमनभावतो
विवक्षितप्रतरद्वयोध्यासिसमवसरणादौचावस्थानतोबहूनांयथोक्तप्रतरद्वयसंस्पर्शभावात् ॥ तेभ्योऽधोलोकेसंख्येयगुणाअधोलौकिकग्रामेषुबहू
नांसमवसरणादावस्थानभावात् ॥ तेभ्यस्तिर्यग्लोकेसंख्येयगुणा ॥ बहुषुसमवसरणेषुबहुषुचक्रीडास्थानेषुबहूनामवस्थानभावात् ॥ तेभ्यऊर्द्धलो
केअसंख्येयगुणाः ॥ ऊर्द्धलोकस्यस्वस्थानत्वात् ॥ तत्रचसदैवबहुतरभावात् एवंवैमानिकदेवीविषयमपिसूत्रंभावनीयंसंप्रत्येकेंद्रियादिगतम
ल्पबहुत्वमाह ॥ ७९ ॥ खेत्ताणुवाएणंएगिंदियाइत्यादिक्षेत्रानुपातेनचिंत्यमानाएकेंद्रियाजीवासर्वस्तोकाउर्द्धलोकतिर्यग्लोकेऊर्द्धलोकतिर्यग्लोकसंज्ञे
प्रतरद्वयेयतोयेतत्रस्थाएवकेचनयेचोर्द्धलोकात्तिर्यग्लोकेतिर्यग्लोकाद्वाऊर्द्धलोकेसमुत्पित्सवःकृतमारणांतिकसमुद्घातास्तेकिलविवक्षितंप्रतरद्व
यंस्पृशंतिस्वल्पाश्चतेइतिसर्वस्तोकाः ॥ तेभ्योऽधोलोकतिर्यग्लोकेविशेषाधिकाः ॥ यतोयेऽधोलोकात्तिर्यग्लोकेतिर्यग्लोकाद्वाअधोलोकेइलिकागत्या
समुत्पद्यमानाविवक्षितंप्रतरद्वयंस्पृशंतिअस्थाश्चऊर्द्धलोकाद्वाधोलोकेविशेषाधिकस्ततोबहवोऽधोलोकात्तिर्यग्लोकेसमुत्पद्यमानाअवाप्यंते
इतिविशेषाधिकाः ॥ तेभ्यस्तिर्यग्लोकेअसंख्येयगुणाः ॥ उक्तप्रतरद्विकक्षेत्रात्तिर्यग्लोकक्षेत्रस्यासंख्येयगुणत्वात् ॥ तेभ्यस्त्रैलोक्येअसंख्येय

गुणाः बहवोहिऊर्द्ध्वलोकादधोलोकाद्वाऊर्द्ध्वलोकेसमुत्पद्यंते तेषांचमध्येबहवोमारणांतिकसमुद्घातवशाद्विक्षिप्तात्मप्रदेशदंडास्त्रीनपिलोका
नस्पृशंतितलोभवंत्यसंख्येयगुणास्तेभ्यऊर्द्ध्वलोकेअसंख्येयगुणा उपपातक्षेत्रस्यातिबहुत्वात् तेभ्योऽधोलोकेविशेषाधिकाः ऊर्द्ध्वलोकक्षे
त्रादधोलोकक्षेत्रस्यविशेषाधिकत्वात् एवमपर्याप्तविषयंपर्याप्तविषयंचसूत्रंभावयितव्यमधुनाद्वींद्रियविषयमल्पबहुत्वमाह ॥ ५४ खेत्ताणु
वाएणंसव्वत्थोवाबेइंदियाइत्यादि क्षेत्रानुपातेनक्षेत्रानुसारेणचिंत्यमानाद्वींद्रियाःसर्वस्तोकाः ऊर्द्ध्वलोकेऊर्द्ध्वलोकस्यैकदेशेतेषांसंभवात् ते
भ्यःऊर्द्ध्वलोकतिर्यग्लोकेप्रतरद्वयरूपेऽसंख्येयगुणाः यतोयेऊर्ध्वलोकात्तिर्यग्लोकाद्वाद्वींद्रियत्वेनसमुत्पत्तुकामास्तदायुरनुभवंतइतिकागत्यासमु
त्पद्यंते येचद्वींद्रियाएवतिर्यग्लोकादूर्द्ध्वलोकेऊर्द्ध्वलोकाद्वातिर्यग्लोकेद्वींद्रियत्वेनान्यत्वेनवासमुत्पत्तुकामाः कृतप्रथममारणांतिकसमुद्घाता
अतएवद्वींद्रियायुःप्रतिसंवेदयमानाःसमुद्घातवशाच्चदूरतरविक्षिप्तनिजात्मप्रदेशदंडास्तेयेचप्रतरद्वयाध्यासितक्षेत्रसमासीनास्तेयथोक्तप्रतरद्व
यसंस्पर्शिनोबहवश्चेतिपूर्वोक्तेभ्योऽसंख्येयगुणास्तेभ्यस्त्रैलोक्यअसंख्येयगुणाः यतोद्वींद्रियाणांप्राचुर्येणोत्पत्तिस्थानान्यधोलोकेतस्माच्च
तिप्रभूतानितिर्यग्लोकेतत्रयेद्वींद्रियाअधोलोकादूर्द्ध्वलोकेद्वींद्रियत्वेनान्यत्वेनवासमुत्पत्तुकामाःकृतप्रथममारणांतिकसमुद्घाताःसमुद्घातवशा
च्चोत्पत्तिदेशंयावद्विक्षिप्तात्मप्रदेशदंडास्तेद्वींद्रियायुःप्रतिसंवेदयमानायेचोर्द्ध्वलोकेद्वींद्रियाःशेषकाययावाद्वींद्रियत्वेनसमुत्पद्यमानाद्वींद्रि
यायुरनुभवंति येचद्वींद्रियास्तिर्यग्लोकादधोलोकेद्वींद्रियत्वेनशेषकायत्वेनवोत्पित्सवःकृतप्रथममारणांतिकसमुद्घाताद्वींद्रियायुरनुभवंतःसमु
द्घातवशेनोत्पत्तिदेशंयावद्विक्षिप्तात्मप्रदेशदंडास्तेयथोक्तंप्रतरद्वयंस्पृशंतिप्रभूताश्चेतेपूर्वोक्तेभ्योऽसंख्येयगुणास्तेभ्योऽधोलोकेसंख्येयगु
णाः ततोत्पत्तिस्थानानामतिप्रचुराणांभावात् तेभ्योपितिर्यग्लोकेसंख्येयगुणाःअतिप्रचुरतराणांयेनिस्थानानांतत्रभावात् यथेदमौघि
कद्वींद्रियसूत्रंतथापर्याप्तापर्याप्तद्वींद्रियसूत्रेऔघिकपर्याप्तापर्याप्तत्रींद्रियचतुरिंद्रियपर्याप्तापर्याप्तसूत्राणिभावनीयानिसांप्रतमौघिकपंचेंद्रिय ६३
विषयमल्पबहुत्वमाह ५७ खेत्ताणुवाएणंसव्वत्थोवापंचेंद्रियातेलोकेइत्यादि क्षेत्रानुपातेनचिंत्यमानाःपंचेंद्रियाःसर्वस्तोकास्त्रैलो

क्यसंस्पर्शिनः यतोयेऽधोलोकादूर्द्ध्वलोकेऊर्द्ध्वलोकाद्वाधोलोकेशेषकायाः पंचेंद्रियायुरनुभवंतइतिकागत्यासमुत्पद्यंतेयेचापंचेंद्रियाऊर्द्ध्वलो
कादधोलोकेअधोलोकेअधोलोकादूर्द्ध्वलोकेशेषकायत्वेनपंचेंद्रियत्वेनवोत्पित्सवःकृतमारणांतिकसमुद्घातवशाच्चोत्पत्तिदेशंयावद्विक्षि
प्तात्मप्रदेशदंडाः पंचेंद्रियायुरप्यनुभवंति तेत्रैलोक्यसंस्पर्शिनस्तेचाल्पाइतिसर्वस्तोकाः तेभ्यऊर्द्ध्वलोकतिर्यग्लोकेप्रतरद्वयरूपेसं
ख्येयगुणामुपपातेनवायथोक्तप्रतरद्वयसंस्पर्शसंभवात् तेभ्योऽधोलोकतिर्यग्लोकेसंख्येयगुणाअतिप्रभूततराणामुपपातसमुद्घाताभ्या
मधोलोकतिर्यग्लोकेसंप्रतरद्वयस्पर्शभावात् तेभ्यऊर्द्ध्वलोकेसंख्येयगुणाः वैमानिकानामवस्थानभावात् तेभ्योऽधोलोकेसंख्येयगुणाः वैमा
निकदेवेभ्यःसंख्येयगुणानांनैरयिकादीनांतत्रभावात् तेभ्यस्तिर्यग्लोकेऽसंख्येयगुणाःसंमूर्छिमजलचरखचरादीनांव्यंतरज्योतिष्काणांसं
मूर्छिममनुष्याणांचतत्रभावात् एवंपंचेंद्रियापर्याप्तसूत्रमपिभावनीयं पंचेंद्रियपर्याप्तसूत्रमिदं खेत्ताणुवाएणंसव्वत्थोवापंचेंद्रियापज्ज
त्तयाऊड्ढलोएइत्यादि क्षेत्रानुपातेनचिंत्यमानाःपंचेंद्रियाःपर्याप्ताःसर्वस्तोकाऊर्द्ध्वलोकेप्रायोवैमानिकानामेवतत्रभावात् तेभ्यऊर्द्ध्वलोकतिर्य
ग्लोकेप्रतरद्वयरूपेऽसंख्येयगुणाःविवक्षितप्रतरद्वयप्रत्यासन्नज्योतिष्काणां तदध्यासितक्षेत्राश्रितव्यंतरज्योतिष्कविद्याधरचारणमुनि
तिर्यक्पंचेंद्रियाणामूर्द्ध्वलोकेतिर्यग्लोकेचगमनागमनंकुर्वतामधिकृतप्रतरद्वयसंस्पर्शनात् तेभ्यस्त्रैलोक्येत्रैलोक्यसंस्पर्शिनसंख्येयगुणाःकथ
मितिचेतदुच्यते यतोयेनाभवनपतिव्यंतरज्योतिष्कवैमानिकाविद्याधरावाधोलोकस्थाःकृतवैक्रियसमुद्घातास्तथाविधप्रयत्नविशेषादूर्द्ध्वलोकेवि
क्षिप्तात्मप्रदेशदंडास्त्रीनपिलोकान्स्पृशंतीतिसंख्येयगुणास्तेभ्योऽधोलोकतिर्यग्लोकेप्रतरद्वयरूपेसंख्येयगुणाः बहवोहिव्यंतरास्व
स्थानप्रत्यासन्नतयाभवनपतयस्तिर्यग्लोकेऊर्द्ध्वलोकेवाव्यंतरज्योतिष्कवैमानिकदेवअधोलोकिकग्रामेषुसमवसरणादावधोलोकेक्रीडादि
निमित्तंचगमनागमनकरणतस्तथासमुद्रेषुकेचित्तिर्यक्पंचेंद्रियाःस्वस्थानप्रत्यासन्नतयाअपरेतदध्यासितक्षेत्राश्रिततयायथोक्तंप्रतरद्व
यंस्पृशंतितितःसंख्येयगुणाः तेभ्योऽधोलोकेऽसंख्येयगुणाः नैरयिकाणांभवनपतीनांचतत्रावस्थानात् तेभ्यःतिर्यग्लोकेअसंख्येय

गुणास्तिर्यक्पंचेंद्रियमनुष्यव्यंतरज्योतिष्काणामवस्थानात्॥ तदेवमुक्तंपंचेंद्रियाणामल्पबहुत्वमिदानीमेकेंद्रियाभेदानांपृथिवीकायिकादीनांपंचा
नामोघिकपर्याप्तापर्याप्तभेदेनप्रत्येकंत्रीण्यल्पबहुत्वान्याह॥ ६५॥ एएसिणंभंते॥ पुढविकाइयाणं पुढविकाइयाइ इत्यादि॥ इमानिपंचदशा
पिसूत्राणि प्रागुक्तैकेंद्रियसूत्रवद्भावनीयानि २ सांप्रतमोघिकत्रसकायापर्याप्तपर्याप्तत्रसकायसूत्राण्याह॥ ६५॥ एएसिणंभंते॥ तसका
इयाणंतसकाइयाणं इत्यादि॥ इमानिपंचेंद्रियसूत्रवद्भावनीयानि॥ गतंक्षेत्रद्वारमिदानींबंधद्वारंवक्तव्यं॥ बंधोपलक्षितंद्वारंबंधद्वारंतदाह॥ ६५॥ एएसिणं
भंतेजीवाणंआउयस्सकम्मस्सबंधगाणंअबंधगाणंमित्यादि॥ इहायुःकर्मबंधकानांपर्याप्तापर्याप्तानांसुप्तजागराणांसमवहतानांसातवेदकानां
इंद्रियोपयुक्तनोइंद्रियोपयुक्तानांसाकारोपयुक्तानाकारोपयुक्तानांसमुदायेनाल्पबहुत्वंव्यंतत्रप्रत्येकंतावत्सूत्रमीयेनसमुदायेसुखेनतद्व
क्ष्यतेतत्रसर्वस्तोकाआयुषोबंधकाःअबंधकाःसंख्येयगुणाः॥ यतोनुभूयमानभवायुषित्रिभागवशेषेपारभविकमायुर्जीवाबध्नंतित्रिभागत्रिभा
गाद्यवशेषेवाततोद्वौत्रिभागावबंधकालएकस्त्रिभागोबंधकालइतिबंधकेभ्योऽबंधकाःसंख्येयगुणाः॥ तथासर्वस्तोकाअपर्याप्तकाःपर्या
प्तकाःअसंख्येयगुणाः॥ एतच्चसूक्ष्मजीवानधिकृत्यवेदितव्यंसूक्ष्मेषुहिबाह्यव्याघाताभावतस्तदभावाद्बहूनांनिष्पत्तिःस्तोकानामे
वचानिष्पत्तिस्तथासर्वस्तोकाःसुप्ताजागराःसंख्येयगुणाः॥ एतदपिसूक्ष्मानेकेंद्रियानधिकृत्यावेदितव्यंयस्मादपर्याप्ताःसुप्ताएवलभ्यं
तेजागराःपर्याप्तास्तेनसंख्येयगुणाइतितथासमवहतासर्वस्तोकायइतइहसमवहतामारणांतिकसमुद्घातेनपरिगृह्यंतेमारणांतिकश्चस
मुद्घातोमरणकालेनशेषकालंतथापिनसर्वेषामितिसर्वस्तोकाः॥ तेभ्योःसमवहताअसंख्येयगुणाजीवनकालस्यातिबहुत्वात्॥ तथास
र्वस्तोकाःसातवेदकायइहबहवःसाधारणशरीराअल्पेप्रत्येकशरीरिणसाधारणशरीराश्चबहवोऽसातवेदकाःस्वल्पाःसातवेदिनःप्रत्येक ६२
शरीरिणस्तुभूयांसःसातवेदकाःअसातवेदिनस्ततःस्तोकाःसातवेदकास्तेभ्योऽसातवेदकाःसंख्येयगुणाः॥ तथासर्वस्तोकाइंद्रि
योपयुक्ताइंद्रियोपयोगोहिप्रत्युत्पन्नकालविषयस्ततस्तदुपयोगकालस्यस्तोकत्वात्॥ पृच्छसमयेतेस्तोकाप्राप्यंतेयदानुत्तमेवार्थमिं

द्रियेणदृष्ट्वाविचारयत्यासाधसंज्ञयापितदानोइंद्रियोपयुक्तःसव्यपदिश्यतेततोनोइंद्रियोपयोगस्यातीतानागतकालविषयाबहुकालत्वात्सं
ख्येयगुणानोइंद्रियोपयुक्तास्तथासर्वस्तोकाअनाकारोपयुक्ताअनाकारोपयोगकालस्यस्तोकत्वात्॥ साकारोपयुक्ताःसंख्येयगुणाः॥ अ
नाकारोपयोगकालात्साकारोपयोगकालस्यसंख्येयगुणत्वात्इदानींसमुदायगतंसूत्रोक्तमल्पबहुत्वंभाव्यतेसर्वस्तोकाजीवाआयुः
कर्मणोबंधकाःआयुर्बंधकालस्यप्रतिनियतत्वात्तेभ्योऽपर्याप्ताःसंख्येयगुणायस्मादपर्याप्ताअनुभूयमानभवत्रिभागाद्यवशेषायुषः
पारभविकमायुर्बध्नंति॥ ततोद्वौत्रिभागावबंधकालएकोबंधकालइतिबंधकालादबंधकालःसंख्येयगुणस्तेनसंख्येयगुणाएवापर्याप्ताआ
युर्बंधकेभ्यः॥ तेभ्योप्यपर्याप्तेभ्यःसुप्ताःसंख्येयगुणाःयस्मादपर्याप्तेषुचपर्याप्तेषुचसुप्तालभ्यंते॥ पर्याप्ताश्चापर्याप्तेभ्यःसंख्येयगुणाइत्य
पर्याप्तेभ्यःसुप्ताःसंख्येयगुणास्तेभ्यःसमवहताःसंख्येयगुणाःबहूनांपर्याप्तेषुचमारणांतिकसमुद्घातेनसमवहतानांसदालभ्यमानत्वात्
तेभ्यःसातवेदकाःसंख्येयगुणाःआयुर्बंधकापर्याप्तकसुप्तेष्वपिसातवेदकानांलभ्यमानत्वात्॥ तेभ्यइंद्रियोपयुक्ताःसंख्येयगुणाः॥ असात
वेदकानामपिइंद्रियोपयोगस्यलभ्यमानत्वात्॥ तेभ्योऽनाकारोपयोगोपयुक्ताःसंख्येयगुणाःइंद्रियोपयोगेषुनोइंद्रियोपयोगेषुचना
कारोपयोगस्यलभ्यमानत्वात्॥ तेभ्यःसाकारोपयुक्ताःसंख्येयगुणाइंद्रियोपयोगेषुचसाकारोपयोगकालस्यबहुत्वात्॥ तेभ्योनोइंद्रियोप
युक्ताविशेषाधिकानोइंद्रियानाकारोपयुक्तानामपितत्रक्षेपात्अत्रविनेयजनानामनुग्रहार्थमसद्भावस्थापनयानिदर्शनमुच्यतेइहसामान्यतः
किलसाकारोपयुक्ताद्विनवत्यधिकंशतं १९२॥ तेचकिलद्विधाइंद्रियसाकारोपयुक्तानोइंद्रियसाकारोपयुक्ताश्चतत्रेंद्रियसाकारोपयुक्ताः
द्विपंचाशत्तावत्स्तोकाइतिविंशतिसंख्याः॥ कल्प्यंतेशेषद्विसप्तत्युत्तरंशतं १४२ नोइंद्रियसाकारोपयुक्ताः॥ नोइंद्रियानाकारोपयुक्ताद्विपंचाशत्कल्पास्त
तःसामान्यतःसाकारोपयुक्तेभ्यइंद्रियसाकारोपयुक्तेषुविंशतिकल्पेष्वपनीतेषुद्विपंचाशत्कल्पेषुअनाकारोपयुक्तेषुतेषुमध्यप्रक्षिप्तेषुदे
शतेचतुर्विंशत्यधिकेभवतःततःसाकारोपयुक्तेभ्योनोइंद्रियोपयुक्ताविशेषाधिकास्तेभ्योऽसातवेदकाविशेषाधिकाः॥ इंद्रियोपयुक्ताना

Dr. BHAU DAJI MEMORIAL

मध्यसातवेदकत्वात् १० तेभ्योऽसमवहताविशेषाधिकाः॥ सातवेदकानामप्यसमवहतत्वभावात्॥ ११तेभ्योजागराविशेषाधिकाःसमावहता
नामपिकेषांचित्जागरत्वात् १२ तेभ्यःपर्याप्ताविशेषाधिकाःसुप्तानामपिकेषांचित्पर्याप्तत्वात् सुप्ताहिपर्याप्ताअपर्याप्ताश्चभवंति॥ जागरा
स्तुपर्याप्ताएवेतिनियमः १३ तेभ्योपिपर्याप्तेभ्यःआयुःकर्माबंधकाविशेषाधिकाअपर्याप्तानामप्यायुःकर्मबंधकत्वाभावात् १४ इदमेवाल्पबहुत्वंवि
नेजनानुग्रहायस्थापनाराशिभिरुपदर्श्यते॥ इहद्वेपंक्तीउपर्यधोभावेनन्यस्येते॥ तत्रापरितन्यांपंक्तौआयुःकर्मबंधकाःअपर्याप्ताःसमवहताः
सातवेदकाइंद्रियोपयुक्ताअनाकारोपयुक्ताःक्रमेणस्थाप्यंतेतस्याअधस्तन्यांपंक्तौतेषामेवपदानामधस्तात्यथासंख्यमायुरबंधकाःपर्याप्ताजागरा
असमवहताअसातवेदकानोइंद्रियोपयुक्ताःसाकारोपयुक्ताःस्थापनान्वेयं॥ अत्रउपरितन्यांपंक्तौसर्वाण्यपिपदानिसंख्येयगुणानिआयुःपदं
चसर्वेषामाद्यमितितत्परिमाणसंख्यायामेकःस्थाप्यतेततःशेषपदानिकिलजघन्येनसंख्येयेनसंख्येयगुणानीतिद्विगुणद्विगुणोअंकस्तेषुस्थाप्य
तेतद्यथाद्वौचत्वारःअष्टौषोडशद्वात्रिंशत्चतुःषष्टिः सर्वोपिजीवराशिरनंतानंतस्वरूपोप्यसत्कल्पनयापद्यंचाशदधिकशतद्वयपरिकल्प्यंतेन
ताःस्मात्राशेरायुर्बंधकादिगताःसंख्याःशोधयित्वायत्यत्शेषमवतिष्ठतेतत्तत्आयुरबंधकादीनांपरिमाणेस्थापयितव्यंतद्यथाआयुरबंध
काःपंचद्विशतिपंचपंचाशदधिकंशेषेषुयथाक्रमंद्वेशतेचतुःपंचाशदधिकेद्वेशतेद्विपंचाशदधिकेद्वेअष्टाचत्वारिंशदधिकेद्वेशतेचतुर्विंशत्य
धिकेद्विनवत्यधिकंशतं॥ एवंचसतिउपरितनपंक्तिगतान्यनाकारोपयुक्तपर्यंतानिपदानिसंख्येयगुणानिद्विगुणाधिकत्वात् ततःपरंसाकारो
पयुक्तपदमपिसंख्येयगुणंत्रिगुणत्वाद्शेषाणितुनोइंद्रियोपयुक्तादीनिप्रतिलोमंविशेषाधिकानिद्विगुणत्वस्यापिक्वचिदभावात्॥ तदेवंबंधद्वा
रमिदानींपुद्गलद्वारमाह॥ ७॥ खेत्ताणुवाएणंसव्वत्थोवापोग्गलातेलोकेइत्यादि॥ इदमल्पबहुत्वंपुद्गलानांद्रव्यार्थत्वमंगीकृत्यव्याख्येयंप्रदा
यात् तत्रक्षेत्रानुसरणेनचिंत्यमानाःपुद्गलास्त्रैलोक्येत्रैलोक्यसंस्पर्शिनःसर्वस्तोकानित्रैलोक्यव्यापीनिपुद्गलद्रव्याणीतिभावः॥ यस्मात्म
हास्कंधाएवत्रैलोक्यव्यापिनस्तेचाल्पाइति॥ तेभ्यऊर्द्ध्वलोकतिर्यग्लोकेअनंतगुणाः॥ यतःस्तिर्यग्लोकस्ययःसर्वोपरितनमेकप्रदेशिकं ६३

आयुर्बंधकाः॥१॥	अपर्याप्त॥२॥	सुप्त ४॥	समवहता॥८॥	सातवेदका १६	इंद्रियोपयुक्त३२	अणागार६४
आयुरबंधकाः२९९	पर्याप्त२९८	जागरा २९२	असमवहता२८०	असातवेदका २४०	नोइंद्रियोपयुक्त० २२४	सागार१९२

प्रतरंयच्चाधोलोकस्यसर्वोपरितनमेकप्रादेशिकंप्रतरमेतद्द्वेअपिप्रतरेऊर्द्ध्वलोकतिर्यग्लोकउच्यते॥ तेचानंताःसंख्येयप्रदेशकाअनंताअसंख्येयप्र
देशका॥ अनंताअनंतप्रदेशकास्कंधाःस्पृशंतीतिद्रव्यार्थतयाअनंतगुणाः॥ तेभ्योअधोलोकतिर्यग्लोकेप्रागुक्तप्रकारेणप्रतरद्वयरूपेविशेषाधि
काःक्षेत्रस्यआयामविष्कंभाभ्यामनाकविशेषाधिकत्वात्॥ तेभ्यस्तिर्यग्लोकेअसंख्येयगुणाः॥ क्षेत्रस्यासंख्येयगुणत्वात्तेभ्यऊर्द्ध्वलोकेअसं
ख्येयगुणाःयतस्तिर्यग्लोकक्षेत्रादूर्ध्वलोकक्षेत्रमसंख्येयगुणमितितेभ्योऽधोलोकेविशेषाधिकाऊर्द्ध्वलोकादधोलोकस्यविशेषाधि
कत्वात्देशोनसप्तरज्जुप्रमाणोह्यूर्द्ध्वलोकःसमधिकसप्तरज्जुप्रमाणस्त्वधोलोकः॥ संप्रतिदिगनुपातेनाल्पबहुत्वमाह॥ ७॥ दिसाणुवाएणंस
व्वत्थोवा२लाउड्ढदिसाएइत्यादि॥ दिगनुपातेनदिगनुसारेणचिंत्यमानानापुद्गलाःसर्वस्तोकाऊर्द्ध्वदिशिइहरत्नप्रभासमभूमितलेमेरुमध्येअष्टप्रा
देशिकोरुचकः॥ तस्माद्विनिर्गताचतुःप्रदेशाऊर्द्ध्वादिकयावल्लोकांतस्ततस्तत्रसर्वस्तोकाःपुद्गलाः॥ तेभ्योऽधोदिशिविशेषाधिकाःअधोदिगपि
रुचकादेवप्रभवतिचतुःप्रदेशायावल्लोकांतस्ततस्याविशेषाधिकत्वात्तत्रपुद्गलाविशेषाधिकाः॥ तेभ्यउत्तरपूर्वस्यांदक्षिणपश्चिमायांचप्रत्येक
मसंख्येयगुणाःस्वस्थानेतुपरस्परंतुल्याः॥ ततस्तेद्वेअपिदिशौरुचकादिनिर्गतेउक्तावलिसंस्थितेतिर्यग्लोकांतंयतोऽलोकांतमूर्द्ध्वलोकांतंप
र्यवसितेतेनक्षेत्रस्यासंख्येयगुणत्वात्तत्रपुद्गलाअसंख्येयगुणाः॥ क्षेत्रंतुस्वस्थानेसममितिपुद्गलाअपिस्वस्थानेतुल्याःतेभ्योदक्षिणपूर्व
स्यामुत्तरपश्चिमायांचप्रत्येकंविशेषाधिकाःस्वस्थानेतुपरस्परंतुल्याःकथंविशेषाधिकाइतिचेतुच्यतेइहसौमनसगंधमादनेषुसप्त
सप्तकूटानिविद्युत्प्रभमाल्यवतोर्नवनवनेषुचकूटेषुधूमिकाश्यायादिसूक्ष्मपुद्गलाःप्रभूताःसंभवंतिततोविशेषाधिकाःस्वस्थानेतुक्षेत्रस्य
पर्वतादेश्वसमानत्वात्तुल्याः॥ तेभ्यःपूर्वस्यांदिशिअसंख्येयगुणाः॥ क्षेत्रस्यासंख्येयगुणत्वात्॥ तेभ्यःपश्चिमायांविशेषाधिकाः अधोलौकि
कग्रामेषुशुषिरभावतोबहूनांपुद्गलानामवस्थानाभावात् दक्षिणेनविशेषाधिकाबहुभवनशुषिरभावात्उत्तरस्यांविशेषाधिकायउत्तरस्या
मायामविष्कंभाभ्यांसंख्येययोजनकोटीकोटीप्रमाणंमानससरस्तत्रयेजलधराःपनकसेवालादयश्चसत्त्वास्तेअतिबहवइतितेषांते

असत्कार्मणपुद्गलास्तेअधिकाःप्राप्यंतेइतिपूर्वोक्तेभ्योविशेषाधिकाः तदेवंपुद्गलविषयमल्पबहुत्वमुक्तमिदानींसामान्यतोद्रव्यविषयंक्षेत्रानुपा
ततआह ॥ ७॥ खेत्ताणुवाएणंसव्वत्थोवाइंदव्वाइंतेलोक्केइत्यादिक्षेत्रानुपातेनचिंत्यमानानिद्रव्याणिसर्वस्तोकानित्रैलोक्यसंस्पर्शीनि यतोध
र्मास्तिकायाधर्मास्तिकायाकाशास्तिकायाद्रव्याणिपुद्गलास्तिकायस्यसमहास्कंधाजीवास्तिकायस्यमारणांतिकसमुद्घातेनातीवसमवहता
जीवास्त्रैलोक्यव्यापिनस्तेबाल्पेइतिसर्वस्तोकानि तेभ्यऊर्द्धलोकतिर्यग्लोकेप्रागुक्तस्वरूपप्रतरद्वयात्मकेअनंतगुणानिअनंतैःपुद्गलद्रव्यै
रनंतैर्जीवद्रव्यैस्तस्यसंस्पर्शनात् तेभ्योधोलोकतिर्यग्लोकेविशेषाधिकानिऊर्द्धलोकतिर्यग्लोकादधोलोकतिर्यग्लोकस्यमनाक्विशेषाधिकत्वा
त् तेभ्यऊर्द्धलोकेअसंख्येयगुणानिक्षेत्रस्यासंख्येयगुणत्वात् तेभ्योधोलोकेऽनंतगुणानिकथमितिचेत्उच्यते इहाधोलौकिकग्रामेषुकालो
स्तितस्यचकालस्यतत्तत्परमाणुसंख्येयासंख्येयानंतप्रादेशिकद्रव्यक्षेत्रकालभावपर्यायसंबंधवशात्प्रतिपरमाण्वादिद्रव्यमनंततातेनाभवंत्यधोलोके
ऽनंतगुणानि तेभ्यस्तिर्यग्लोकेसंख्येयगुणानि अधोलौकिकग्रामप्रमाणानांखंडानांमनुष्यलोकेकालद्रव्याधारभूतेसंख्येयानामवाप्यमानत्वात् संप्र
तिदिगनुपातेनसामान्यतोद्रव्याणामल्पबहुत्वमाह ॥ ७॥ दिसाणुवाएणंसव्वत्थोवाइंदव्वाइंअहेदिसाएइत्यादिदिगनुपातेनदिगनुसारेणचिंत्यमा
नानिद्रव्याणिसर्वस्तोकानि अधोदिशिप्राग्व्यावर्णितस्वरूपायांतेऊर्द्धदिश्यनंतगुणानिकिंकारणमितिचेत्उच्यते इहऊर्द्धलोकेमेरोःपंचयोज
नशतिकंस्फटिकमयंकांडंतत्रचंद्रादित्यप्रभानुप्रवेशात्द्रव्याणांक्षणादिकालप्रतिभागोस्तिकालस्यचप्रागुक्तनीत्याप्रतिपरमाण्वादिद्रव्य
मानंत्यात्तेभ्योनंतगुणानि तेभ्यउत्तरपूर्वस्यामाशान्यांदक्षिणपश्चिमायांनैरृतकोणइत्यर्थःअसंख्येयगुणानिक्षेत्रस्यासंख्येयगुणत्वात्
स्वस्थानेद्वयान्यपिपरस्परंतुल्यानिसमानक्षेत्रत्वात् तेभ्योदक्षिणपूर्वस्यामाग्नेय्यामुत्तरपश्चिमायांवायव्यकोणइतिभावः विशेषाधिकानिवि
द्युत्परस्परंतुल्यानिसमानक्षेत्रत्वात् तेभ्योदक्षिणपूर्वस्यामाग्नेय्यामुत्तरपश्चिमायांवायव्यकोणइतिभावः विशेषाधिकानिविद्युत्प्रभमाल्यव ६४
त्कूटाश्रितानांधूमिकावश्यायादिश्लक्ष्णपुद्गलद्रव्याणांबहूनांसंभवात् तेभ्यःपूर्वस्यांदिशिअसंख्येयगुणात्वात् तेभ्यःपश्चिमायांविशेषाधि

कानिअधोलौकिकग्रामेषुशुषिरभावात्तेभ्यउत्तरस्यांविशेषाधिकानितत्रमानससरसिजीवद्रव्याणांतदाश्रितानांतैजसकार्मणपुद्गलस्कंधद्रव्याणांचबहूनांसं
भावात् संप्रतिपरमाणुसंख्येयप्रदेशानांपरस्परमल्पबहुत्वमाह ॥ ७॥ एएसिणंभंतेपरमाणुपुग्गलाणंसंखेज्जपएसियाणमित्यादि पाठसिद्धंनवरंमत्राल्प
बहुत्वभावनायांसर्वत्रतथास्वाभाव्यंकारणंवाच्यं संप्रत्येतेषामेवक्षेत्रप्राधान्येनाल्पबहुत्वमाह ॥ ७॥ एएसिणंभंतेएगपएसोगाढाणमित्यादि इह
क्षेत्राधिकारतःक्षेत्रस्यप्राधान्यात्परमाणुद्व्यणुकाद्यनंताणुकस्कंधाअपिविवक्षितैकप्रदेशावगाढाआधाराधेययोरभेदोपचारादेकद्रव्यत्वेनव्यवह्रि
यंते तदेवंभूतानिएकप्रदेशावगाढाःपुद्गलाःपुद्गलद्रव्याणिसर्वस्तोकानिलोकाकाशप्रदेशप्रमाणानीत्यर्थः नहिसकश्चिदेवंभूतआकाशप्रदेशोस्तियएक
प्रदेशावगाहनपरिणामपरिणतानांपरमाण्वादीनामवकाशदानपरिणामेनपरिणतोनवर्ततेइति तेभ्यःसंख्येयप्रदेशावगाढाःपुद्गलाद्रव्या
र्थतयासंख्येयगुणाःकथमितिचेत्उच्यते इहापिक्षेत्रस्यप्राधान्यात्द्व्यणुकाद्यनंताणुकस्कंधाद्विप्रदेशावगाढाएकद्रव्यत्वेनविवक्ष्यंतेतानिचतथाभू
तानिपुद्गलद्रव्याणिपूर्वोक्तेभ्यःसंख्येयगुणानि तथाहिसर्वलोकप्रदेशास्तत्त्वतोअसंख्येयाअपिअसत्कल्पनयादशपरिकल्प्यंतेतेनचप्रत्येकचिंतायां
दशैवेतिदशएकप्रदेशावगाढानिपुद्गलद्रव्याणिलभ्यानिलोकस्यचदशसुप्रदेशेषुन्यग्रहणान्यमोक्षणद्वारेणबहवोद्विकसंयोगालभ्यंतेइतिभ
वंत्येकप्रदेशावगाढेभ्योद्विप्रदेशावगाढानिपुद्गलद्रव्याणिसंख्येयगुणानिएवंतेभ्योपित्रिप्रदेशावगाढानिएवमुत्तरोत्तरंयावदुत्कृष्टसंख्येयप्रदे
शावगाढानिततःस्थितमेतत्एकप्रदेशावगाढेभ्यःसंख्येयप्रदेशावगाढापुद्गलाद्रव्यार्थतयासंख्येयगुणाइति एवंतेभ्योऽसंख्येयप्रदेशाव
गाढाःपुद्गलाद्रव्यार्थतयाऽसंख्येयगुणाः असंख्यातस्यअसंख्यातभेदभिन्नत्वात् प्रदेशार्थतासूत्रंद्रव्यार्थप्रदेशार्थतासूत्रंचसुगमत्वात्
स्वयंभावनीयंकालभावसूत्राण्यपिसुगमत्वात्स्वयंभावयितव्यानिनवरंजहापोग्गलानहाभाणियव्वाइतियथाप्राक्सामान्यतःपुद्गलाउक्तास्तथाएक
गुणकालकादयोपिवक्तव्याः तच्चैवंसव्वत्थोवाअणंतपएसियाखंधाएगगुणकालगापरमाणुपुग्गलाएगगुणकालगादव्वट्ठयाअणंतगुणा
असंखेज्जपएसियाखंधाएगगुणकालगासंखेज्जगुणाअसंखेज्जपएसियाखंधाएगगुणकालगाअसंखेज्जगुणापएसट्ठयाएसव्वत्थोवाअणं

तपएसियाखंधाएगगुणकालगापरमाणुयोग्गलाएगगुणकालगाअणंतगुणाइत्यादि॥एवंसंख्येयगुणकालकानामसंख्येयगुणकालकानाम
नंतगुणकालकानामपिवाच्यमेवंशेषवर्णगंधरसाअपिवक्तव्याः कर्कशमृदुगुरुलघवःस्पर्शायथाएकप्रदेशाद्यवगाढाभणितास्तथावक्तव्याः
तेच्चैवंसव्वत्थोवाएगपएसोगाढाएगगुणकक्खडफासादव्वट्ठयाएसंखेज्जपएसोगाढाएगगुणकक्खडफासापोग्गलादव्वट्ठयाएसंखेज्जगुणाअसं
खेज्जपएसोगाढाएगगुणकक्खडफासादव्वट्ठयाएअसंखेज्जगुणाइत्यादि॥एवंसंख्येयगुणकर्कशस्पर्शाअसंख्येयगुणकर्कशस्पर्शाअनंतगुण
कर्कशस्पर्शावाच्याएवंमृदुगुरुलघवःअवशेषाश्चत्वारःशीतादयःस्पर्शायथावर्णादयउक्तास्तथावक्तव्याःसूत्रपाठोयुक्तानुसारेणस्वगमत्वात्स्वयं
भावनीयः॥गतंपुद्गलद्वारमिदानींमहादंडकंविवक्षुर्गुरुमापृच्छति॥ ७४॥अहंभंतेइत्यादि॥ अथभवंतसर्वजीवाल्पबहुत्वंसर्वजीवाल्पबहुत्वंस
र्वजीवाल्पबहुत्ववक्तव्यतात्मकंमहादंडकवर्तयिष्यामिरचयिष्यामीतितात्पर्यार्थः॥अनेनएतत्ज्ञापयतितीर्थकराणुज्ञामात्रसापेक्षएवभगवान्
गणधरःसूत्ररचनांप्रतिवर्त्तते।नपुनःश्रुताभ्यासपुरस्सरमितियद्वेनत्वज्ञापयतिकुशलरूपिकर्मणिविनेयेनगुरुमनापृच्छ्यनप्रवर्त्तितव्यंकिंतुतदनु
ज्ञापुरस्सरमन्यथाविनेयत्वायोगात्॥विनेयस्यहिलक्षणमिदंगुरोर्निवेदितात्मायोगुरुभावानुवर्त्तकः॥मुक्त्यर्थंचेष्टतेनित्यंसविनेयःप्रकीर्तितः॥गुरु
रपियःपृच्छनीयःसएवंरूपोधर्मकर्त्ताचसदाधर्मप्रवर्त्तकः॥सत्वेभ्योधर्मशास्त्रार्थदेशकोगुरुरुच्यतेइतिमहादंडकंकर्तयिष्यामीत्युक्तंततःप्रतिज्ञात
मेवनिर्वाहयति॥ ७५॥सव्वत्थोवागब्भवक्कंतियमणुस्साइत्यादि॥सर्वस्तोकागर्भव्युत्क्रांतिकामनुष्याःसंख्येयकोटीकोटीप्रमाणत्वात्॥तेभ्योमनुष्या
मनुष्यस्त्रियःसंख्येयगुणाःसप्तविंशतिगुणत्वात्॥उक्तंचसत्तावीसगुणापुणमणुयाणंतदहियाचेवेति २ ताभ्योबादरतेजस्कायिकाःपर्याप्ताअसंख्ये
यगुणाः॥कतिपयवर्गन्यूनावधिकाघनसमयप्रमाणत्वात्॥तेभ्योनुत्तरोपपातिनोदेवाअसंख्येयगुणाः॥क्षेत्रपल्योपमासंख्येयभागवर्त्तिनभःप्र ६९.
देशाराशिप्रमाणत्वात्॥तेभ्यउपरितनग्रैवेयकदेवाःसंख्येयगुणाःबृहत्तरक्षेत्रपल्योपमासंख्येयभागवर्त्तिनभःप्रदेशाराशिप्रमाणत्वादेतदपिकथ
मवसेयमितिचेदुच्यतेविमानबाहुल्यात्॥तथाह्यनुत्तरदेवानांपंचविमानानिविमानशतंत्पुरितनग्रैवेयकत्रिकेप्रतिविमानंचासंख्येयादेवा॥यथा

चाधोवर्त्तीनिविमानानिविमानानितथातथादेवाअपिप्राचुर्येणलभ्यंतेततोऽवसीयते॥अनुत्तरोपपातिदेवेभ्योबृहत्तरक्षेत्रपल्योपमासंख्येयभागवर्त्ती
काशप्रदेशराशिप्रमाणाउपरितनग्रैवेयकत्रिकदेवाएवमुत्तरत्रापिभावनाकार्याःयावदानतकल्पः॥तेभ्योप्युपरितनग्रैवेयकत्रिकदेवाःसंख्येयकत्रि
कदेवाःसंख्येयगुणास्तेभ्योप्यधस्तनग्रैवेयकगुणास्तेभ्योप्यच्युतकल्पदेवाःसंख्येयगुणाः ८ तेभ्योप्यारणकल्पदेवाःसंख्येयगुणाःयद्यप्यारणाच्यु
तकल्पौसमश्रेणिकौयद्यप्यारणाच्युतकल्पौसमश्रेण्यौ४कौसमविमानसंख्याकौचतथापिकृष्णपाक्षिकास्तथास्वाभाव्यात्प्राचुर्येणदक्षिणस्यांदिशिसमुत्प
द्यंतेतेनोत्तरस्यांबहवश्चकृष्णपाक्षिकाःस्तोकाःशुक्लपाक्षिकास्ततोच्युतकल्पदेवाःसंख्येयगुणाः॥तेभ्योपिप्राणतकल्पदेवाःसंख्येयगुणाः१०तेभ्योप्यान
तकल्पदेवाःसंख्येयगुणाःभावनाआरणकल्पवत्कर्तव्याः॥तेभ्योप्यधःसप्तमनरकपृथिव्यांनैरयिकाअसंख्येयगुणाःश्रेण्यसंख्येयभागगतनभः
प्रदेशराशिप्रमाणत्वात् ११ तेभ्यःषष्टपृथिव्यांनैरयिकाअसंख्येयगुणाएतच्चप्रागेवदिगनुपातेननैरयिकाल्पबहुत्वचिंतायांभावितं॥तेभ्योपिसहस्रा
रकल्पदेवाअसंख्येयगुणाःषष्टपृथिवीनैरयिकपरिमाणहेतुश्रेण्यसंख्येयगुणापेक्षयासहस्रारकल्पदेवपरिमाणहेतोःश्रेण्यसंख्येयभाग
स्यासंख्येयगुणत्वात् १४ तेभ्योमहाशुक्रकल्पदेवाःअसंख्येयगुणाःविमानबाहुल्यात्तथाहिषट्सहस्राणिविमानानांसहस्रारकल्पेचत्वा
रिंशत्सहस्रारमहाशुक्रेअन्यच्चाधोधोविमानवासिनोबहुबहुतरास्तोकतराश्चोपरितनोपरितनविमानवासिनःनचःसहस्रारदेवेभ्योमहा
शुक्रकल्पदेवाअसंख्येयगुणाः॥तेभ्योपिपंचमधूमप्रभाभिधाननरकपृथिव्यांनैरयिकाश्चासंख्येयगुणाः॥बृहत्तमश्रेण्यसंख्येयभागवर्त्तिनभः
प्रदेशराशिप्रमाणत्वात्तेभ्योपिलांतककल्पदेवाअसंख्येयगुणाअतिबृहत्तमश्रेण्यसंख्येयभागगतनभःप्रदेशराशिप्रमाणत्वात्॥तेभ्योपिच
तुर्थ्यांपंकप्रभायांपृथिव्यांनैरयिकाअसंख्येयगुणाःयुक्तिःप्रागिवभावनीयातेभ्योपिब्रह्मलोककल्पदेवाअसंख्येयगुणाः युक्तिःप्रागुक्तैवते
भ्योपितृतीयस्यांवालुकाप्रभायांपृथिव्यांनैरयिकाअसंख्येयगुणाःतेभ्योपिमाहेंद्रकल्पदेवाअसंख्येयगुणाःतेभ्योपिसनत्कुमारक
ल्पेदेवाःअसंख्येयगुणाःयुक्तिःसर्वत्रापिप्रागुक्तैवतेभ्योद्वितीयस्यांशर्कराप्रभायांपृथिव्यांनैरयिकाअसंख्येयगुणाएतेचसप्तमपृथिवी

नारकादयोद्वितीनारकपर्यंताः प्रत्येकंस्वस्थानेचिंत्यमानाः सर्वेपिघनीकृतलोकश्रेण्यसंख्येयभागवर्तिनभःप्रदेशराशिप्रमाणाद्रष्टव्याः केवलं
श्रेण्यसंख्येयंसंख्येयभागोऽसंख्येयभेदभिन्नस्ततइत्थमसंख्येयगुणत्वातयाअल्पबहुत्वमभिधीयमानंनविरुध्यते तेभ्योपिद्वितीयनरकपृ
थिवीनारकेभ्यःसंमूर्छिममनुष्याअसंख्येयगुणाः तेहिअंगुलमात्रक्षेत्रप्रदेशराशेःसंबंधिनितृतीयवर्गमूलेनगुणितेप्रथमेवर्गमूलेयावा
न्प्रदेशराशिस्तावत्प्रमाणानिखंडानियावंत्येकस्यामेकप्रादेशिक्यांश्रेणौभवंतितावत्प्रमाणास्तेभ्यईशानकल्पेदेवाअसंख्येयगुणाः यतोऽंगुल
मात्रक्षेत्रप्रदेशराशेःसंबंधिनिद्वितीयेवर्गमूलेतृतीयेनवर्गमूलेनगुणितेयावान्प्रदेशराशिर्भवतितावत्प्रमाणास्वघनीकृतस्यलोकस्येकप्रादेश
कासुश्रेणिषुयावंतोनभःप्रदेशास्तावत्प्रमाणईशानकल्पगतोदेवदेवीसमुदायस्ततकिंचिदूनद्वात्रिंशत्तमभागकल्पाईशानदेवास्ततोदेवाःसंमूर्छि
ममनुष्येभ्योअसंख्येयगुणाः २९ तेभ्यईशानकल्पेएवदेव्यःसंख्येयगुणाद्वात्रिंशद्गुणत्वात् बत्तीसगुणाबत्तीसरूवअहिअहुंउहोंसिदेवीउइति
वचनात्ताभ्यःसौधर्मकल्पेदेवाःसंख्येयगुणास्तत्रविमानबाहुल्यात्तथाहितत्रद्वात्रिंशत्शतसहस्राणिविमानानांमष्टाविंशतिःशतसहस्राणिविमा
नानांमष्टाविंशतिःशतसहस्राणिईशानेकल्पेअपिचदक्षिणदिग्वर्त्तीसौधर्मकल्पईशानकल्पस्तूत्तरदिग्वर्तीदक्षिणस्यांचदिशिबहवःकृष्णपाक्षि
काःसमुत्पद्यंते ततईशानदेवेभ्यःसौधर्मदेवाःसंख्येयगुणानद्वियुक्तिर्माहेंद्रसनत्कुमारकल्पयोरप्युक्तापरंतत्रमाहेंद्रकल्पापेक्षयासनत्कुमारक
ल्पेदेवाअसंख्येयगुणाउक्ताइहतुसौधर्मकल्पेसंख्येयगुणास्तदेतत्कथमुच्यतेबवभप्रामाण्यानवात्रपाठभ्रमायतोऽन्यत्राप्युक्तं ईशाणेसव्वत्थवित्ती
सगुणाउहोंतिदेवीउसंखेज्जासोहम्मेतऽअसंखाभवणवासी २७इति तेभ्योपितस्मिन्नेवसौधर्मकल्पेदेवाःसंख्येयगुणाःद्वात्रिंशत्गुणत्वा
त् सव्वत्थवित्तीसगुणाउहोंतिदेवीउइतिवचनात् ताभ्योप्यसंख्येयगुणाभवनवासिनःकथमितिचेत्उच्यते इहअंगुलमात्रक्षेत्रप्रदेशरा
शेःसंबंधिनिप्रथमेवर्गमूलेनगुणितेयावान्प्रदेशराशिर्भवति तावत्प्रमाणास्तुघनीकृतस्यलोकस्यएकप्रादेशिकासुश्रेणिषुयावंतोनभःपति
देवदेवीसमुदायास्तद्गतकिंचिदूनद्वात्रिंशत्तमभागकल्पाश्चभवनपतयोदेवास्ततोघटंतेसौधर्मदेवीभ्यस्तेअसंख्येयगुणाद्वात्रिंशद्गुणत्वात्ताभ्यो

प्यसंख्येयगुणारत्नप्रभायांपृथिव्यांनैरयिकाअसंख्येयगुणाअंगुलमात्रक्षेत्रप्रदेशराशेःसंबंधिनिप्रथमवर्गमूलेद्वितीयेनवर्गमूलेनगुणितेयावान्प्रदेशराशि
स्तावत्प्रमाणासुश्रेणिषुयावंतआकाशप्रदेशास्तावत्प्रमाणत्वात् तेभ्योपिखचरपंचेंद्रितिर्यग्योनिकाःपुरुषाअसंख्येयगुणाः प्रतरासंख्येयगुणाःप्रत
रासंख्येयभागवर्त्तसंख्येयश्रेणिनभःप्रदेशराशिप्रमाणत्वात् तेभ्योपिखचरपंचेंद्रियतिर्यग्योनिकाःस्त्रियःसंख्येयगुणास्त्रिगुणत्वात् तिगुणातिरूवअ
हियातिरियाणंइत्थियामुणेयव्वा इतिवचनात् ३३ ताभ्यःस्थलचरपंचेंद्रियतिर्यग्योनिकाःपुरुषाःसंख्येयगुणाः बृहत्तरप्रतरासंख्येयभागवर्त्यसंख्येयश्रे
णिगताकाशप्रदेशराशिप्रमाणत्वात् ३४ तेभ्यःस्थलचरपंचेंद्रियतिर्यग्योनिकाःस्त्रियःसंख्येयगुणास्त्रिगुणत्वात्ताभ्योजलचरपंचेंद्रियतिर्यग्योनि
काःपुरुषाः संख्येयगुणाः बृहत्तमप्रतरासंख्येयभागवर्त्यसंख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्तेभ्योजलचरपंचेंद्रियतिर्यग्योनिकस्त्रियःसं
ख्येयगुणास्त्रिगुणत्वात् ३२ ताभ्योपिव्यंतरादेवाःपुंवेदोदयिनःसंख्येययोजनकोटीकोटीप्रमाणानिसूचिरूपाणिखंडानिसूचिरूपाणिखंडानियावंत्येक
स्मिन्प्रतरेभवंति तावंतःसामान्येनव्यंतराकेवलमिहपुरुषाविवक्षिताइति तेसकलसमुदायापेक्षयाकिंचिदूनद्वात्रिंशत्तमभागकल्पावेदितव्याःस्ततो
घटंतेजलचरयुवतिभ्यःसंख्येयगुणाद्वात्रिंशद्गुणत्वात् ताभ्योज्योतिष्कदेवाःसंख्येयगुणाः तेहिसामान्यतःषट्पंचाशदधिकशतद्वयांगुलप्रमाणानि
सूचीरूपाणिखंडानियावंत्येकस्मिन्प्रतरेभवंतितावत्प्रमाण्याःपरिमिहपुरुषाविवक्षिताइतिसकलसमुदायापेक्षयाकिंचिदूनद्वात्रिंशत्तमभागकल्पा
प्रतिपत्तव्यास्ततउपपद्यंते व्यंतरेभ्यःसंख्येयगुणाः ४० तेभ्योज्योतिष्कदेव्यःसंख्येयगुणाद्वात्रिंशद्गुणत्वात् ४१ ताभ्यःखचरपंचेंद्रियतिर्यग्योनिकानपुंस
काःसंख्येयगुणाः क्वचित्असंख्येयगुणाइतिपाठःसमसमीचीनोयदितउर्द्धपर्याप्तचतुरिंद्रियावक्ष्यंतेतेपिज्योतिष्कदेवापेक्षयासंख्येयगुणाएवोप
पद्यंतेनथाहिषट्पंचाशदधिकशतद्वयांगुलप्रमाणानिसूचिरूपाणिखंडानियावंत्येकस्मिन्प्रतरेभवंतितावत्प्रमाणाज्योतिष्काः उक्तंच
छप्पन्नदोसयंगुलसूइपएसेहिंभाइयंपयरं जोइसिएहिंहीरइइति अंगुलसंख्येयभागमात्राणिचसूचिरूपाणिखंडानियावंत्येकस्मिन्प्रतरेभ
वंतितावत्प्रमाणश्चतुरिंद्रियाः उक्तंच पज्जत्तापज्जत्ताबितिचउअसन्निणोअवहरंति अंगुलसंखासंखप्पएसभइयंपुढोपयरं अंगुल

संख्येयभागापेक्षयावषद्यंचाशादधिकमंगुलशतद्वयंसंख्येयगुणं॥ ततोज्योतिष्कदेवापेक्षयांपरिभाव्यमानाःपर्याप्तचतुरिंद्रियाअपिसंख्येयगुणाएव
घटंतेकिंपुनःपर्याप्तचतुरिंद्रियापेक्षयासंख्येयभागमात्राखचरपंचेंद्रियनपुंसकाइति॥तेभ्योपिस्थलचरपंचेंद्रियनपुंसकाःसंख्येयगुणाः तेभ्योपि
जलचरपंचेंद्रियानपुंसकाःसंख्येयगुणाः॥ ४५ तेभ्योपिपर्याप्ताःसंज्ञ्यसंज्ञिभेदभिन्नाःपंचेंद्रियाविशेषाधिकाः॥तेभ्योपिपर्याप्तद्वींद्रियाविशेषाधिकाः
४० तेभ्योपिपर्याप्तत्रींद्रियाविशेषाधिकाःयद्यपिचपर्याप्तचतुरिंद्रियादीनांपर्याप्तत्रींद्रियपर्यंतानांप्रत्येकमंगुलमसंख्येयभागमात्राणिसूचिरूपाणि
खंडानियावंत्येकस्मिन्प्रतरेभवंतितावत्प्रमाणत्वमविशेषेणान्यत्रवर्ण्यतेतथाप्यंगुलसंख्येयभागस्यसंख्येयभेदभिन्नत्वान्दिशंविशेषाधिकत्व
मुच्यमानंनविरुद्धं॥ उक्तंचेश्वमल्पबहुत्वमन्यत्रापि॥ततोनपुंसकखहयरसंखेद्याथलयरजलयरनपुसंका॥ चतुरिंद्रियततोपणवितिपद्यत्तकिंच
हियाइत्ति॥ ४८॥ तेभ्योपिपर्याप्तत्रींद्रियेभ्योऽपर्याप्ताःपंचेंद्रियाअसंख्येयगुणाः॥ अंगुलासंख्येयभागमात्राणिखंडानिसूचिरूपाणियावंत्येकस्मि
न्प्रतरेभवंति॥ तावत्प्रमाणत्वात्तेभ्यश्चतुरिंद्रियाअपर्याप्ताविशेषाधिकाः॥ तेभ्योपित्रींद्रियाअपर्याप्ताविशेषाधिकाः ५३ तेभ्योपिद्वींद्रियाअ
पर्याप्ताविशेषाधिकाः॥ यद्यपिचापर्याप्तपंचेंद्रियादयोऽपर्याप्तद्वींद्रियपर्यंताःप्रत्येकमंगुलस्यासंख्येयभागमात्राणिखंडानिसूचिरूपाणियावंत्येकस्मि
न्प्रतरेभवंतितावत्प्रमाणाअन्यत्राविशेषेणोक्तास्तथाप्यसंख्येयभागस्यविचित्रत्वादित्थंविशेषाधिकत्वमुच्यमानंनविरोधमास्कंदति तेभ्योपिद्वीं
द्रियापर्याप्तेभ्यप्रत्येकबादरवनस्पतिकाःपर्याप्ताअसंख्येयगुणः॥ यद्यपिचापर्याप्तद्वींद्रियादिवत्पर्याप्तबादरवनस्पतिकाअपित्र्यंगुलासंख्येय
भागमात्राणिसूचीरूपाणिखंडानियावंत्येकस्मिन्प्रतरेभवंति॥ तावत्प्रमाणाअन्यथोक्तास्तथाप्यंगुलासंख्येयभागस्यासंख्येयभेदभिन्नत्वात्॥
बादरपर्याप्तप्रत्येकवनस्पतिपरिमाणचिंतायामंगुलासंख्येयभागोसंख्येयगुणहीनःपरिगृह्यते॥ ततोनकश्चिद्विरोधः॥ ५२ तेभ्योपिबादरनि
गोदाअनंतकायिकशरीररूपाःपर्याप्ताअसंख्येयगुणाः ५४ तेभ्योपिबादरपृथिवीकायिकाःपर्याप्ताअसंख्येयगुणाः॥ ५५ तेभ्योपिपर्याप्ताबा ६७
दराकायिकाःअसंख्येयगुणाः॥ यद्यपिचपर्याप्ताबादरप्रत्येकवनस्पतिकायिकपृथिवीकायिकाऽप्कायिकाःप्रत्येकमंगुलासंख्येयभागमात्रा

णिसूचिरूपाणिखंडानियावंत्येकस्मिन्प्रतरेभवंतितावत्प्रमाणाअन्यत्राविशेषेणोक्तास्तथाप्यंगुलासंख्येयभेदभिन्नत्वादिन्नत्वादित्थमसंख्येयगुण
त्वाभिधानेनकश्चिद्दोषः॥ तेभ्योबादरपर्याप्ताप्कायकेभ्योबादरवायुकायिकाःपर्याप्ताअसंख्येयगुणाघनीकृतलोकासंख्येयप्रतरगतनभःप्रदेशरा
शिप्रमाणत्वात्तेभ्योपिबादरतेजस्कायिका॥ अपर्याप्ताअसंख्येयगुणाःअसंख्येयलोकाकाशप्रदेशराशिप्रमाणत्वात्॥ ५८ तेभ्यःप्रत्येकशरीरबाद
रवनस्पतिकायिकाअपर्याप्ताअसंख्येयगुणाः॥ ५९ तेभ्योपिबादरनिगोदाअपर्याप्तकाअसंख्येयगुणाः॥ ५९ तेभ्योपिबादरनिगोदाअपर्याप्त
काअसंख्येयगुणाः ६०॥ तेभ्योपिबादरपृथिवीकायिकाअपर्याप्तकाअसंख्येयगुणाः॥ ६१ तेभ्योबादराप्कायिकाअपर्याप्ताअसंख्येयगुणाः
६२ तेभ्योबादरवायुकायिकाअपर्याप्तकाअसंख्येयगुणाः॥ ६३ तेभ्यःसूक्ष्मतेजस्कायिकाअपर्याप्तकाअसंख्येयगुणाः॥ तेभ्यःसूक्ष्मपृथिवीका
यिकाअपर्याप्ताविशेषाधिकाः ६४ तेभ्यःसूक्ष्माप्कायिकाअपर्याप्तकाविशेषाधिकाः ६६ तेभ्यःसूक्ष्मवायुकायिकाअपर्याप्ताविशेषाधिकाः॥
६७ तेभ्यःसूक्ष्मतेजस्कायिकाःपर्याप्तकाःसंख्येयगुणाअपर्याप्तसूक्ष्मेभ्यःपर्याप्तसूक्ष्माणांस्वभावचप्राचुर्येणभावात्तथाचाह॥ अस्याएवप्रज्ञा
पनायासंग्रहणिकारंजीवाणमपद्यत्ताबहुनरगावायराणविन्नेयासुहुमाणयपद्यत्ताउहेणयकेवलीबेंति॥ ६८ तेभ्योपिसूक्ष्मपृथिवीकायिकाः
६९ तेभ्योपिसूक्ष्माप्कायिकाःपर्याप्ताविशेषाधिकाः ७० तेभ्योपिसूक्ष्मवायुकायिकाःपर्याप्ताविशेषाधिकाः॥ ७१ तेभ्योपिसूक्ष्मनिगोदाअपर्याप्त
काअसंख्येयगुणाः ७२ तेभ्योपिपर्याप्तासूक्ष्मनिगोदाःसंख्येयगुणाःयद्यपिचापर्याप्ततेजस्कायिकादयःपर्याप्तसूक्ष्मनिगोदपर्यंताअविशेषेणा
न्यत्रासंख्येयलोकाकाशप्रदेशराशिप्रमाणाउक्तामुक्तास्तथापिलोकासंख्येयत्वस्यासंख्येयभेदभिन्नत्वादित्थमल्पबहुत्वमभिधीयमानमुपपन्नं
द्रष्टव्यं ७३ तेभ्योअभवसिद्धिकाअनंतगुणाःजघन्ययुक्तानंतकप्रमाणत्वात् ७४ तेभ्यःप्रतिपतितसम्यग्दृष्टयोनंतगुणाः ७५ तेभ्यसिद्धाअ
नंतगुणाः ७६ तेभ्योपिबादरवनस्पतिकायिकाःपर्याप्ताअनंतगुणाः ७७ तेभ्योपिसामान्यतोबादरपर्याप्ताविशेषाधिकाबादरपर्याप्तपृथि
वीकायिकादीनामपितत्रप्रक्षेपात् ७८ तेभ्योपिबादरापर्याप्तवनस्पतिकायिकाअसंख्येयगुणाएकैकबादरनिगोदपर्याप्तनिश्रयाअसंख्येय

प्रज्ञा० वृत्ति०
६८

गुणानांबादरापर्याप्तनिगोदानांसंभवात् ७९ तेभ्यः सामान्यतो बादरा अपर्याप्ता विशेषाधिकाः बादरापर्याप्तपृथिवीकादीनामपितत्रप्रक्षेपात्
८० तेभ्यः सामान्यतो बादरा विशेषाधिकाः पर्याप्तानामपितत्रप्रक्षेपात् ८१ तेभ्यः सूक्ष्मवनस्पतिकायिका अपर्याप्ता असंख्येयगुणाः ८२ ते
भ्यः सूक्ष्मा अपर्याप्ता विशेषाधिकाः तेभ्यः सामान्यतः सूक्ष्माः पर्याप्ता विशेषाधिकाः पर्याप्तसूक्ष्मपृथवीकायिकादीनामपितत्रप्रक्षेपात् ८५ तेभ्यः
पर्याप्तापर्याप्तविशेषणरहिताः सूक्ष्मा विशेषाधिका अपर्याप्तसूक्ष्मपृथिव्यप्तेजोवायुवनस्पतिकायिकानामपितत्रप्रक्षेपात् ८६ तेभ्योपिभव
सिद्धिभवसिद्धिर्येषांतेभवसिद्धिकाः भव्या विशेषाधिकाः जघन्ययुक्तानंतकमात्राभव्यपरिहारेण सर्वजीवानांभव्यत्वात् ८७ तेभ्यः सामा
न्यतो निगोदा जीवा विशेषाधिकाः ८८ इह भव्या अभव्याश्चातिप्राचुर्येण बादरसूक्ष्मनिगोदजीवराशीन्वैव प्राप्यंते नान्यत्र अन्येषां सर्वे
षामपि मिलितानामसंख्येयलोकाकाशप्रदेशराशिप्रमाणत्वात् अभव्याश्च युक्तानंतकसंख्यामात्रपरिमाणास्ततो भव्यापेक्षया तेर्किंचिन्मात्रा
भव्याश्च प्रागभव्यपरिहारेण चिंतिता इदानींतु बादरसूक्ष्मनिगोदचिंतायांतेपिप्रक्षिप्यंते इति विशेषाधिकाः ८९ तेभ्यः सामान्यतो वनस्पति
जीवा विशेषाधिकाः प्रत्येकशरीरिणामपि वनस्पतिजीवानांतत्रप्रक्षेपात् तेभ्यः सामान्यतः एकेंद्रिया विशेषाधिका बादरसूक्ष्मपृथिवीकायि
कादीनामपितत्रप्रक्षेपात् ९० तेभ्यः सामान्यतस्तिर्यग्योनिका विशेषाधिकाः पर्याप्तापर्याप्तद्वित्रिचतुरिंद्रियतिर्यक्पंचेंद्रियाणामपितत्रप्रक्षे
पात् ९१ तेभ्यश्चतुर्गतिभाविनो मिथ्यादृष्टयो विशेषाधिकाः इह कतिपयाविरतसम्यग्दृष्ट्यादिसंज्ञिव्यतिरेकेण शेषाः सर्वेपितिर्यंचो मि
थ्यादृष्टिचिंतायांचासंख्येयनारकादयस्तत्रप्रक्षिप्यंते ततस्तिर्यग्जीवराश्यपेक्षया चतुर्गतिका मिथ्यादृष्टयश्चिंत्यमाना विशेषाधिकाः ९२ तेभ्यो
प्यविरता विशेषाधिका अविरतसम्यग्दृष्टिनामपितत्रप्रक्षेपात् ९३ तेभ्यः सकषायिणो विशेषाधिकाः देशविरतादीनामपितत्रप्रक्षेपात् तेभ्यश्छद्म ६८
स्था विशेषाधिकाः उपशांतमोहादीनामपितत्रप्रक्षेपात् ९५ तेभ्यः सयोगिनो विशेषाधिकाः सयोगिकेवलिनामपितत्रप्रक्षेपात् तेभ्यः सं
सारस्था विशेषाधिका अयोगिकेवलिनामपितत्रप्रक्षेपात् ९७ तेभ्यः सर्वजीवा विशेषाधिकाः सिद्धानामपितत्रप्रक्षेपात् ९८ ॥ ॥

इति श्रीमलयगिरिविरचितायांप्रज्ञापनाटीकायांतृतीयंपदंसमाप्तं ॥ ॥ व्याख्यातंतृतीयंपदमिदानींचतुर्थमारभ्यते तस्यचायमभिसंबंधः इ
हानंतरपदेदिगनुपातादिना अल्पबहुत्वसंख्यानिर्द्धारिता अस्मिंस्तु तया अल्पबहुत्वसंख्यया निर्द्धारितानांस्वानांजन्मतः प्रभृत्यामरणात्स्य नारका
दिपर्यायरूपेणाव्यवच्छिन्नभवस्थानंतच्चिंत्यते अनेनसंबंधेनायातस्यास्येदमादिसूत्रं नेरइयाणंभंतेकेवइयंकालंठिईपन्नत्ता इति नैरयिकाणां
भदंतकालंस्थितिः प्रज्ञप्ताः तत्रस्थीयते अवस्थीयते अनया आयुःकर्मानुभूत्येतिस्थितिरायुःकर्मानुभूतिर्जीवनमितिपर्यायाः यद्यपि च जीवनमिथ्या
त्वादिरूपाचानांकर्मपुद्गलानांज्ञानावरणीयादिरूपतया परिणतान्यांयदवस्थानंसास्थितिरितिप्रसिद्धंतथापि नारकादिपिनकेरगतिपंचेंद्रियजात्या
दीनामकर्मोदयाश्रयेोनारकत्वपर्यायस्तथापिनारकायुःप्रथमसमयसंवेदनकालएवतन्निबंधनंनारकक्षेत्रमप्राप्तोपिनारकव्यपदेशंलभ्यते तथा
चभगवतींद्रप्रवचनंनेरइएणंदेशहेतुरायुःकर्मानुभूतिस्तथाहि यदब्बिघणंभंतेनेरइएसुउववज्जइ अनेरईएनेरईएसुउववज्जइ गोयमानेरइएसुउव
वज्जइ गोयमानेरईएसुउववज्जइनोअनेरइएसुउववज्जइ इत्यादिततः सैवायुःकर्मानुभूतिरिहपथोक्तच्युत्पत्त्यास्थितिरभिधीयते इतिनिर्वचनमाह गो
यमेत्यादि एतच्चपर्याप्तापर्याप्तविभागेन सामान्यतउक्तंयदानुपर्याप्तापर्याप्तविभागेनचिंतानदेवंसूत्रंप्रपद्यतनेरइयाणंभंतेइत्यादि इहापर्याप्ताद्विविधा
लब्ध्या करणेश्चतत्रनैरयिकदेवाः संख्येयवर्षायुषस्तिर्यङ्मनुष्याः करणैरेवापर्याप्तानलब्ध्यपर्याप्तकानांतेपुमध्ये उत्पादासंभवात् ततएते उपपात
कालएवकरणैः कियंतंकालमपर्याप्ताद्रष्टव्याः शेषास्तु तिर्यग्मनुष्यालब्ध्याअपर्याप्ताउपपातकालेचउक्तंच नारकदेवातिरिमणुयगब्भजाते
असंखवासाऊ एएउअपज्जत्ताउववाएचेवबोधव्वासेसायतिरियमणुयालद्धिंपप्पोववायकालेय दुहउवियभइयव्वापज्जत्तितरेयजि
णवयणं अपर्याप्तकाश्चजघन्यतउत्कर्षतोवांतर्मुहूर्तमतउक्तंगोयमा जहपर्याप्तकाश्चजघन्यतउत्कर्षतोवांतमुहूर्तमतउक्तं गोय
माजहण्णेणविउक्कोसेणविअंतोमुहुत्तं अपर्याप्ताद्धापगमेशेषकालः पर्याप्ताद्धाततउक्तंपर्याप्तसूत्रेगोयमाजहन्नेणंदसवाससहस्साइंअं
तोमुहुत्तूणाइंउक्कोसेणंतेत्तीसंसागरोवमाइंअंतोमुहुत्तूणाइं एतच्चपृथिव्यविभागेनचिंतंसंप्रतिपृथिवीविभागेनचिंतयति ७ रयणप्पभापुढवि

DR. BHAU DAJI MEMORIAL

नेरइयाणंभंतेइत्थादिसूत्रगमं शेषमपिसूत्रगममापदपरिसमाप्तेर्नेवरंचंदविमाणेणंभंतेदेवाणमित्यादि चंद्रविमानेचंद्रइत्यधंते शेषाश्चतत्परिवारभूतास्त
त्रतत्परिवारभूतानांजघन्यतुर्भागपल्योपममामाणाउत्कर्षतःकेषांचिदिंद्रसामानिकादीनांवर्षलक्षाभ्यधिकंपल्योपमंचंद्रदेवस्यतुयथोक्तमुत्कृष्टमेव
एवंसूर्यादिविमानेष्वपिभावनीयं ७ इतिश्रीमलयगिरिविरचितायांप्रज्ञापनाटीकायांचतुर्थस्थित्याख्यपदंसमाप्तं॥ ॥तदेवंव्याख्या
तंचतुर्थपदमिदानींपंचममारभ्यतेतस्यचायमभिसंबंधः इहानंतरपदेनारकादिपर्यायरूपेणसत्वानामवस्थितिरुक्ताइहत्वौदयिकक्षायो
पशमिकक्षायिकभावाश्रयपर्यायावधारणंप्रतिपाद्यतेतत्रचेदमादिसूत्रं ७ कइविहाणंभंतेपज्जवापन्नत्ताइतिइत्यादि अथकेनाभिप्रायेणगौ
तमस्वामिनाभगवानेवंपृष्टउच्यते उत्क्रमादौप्रथमेपदेप्रज्ञापनाद्विविधाप्रज्ञप्ताजीवप्रज्ञापनीअजीवप्रज्ञापनाचेति तत्रजीवाश्चाजीवाश्चद्रव्याणिद्र
व्यलक्षणंचेदंगुणपर्यायवद्द्रव्यमितिचेनततोजीवाजीवपर्यायभेदावगमार्थमेवंपृष्टवान्तथाचभगवानपिनिर्वचनमेवमेवाह गोयमादुवि
हापज्जवापन्नत्तातंजहा जीवपज्जवायअजीवपज्जवायइतितत्रपर्यायागुणाविशेषाधर्माइत्यनर्थांतरं ननुसंबंधंप्रतिपादयतेदमुक्तंइहत्वौ
दयिकादिभावाश्रयपर्यायपरिमाणावधारणंप्रतिपाद्यतइतिउदयिकादयश्चभावाजीवाश्रयास्ततोजीवपर्यायाएवगम्यंते अथचास्मिन्नि
र्वचनसूत्रेद्वयानामपिपर्यायाउक्तास्ततोनसंदरःसंबंधःतदयुक्तमभिप्रायापरिज्ञानात् ऊदयिकोहिभावःपुद्गलव्यक्तिरपिभवति ततोजी
वाजीवभेदेनौदयिकभावस्यद्वैविध्यात्नसंबंधकथननिर्वचनसूत्रयोर्विरोधः संप्रतिसंबंधपरिमाणावमायपृच्छति ७ जीवपज्जवाजीवा
णंभंतेकिंसंखिज्जाइहयस्मात्वनस्पतिसिद्धवर्जाःसर्वेपिनैरयिकादयःप्रत्येकमसंख्येयामनुष्येषुसंख्येयत्वंसंमूर्छिममनुष्यापेक्षयाव
नस्पतयःसिद्धाश्चप्रत्येकमनंतास्ततःपर्यायिणामनंतत्वाद्ध्रुवंस्यनंताजीवपर्यायाःपृष्टोभगवानपिचसामान्येननिर्वचनमुक्तवान्इदा
नींविशेषविषयंप्रश्नंगौतमआह ७ नेरइयाणंभंतेकेवइयापज्जवापन्नत्ताइति अथकेनाभिप्रायेणैवंगौतमःपृष्टवान्उच्यते पूर्वंकिलसा
मान्यप्रश्नेपर्यायिणामनंतत्वात् पर्यायाणामानंत्यमुक्तंयत्रपुनःपर्यायिणामानांत्यंनास्तितत्रकथमितिपृच्छति नेरइयाणमित्यादितत्रापि ६९

निर्वचनमिदमनंताइति अत्रैवंजातसंशयःप्रश्नइतिमेकेणठेणंभंतेइत्यादि अथकेनार्थेनकेनकारणेनकेनहेतुनाभदंतएवमुच्यतेनैरयिकाणां
पर्यायाएवमनंताइतिभगवानाह गोयमानेर इयस्सदव्वठयाएतुल्लेइत्यादि अथपर्यायाणामानंत्यंकथंघटतेइतिपृष्टेनैवपर्यायाणामानंत्यं
यथायुक्त्योपपन्नंभवति तथानिर्वचनीयंनान्यत् ततःकेनाभिप्रायेणभगवतैवंनिर्वचनमवादिनैरयिकस्यद्रव्यार्थतयातुल्यइति उच्यतेएक
मपिद्रव्यमनंतपर्यायमित्यस्यन्यायस्यप्रदर्शनार्थंतत्रयस्मादिदमपिनारकजीवद्रव्यमेकसंख्याऽवरुद्धमिदमपिमिति नैरयिकोनैरयिक
स्यद्रव्यार्थतयातुल्यःद्रव्यमेवार्थोद्रव्यार्थस्तद्भावोद्रव्यार्थतातयातुल्यएवंतावद्द्रव्यार्थतयातुल्यत्वमभिहितमिदानींप्रदेशार्थतामधिकृत्यतु
ल्यत्वमाह पएसठयाएतुल्लेइदमपिनारकजीवद्रव्यंलोकाकाशप्रदेशपरिमाणप्रदेशमिदमपिलोकाकाशप्रदेशमितिप्रदेशार्थतयापिनै
रयिकोनैरयिकस्यतुल्यःप्रदेशाएवार्थःप्रदेशार्थस्तत्तानयाप्रदेशार्थतयाकस्मादिदमभिहितमितिचेत् उच्यतेद्रव्यंद्वैविध्यप्रदेशनार्थंतथाहिद्वि
धंद्रव्यंप्रदेशवत्अप्रदेशवच्च तत्रपरमाणुरप्रदेशोद्विप्रदेशादिकंतुप्रदेशवत् एतच्चद्रव्यद्वैविध्यंपुद्गलास्तिकायएवंभवति शेषाणितुधर्मास्ति
कायादीनिद्रव्याणिनियमात्सप्रदेशानिउगाहणठयाएसियहीणेइत्यादिनैरयिकोऽसंख्यातप्रदेशोऽपरस्यनैरयिकस्यतुल्यप्रदेशस्यअवगा
हनमवगाहःशरीरोच्छ्रयोअवगाहनमेवार्थोआवगाहनार्थस्तद्भावोऽवगाहनार्थतातयाअवगाहनार्थतयासियहीणेत्यादि स्याच्छब्दःप्रशंसास्ति
त्वविवादविचारणाऽनेकांतसंशयप्रश्नादिष्वर्थेषुअत्रानेकांतद्योतकस्यग्रहणंस्याद्धीनोनेकांतेनहीनइत्यर्थः स्यात्तुल्योनेकांतेनतुल्यइत्यर्थः
स्यादभ्यधिकोनेकांतेनाभ्यधिकइतिभावःकथमितिचेत् उच्यतेयस्माद्रत्नप्रभापृथिवीनैरयिकाणांभवधारणीयस्यवैक्रियस्यश
रीरस्यजघन्येनावगाहनायाअंगुलस्यासंख्येयोभागउत्कर्षतःसप्तधनूंषित्रयोहस्ताःषडंगुलानिउत्तरोत्तरासुचपृथिवीषुद्विगुणंयाव
त्सप्तमपृथिवीनैरयिकाणांजघन्याताऽवगाहनाअंगुलस्यासंख्येयोभागःउत्कर्षतःपंचधनुःशतानीति तत्रजइहीणेत्यादि यदिहीनस्ततो
ऽसंख्येयभागहीनोवास्यात्संख्येयभागहीनोवासंख्येयगुणहीनोवास्यात् असंख्येयगुणहीनो वा अथाभ्यधिकस्ततोऽसंख्येयभागाभ्यधि

भ्यधिकोवास्यादसंख्येयभागाभ्यधिकोवासंख्येयगुणाधिकोवाकथमितिचेदुच्यतेएकःकिलनारकश्चैस्त्वेनपंचधनुःशतानिअपरस्तान्येवांगुलासंख्येयभा
गाभ्यधिकोवासंख्येयगुणाधिकोवाकथमितिचेदुच्यतेएकःकिलनारकश्चैस्त्वेनपंचधनुःशतानिअपरस्तान्येवांगुलासंख्येयभागहीनानिअंगुलासंख्येय
भागश्चपंचानांधनुःशतानामसंख्येयभागेवर्त्ततेतेनसोऽगुलासंख्येयभागहीनपंचधनुःशतप्रमाणोऽपरस्यपरिपूर्णपंचधनुःशतप्रमाणस्यापेक्ष
याअसंख्येयभागहीनइतरस्त्वितरापेक्षया॥ असंख्येयभागाभ्यधिकःतथाएकःपंचधनुःशतान्युच्चैस्त्वेनापरस्तुतान्येवद्वाभ्यांत्रिभिर्वाधनुर्भिर्हीनानिते
चद्वेत्रीणिवाधनूंषिपंचानांधनुःशतानांसंख्येयभागेवर्त्ततेततःसोऽपरस्यपरिपूर्णपंचधनुःशतप्रमाणस्यापेक्षयासंख्येयभागहीनःइतरस्तुपरिपूर्णपंच
धनुःशतप्रमाणस्तदपेक्षयासंख्येयभागाधिकःतथाएकःपंचविंशंधनुःशतमुच्चैस्त्वेनापरःपरिपूर्णानिपंचधनुःशतानिपंचविंशंचधनुःशतंचतुर्भिर्गुणि
भा तंपंचधनुःशतानिशत्यधिकधनुःशतप्रमाणस्यापेक्षयासंख्येयगुणहीनोभवतितदपेक्षयात्वितरःपरिपूर्णपंचधनुःशत[illegible]
प्रमाणासंख्येयगुणाधिकास्तथा॥ एकोऽपर्याप्तावस्थायामंगुलस्यासंख्येयभागावगाहेवर्त्तते॥ अन्यस्तुपंचधनुःशतान्युच्चैस्त्वेनांगुलासंख्येयभागश्चासं
ख्येयेनगुणितःसन्पंचधनुःशतप्रमाणोभवति॥ ततोपर्याप्तावस्थायामंगुलासंख्येयभागप्रमाणेऽवगाहेवर्त्तमानःपरिपूर्णपंचधनुःशतप्र
माणापेक्षयाअसंख्येयगुणहीनःपंचधनुःशतप्रमाणस्तुतदपेक्षयाऽसंख्येयगुणाभ्यधिकःठिइएसियहीणेइत्यादि॥ यथावगाहनयाहीनोऽधिको
वचतुःस्थानपतितउक्तस्तथास्थित्यापिवक्तव्यइतिभावः॥ एतदेवाहजइहीणेअसंखेज्जइभागहीणेवाइत्यादि॥ तत्रएकस्यकिलनारकस्यत्रयस्त्रिंशत्सा
गरोपमाणिस्थितिरपरस्यतुतान्येवसमयादिन्यूनानितत्रयःसमयादिन्यूनत्रयस्त्रिंशत्सागरोपमप्रमाणस्थितिकःसपरिपूर्णत्रयस्त्रिंशत्सागरोप
मस्थितिकनारकापेक्षयाअसंख्येयभागहीनःपरिपूर्णत्रयस्त्रिंशत्सागरोपमस्थितिकतदपेक्षयाऽसंख्येयभागाभ्यधिकःसमयादेःसागरोपमापे
क्षयाअसंख्येयभागमात्रत्वात्तथाह्यसंख्येयैःसमयैरेकावलिकासंख्याताभिरावलिकाभिरेकउच्छ्वासनिश्वासकालःसप्तभिःरुच्छ्वासनिश्वासै १०
रेकःस्तोकःसप्तभिःस्तोकैरेकोलवःसप्तसप्तत्यालवानामेकोमुहूर्त्तः त्रिंशतामुहूर्तैरेकोरात्रःपंचदशभिःरहोरात्रैःपक्षोद्वाभ्यांमासोद्वादशभिःसंवत्स

रैःपल्योपमसागरोपमाणिततःसमयावलिकोच्छ्वासमुहूर्त्तदिवसाहोरात्रपक्षमाससंवत्सरयुगैर्हीनःपरिपूर्णस्थितिकनारकापेक्षयासंख्येयभा
गहीनोभवतितदपेक्षयात्वितरोऽसंख्येयभागाभ्यधिकस्तथाएकस्यत्रयस्त्रिंशत्सागरोपमाणिस्थितिःपरस्यतान्येवपल्योपमैर्न्यूनानिदशभिश्चपल्यो
पमकोटीभिरेकंसागरोपमंनिष्पद्यतेततःपल्योपमैन्यूनस्थितिकःपरिपूर्णस्थितिनारकापेक्षयासंख्येयभागाभ्यधिकःतथाएकस्यसागरोपममेकंस्थि
तिरपरस्यपरिपूर्णानित्रयस्त्रिंशत्सागरोपमाणि॥ तत्रैकसागरोपमस्थितिकःपरिपूर्णस्थितिकनारकापेक्षयासंख्येयगुणहीनःएकस्यसागरोपमस्यत्रय
स्त्रिंशतागुणनेपरिपूर्णस्थितिकत्वप्राप्तेःपरिपूर्णस्थितिकस्तुतदपेक्षयासंख्येयगुणाभ्यधिकःतथाएकस्यदशवर्षसहस्राणिस्थितिरपरस्यत्रयस्त्रिंश
त्सागरोपमाणिदशवर्षसहस्राण्यसंख्येयरूपेणगुणकारेणगुणितानित्रयस्त्रिंशत्सागरोपमाणिभवंतिभावतःदशवर्षसहस्रस्थितिकस्त्रयस्त्रिंश
त्सागरोपमस्थितिकनारकापेक्षयासंख्येयगुणहीनस्तदपेक्षयातुत्रयस्त्रिंशत्सागरोपमस्थितिकोसंख्येयगुणाभ्यधिकइति॥ तदेवमेकस्यनारकापे
क्षयाद्रव्यार्थतयातुल्यत्वमुक्तंक्षेत्रतोवगाहनंप्रतिहीनाधिकत्वेनचतुःस्थानपतितत्वंकालतोपिस्थितितोहीनाधिकत्वेनचतुःस्थानपतितत्वमि
दानींभावाश्रयंहीनाधिकत्वंप्रतिपाद्यतेयतःसकलमेवजीवद्रव्यंवापरस्परतोद्रव्यक्षेत्रकालभावैर्विभज्यतेयथाघटःतथाहिद्रव्यतएकोमा
र्त्तिकोऽपरःकांचनोराजतादिर्वा॥ क्षेत्रतएकइहत्योऽपरःपाटलिपुत्रकःकालतएकोद्यतनोऽन्यस्त्वैषमःपरुत्तनोवाभावतः॥ एवंवर्णतोऽपरस्तुरक्तादि
रेवमतःपुद्गलविपाकिनामकर्मोदयनिमित्तजीवौदयिकभावाश्रयेणहीनाधिकत्वमाह॥ ७॥ कालवन्नपज्जवेहिंसियहीणेसियतुल्लेसियअब्भहिए
अस्याक्षरघटनापूर्ववत्॥ यथाहीनत्वमभ्यधिकत्वंवातथाप्रतिपादयतिजइहीणेइत्यादिइहभावापेक्षयाहीनाधिकत्वचिंतायांहीनोवाधिकोवात्र्यंकं
षट्स्थानकेवयत्तदपेक्षयाअनंतभागहीनंतभागहीनंतस्यसर्वजीवानांतकेनभागेहृतेयल्लभ्यतेतेनानंततमेनभागेनहीनंयच्चयदपेक्षयासंख्येयभा
गहीनंतस्यापेक्षणीयस्यासंख्येयलोकाकाशप्रदेशप्रमाणेनराशिनाभागेहृतेयल्लभ्यतेतद्भागेनन्यूनंयच्चयदपेक्षयासंख्येयभागहीनंतस्या
पेक्षणीयस्योत्कृष्टसंख्येयकेनभागेहृतेयल्लभ्यतेतावताहीनंगुणनचिंतायांतुयत्तुयत्संख्येयगुणंतत्तस्यापेक्षणीयस्यसंख्येयकेनगुणितंसयत्

यावद्वर्ततितावत्प्रमाणमवसातव्यं यच्चयतोऽसंख्येयगुणंतदवधिस्ततमसंख्येयलोकाकाशप्रमाणेनगुणकारेणगुण्यतेगुणितंसत्यावद्भवतितावद
वसेयंयच्चयस्मादनंतगुणंतदवधिभूतंसर्वजीवानांतकरूतंसर्वजीवानांतकरूपेणगुणकारेणगुण्यतेगुणितंसत् यावद्भवतितावत्प्रमाणंद्रष्टव्यं तथा
चैतदेवकर्मप्रकृतिसंग्रहिण्यांषट्स्थानकप्ररूपमुपवर्णितंसव्वजीयाणंतनसंखेज्जगस्सजेठस्स भागोतिसगुणणातिसङ्तिसप्रत्यनिसप्रत्यधिकृतव
सर्वान्तषट्स्थानपतितत्वंभाव्यते तत्रकृष्णवर्णपर्यायपरिमाणंतत्तोऽसंख्यात्मकमप्यसद्भावस्थापनयाकिलदशसहस्राणि १०००० तस्यसर्वजीवानां
तकेनशतपरिमाणपरिकल्पितेनभागोह्रियतेलब्धशतं १०० तत्रैकस्यकिलनारकस्यकृष्णवर्णपर्यायपरिमाणंदशसहस्राणि अपरस्यतान्येवशतेनही
नानि ९९०० शतंचसर्वजीवानंतभागहारलब्धत्वादनंततमोभागस्ततोभागस्ततोयस्यतेनहीनानिदशसहस्राणिसोऽपरस्यपरिपूर्णदशसहस्रप्रमाण
कृष्णवर्णपर्यायस्यनारकस्यापेक्षयाऽनंतभागहीनस्तदपेक्षयातुसोऽपरकृष्णवर्णपर्यायोनंतभागाभ्यधिकः तथाकृष्णवर्णपर्यायपरिमाणस्यद
शसहस्रसंख्याकस्यासंख्येयलोकाकाशप्रमाणपरिकल्पितेनपंचाशत्परिमाणेनभागोह्रियतेलब्धंद्वेशतेतेचाऽसंख्येयतमोभागः तत्रैकस्यकिलना
रकस्यकृष्णवर्णपर्यायदशसहस्राणिशतद्वयेनहीनानि ९८०० अपरस्यपरिपूर्णानिदशसहस्राणि १०००० तत्रयःशतद्वयहीनदशसहस्रप्रमा
णकृष्णवर्णपर्यायः सपरिपूर्णकृष्णवर्णपर्यायनारकापेक्षयाऽसंख्येयभागहीनः परिपूर्णकृष्णवर्णपर्यायस्तुतदपेक्षयाऽसंख्येयभागाधिकः
२ तथातथैवकृष्णवर्णपर्यायराशेर्दशसहस्रसंख्याकस्योत्कृष्टसंख्येयकपरिमाणपरिकल्पितेनदशकपरिमाणेनभागहारेणभागोह्रियतेलब्धंसह
स्रंएषकिलसंख्याततमोभागः तत्रैकस्यनारकस्यकिलकृष्णवर्णपर्यायपरिमाणंनवसहस्राणि ९००० अपरस्यदशसहस्राणिसहस्रेणहीनानिसहस्रंच
संख्येयतमोभागइतिनवसहस्रप्रमाणकृष्णवर्णपर्यायोदशसहस्रप्रमाणकृष्णवर्णपर्यायनारकापेक्षयासंख्येयभागहीनस्तदपेक्षयान्वितरसंख्येयभा
गाधिकः तथैकस्यनारकस्यकिलकृष्णवर्णपर्यायपरिमाणंसहस्रंअपरस्यदशसहस्राणि तत्सहस्रंदशकेनोत्कृष्टसंख्यातककल्पितेनगुणितंदशस ७३
हस्रसंख्याकंभवतीति सहस्रसंख्याककृष्णवर्णपर्यायनारकापेक्षयासंख्येयगुणहीनस्तदपेक्षयापरिपूर्णकृष्णवर्णपर्यायःसंख्येयगुणाभ्यधिकः

तथाएकस्यकिलनारकस्यकृष्णवर्णपर्यायाग्रंद्वेशतेऽपरस्यपरिपूर्णानिदशसहस्राणिद्वेचशतेऽसंख्येयलोकाकाशप्रदेशपरिमाणकल्पितेनपंचाश
त्परिमाणेनगुणकारेणगुणितेदशसहस्राणिजायंतेततोद्विशतपरिमाणकृष्णवर्णपर्यायोनारकःपरिपूर्णकृष्णवर्णपर्यायनारकापेक्षयाऽसंख्येयगुणहीन
स्तदपेक्षयान्वितरोऽसंख्येयगुणाभ्यधिकः ५ तथैकस्यकिलनारकस्यकृष्णवर्णपर्यायपरिमाणंशतमपरस्यदशसहस्राणिशतंचसर्वजीवानांसकपरि
कल्पितेनशतेनगुणकारेणगुणितंजायंतेदशसहस्राणिततःशतप्रमाणकृष्णवर्णपर्यायोनारकःपरिपूर्णकृष्णवर्णपर्यायनारकापेक्षयाऽनंतगुणही
नइतरस्तुतदपेक्षयाऽनंतगुणाभ्यधिकः वाच्यःकृष्णवर्णपर्यायानधिकृत्यहानौवृद्धौचषट्स्थानपतितत्वमुक्तं एवंशेषवर्णगंधरसस्पर्शेष्वपिप्रत्येकंषट्
स्थानपतितत्वंभावनीयंदेवंपुद्गलविपाकिनामकर्मोदयजनितजीवौदयिकभावाश्रयेणषट्स्थानपतितत्वंभावनीयंइहद्रव्यतस्तुल्यत्वंवदतासंमूर्छितस
र्वप्रभेदेनिर्भेदबीजंमयूरांडकरसवदनभिव्यक्तदेशकालक्रमप्रत्ययवद्धविशेषभेदपरिणतेर्योग्यद्रव्यमित्यावेदितंअवगाहनयाचतुस्थानपतितत्वम
भिवदताक्षेत्रतःसंकोचविकोचधर्मआत्मानतुद्रव्यप्रदेशसंख्ययाइतिदर्शितंउक्तंचैतदन्यत्रापिविकसनसंकोचनयोर्नसोद्रव्यप्रदेशसंख्यायावृद्धिर्ह्रासौ
क्षेत्रतस्तुतावात्मनस्तस्मात् स्थित्याचतुस्थानपतितत्वंवदता आयुःकर्मस्थितिनिवर्तकानामध्यवसायस्थानानामुत्कर्षापकर्षवृत्तिरूपदर्शिना अन्यथा
स्थित्याचतुःस्थानपतितत्वायोगात् आयुःकर्मचोपलक्षणंतेनसर्वकस्थितिनिर्वर्तकविषयध्यवसायोत्कर्षापकर्षवृत्तिरवसातव्या कृष्णादिप
र्यायेषट्स्थानपतितत्वमुपदर्शयताएकस्यापिनारकस्यपर्यायाःअनंताःकिंपुनःसर्वेषांनारकाणामितिदर्शितं अथनारकाणांपर्यायानंत्यंपृष्टे
नभगवतानदेवपर्यायानंत्यं नत्वन्यततःकिमर्थंद्रव्यक्षेत्रकालाभिधानमिति तदयुक्तमभिप्रायापरिज्ञानात् इहनसर्वेषांसर्वेस्वपर्यायाः
समसंख्याःकिंतुषट्स्थानपतितागतआनंतरमेवदर्शितंतच्चषट्स्थानपतितत्वंपरिणामित्वमंतरेणनभवति तच्चपरिणामित्वंयथोक्तलक्षणस्यद्रव्यस्य
तिद्रव्यमभिहितंतथानकृष्णादिपर्यायैरेवपर्यायवान्जीवः किंतुतत्क्षेत्रसंकोचधर्मतयापितथातत्तदध्यवस्थानयुक्ततयापीतिख्यापना
र्थंक्षेत्रकालाभ्यांचतुस्थानपतितत्वंयुक्तमितिकृतंप्रसंगेनतदेवमवसितंनैरयिकाणांपर्यायानंत्यमिदानीमसुरकुमारेषुपर्यायानंत्यपिप

छिधुराह॥ ७॥ असुरकुमाराणं भंते केवइयापज्जवापन्नत्ताइत्यादि उक्तएवार्थः॥ प्रायः सर्वेष्वप्यसुरकुमारादिषु ततः सकलमपि चतुर्विंशतिदंडकसूत्रं भाव
नीयं॥ यस्तु विशेषः स उपदर्श्यते तत्र यत् पृथिवीकायिकादीनामवगाहनायामंगुलासंख्येयभागप्रमाणायामपि चतुःस्थानपतितत्वं तदंगुलासंख्येयभागस्या
संख्येयभेदभिन्नत्वादवसेयं॥ स्थित्याहीनत्वमप्यधिकत्वं च त्रिस्थानपतितं न चतुःस्थानपतितमसंख्येयगुणवृद्धिहान्योरसंभवात् कथं भवतीति चेत् उच्यते इह
पृथिव्यादीनां सर्वजघन्यमायुः क्षुल्लकभवग्रहणस्य च परिमाणमावलिकानां द्वे शते षट्पंचाशदधिके मुहूर्ते च द्विघटिकाप्रमाणे सर्वसंख्यया क्षुल्लकभवग्रहणा
नां पंचषष्टिसहस्राणि पंचशतानि षट्त्रिंशदधिकानि ६५५३६ उक्तं च दोन्निसयाइं नियमा छप्पन्नाइं पमाणतो होंति आवलियपमाणेणं खुड्डागभवग्गहणे
भवंति॥ एतेमुहूर्तेणं पृथिव्यादीनां च स्थितिरुत्कर्षतोपि संख्येयवर्षप्रमाणा ततोनासंख्येयगुणवृद्धिहान्योः संभवः॥ शेषवृद्धिहानित्रिकभावना त्वेवं एकस्य
किल पृथिवीकायस्य स्थितिः परिपूर्णानि द्वाविंशतिवर्षसहस्राणि अपरस्य तान्येव समयन्यूनानि ततः समयन्यूनं द्वाविंशतिवर्षसहस्रस्थितिकः परिपूर्ण
द्वाविंशतिवर्षसहस्रस्थितिकापेक्षया असंख्येयभागहीनस्तदपेक्षया त्वितरो असंख्येयभागाधिकस्तथा॥ एकस्य परिपूर्णानि द्वाविंशतिवर्षसहस्राणि
स्थितिरपरस्य तान्येवांतर्मुहूर्तादिनानि अंतर्मुहूर्तादिकं तु द्वाविंशतिवर्षसहस्राणां संख्येयतमो भागः ततोंतर्मुहूर्तादिन्यून द्वाविंशतिवर्षसहस्रस्थि
तिकः परिपूर्णद्वाविंशतिवर्षसहस्रस्थितिकापेक्षया संख्येयभागहीनः तदपेक्षया त्वितरः संख्येयभागाभ्यधिकः॥ तथा एकस्य द्वाविंशतिवर्षसहस्राणि
स्थितिरपरस्यांतर्मुहूर्तं मासो वर्षं वर्षसहस्रं वा॥ अंतर्मुहूर्तादिकं नियतपरिमाणया संख्यया गुणितं द्वाविंशतिवर्षसहस्रप्रमाणं भवति॥ तेनांतर्मुहूर्तादिप्रमा
णस्थितिकः परिपूर्णद्वाविंशतिवर्षसहस्रस्थितिकापेक्षया संख्येयगुणहीनस्तदपेक्षया तु परिपूर्णद्वाविंशतिवर्षसहस्रस्थितिकः संख्येयगुणाभ्यधिकः
एवमप्कायिकादीनामपि चतुरिंद्रियपर्यंतानां स्वस्वोत्कृष्टस्थित्यनुसारेण स्थित्या त्रिस्थानपतितत्वं भावनीयं॥ ७॥ तिर्यक्पंचेंद्रियाणां मनुष्याणां च
चतुःस्थानपतितत्वं तेषामुत्कर्षतस्त्रीणि पल्योपमानि स्थितिः पल्योपमवासंख्येयवर्षसहस्रप्रमाणमतो असंख्येयगुणवृद्धिहान्योरपि संभवात् ७२
पपद्यते चतुःस्थानपतितत्वं एवं व्यंतराणामपि तेषां जघन्यतो दशवर्षसहस्रस्थितिकत्वादुत्कर्षतः पल्योपमस्थितेः॥ ज्योतिष्कवैमानिकानां पुनः स्थित्या त्रिस्था

नपतितत्वं यतो ज्योतिष्काणां जघन्यमायुः पल्योपमाष्टभागो उत्कृष्टं वर्षलक्षाधिकं पल्योपमं वैमानिकानां जघन्यं पल्योपममुत्कृष्टं त्रयस्त्रिंशत्सागरोपमानि दश च को
टीकोटी असंख्येयपल्योपमप्रमाणं च सागरोपममतस्तेषामप्यसंख्येयगुणवृद्धिहान्यसंभवात् स्थितितस्त्रिस्थानपतितता शेषसूत्रभावना तु सुगमत्वात् स्वयं भाव
नीया तदेवं सामान्यतो नैरयिकादीनां प्रत्येकं पर्यायानंत्यं प्रतिपादितमिदानीं जघन्याद्यवगाहनाद्यधिकृत्य तेषामेव प्रत्येकं पर्यायान् प्रतिपिपादयिषुराह
॥ ७॥ जहन्नोगाहणाणं भंते इत्यादि सुगमं नवरं ठिइए चउठाणवडिए इति जघन्यावगाहनो हि दशवर्षसहस्राणि स्थितिकोपि भवति रत्नप्रभायामुत्कृष्टस्थि
तिकोपि सप्तमनरकपृथिव्यां तत्र उपपद्यते स्थित्या चतुःस्थानपतितता तिहिं नाणेहिं तिहिं अन्नाणेहिं ति इह यदा गर्भव्युत्क्रांतिकसंज्ञिपंचेंद्रियो नरकेषूत्पद्यते
तदा स नारकायुःसंवेदनप्रथमसमय एव पूर्वं स्याहीनौदारिकशरीरपरिशाटं करोति॥ तस्मिन्नेव च समये सम्यग्दृष्टेस्त्रीणि ज्ञानानि मिथ्यादृष्टेस्त्रीण्यज्ञाना
नि समुत्पद्यंते॥ ततो विग्रहेण वागत्या वैक्रियशरीरसंघातं करोति॥ यस्तु संमूर्छिमासंज्ञिपंचेंद्रियो नरकेषूत्पद्यते॥ तस्य तदानीं विभंगज्ञानं नास्तीति ज
घन्यावगाहनस्याज्ञानानि भजनया द्वे त्रीणि वेति॥ उत्कृष्टावगाहनसूत्रे स्थित्या हीनो वृद्धो वा द्विस्थानपतितत्वं तद्यथा असंख्येयभागही
नत्वं वासंख्येयभागाधिकत्वं न तु संख्येयासंख्येयगुणवृद्धि हानी कस्मादिति चेत् उच्यते॥ उत्कृष्टावगाहना हि नैरयिकाः पंचधनुःशतप्रमाणास्ते च
सप्तमनरकपृथिव्यां तत्र जघन्या स्थितिः द्वाविंशतिसागरोपमानि उत्कृष्टा त्रयस्त्रिंशत्सागरोपमाणि ततो असंख्येयसंख्येयभागहानिवृद्धी एव घटेते न सं
ख्येयगुणहानिवृद्धी तेषां चोत्कृष्टावगाहनानां त्रीणि ज्ञानानि वा नियमाद्भवंति त्र्यज्ञानानि भजनया भजना हि तो संमूर्छिमासंज्ञिपंचेंद्रियोत्पादस्य तेषामसंभ
वात्॥ अजघन्योत्कृष्टावगाहनासूत्रे यदवगाहनया चतुःस्थानपतितत्वं तदेवं अजघन्योत्कृष्टावगाहनो हि सर्वजघन्यांगुलासंख्येयभागात्परतो म
नाक् बृहत्तरांगुलासंख्येयभागादारभ्य यावदंगुलासंख्येयभागन्यूनानि पंचधनुःशतानि तावदेवं मेयः ततः सामान्यतो नैरयिकस्त्रेइवाप्युपपद्य
ते अवगाहनातश्चतुःस्थानपतितता स्थित्या चतुःस्थानपतितता सप्रतीता दशवर्षसहस्रेभ्यः आरभ्योत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणामपि तस्यां
लभ्यमानत्वात् जघन्यस्थितिसूत्रे अवगाहनया चतुःस्थानपतितत्वं तस्यावगाहनायां जघन्यतोंगुलासंख्येयभागादारभ्योत्कर्षतः सप्तानां धनुषा

मवाप्यमानत्वात् अत्रापित्रीण्यज्ञानानिकेषांचिकादाचित्कतयाद्रष्टव्यानिसंमूर्छिमासंज्ञिपंचेंद्रियेभ्यउत्पन्नानामपर्याप्तावस्थायांविभंगस्याभावात् उ
त्कृष्टस्थितिचिंतायामवगाहनयाचतुःस्थानपतितत्वमुत्कृष्टस्थितिकस्यावगाहनायाजघन्यतोंगुलासंख्येयभागादारभ्योत्कर्षतस्तर्षतःपंचानांधनुःशतानां
नामवाप्यमानत्वात् अजहणुक्कोसठिईएविएवंचेवेत्यादिअजघन्योत्कृष्टतावपितथावक्तव्यंयथाजघन्यस्थितिसूत्रेचनवरमयंविशेषोजघन्यस्थितिसूत्रेउत्कृष्ट
स्थितिसूत्रेचस्थित्यातुल्यत्वमभिहितमत्रनुस्वस्थानेपिचतुःस्थानपतितइति वक्तव्यंसमयाधिकदृशवर्षसहस्रेभ्य आरभ्योत्कर्षतःसमयोनत्रयस्त्रिंशत्सा
गरोपमाणामवाप्यमानत्वात् जघन्यगुणकालिकादिसूत्राणिसुप्रतीतानिनवरंजस्सनाणातस्सअण्णाणानत्थित्ति यस्यज्ञानानितस्याज्ञानानिनसंतीति
यतःसम्यग्दृष्टेर्ज्ञानानिमिथ्यादृष्टेरज्ञानानिसम्य ग्दृष्टित्वंचमिथ्यादृष्टित्वोपमर्देनभवति मिथ्यादृष्टित्वमपिसम्यग्दृष्टित्वोपमर्देनततोज्ञानसद्भावेअज्ञाना
भावःएवमज्ञानसद्भावेज्ञानाभावः ततउक्तं जहानाणानहअण्णाणाविभाणियव्वा नवरंजस्सअन्नाणातस्सनाणानभवंति इतिशेषपाठसिद्धमेव
मसुरकुमारादिसूत्राण्यपिभावनीयानिप्रायःसमानगमत्वात् जघन्यावगाहनादिपृथिव्यादिसूत्रेस्थित्यात्रिस्थानपतितत्वंसंख्येयवर्षायुष्कत्वात् एतच्च
वागेवसामान्यपृथिवीकायिकसूत्रेभावितंपर्यायचिंतायामज्ञानेएवमत्यज्ञानेश्रुताज्ञानलक्षणेवक्तव्येनतुज्ञानेतेषांसम्यक्त्वस्यतेषुमध्येसम्यक्त्वसहितस्य
चोत्पादासंभवात् उभयाभावोपुढवीइएसुइतिवचनात् अतएवैतद्वैवोक्तमत्रदोहिंअण्णाणेहिंइति जघन्यावगाहनद्वींद्रियसूत्रेदोहिंनाणेहिंदोहिंअन्ना
णेइतिद्वींद्रियाणांहिकेषांचिदपर्याप्तावस्थायांसासादनसम्यक्त्वमवाप्यतेसम्यग्दृष्टिश्चज्ञानेइतिद्वेज्ञानेलभ्येतेशेषाणामज्ञानेततउक्तंद्वाभ्यांज्ञानाभ्यां
द्वाभ्यामज्ञानाभ्यामिति उत्कृष्टावगाहनायांत्वपर्याप्तावस्थायाअभावात् सासादनसम्यक्त्वंनावाप्यतेततस्तत्रज्ञानेनवक्तव्येतथाचाह एवंउक्कोसिओ
गाहणाएविनवरंनाणानत्थित्ति तथाअजघन्योत्कृष्टावगाहनाकिलप्रथमसमयादूर्ध्वंभवतीत्यपर्याप्तावस्थायामपितस्याःसंभवात् सासादनसम्य
क्त्वतोज्ञानेअन्येषांचाज्ञानेइतिज्ञानेवाज्ञानेचवक्तव्येतथाचाह अजहण्णमुक्कोसोगाहणाएजहाजहन्नोगाहणाएइति तथाजघन्यस्थितिसूत्रेद्वे ७३
अज्ञानेएवंवक्तव्येनतुज्ञानेयतःसर्वजघन्यस्थितिकोलब्ध्यपर्याप्तकेषुमध्येसासादनसम्यग्दृष्टिरुत्पद्यतेकिंकारणमितिचेत् उच्यतेलब्ध्यपर्याप्त

काहिसर्वसंक्लिष्टाःसासादनसम्यग्दृष्टिश्चमनाक्शुभपरिणामस्ततःसतेषुमध्येनोत्पद्यते तेनाज्ञानेएवलभ्येतेनज्ञानेउत्कृष्टस्थितिषुपुनर्मध्येसासादन
सम्यक्त्वसहितोत्पद्यते इतिसूत्रेज्ञानेअज्ञानेचवक्तव्येतथाचाह एवंउक्कोसठिइएविनवरंदोणाणाअभहियाइति एवमेवाजघन्योत्कृष्टस्थितिसूत्र
मपिवक्तव्यं भावसूत्राणिपाठसिद्धानि एवंत्रींद्रियचतुरिंद्रियाअपिवक्तव्याः नवरंचतुरिंद्रियाणांचक्षुर्दर्शनमधिकमन्यथाचतुरिंद्रियत्वायोगादितितेषांच
क्षुर्दर्शनविषयमपिसूत्रंवक्तव्यं जघन्यावगा हनतिर्यग्पंचेंद्रियसूत्रेठिइएतिठाणवडिएइतिइहतिर्यग्पंचेंद्रियसूत्रेठिइएतिअणावडिएइतिइहतिर्यग्पं
चेंद्रियसूत्रेठि इएतिठाणावडिएइतिइहतिर्यग्पंचेंद्रियःसंख्येयवर्षायुष्कएवजघन्यावगाहनोभवति नासंख्येयवर्षायुष्कःकिंकारणमितिचेत् उच्यतेअ
संख्येयवर्षायुष्काहिमहाशरीराः कंककुक्षिपरिणामत्वात् पुष्टाहाराःप्रबलधातुपचयास्ततस्तेषांभूयान् शुक्रनिषेकोभवतिशुक्रनिषेकानुसारेणचति
र्यक्मनुष्याणामुत्पत्तिसमयेऽवगाहनेतितेषांजघन्यावगाहनालभ्यतेकिंतुसंख्येयवर्षायुषांसंख्येयवर्षायुषश्चस्थित्याश्रिस्थानपतितापनचभाविनं
प्राक्तनतउक्तंस्थित्यात्रिस्थानपतिताइति दोहिंनाणेहिंदोहिंअन्नाणेहिंइतिजघन्यावगाहनोहितिर्यग्पंचेंद्रियः संख्येयवर्षायुष्कोपर्याप्तोभवति सोपिचा
त्पकायेषुमध्येसमुत्पद्यमानस्तस्यावधिविभंगज्ञानासंभवात् द्वेज्ञानेद्वेअज्ञानेउक्तेयस्तुविभंगज्ञानसहितोनरकादुद्धृतःसंख्येयवर्षायुष्केषुतिर्यग्पंचें
द्रियेषुमध्येसमुत्पद्यमानोवक्ष्यतेसमहाकायेषूत्पद्यमानोद्रष्टव्योनाल्पकायेषुतथास्वाभाव्यादन्यथाधिकृतस्तत्रविरोधः उत्कृष्टावगाहनतिर्यग्पंचेंद्रि
यस्ततिहिंअन्नाणेहिंइतित्रिभिर्ज्ञानैस्त्रिभिरज्ञानैःषट्स्थानपतितताचीणिअज्ञानानित्रथमितिचेत् उच्यते इहयस्ययोजनसहस्रंशरीरावगाहनासउत्कृ
ष्टावगाहनःसचसंख्येयवर्षायुष्कएवगाहनःसचसंख्येयवर्षायुष्कएवभवति पर्याप्तश्चतेनतस्यत्रीणिज्ञानानित्रीवसंभवंतिस्थित्यापिचासाधुत्कृष्टा
वगाहनत्रिस्थानपतितःसंख्येयवर्षायुष्कत्वात् अजघन्योत्कृष्टावगाहनस्तुस्थित्याचतुःस्थानपतिताजघन्योत्कृष्टावगाहनोऽसंख्येयवर्षायुष्कोपि
लभ्यतेततउपपद्यतेत्रायुष्कमुक्त्वाचतुःस्थानपतितत्वंजघन्यस्थितिकतिर्यक्पंचेंद्रियसूत्रेद्वेअज्ञानेएववक्तव्येनतुज्ञानेयतोसौजघन्यस्थितिको
लब्ध्यपर्याप्तकएवतितततन्मध्येसासादनसम्यग्दृष्टिरुत्पादइति उत्कृष्टस्थितिकतिर्यक्पंचेंद्रियसूत्रेदोनाणादोअन्नाणाइति उत्कृष्टस्थितिकोहि

र्यक्पंचेंद्रियस्त्रिपल्योपमस्थितिकोभवति॥ तस्यचद्वेअज्ञानेतावन्नियदापुनःषण्मासावशेषायुर्वैमानिकेषुबद्धायुष्कोभवति॥तदातस्यद्वेज्ञाने
लभ्येतेतनउक्तंद्वेज्ञानेद्वेअज्ञानेइतिअजघन्योत्कृष्टस्थितिकतिर्यक्पंचेंद्रियसूत्रेठिइएचउठाणवडिएइति॥ अजघन्योत्कृष्टस्थितिकोहितिर्यक्पंचेंद्रियःसंख्ये
यवर्षायुष्कोपिलभ्यतेअसंख्येयवर्षायुष्कोपिसमयोनत्रिपल्योपमस्थितिकः ततश्चचतुःस्थानपतितताजघन्याभिनिबोधिकतिर्यक्पंचेंद्रियसूत्रेठि
इएचउठाणवडिएइति॥ असंख्येयवर्षायुषोपिहितिर्यक्पंचेंद्रियस्यस्वभूमिकानुसारेणजघन्ये आभिनिबोधिकश्रुतज्ञानेलभ्यतेततःसंख्येयवर्षा
युषश्चजघन्याभिनिबोधिकज्ञानेसंभवाद्भवतिस्थित्याचतुःस्थानपतितताउत्कृष्टाभिनिबोधिकज्ञानसूत्रेस्थित्यात्वत्रिस्थानपतितताबक्तव्या
इहयस्योत्कृष्टेआभिनिबोधिकश्रुतज्ञानेसनियमातसंख्येयवर्षायुष्कः संख्येयवर्षायुष्कश्चस्थित्यात्रिस्थानपतितएवयथोक्तंप्राक्॥ अवधिसूत्रेवि
भंगसूत्रेपिचस्थित्यात्रिस्थानपतितताकिंकारणमितिचेतउच्यतेअसंख्येयवर्षायुषोऽवधिविभंगासंभवात्॥ आहचमूलटीकाकारः इहविभंगेपि
नियमात्तिठाणेवडिएत्तिकारणंभन्नइइहविभंगाअसंख्येयवासाउयस्सनत्थिइत्थि॥ जघन्यावगाहनमनुष्यंसूत्रेठिइएतिठाणवडिएइतितिर्यक्पं
चेंद्रियवत्मनुष्योपिजघन्यावगाहनःसंख्येयवर्षायुष्कश्चस्थित्यात्रिस्थानपतितएवेतिनाहिंनाणेहिंइति॥ यदाकश्चित्तीर्थकरोनुत्तरोपपातिकदेवोवा
अप्रतिपतितेनावधिज्ञानेनजघन्यायामवगाहनायामुत्पद्यतेतदाअवधिज्ञानमपिलभ्यते॥ इतित्रिभिर्ज्ञानैरित्युक्तंविभंगज्ञानसहितस्तुनरका
दुद्धृत्तोजघन्यायामवगाहनायांनोत्पद्यतेतथास्वाभाव्यात्ततोविभंगज्ञानंनलभ्यते॥ इतिद्वाभ्यामज्ञानाभ्यामित्युक्तं॥ उत्कृष्टावगाहनमनुष्यसूत्रे
ठिइएसियअब्भहिएजइहीणेअसंख्येयभागहीणेजइअब्भहिएसंख्येयइभागअब्भहिएइति॥ उत्कृष्टावगाहनाहिमनुष्यास्त्रिगव्यूतानास्त्रिगव्यू
तानांस्थितिर्जघन्यतःपल्योपमासंख्येयभागहीनानित्रीणिपल्योपमानिउत्कर्षतस्तान्येवपरिपूर्णानित्रीणिपमानि॥ उक्तंच जीवाभिगमेउत्तरकुरुाए
मणुस्साणंभंतेकेवइकालंठिईपण्णत्ता गोयमा जहन्नेणंतिन्निपलिउवमासंख्येयइभागहीणाइं॥ उक्कोसेणंतिन्निपलिउवमाइंतिपल्योपमासं ७४
ख्येयभागश्चत्रयाणांपल्योपमानसंख्येयतमोभागइतिपल्योपमासंख्येयभागहीनपल्योपमत्रयस्थितिकःपरिपूर्णपल्योपमत्रयस्थितिकोपे

क्षया ऽसंख्येयभागहीनइतरस्तुद्वितीयापेक्षयासंख्येयभागाधिकःशेषावृद्धिहानलभ्यंते॥ दोनाणादोअन्नाणाइति॥ उत्कृष्टावगाहनाहिसंख्येयवर्षायुषोऽसंख्ये
यवर्षायुषांचावधिविभंगासंभवस्तथास्वाभाव्यादतोद्वेएवज्ञानेद्वेवाज्ञानेइति॥ तथाऽजघन्योत्कृष्टावगाहनःसंख्येयवर्षायुष्कोपिभवत्यसंख्येयवर्षायुष्को
पिगव्यूतद्विगव्यूतोद्धूयस्ततोवगाहनयापिचतुःस्थानपतितत्वंस्थित्यापि॥ तथाऽऽद्यैश्चतुर्भिर्मतिश्रुतावधिमनःपर्यवरूपैर्ज्ञानैःषट्स्थानपतितताते
षांचतुर्णामपिज्ञानानांतत्तद्द्रव्यादिसापेक्षक्षयोपशमवैचित्र्यतस्तारतम्यभावात् केवलज्ञानपर्यवैस्तुल्यतानिःशेषस्यावरणापगमतःप्रादुर्भूतस्य
भेदाभावात्शेषंप्रकटमंजघन्यस्थितिकमनुष्यसूत्रेदोहिंअन्नाणेहिंइतिद्वाभ्यामज्ञानश्रुताज्ञानरूपाभ्यांषट्स्थानपतिततावक्तव्यानतुतृतीयाकस्मादि
तिचेतउच्यतेजघन्यस्थितिकामनुष्याःसंमूर्छिममनुष्याश्चनियमतोमिथ्यादृष्टयस्ततस्तेषामज्ञानेएवनज्ञानेउत्कृष्टस्थितिमनुष्यसूत्रेदोनाणादोअन्ना
णाइति॥ उत्कृष्टस्थितिकाहिमनुष्यास्त्रिपल्योपमायुषस्तेषांतावद्ज्ञानेनियमेनयदापुनःषण्मासावशेषायुषोवैमानिकेषुबद्धायुषस्तदासम्यक्त्वला
भात्द्वेज्ञानेलभ्यंते॥ अवधिविभंगौवासंख्येयवर्षायुषांनस्तइतित्रीणिज्ञानानीतिनोक्तं॥ अजघन्योत्कृष्टस्थितिकमनुष्यसूत्रमजघन्योत्कृष्टावगा
हनमनुष्यसूत्रमिवाभावनीयं॥ जघन्याभिनिबोधिकमनुष्यसूत्रेद्वेज्ञानेवक्तव्येद्वेदर्शनेकिंकारणमितिचेतउच्यते॥ जघन्याभिनिबोधिकोहिजीवो
नियमादवधिमनःपर्यवज्ञानविकलःप्रबलज्ञानावरणकर्मोदयसद्भावादन्यथाजघन्याभिनिबोधिकज्ञानत्वायोगात्ततःशेषज्ञानदर्शनासं
भवादाभिनिबोधिकज्ञानपर्यवैस्तुल्यःश्रुतज्ञानपर्यवैर्द्वाभ्यांदर्शनाभ्यांचषट्स्थानपतितउक्तः॥ उत्कृष्टाभिनिबोधिकासूत्रेठिइएतिठाणवडिएइति
उत्कृष्टाभिनिबोधिकोहिनियमात्संख्येयवर्षायुरसंख्येयवर्षायुषस्तथाभवस्वाभाव्यानसर्वोत्कृष्टाभिनिबोधिकज्ञानासंभवात्संख्येयवर्षायु
श्चभागुत्कयुक्तःस्थित्यात्रिस्थानपतितइतिजघन्यावधिस्तंत्रैवअवगाहनयात्रिस्थानपतितोवक्तव्यः॥ यतःसर्वजघन्यावधिर्यथोक्तस्वरूपोम
नुष्याणांपारभविकोनभवति॥ किंतुतद्भवभावीसोपिचपर्याप्तावस्थायामपर्याप्तावस्थायांतद्योग्यविशुद्ध्यभावात्॥ उत्कृष्टोप्यवधिर्भावतश्चा
रित्रिणस्ततोजघन्यावधिरुत्कृष्टावधिर्वाऽवगाहनयात्रिस्थानपतितःअजघन्योत्कृष्टावधिःपारभविकोपिसंभवति॥ ततोऽपर्याप्तावस्थायामपि

DR. BHAU DAJI MEMORIAL

नस्यसंभवादजघन्योत्कृष्टावधिरवगाहनया चतुःस्थानपतितः स्थित्या तु जघन्यावधिरुत्कृष्टावधिरजघन्योत्कृष्टावधिरपि वा त्रिस्थानपतितः असंख्येयव
र्षायुषामवधेरसंभवात् संख्येयवर्षायुषां च त्रिस्थानपतितत्वात् जघन्यमनःपर्यवज्ञानी उत्कृष्टमनःपर्यवज्ञानी च स्थित्या त्रिस्थानपतितः चारित्रिणामे
व मनःपर्यवज्ञानसद्भावात् चारित्रिणां च संख्येयवर्षायुष्कत्वात् केवलज्ञानसूत्रे तु ओगाहणठयाए चउठाणवडिए इति केवलिसमुद्घातं प्रतीत्य तथाहि के
वलिसमुद्घातमतः केवली शेषकेवलिभ्योऽसंख्येयगुणावगाहनस्तदपेक्षया शेषाः केवलिनो ऽसंख्येयगुणहीनावगाहनाः स्वस्थाने तु शेषाः केवलिन
स्त्रिस्थानपतिता इति स्थित्या त्रिस्थानपतितत्वं संख्येयवर्षायुष्कत्वात् व्यंतराणां यथा असुरकुमाराः ज्योतिष्कवैमानिकाश्चापि तथैव नवरं ते स्थित्या त्रिस्था
नपतिता वक्तव्याः एतच्च प्रागेव भावितमुपसंहारमाह ग्रंथाग्रं ५००० सेत्तं जीवपज्जवा तदेते जीवपर्यायाः संप्रत्यजीवपर्यायान् पृच्छति ५ अजीव
पज्जवाणं भंते इत्यादि रूवि अजीवपज्जवा य अरूवि अजीवपज्जवा य इति रूपमिति उपलक्षणमेतत् गंधरसस्पर्शाश्च विद्यंते येषां ते रूपिणस्ते च
ते अजीवाश्च रूप्यजीवास्तेषां पर्यायाः रूप्यजीवपर्याया इत्यर्थः तद्विपरीता अरूप्यजीवपर्यायाः अमूर्ताजीवपर्याया इति भावः धम्मत्थिकाए
त्यादि धर्मास्तिकाय इति परिपूर्णमवयवि द्रव्यं धर्मास्तिकायस्य देशास्तस्यैवार्द्धादिरूपो विभागः धर्मास्तिकायस्य प्रदेशास्तस्यैव निर्विभागा भागाः एवं
निकमधर्मास्तिकाये आकाशास्तिकाये च भावनीयं एतावता चान्योन्यानुगमात्मकावयवावयविस्वरूपं धर्मास्तिकायादिकं वस्तु इति प्रतिपादितं
दशाभेद्धादसमयः न त्वत्र पर्यायाश्च कुमुपक्रांतास्तत्कथं द्रव्यमत्रोपन्यासः कृतः उच्यते पर्यायपर्यायिणोः कथंचिद्भेदख्यापनार्थः एवमुत्त
रोपि ग्रंथः आह च मूलटीकाकारः अत्र सर्वत्र पर्यायपर्यायिणोः कथंचिद्भेदख्यापनार्थमित्थं सूत्रोपन्यास इति परमार्थतस्त्वेतद्द्रष्टव्यं धर्मास्तिका
यदेशत्वं धर्मास्तिकायप्रदेशत्वमित्यादि तेणं भंते किं संखेज्जा इत्यादि ते स्कंधादयः प्रत्येकं किं संख्येया असंख्येया अनंता भगवानाह अ
णंता एतदेव भावयति सेकेणठेणं भंते इत्यादि पाठसिद्धं संप्रति दंडकक्रमेण परमाणुपुद्गलादीनां पर्यायाश्चिंतनीयाः दंडकक्रमश्चायं प्रथमतः ७९
सामान्येन परमाण्वादयश्चिंतनीयास्तदनंतरं त एव एकप्रदेशाद्यवगाढास्तत एकसमयादिस्थितिकास्तदनंतरमेकगुणकालकादयः ततो ज

घन्याद्यवगाहनाप्रकारेण तदनंतरं जघन्यस्थित्यादिभेदेन ततो जघन्यगुणकालादिक्रमेण तदनंतरं जघन्यप्रदेशादिना भेदेनेति उक्तं च अणुमाइ
उहियाणं खेत्ताइपएससंगयाणं च जहन्नावगाहणाईण चेव जहन्नाइदेसाणं अस्यायमक्षरगमनिका प्रथमतो ऽण्वादीनां पर्यायचिंता कर्त्तव्या तदनंतरं दे
शादिप्रदेशसंगतानां अत्रादिशब्दात् कालभावपरिग्रहः ततोयमर्थः प्रथमतः क्षेत्रप्रदेशैरेकादिभिः संगतानां चिंता कर्त्तव्या तदनंतरं कालप्रदेशै
रेकादिसमयैस्ततो भावप्रदेशैरेकगुणकालकादिभिः ततस्तदनंतरं जघन्याद्यवगाहनादीनामिति अत्रादिशब्देन मध्यमोत्कृष्टावगाहना जघन्यमध्यमो
त्कृष्टस्थितिजघन्यमध्यमोत्कृष्टगुणकालकादिवर्णपरिग्रहः ततो जघन्यादिप्रदेशा जघन्यादिप्रदेशानां मध्यमप्रदेशानां मध्यजघन्योत्कृष्टप्रदे
शानामिति तत्र प्रथमतः क्रमेण परमाण्वादीनां चिंतां कुर्वन्नाह ७ परमाणुपोग्गलाणं भंते इत्यादि स्थित्या चतुःस्थानपतितत्वं परमाणोः समया
दारभ्योत्कर्षतो ऽसंख्येयकालमवस्थानभावात् कालादिवर्णपर्यायैः षट्स्थानपतिता एकस्यापि परमाणोः पर्यायानंत्याविरोधात् ननु परि
माणुरप्रदेशो गीयते ततः कथं पर्यायानंत्याविरोधः पर्यायानंत्ये नियमतः प्रदेशोत्कर्षस्तदयुक्तं वस्तुसत्त्वापरिज्ञानात् परमाणुर्हि अप्रदेशो गीयते द्र
व्यरूपतया सांशो न भवतीति ननु कालभावाभ्यामपि अपएसो दव्वठयाए इति वचनात् ततः कालभावाभ्यां सप्रदेशत्वेपि न कश्चिद्दोषः तथा
परमाण्वादीनामसंख्यातप्रदेशकस्कंधपर्यंतानां केषांचिदनंतप्रदेशकानामपि स्कंधानां तथा एकप्रदेशावगाढानां यावत्संख्यातप्रदेशा
वगाढानां शीतोष्णस्निग्धरूक्षाश्चत्वार एव स्पर्शा इति तैरेव परमाण्वादीनां षट्स्थानपतितता वक्तव्या न शेषैः द्विप्रदेशकस्कंधसूत्रे ओगाह
णठयाए सिय हीणे सिय तुल्ले सिअ अब्भहिए इत्यादि यदा द्वावपि द्विप्रदेशकौ स्कंधौ द्विप्रदेशावगाढावेकप्रदेशावगाढावेकप्रदेशावगाढौ वा
भवतस्तदा तुल्यावगाहनौ यदा त्वेको द्विप्रदेशावगाढो ऽपरस्त्वेकप्रदेशावगाढस्तदा एकप्रदेशावगाढो द्विप्रदेशावगाढापेक्षया प्रदेशहीनो
द्विप्रदेशावगाढस्तु तदपेक्षया प्रदेशाभ्यधिकः शेषं प्राग्वत् त्रिप्रदेशकस्कंधसूत्रे ओगाहणठयाए सिय हीणे इत्यादि यदा द्वावपि त्रिप्रदेश
कौ स्कंधौ त्रिप्रदेशावगाढौ द्विप्रदेशावगाढौ वा तदा तुल्यौ यदा त्वेकस्त्रिप्रदेशावगाढो वा द्विप्रदेशावगाढो वा अपरस्तु द्विप्रदेशावगाढ एकप्र

देशावगाढोवात्तदाद्विप्रदेशागाढोयथाकर्मंत्रिप्रदेशावगाढापेक्षयाएकप्रदेशावगाढद्विप्रदेशावगाढोतुनदपेक्षयाएकप्रदेशाभ्यधिकोयदाचैक
स्त्रिप्रदेशावगाढोऽपरएकप्रदेशावगाढस्तदैकप्रदेशावगाढस्त्रिप्रदेशावगाढापेक्षयाद्विप्रदेशहीनस्त्रिप्रदेशावगाढस्तुनदपेक्षयाद्विप्रदेशाभ्यधि
कः एवमेकैकप्रदेशपरिवृद्ध्याचतुःप्रदेशादिषुस्कंधेष्ववगाहनामधिकृत्यहानिर्वृद्धिर्भावनीयावद्दशप्रदेशकस्कंधस्तस्मिंश्चदशकेस्कंधे
एवंवक्तव्यंजइहीणेपएसहीणेवादुपएसहीणेवाजावनवपएसहीणेवाअहअब्भहिएपएसमब्भहिएवा दुपएसमब्भहिएवाजावनवपएसमब्भहि
एइतिभावनापूर्वोक्तामसारेणस्वयंकर्तव्याः संख्यातप्रदेशकस्कंधसत्रेउगाहणट्ठयाएदुट्ठाणवडिएइतिसंख्येयभागेनसंख्येयगुणेनवेतिअसंख्या
तप्रदेशकस्कंधउगाहणट्ठयाएचउट्ठाणवडिएइतिअसंख्यातभागेनसंख्यातगुणेनासंख्यातगुणेनेति॥ अनंतप्रदेशकस्कंधेप्यवगाहनार्थतयाचतुः
स्थानपतितात्ऽअनंतप्रदेशावगाहनायाअसंभवात्ऽअनंतभागानंतगुणाभ्यांवृद्धिहान्योरसंभवात्॥ एगपएसोगाढाणंपोग्गलाणंभंतेइत्यादिश्र
त्रदव्वट्ठयाएतुल्लेपएसट्ठयाएछट्ठाणवडिएइदमपिविभाक्षितैकप्रदेशावगाढंपरमाण्वादिकंद्रव्यमिदमप्यपरैकप्रदेशावगाढंद्विप्रदेशादिकंद्रव्यमि
तिद्रव्यार्थतयानुल्यतानुल्यतात्प्रदेशार्थतयाषट्स्थानपतिततात्ऽअनंतप्रदेशकस्यापिस्कंधस्यैकस्मिन्नाकाशप्रदेशेऽवगाहसंभवात्॥ शेषंसुगमं
एवंस्थितिभावाश्रयाण्यपिसूत्राणिउपयुज्यभावनीयानिजहन्नोगाहणगाणंभंतेदुपदेसियाणमित्यादिजघन्यादिप्रदेशकस्यस्कंधस्यावगा
हनाएकप्रदेशात्मिकाउत्कृष्टाद्विप्रदेशात्मिकाअत्रापांतरालंनास्तीतिमध्यमानलभ्यतेतनउक्तमजहन्नमणुक्कोसोगाहणउनत्थिइत्थिन्त्रिप्रदेशकस्यज
घन्यावगाहनाएकप्रदेशरूपा [·] मध्यमाद्विप्रदेशरूपा [:] उत्कृष्टात्रिप्रदेशरूपा [∴] चतुःप्रदेशस्यजघन्याएकप्रदेशरूपा [·] उत्कृष्टाचतुः
प्रदेशात्मिका [::] मध्यमाद्विविधाद्विप्रदेशात्मिका [:] त्रिप्रदेशात्मिकावा [∴] एवंचसतिमध्यमावगाहनस्यचतुःप्रदेशकोमध्यमावगाहनच
तुःप्रदेशकापेक्षयायदिहीनस्तर्हिप्रदेशनोहीनोभवतिअथाभ्यधिकस्ततःप्रदेशतोभ्यधिकः एवंपंचप्रदेशादिषुस्कंधेषुमध्यमावगाहनामधि
कृत्यप्रदेशपरिवृद्ध्यावृद्धिर्हानिश्चतावद्वक्तव्यायावद्दशकेप्रदेशस्कंधसत्तप्रदेशपरिवृद्धिःसाचैवंवक्तव्या अजहन्नमणुक्कोसोगाहणएदसपएसि

ए॥ अजहन्नमणुक्कोसोगाहणस्सदसपएसियस्सखंधस्सउगाहणट्ठयाएसियहीणेसियतुल्लेसियअब्भहिएजइहीणेपएसहीणेजावसत्तपएसहीणेअहअ
ब्भहिएपएसमब्भहिएजावसत्तपएसमब्भहिएइतिशेषंसूत्रंस्वयमुपयुज्यपरिभावनीयंसुगमत्वात्तत्परमनंतप्रदेशकोत्कृष्टावगाहनाचिंतायांठिइएविनु
ल्लेइतिउत्कृष्टावगाहनःकिलानंतप्रदेशकःस्कंधःसउच्यतेयःसमस्तलोकव्यापीसचाचित्तमहास्कंधःकेवलिसमुद्घातकर्मस्कंधोवातयोश्चो
भयोरपिदंडकपाटमंथांतरपूरणलक्षणचतुःसमयप्रमाणत्वेनतुल्यकालत्वतःशेषंसूत्रमापदपरिसमाप्तेःप्रागुक्तभावनानुसारेणस्वयमुपयुज्यपरिभा
वनीयंनवरंजघन्यप्रदेशकास्कंधादिप्रदेशकाउत्कृष्टप्रदेशाःसर्वोत्कृष्टाअनंतप्रदेशाः॥ ७७॥ इतिश्रीमलयगिरिविरचितायांप्रज्ञापनटीकायां
विशेषाख्यंपंचमंपदंसमाप्तं॥ ॥तदेवंव्याख्यातंपंचमंपदंसंप्रतिषष्ठमारभ्यते तस्यचायमभिसंबंधः इहानंतरपदेऔदयिकभावाश्रयंपर्या
यपरिमाणावधारणंप्रतिपादितमिहत्वौदयिकक्षायोपशमिकविषयाःसत्वानामुपपातविरहादयश्चिंत्यंतेतत्रादावियमधिकारसंग्रहिणिगाथा
बारसचउवीसाइंइत्यादिप्रथमंगतिषुसामान्यतःउपपातविरहस्योद्वर्त्तनाविरहस्यचद्वादशमुहूर्तप्रमाणंवक्तव्यंतदनंतरंनैरयिकादिषुभेदेषूप
पातविरहस्योद्वर्त्तनाविरहस्यचतुर्विंशतिमुहूर्तागतिषुप्रत्येकमादौवक्तव्याः ततःसंतरत्तिसांतरंनैरयिकादयउत्पद्यंतेनिरंतरंचेतिवक्तव्यंतदनं
तरमेकसमयेननैरयिकादयःप्रत्येकंकतिउत्पद्यंतेकतिवाउद्वर्त्तंतेइतिचिंतनीयं ततःकुतउत्पद्यंतेनारकादयइतिचिंत्यंततउव्वट्टणाइतिनैरयि
कादयउद्वृत्ताःसंतःक्वोत्पद्यंतेइतिवक्तव्यंतदनंतरंकतिभागावशेषेऽनुभूयमानभवायुषिजीवाःपारभविकमायुर्बध्नंतीतिवक्तव्यं तथाकतिभि
राकर्षैरुत्कर्षतः आयुर्बंधकाइतिचिंतायांअट्ठआकर्षावक्तव्या एषसंग्रहणिगाथासंक्षेपार्थः एतमेवक्रमेणविवरीषुराह॥ निरयगईणंभंतेके
वइयंकालंविरहियाउववाएणंपन्नत्ताइत्यादि॥ निरयगतिर्नामनरकगतिनामकर्मोदयजनितोजीवस्यौदयिकोभवः संवेकःसचैकःसप्तपृथिवी
व्यापीचेतिएकवचनं॥ सप्तानांचपृथिवीनांपरिहःणमितिवाक्यालंकारेभदंतेतिगुर्वामंत्रणेपरमकल्याणयोगिन्केवइयंतिकियंतंकालंविरहे
ताःशून्याउपपातेनपपतनंउपपातस्तदन्यगतिकानांनारकत्वेनोत्पादइतिभावःतेनप्रज्ञप्ताःरूपिताभगवताअन्यैश्चऋषभादिभिस्तीर्थकरैः

एवंप्रश्नेकृतेभगवानाह। गौतमजघन्यतएकंसमयंयावत्उत्कर्षतोद्वादशमुहूर्त्तान्अत्रमुग्धप्रेरकआह। नन्वेकस्यामपिपृथिव्यामग्रेद्वादश
मुहूर्तप्रमाणउपपातविरहोनवक्ष्यते। चतुर्विंशतिमुहूर्त्तादिप्रमाणस्यवक्ष्यमाणत्वात्ततःकथंसर्वपृथिवीसमुदायेपिद्वादशमुहूर्त्तप्रमाणःप्र
त्येकमभावेसमुदायेऽप्यभावादितिन्यायस्यश्रवणात् तदयुक्तंतत्त्वापरिज्ञानात्। यद्यपिहिनामरत्नप्रभादिष्वेकैकनिर्द्धारणेनचतुर्विंशतिमुहू
र्त्तादिप्रमाणउपपातविरहोवक्ष्यते। तथापियदासप्तापिपृथिवीसमुदितोपेक्ष्योपपातविरहश्चिंत्यते। तदासद्वादशमुहूर्त्तप्रमाणएवलभ्यते
द्वादशमुहूर्त्तानंतरमवश्यमन्यतरस्यांपृथिव्यामुत्पादसंभवात्तथाकेवलवेदसोपलब्धेः यस्तुप्रत्येकमभावेसमुदायेप्यभावइतिन्यायःसका
रणाकार्यधर्मानुगमचिंतायांनान्यत्रेत्यदोषः यथानरकगतिर्द्वादशमुहूर्त्तानुत्कर्षतउपपातेनविरहिताएवंतिर्यग्मनुष्यदेवगतयोपिसिद्धिगतिस्तूत्क
र्षतःषण्मासानुपपातेनविरहिता एवमुद्वर्त्तनापिनवरंसिद्धानोद्वर्त्तंतेतेषांसाद्यपर्यवसितकालतयाशाश्वतत्वादितिसिद्धिरुद्वर्तनयाविरहिताव
क्तव्या गतंप्रथमंद्वारमिदानींचतुर्विंशतिरितिद्वितीयंद्वारमभिधित्सुराह। ७७ रयणप्पभापुढविनेरइयाणंभंतेकेवइयंकालंविरहियाउववा
एणंपन्नत्ताइत्यादि पाठसिद्धं नवरमुत्कर्षविषयाइमाःसंग्रहणिगाथाः चउवीसयंमुहुत्तासत्तयराइंदियाइंपरेकायमासाएक्कोदुन्निउचउ
रोछम्मासनरयेसुकम्मस्साउकोसेणंचउवीसमुहुत्ताभवणवासीसु अविरहियापुढवाईविगलाणंतोमुहुत्तंतु संमुच्छतिरिपणिंदियए
यंवियगब्भवारसमुहुत्ता संमुच्छगब्भमणुयाकमसोचउवीसवारसय वणजोइससोहम्मीसाणकप्पचउवीसईमुहुत्ताउकप्पेसणंकुमारे
दिवसणववीसइमुहुत्तामाहिंदेराईंदियवारसदसमुहुत्तबंभलोगंमि राइंदिअद्धतेवीसलंतएहोंतिपणयालो महसूकंमीअसईसहस्सा
रियतनोउक्कप्पदुगेमासासंख्येयानहवासासंख्येयाउवरिदुगे ८ हेठिममज्झिमउवरिमजहसंखंसयसहस्सलक्खकोडीवासाणं विजे
याईसेणंविरहकालो कालोसंखातीतोविजयाइसुचउसुहोइनायव्वो संख्येयापलस्सउभागोसव्वट्ठसिद्धम्मि गतंद्वितीयद्वार ७७
मधुनातृतीयमाह ७७ नेरईयाणंभंतेकिंसंतरंउववज्जंतिइत्यादिपाठसिद्धं प्रागुक्तसूत्रार्थानुस्मरणेभावार्थस्यसुप्रतीतत्वात्गतंतृ

तीयंद्वारमिदानींचतुर्थद्वारमाह॥७७॥ नेरइयाणंभंतेएगसमएणंकेवइयाउववज्जंति॥इत्यादिनिगदसिद्धंनवरंवनस्पतिसूत्रेसठाणुववायंपडुच्चअण
समयमविरहियाअणंताइतिस्वस्थानेवनस्पतीनांवनस्पतित्वेनोत्पत्तिमंगीकृत्येत्यर्थःयद्यनंतरभववनस्पतयएववनस्पतित्वेनोत्पद्यमानाश्चिंत्यंतेतदाप्रतिसमयविर
हितंसर्वकालमनंताविज्ञेयाःप्रतिनिगोदमसंख्येयभागस्यनिरंतरमुत्पद्यमानतयाउद्वर्तमानतयाचलभ्यमानत्वात्॥परठाणुववायंपडुच्चअणुसम
यमविरहियमसंखेज्जाइति॥परस्थानंपृथिव्यादयःकिमुक्तंभवति यदिपृथिव्यादयःकिमुक्तंभवति॥यदिपृथिव्यादयःस्वभवादुद्वृत्यवनस्पतिषूत्पद्य
मानाश्चिंत्यंतेतदाअनुसमयमविरहितमसंख्येयावक्तव्याइति॥तथागर्भव्युत्क्रांतिकामनुष्याउत्कृष्टपदेपिसंख्यास्ततस्तत्सूत्रेउत्कर्षतःसंख्येयाव
क्तव्यास्तथाआनतादिकेषुमनुष्याएवोत्पद्यंतेनतिर्यंचोपिमनुष्याश्चसंख्येयाएवेत्यानतादिसूत्रेष्वपिसंख्येयाएववक्तव्यानासंख्येयाःसिद्धिगतावुत्क
र्षतोऽष्टशतंएवमुद्वर्त्तनासूत्रमपिवक्तव्यंनवरंजोइसवेमाणियाणंचयणेणंअभिलावोकायव्वोइतिज्योतिष्कवैमानिकानांहिस्वभावादुद्वर्त्तनंच्यव
नमित्युच्यते॥तथानादिवप्रसिद्धस्ततस्तत्सूत्रेच्यवनेनाभिलापःकर्त्तव्यःसचैवंजोइसियाणंभंतेएगसमएणंकेवइयाचयंतिगोयमाजहन्ने
णंएगोवादोवाइत्यादिगतंचतुर्थद्वारमधुनापंचमंद्वारमभिधित्सुराह॥७७॥ नेरइयाणंभंतेकओहिंतोइत्यादिपाठसिद्धं॥नवरमेषसंक्षेपार्थः
सामान्यतोनरकोपपातचिंतायांरत्नप्रभोपपातचिंतायांचदेवनारकपृथिव्यादिपंचकविगलेंद्रियत्रिकाणांतथाऽसंख्येयवर्षायुष्कचतुष्पदखचराणां
शेषाणामपिचपर्याप्तकानांतिर्यक्पंचेंद्रियाणांतथामनुष्याणांसंमूर्च्छिमाणांगर्भव्युत्क्रांतिकानामप्यकर्मभूमिजानामंतरद्वीपजानांकर्मभूमिजानाम
प्यसंख्येयवर्षायुषामपिअपर्याप्तानांप्रतिषेधःशेषाणांविधानंशर्कराप्रभायांसंमूर्च्छिमानामपिप्रतिषेधःवालुकाप्रभायांभुजपरिसर्पाणाम
पिपंकप्रभायांखचराणामपिधूमप्रभायांचतुष्पदानामपितःप्रभायामुरःपरिसर्पाणामपिसप्तमपृथिव्यांस्त्रीणामपिभवनवासिषूपपातचिं
तायांदेवनारकपृथिव्यादिपंचकविकलेंद्रियत्रिकापर्याप्ततिर्यक्पंचेंद्रियसंमूर्च्छिमापर्याप्तगर्भव्युत्क्रांतिकमनुष्याणांप्रतिषेधःशेषाणांविधा
नंपृथिव्यबनस्पतिषुसकलनैरयिकसनत्कुमारादिदेवाणांतेजोवायुद्वित्रिचतुरिंद्रियेषुसर्वनारकसर्वदेवानांतिर्यक्पंचेंद्रियेष्वानतादिदेवानांमनु

थ्वेषुसप्तमपृथिवीनारकेतेजोवायूनांव्यंतरेषुदेवनारकपृथिव्यादिपंचकविकलेंद्रियत्रिकापर्याप्ततिर्यग्पंचेंद्रियसंमूर्छिमापर्याप्तगर्भव्युत्क्रांतेकमनुष्या
णांज्योतिष्केषुसंमूर्छिमतिर्यक्पंचेंद्रियासंख्येयासंख्येयवर्षायुष्कखचरांतरद्वीपजमनुष्याणामपिनिषेधः एवंसौधर्मेशानयोरपिसनत्कुमारादिषुसह
स्रारपर्यंतेषुकर्मभूमिजासंख्येयवर्षायुष्ककर्मभूमिजानामपिप्रतिषेधः आनतादिषुतिर्यक्पंचेंद्रियाणामपिविजयादिषुमिथ्यादृष्टिमनुष्याणामपी
तिगतंपंचमद्वारमिदानींषष्ठंद्वारमभिधित्सुराह॥ नेरइयाणंभंतेअणंतरंउव्वट्टित्ताकहिंउववज्जंतीत्यादिपाठसिद्धंनवरंरमत्राप्येषसंक्षेपार्थः॥ नेर
यिकाणांस्वभावादुद्धृतानांगर्भजसंख्येयवर्षायुष्कतिर्यक्पंचेंद्रियमनुष्येषूत्पादः॥ अधःसप्तमपृथिवीनारकाणांगर्भजसंख्येयवर्षायुष्कतिर्यक्पं
चेंद्रियेष्वेवअसुरकुमारादिभवनव्यंतरज्योतिष्कसौधर्मेशानदेवानांबादरपर्याप्तपृथिव्यब्वनस्पतिगर्भजसंख्येयवर्षायुष्कतिर्यक्पंचेंद्रियमनुष्येषु
पृथिव्यब्वनस्पति .. द्वित्रिचतुरिंद्रियाणांतिर्यग्गतौमनुष्यगतौचतेजोवायूनांतिर्यग्गतावेवतिर्यक्पंचेंद्रियाणांनारकतिर्यग्मनुष्यदेवगतिषुनवरंवै
मानिकेषुसहस्रारपर्यंतेषुमनुष्याणांसर्वेष्वपिस्थानेषुसनत्कुमारादिदेवानांसहस्रारदेवपर्यंतानांगर्भजसंख्येयवर्षायुष्कतिर्यक्पंचेंद्रियमनु
ष्येषुआनतादिदेवानांगर्भजसंख्येयवर्षायुमनुष्येष्वेवतिगतंषष्ठद्वारमिदानींसप्तमंद्वारंतस्यचायमभिसंबंधः॥ येषांजीवानांनारकादिषुविविधउ
पपातोवर्णितस्तेर्जीवैःपूर्वभववर्त्तमानैरायुर्बद्धंततःपश्चादुपपातोऽन्यथोपपाताऽयोगात्तत्रकियतिपूर्वभवायुषिशेषेपारभविकमायुर्बद्धमितिसंश
योनः॥ पृच्छति॥ ७॥ नेरइयाणंभंतेकइभागावसेसाउयापरभवियाउयंबंधति॥ इत्यादिपाठसिद्धंतदेवंयद्भागावशेषेअनुभूयमानभवायुषिपारभवि
कमायुर्बध्नंतितत्प्रतिपादितंसंप्रतियत्प्रकारंबध्नंतितत्प्रकारंनैरयिकादिदंडकक्रमेणप्रतिपादयति॥ ७॥ नेरईयाणंभंतेकइविहेआउयबंधेपन्नत्तेइ
त्यादिजाइनामनिहत्ताउ एइतिजातिरेकेंद्रियजात्यादिः पंचप्रकारासैवनामनामकर्मणउत्तरप्रकृतिविशेषारूपंजातिनामतेनसहनिधत्तंनिषिक्तं ७८
यदायुस्तद्यातिनामनिधत्तायुः निषेकश्चकर्मपुद्गलानामनुभवनार्थंरचनासाचैवं॥ क्षणामोत्तणसगमवाहंपढमाइठिइएबहुतरंदव्वं सेसेवि
सेसहीणंजावुक्कोसंतिउक्कोसागतिनामनिहत्ताउएइतिगतिर्नरकगत्यादिभेदाच्चतुर्धासैवनामगतिनामतेनसहनिधत्तमायुर्गतिनामनिधत्तायुः॥

स्थितिर्यत्तेनभावेनभावेनस्थातव्यं॥ तत्प्रधानंनामस्थितिनामयत्यस्मिन्भवेउदयमागतमवतिष्ठतेनतुगतिजातिशरीरांगोपांगादिव्यतिरिक्तंस्थितिनामावसे
यमितिभावः॥ गत्यादीनांवर्जनंतेषांस्वपदैःगइनामनिहत्ताउएइत्यादिभिरुपात्तत्वात्तेनसहनिधत्तमायुःस्थितिनामनिधत्तायुस्तथावगाहनाशरी
रमौदारिकादितस्यनामऔदारिकादिशरीरनामकर्मअवगाहनानामशेषंतथैवप्रदेशाःकर्मपरिमाणवर्त्तिनःप्रदेशाःसंक्रमतोऽप्यनुभूयमानाःपरि
गृह्यंतेतत्प्रधानंनामप्रदेशनामकिमुक्तंभवति॥ तस्मिन्भवेप्रदेशतोऽनुभूयतेतत्प्रदेशनामेति॥ अनेनविपाकोदयमप्राप्तमपिनामपरिगृहीतंतेनप्रदे
शनाम्नासहनिधत्तमायुःप्रदेशनामनिधत्तायुः तथानुभावोविपाकःसचेहप्रकर्षप्राप्तःपरिगृह्यतेतत्प्रधानंनाम अनुभावनामयत्यस्मिन्भवेतीव्रविपा
कंनामकर्मानुभूयतेतद्यथानारकायुषिअशुभवर्णगंधरसस्पर्शोपघातानादेयदुःस्वरायशःकीर्त्यादिनामानितदनुभावनामतेनसहनिधत्तमायुरनुभा
वनानिधत्तायुःअथकस्मात्जात्यादिनामकर्मभिरायुर्विशेष्यतेऽत्येत्यायुःकर्मप्राधान्यख्यापनार्थंतथाहिनारकाद्यायुरुदयेसतिजात्यादिनामकर्मणामु
दयोभवतिभवत्यायुषःप्रधानताइतिअथजात्यादिना॥ सविशिष्टमायुःकियद्भिराकर्षैर्बध्नातीतिजिज्ञासुर्जीवादिदंडकक्रमेणपृच्छति॥ ७॥ जीवाणंभंते
जाइनामनिहत्ताउयंकइहिंआगरिसेहिंपगरिंतीत्यादि॥ आकर्षोनामतथाविधेनप्रयत्नेनकर्मपुद्गलोपादानंयथागोपानीयंपिबतीभयेनपुनःपुन
राघोटयति॥ एवंजीवोपियदातीव्रेणायुर्बंधाध्यवसायेनजातिनामनिधत्तायुरन्यद्वाबध्नातितदाएकेनमंदेनद्वाभ्यांत्रिभिर्वामंतरेणत्रिभिश्च
तुर्भिर्वामंदतमेनपंचभिःषड्भिःसप्तभिरष्टभिर्वाइहजात्यादिनाम्नाकर्मनियमत्वायुषासहबध्यमानानामवसानत्योनशेषकालंकासंचितप्रकृती
नांध्रुवबंधिनीत्वादपरासांपरावर्तमानत्वात्प्रभूतकालमपिबंधसंभवेनाकर्षानियमात्॥ ७॥ इतिश्रीमलयगिरिविरचितायांप्रज्ञापनाटीकायांव्यु
त्क्रांत्याख्यषष्ठपदंसमाप्तः॥ ॥व्याख्यातंषष्ठंपदमिदानींसप्तममारभ्यते॥ तस्यचायमभिसंबंधः॥ इहानंतरपदेसत्त्वानामुपपातविरहादायाभिहि
तान्यस्मिन्पुनर्नारकादिभावेनात्पन्नानांप्राणापानपर्याप्त्यापर्याप्तानांयथासंभवमुच्छ्वासनिश्वासक्रियाविरहाविरहकालपरिमाणमभिधेयमि
त्यनेनसंबंधेनायातस्यास्येदमादिसूत्रं॥ ७॥ नेरइयाणंभंतेइत्यादि॥ नैरयिकाणमितिवाक्यालंकारेभदंतकेवइकालस्सइतिप्राकृतत्वात्सप्तम्यर्थे

म्यर्थेतृतीयार्थेचाषष्ठीततोयमर्थः॥ कियतः कालात् कियताबाकालेनआणमंति आनंति आनप्राणनेइतिधातुपाठात्॥ मकारो ऽलाक्षणिकः ए
वमन्यत्रापियथायोगंपरिभावनीयंपाणमंतिवर्शेष्ठौसमुच्चयार्थौ॥ एतदेवपदद्वयंक्रमेणार्थतः स्पष्टयंतिऊससंतिवायदेवोक्तंमानंतितदेवोकमुच्चसंति॥ न
थायदेवोक्तंप्राणंतितदेवोक्तंनिश्वसंति॥ अथवा आनमंतिप्राणमंतिइति णामप्रव्हत्वेइत्यस्यद्रष्टव्यं॥ धातूनामनेकार्थतयाश्वसनार्थत्वस्याप्यविरोधः अपरे
व्याचक्षते आनंतिप्राणंतीत्यनेनांतःस्फुरंतीउच्छ्वासनिःश्वासक्रियापरिगृह्यतेऊसमंतिनिश्वसंतीत्यनेनतुबाह्याएवंगौतमेनप्रश्नेकृतेभगवानाह॥ गौतमस
ततमविरहितं॥ अतिदुःखिताहिंनैरयिकाः दुःखितानांचनिरंतरंमुच्छ्वासनिःश्वासौ॥ तथालोकेदर्शनात्तच्चसततंप्रायोबत्यापिस्यादतआह संततयामेवस
ततमेवानवरमेवनैकोपिसमयस्तद्विरहःकालोदीर्घत्वंप्राप्ततत्वात् आनमंतीत्यादिः पुनरुच्चारणंशिष्यवचनेनत्र्यादरोपदर्शनार्थंगुरुभिरादिष्टमा
णवचनाहिशिष्याः संतोभवंति॥ तथाचसतितेपौनःपुण्येनप्रश्नश्रवणार्थंनिर्णयादिषुघटंतेत्र्येकेवादेयवचनाभवंति॥ एवंप्राप्तनभव्योपकारस्तीर्थाभिव
द्धिश्च॥ असुरकुमारसूत्रेउक्कोसेणंसातिरेगस्सपक्खेइतिइहदेवेषुयस्ययावंतिसागरोपमाणिस्थितिस्तस्यतावत्पक्षप्रमाणउच्छ्वासनिःश्वासक्रियाविरह
कालःअसुरकुमाराणां॥ बल्युच्चारुद्धितिरेकंसातिरेकंसागरोपमंचमरबलियमितिवचनात् ततः सातिरेगस्सपरकस्सेत्युक्तंसातिरेकात्पक्षादूर्ध्व
मुच्छ्वसंतीत्यर्थः पृथिवीकायसूत्रेवेमायाएइतिविषमात्रातयाकिमुक्तंभवति॥ अनियतविरहकालप्रमाणंतेषामुच्छ्वासनिःश्वासक्रियातथांदेवेषुयोय
थामहायुःसततथासुखासुखितानीचयथोत्तरंमहानुच्छ्वासनिश्वासक्रियाविरहकालोदुःखरूपत्वादुच्छ्वासनिश्वासक्रियायास्ततोयथायुषःसागरोप
मवृद्धिस्तथानयोरुच्छ्वासनिःश्वासक्रियाविरहप्रमाणस्यापिपक्षवृद्धिः॥ ७॥ इतिश्रीमलयगिरिविरचितायांप्रज्ञापनाटीकायांसप्तममुच्छ्वासाख्यंपदंस
मा॥ ॥एतदेवंव्याख्यातंसप्तमपदमिदानीमष्टममारभ्यते॥ तस्यचायमभिसंबंधः॥ इहानंतरपदेसत्वानामुच्छ्वासपर्याप्तिनामकर्मयोगाश्रया
विरहाविरहकालप्रमाणेनोक्ताः संप्रतिवेदनीयोदयाश्रयान्ज्ञानावरणदर्शनावरणक्षयोपशमाश्रयाश्चात्मपरिणामविशेषान्अधिकृत्यप्रश्नसूत्रमा ७९
ह॥ कइणंभंतेसन्नाउपन्नत्ताउइतिकतिकियत्संख्याणमितिवाक्यालंकारेभदंतसंज्ञाः प्रज्ञप्ताः तत्रसंज्ञानंसंज्ञाआभोगइत्यर्थः यदिवासंज्ञायते

अनयाअयंजीवइतिसंज्ञाऽभयचापिवेदनीयामोहोदयाश्रिताज्ञानावरणदर्शनावरणक्षयोपशमाश्रिताचविचित्राआहारादिप्राप्तिक्रियासाचोपाधिभे
दाद्दशविधा॥ तथाचाह गौतमदशविधाप्रज्ञप्तातदेवदशविधत्वंनामग्राहमाह॥ आहारसन्नाइत्यादि॥ तत्रक्षुद्वेदनीयोदयात्कवलाद्याहारार्थंतथाविध
पुद्गलोपादानक्रियासा आहारसंज्ञातस्याआभोगात्मिकत्वात्॥ यदिवासंज्ञातस्याआभोगात्मिकत्वात्॥ यदिवासंज्ञायतेजीवोऽनयेतिएवसर्वत्रापि
भावनाकार्यातथाभयमोहनीयोदयात्भयोद्भ्रांतस्यदृष्टिवदनविकाररोमांचोद्भेदादिक्रियाभयसंज्ञापुंवेदोदयान्मैथुनायस्त्र्यालोकनप्रसन्नवदनस
स्तंभितोरुवेपथुप्रभृतिलक्षणाक्रियामैथुनसंज्ञातथालोभोदयात्प्रधानसंसारकारणाभिष्वंगपूर्विकासचित्तेतरद्रव्योपादानक्रियापरिग्रहसंज्ञा तथा
क्रोधवेदनीयोदयात्तदावेशगर्भापुरुषमुखनेयनदंतच्छदस्फुरणचेष्टाक्रोधसंज्ञातथामानोदयादहंकारात्मिकाउत्सेकादिपरिणतिमानसंज्ञा॥ ६॥ माया
वेदनीयेनाशुभसंक्लेशादनृतसंभाषणादिक्रियामायासंज्ञातथालोभवेदनीयोदयतोलालसत्वेनसचित्तेतरद्रव्यप्रार्थनालोभसंज्ञा॥ तथामतिज्ञाना
वरण कर्मक्षयोपशमनात्शब्दाद्यर्थगोचरासामान्यावबोधक्रियाउघसंज्ञा॥ तथातद्विशेषावबोधक्रियालोकसंज्ञाएवंचेदमापतितंदर्शनोपयो
गउघसंज्ञाज्ञानोपयोगोलोकसंज्ञा॥ अन्येत्वभिदधतिसामान्यप्रवृत्तिर्यथावल्ल्यादिवृत्यारोहणमोघसंज्ञा॥ लोकस्यहेयाप्रवृत्तिर्लोकसंज्ञा॥ तदेवमेताः
प्रतिपत्तयेस्पष्टरूपाः पंचेंद्रियानधिकृत्यव्याख्याताएकेंद्रियाणांत्वेताअव्यक्तरूपाअवगंतव्यानैरयिकसूत्रेउसन्नकारणंपडुच्चभयसन्नोवउत्ताइ
इति॥ अत्रउत्सन्नशब्देनबाहुल्यमुच्यते कारणशब्देनबाह्यंकारणमाश्रित्यनैरयिकाबाहुल्येनभयसंज्ञोपयुक्तास्तथाहिसंततमेषामंतःप्रभूतानिपरमाधा
र्मिकाऽयःकवलीशक्तिकुंतादीनिभयोत्पादकानीति॥ संतइभावंपडुच्चेति॥ इहांतरोऽनुभवभावः सांततिभावमपेक्ष्यनैरयिकाआहारसंज्ञोपयुक्ता
अपियावत्परिग्रहसंज्ञोपयुक्ताअपिअल्पबहुत्वविनयासर्वस्तोकामैथुनसंज्ञोपयुक्तानैरयिकाहिचक्षुर्निमीलनमात्रमपिनसुखिनः केवल
मनवरतमतिप्रबलदुःखानिनासंतप्यमानशरीराउक्तंच॥ अच्छिनमीलियमित्तंनत्थिसुहंदुःखमेवपडिबद्धं॥ नरएनेरयियाणंअहोनिसं
पच्चमाणाणंततोमैथुनेनैषांभवतीति॥ यदिपरंकश्चिदेषांचिदुद्भवंति सापिचस्तोककालेतिपृच्छासमयेस्तोकामैथुनसंज्ञोपयुक्तास्तेभ्यःसंख्येयगुणा

आहारसंज्ञोपयुक्ताद्दुःखितानामपिभूतानांप्रभूतकालंबाह्येच्छायाभावतःपृच्छासमयेअतिप्रभूतानामाहारसंज्ञोपयुक्तानांसंभवात्तेभ्यःसंख्येयगुणा
परिग्रहसंज्ञोपयुक्ताआहारेच्छादिदेहार्थमेवभवतिपरिग्रहेच्छातुदेहेप्रहरणादिषुचप्रभूततरकालावस्थायिनीचपरिग्रहच्छाततःपृच्छासमयेअ
तिप्रभूततराःपरिग्रहसंज्ञोपयुक्ताअवाप्यंतेइतिभवंतिपूर्वेभ्यःसंख्येयगुणाःतेभ्योभयसंज्ञोपयुक्ताःसंख्येयगुणानरकेषुहिनैरयिकाणां
सर्वतोभयमामरणंतेभाविनतःपृच्छासमयेअतिप्रभूततमाभयसंज्ञोपयुक्ताःप्राप्यंतेइतिसंख्येयगुणास्तिर्यग्पंचेंद्रियाअपिबाह्यंकारणंप्रती
त्यबाहुल्येनाहारसंज्ञोपयुक्ताभवंति॥नशेषसंज्ञोपयुक्तास्तथाप्रत्यक्षतएवोपलब्धेः आंतरमनुभवमाश्रित्याहारसंज्ञोपयुक्ताअपियावत्प
रिग्रहसंज्ञोपयुक्ताअपिअल्पबहुत्वचिंतायांसर्वस्तोकाः परिग्रहसंज्ञोपयुक्तापरिग्रहसंज्ञायाःस्तोकाकालत्वेनपृच्छासमयेस्तेषांस्तोका
नामेवावाप्यमानत्वात्तेभ्योमैथुनसंज्ञोपयोगस्यप्रभूततरकालत्वात् तेभ्योपिभयसंज्ञोपयुक्ताःसंख्येयगुणाःसजातीयात्परजातीयाच्चनेभ
यसंभवतोभयोपयोगस्यचप्रभूततमकालत्वात् पृच्छासमयेभयसंज्ञोपयुक्तानामतिप्रभूततराणामवाप्यमानत्वात् तेभ्यःसंख्येयगुणा
आहारसंज्ञोपयुक्ताःप्रायःसततंसर्वेषामाहारसंभवात्मनुष्याबाह्यंकारणमाधिकृत्यबाहुल्येनमैथुनसंज्ञोपयुक्ताः॥संततिभावमांतरानु
भवभावरूपंप्रतीत्याहारसंज्ञोपयुक्ताअपियावत्परिग्रहसंज्ञापयुक्ताअपिअल्पबहुत्वचिंतायांसर्वस्तोकाभयसंज्ञोपयुक्ताःस्तोकानांस्तोककालं
चभयसंज्ञासंभवात्तेभ्यआहारसंज्ञोपयोगस्यप्रभूततरकालंभावात् अतएवहेतोस्तेभ्यःअसंख्येयगुणाःपरिग्रहसंज्ञोपयुक्ताःतेभ्योमैथुनसंज्ञो
पयुक्ताःसंख्येयगुणामैथुनसंज्ञायाअतिप्रभूततरंकालंयावद्भावतःपृच्छासमयेतेषामतिप्रभूततराणामवाप्यमानत्वात्तथाबाह्यंकारणमधि
कृत्यबाहुल्येनदेवाःपरिग्रहसंज्ञोपयुक्ताःमणिकनकरत्नादीनांपरिग्रहसंज्ञोपयोगहेतूनांतेषांसदासन्निहितत्वात्संततिभावंयथोक्तरूपं ८०
प्रतीत्यपुनराहारसंज्ञोपयुक्ताअपियावत्परिग्रहसंज्ञोपयुक्ताअपिअल्पबहुत्वचिंतायांसर्वस्तोकाआहारसंज्ञोपयुक्ताआहारेच्छाविरहकाला
स्यातिप्रभूततयाआहारसंज्ञोपयोगकालस्यातिस्तोकतयापृच्छासमयेसर्वस्तोकानांतेषामवाप्यमानत्वात् ततोभयसंज्ञोपयुक्ताःसंख्येय

गुणाभयसंज्ञायाःप्रभूतानांप्रभूतकालंचभावात् तेभ्योमैथुनसंज्ञोपयुक्ताजीवापेक्षयाबहवोवक्तव्या॥तेचतथैवभाविनाइति॥७५॥इतिश्री
मलयगिरिविरचितायांप्रज्ञापनाटीकायांसंज्ञाख्यमष्टमंपदंसमाप्तं॥ ७५॥ एतदेवंमाख्यातमष्टमंपदमधुनानवममारभ्यते॥तस्यचायमभि
संबंधः॥ इहानंतरपदेसत्वानांसंज्ञापरिणामाउक्ताइहतुतेषामेवयोनयःप्रतिपाद्यंतेतत्रवेदनमादिसूत्रं॥कइविहाणंभंतेजोणीइत्यादिक
तिविधाकारणमिति॥ पूर्ववत् भदंतयोनिःप्रज्ञप्ताःअथयोनिरितिकःशब्दार्थउच्यते॥युमिश्रणेयुवंतितैजसकार्मणशरीरवंतःसंत
औदारिकादिशरीरप्रायोग्यपुद्गलस्कंधसमुदायेनमिश्रीभवंत्यस्यामितियोनिरुत्पत्तिस्थानमौणादिकोनिप्रत्ययःभगवानाहगौतमत्रिवि
धायोनिःप्रज्ञप्तातद्यथा॥शीताउष्णाशीतोष्णातत्रशीतस्पर्शपरिणामाशीताउष्णस्पर्शपरिणामाउष्णाशीतोष्णरूपोभयस्पर्शपरिणामाशी
तोष्णातत्रनैरयिकाणांद्विविधायोनिःशीताःउष्णावनतृतीयाशीतोष्णाकस्यांपृथिव्यांकायोनिरितिविदुच्यते रत्नप्रभायांवालुकाप्रभायांचा
यांनैरयिकाणामुपपातक्षेत्राणितानिसर्वाण्यपिशीतस्पर्शपरिणामपरिणतानिउपपातक्षेत्रव्यतिरेकेणचान्यत्सर्वमपितिसृष्वपिपृथि
वीषूष्णस्पर्शपरिणामपरिणतंतेनतत्रत्यानैरयिकाःशीतयोनिकाउष्णांवेदनांवेदयंतेपंकप्रभायांबहुषूपपातक्षेत्राणिशीतस्पर्शपरिणामपरि
णतानिस्तोकान्युष्णस्पर्शपरिणामपरिणतानियेषुचप्रस्तटेषुनरकावासेषुशीतस्पर्शपरिणामान्युपपातक्षेत्राणितेषुतद्व्यतिरेकेणान्यत्स
र्वमुष्णस्पर्शपरिणामंयेषुप्रस्तटेषुनरकावासेषुचोपपातक्षेत्राण्युष्णस्पर्शपरिणामानि तेषुतद्व्यतिरेकेणान्यत्सर्वंशीतस्पर्शपरिणामंतेनत
त्रत्याबहवोनैरयिकाशीतयोनिकाउष्णांवेदनांवेदयंतेस्तोकाउष्णयोनिकाःशीतवेदनामितिधूमप्रभायांबहून्युपपातक्षेत्राणिउष्णस्पर्श
परिणामपरिणतानिस्तोकानिशीतस्पर्शपरिणामानियेषुचप्रस्तटेषुनरकावासेषुचोष्णस्पर्शपरिणामपरिणतान्युपपातक्षेत्राणितेषु
तद्व्यतिरेकेणान्यत्सर्वंशीतपरिणामंयेषुचशीतस्पर्शपरिणामान्युपपातक्षेत्राणितेष्वन्यदुष्णस्पर्शपरिणामंतेनतत्रत्याबहवोनार
काउष्णयोनिकाःशीतांवेदनांवेदयंतेस्तोकाःशीतयोनिकाउष्णवेदनामितितमःप्रभायांतमस्तमःप्रभायांचोपपातक्षेत्राणिसर्वाण्यु

डाक्टर भाऊदाजी इत्यस्य स्मारकम्
DR. BHAU DAJI MEMORIAL

प्युस्कंर्शपरिणामपरिणतानितव्यतिरेकेणचान्यत्सर्वंतत्रशीतस्पर्शपरिणामंतेनतत्रत्यानारकाःउष्णयोनिकाःशीतदेवेदनांवेदयितारइति
भवनवासिनांगर्भव्युत्क्रांतिकमनुष्याणांव्यंतरज्योतिष्कवैमानिकानांचोपपातक्षेत्राणिशीतोष्णरूपोभयस्पर्शपरिणतानितेनतेषांयोनि
रुभयरूपागवानशीतानाप्युष्णाएकेंद्रियाणांमग्निकामग्निकायिकवर्ज्जानांद्वित्रिचतुरिंद्रियसंमूर्छिमतिर्यग्पंचेंद्रियसंमूर्छिममनुष्या
णांचोपपातस्थानानिशीतस्पर्शान्युष्णस्पर्शान्युभयस्पर्शान्यपिभवंतीतितेषांत्रिविधायोनिस्तेजस्कायिकाउष्णयोनिकाः तथाप्रक्षतउप
लब्धेःअल्पबहुत्वचिंतायांसर्वस्तोकाःशीतोष्णयोनयःशीतोष्णरूपोभययोनिकाभवनवासिगर्भजतिर्यग्पंचेंद्रियगर्भजमनुष्याव्यंतरज्यो
तिष्कवैमानिकानामेवोभययोनिकत्वात् तेभ्योऽसंख्येयगुणाउष्णयोनिकाःसर्वेषांसूक्ष्मबादरभेदभिन्नानांतेजस्कायिकानांप्रभूततराणां
नैरयिकाणांकतिपयानांपृथिव्यप्वायुप्रत्येकवनस्पतीनांवोष्णयोनिकत्वात्अयोनिकाअनंतगुणाःसिद्धानामनंतत्वात्तेभ्यःशीतयोनि
काअनंतगुणाः॥ अनंतकायिकानांसर्वेषामपिशीतयोनिकत्वात्तेषांचसिद्धेभ्योप्यनंतगुणत्वात् भूयःप्रकारांतरेणयोनिःप्रतिपिपादयिषुरा
ह॥ कइविहाणंभंतेजोणीपन्नत्ताइत्यादि॥ सचित्ताजीवप्रदेशसंबंधअचित्तासर्वथाजीवविप्रमुक्तामिश्राजीवविप्रमुक्तात्वविप्रमुक्त
स्वरूपातत्रनैरयिकाणांयदुपपातक्षेत्रंतन्नकेनचित्जीवेनपरिग्रहीतमितितेषामचित्तायोनिः यद्यपिचसूक्ष्मैकेंद्रियाःसकललोक
व्यापिनस्तथापितत्प्रदेशैरुपपत्तेस्थानपुद्गलाअन्योन्यानुगमसंबद्धाइत्यचित्तैवतेषांयोनिः॥ एवमसुरकुमारादीनांभवनपतीनांव्यंत
रज्योतिष्कवैमानिकानांवाचित्तायोनिर्भावनीयापृथिवीकायिकादीनांसंमूर्छिममनुष्यपर्यंतानामुपपातक्षेत्रंजीवैःपरिगृहीतमपरिगृ
हीतमुभयथाभावंचसंभवंतीतित्रिविधापियोनिःगर्भव्युत्क्रांतिकतिर्यक्पंचेंद्रियाणांगर्भव्युत्क्रांतिकमनुष्याणांचयत्रोत्पत्तिस्तत्रचित्ता ८१
अपिशुक्रशोणितादिपुद्गलासंतीतिमिश्रातेषायोनिःअल्पबहुत्वचिंतायांसर्वस्तोकाजीवामिश्रयोनिकाःगर्भव्युत्क्रांतिर्यक्पंचेंद्रियमनु
ष्याणामेवमिश्रयोनिकत्वात्तेभ्योऽचित्तयोनिकाअसंख्येयगुणाः॥नैरयिकादेवानांकति पयानांचप्रत्येकंपृथिव्यप्तेजोवायुप्रत्येकवनस्प

तिद्वित्रिचतुरिंद्रियसंमूर्छिमतिर्यक्पंचेंद्रियसंमूर्छिममनुष्याणामचित्तयोनिकत्वात्तेभ्योप्ययोनिकाअनंतगुणाःसिद्धानामनंतत्वात्तेभ्यःसचि
त्तयोनिकाअनंतगुणानिगोदजीवानांसचित्तयोनिकत्वात् तेषांचसिद्धेभ्योप्यनंतगुणत्वात्भूयोपिप्रकारांतरेणयोनीःप्रतिपादयितुकाम
माह॥ कइविहाणंभंतेजोणीपन्नत्ताइत्यादितत्रनारकाणांसंवृत्तायोनिर्नरकनिष्कुटानांनारकोत्पत्तिस्थानानांसंवृतगवाक्षकल्पत्वात्तत्रचजा
ताःसंतोनैरयिकाप्रवर्धमानमूर्त्तयस्तेभ्यःपतंतिशीतेषुउष्णेषुउष्णेभ्यःशीतेष्वितिभवनपतिव्यंतरज्योतिष्कवैमानिकानामपिसंवृतायोनिस्ते
षांदेवदूष्यांतरितेउत्पादात् देवसयणिज्जंसिदेवदूसंतरिएअंगुलसंखेज्जइतिवचनात् एकेंद्रियाअपिसंवृतायोनिकास्तेषामपियोनेः
स्पष्टमनुपलक्ष्यमाणत्वात्द्वींद्रियादीनांचतुरिंद्रियपर्यंतानांसंमूर्छिमतिर्य क्पंचेंद्रियसंमूर्छिममनुष्याणांचविवृतायोनिस्तेषामुत्पत्तिस्थान
स्यजलाशयादेःस्पष्टमुपलभ्यमानत्वात्गर्भव्युत्क्रांतिकमनुष्याणांचसंवृतविवृतयोनिकंगर्भस्यसंवृतरूपत्वात् गर्भोह्यंतःस्वरूपतोना
त्मतेबहिस्तदरवृद्ध्यादिनोपलक्ष्यतेइति॥ अल्पबहुत्वचिंतायांसर्वस्तोकाःसंवृतविवृतयोनिकागर्भव्युत्क्रांतिकतिर्यग्पंचेंद्रियमनुष्याणामे
वसंवृतविवृतयोनिकत्वात्तेभ्योविवृतायोनिकाःसंख्येयगुणाद्वींद्रियादीनांचतुरिंद्रियपर्यवसानानांसंमूर्छितिर्यग्पंचेंद्रियसंमूर्छिममनुष्याणां
चविवृतयोनिकत्वात्तेभ्योअयोनिकाअनंतगुणाःसिद्धानामनंतत्वात्तेभ्यःसंवृतयोनिकाअनंतगुणावनस्पतीनांसंवृतयोनिकत्वात्तेषांचसि
द्धेभ्योप्यनंतगुणत्वात्संप्रतिमनुष्ययोनिविशेषप्रतिपादनार्थमाह॥ कइविहाणंभंतेजोणीपन्नत्ता॥ इत्यादिकूर्मपृष्ठमिवोन्नताकूर्मोन्नता
संखसेवावर्तोयस्यांसा॥ शंखावर्त्तासंयुक्तवंशीपत्रद्वयाकारत्वात्वंशीपत्राःशेषंसुगमं॥ नवरंशंखावर्तायांयोनौबहवोजीवाजीवसंबद्धा
पुद्गलाश्चावक्कमंतेआगच्छंतिव्युत्क्रामंतिगर्भतयोत्पद्यंतेतथाचीयंतेनभाचीयंतेसामान्यतश्चयमागच्छंतिउपचीयंतेविशेषतउपचयमायांतिप
रंतनिष्पद्यंते॥ अतिप्रबलकामाग्निपरितापात्नाध्वंसगमनादितिवृद्धप्रवादः॥ ९॥ ॥इतिश्रीमलयगिरिविरचितायांप्रज्ञापनाटीकायांयोन्याख्यं
नवमंपदं॥ ॥एतदेवव्याख्यातंनवमपदमिदानींदशममारभ्यते॥ तस्यचायंमभिसंबंधः॥ इहानंतरपदेसत्त्वानांयोनयःप्रतिपादिताःस्ति

स्तुयदुपपातक्षेत्रंरत्नप्रभादितस्यचरमाचरमविभागप्रदर्शनंक्रियतेतत्रेदमादिसूत्रं॥७॥ कइणंभंतेपुढवीउपन्नत्ताउइत्यादिस्रगमंनवरमी
षत्प्राग्भारापंचचत्वारिंशद्योजनलक्षायामविष्कंभप्रमाणाशुद्धस्फटिकसंकाशासिद्धसिलाइमाणंभंतेरयणंप्यभापुढीकिंचरमोअचरमेत्यादि
पृच्छाअथकेयंचरमोचरमपरिभाषाउच्यतेचरमंनामपर्यंतवर्त्तितच्चरमत्वमापेक्षिकमन्यापेक्षयातस्यभावात्॥ यथापूर्वशरीरापेक्षयाचरमंशरी
रमिति अचरमंप्रांतमध्यवर्त्तीनियावत्तदपिवापेक्षिकंतस्यचरमापेक्षयाभावात्॥ यथातथाविधा॰न्यशरीरापेक्षयामध्यशरीरमचशरीरंत
देवंचरमाअचरमेत्येकवचनांतःप्रश्नःकृतःसंप्रतिबहुवचनांतमाह॥ चरमाइंअचरमाईइतिएवानिचत्वारिप्रश्नसूत्राणितथाविधैकत्वपरिणा
मविशिष्टद्रव्यविषयाणिकृतानिसंप्रतिप्रदेशानधिकृत्यप्रश्नद्वयसूत्रमाह॥ चरमंतपएसायअचरमंतपएसायइतिचरमाण्येवांतवर्त्तित्वा
दंताश्चरमांतप्रदेशाअचरममेवकस्याप्यपेक्षयाअनंतवर्त्तित्वादंतोअचरमांतप्रदेशाः॥ तदेवंषट्सुप्रश्नेषुकृतेषुभगवानाह॥ गौतमसारत्नप्र
भापृथिवीनचरमाचरमत्वंत्वापेक्षिकमित्युक्तंनचात्रा मपेक्षणीयमस्तिकेवलायाएवतदन्यनिरपेक्षयाःपृष्ठत्वात्नाप्यचरमाततएवएवहे
तोस्तथाह्यचरमत्वमपिआपेक्षिकंनचात्रान्यदपेक्षणीयमस्तीतिकिमुक्तंभवतिइयंरत्नप्रभापृथिवीनपश्चिमानाभध्यमातदन्यसापेक्षणीय
स्याविवक्ष्यणातितिअतएवनचरमाणिचरमत्वव्यपदेशस्यैवासंभवतस्तद्विषयबहुवचनासंभवात्तथाहियदातस्याश्चरमत्वव्यपदेशए
वोक्तयुक्तेनोपपद्यतेतदाकथंतद्विषयंबहुवचनमुपपत्तुमर्हतीतिएवमचरमाण्यपिप्रतिषेधनीयानिप्रागुक्तयुक्तेरचरमत्वव्यपदेशस्यासंभ
वात्नचचरमांतप्रदेशाउत्पयुक्त्याचरमत्वस्याऽचरमत्वस्यावासंभवतस्तत्प्रदेशकल्पनाया अप्यसंभवात्॥ यद्येवंतर्हिकिंस्वरूपासेत्यत्र
आह॥ नियमं॥नियमेनाचरमंचचरमाणिचकिमुक्तंभवतियदीयमखंडरूपाविवक्षित्वापृच्छ्यतेतदायथोक्तभंगानामेकेनापिभंगेनव्यपदे
श्यानभवतियदात्वसंख्येयप्रदेश्यानभवतियदात्वसंख्येयप्रदेशावगाढेत्यनेकावयवविभागात्मिकाविवक्ष्यतेतदायथोक्तनिर्वचनविषयाभ
वतितथाहि॥ रत्नप्रभापृथिवीतावदनेनप्रकारेणाव्यवस्थितास्थापनाचेयं एवम  वस्थितायाअस्यानिप्रांतेष्ववस्थितानिखंडानिप्रत्येकं

तथाविधविशिष्टैकत्वपरिणामपरिणतानिचरमाणियत्पुनर्मध्येमहद्रत्नप्रभायाःखंडंतत्तथाविधैकत्वपरिणामयुक्तत्वादंतविवक्षितमित्यचरमंउभयरू
पाचेयमन्यथातदभावप्रसंगात्नदेवमयर्यावयवरूपतयाचिंतायामचरमंचरमाणिचेत्यखंडैकनिर्वचनविषयाप्रतिपादितायदापुनःप्रदेशाश्चिंतायंतेनदि
वंनिर्वचमांतप्रदेशाअचरमांतप्रदेशाश्चतथाहि॥ येबाह्यखंडेषुगताःप्रदेशास्तेचरमांतप्रदेशायेपुनर्मध्येकखंडगताःप्रदेशास्तेचरमांतप्रदेशायेपुनर्मध्ये
कखंडगताःप्रदेशास्तेअचरमांतप्रदेशाअन्येतुव्याचक्ष्यतेचरमाणिनामतथाविधप्रविष्टेतरप्रांतैकप्रादेशिकश्रेणिपटलरूपाणिमध्यभागोऽचरमइति
तदपिसमीचीनंदोषाभावात्चरमांतप्रदेशाययथोक्तप्रांतैकप्रादेशिकश्रेणिपटलगतागप्रदेशाःअचरमांतप्रदेशामध्यभागगताःप्रदेशाअनेननिर्वच
नसूत्रेणएकांतदुर्णयनिरोधप्रधानेनअवयवावयविरूपरत्नप्रभादिकंवस्तुतयोश्चावयवावयविनोर्भेदाभेदइत्यावेदितं॥ यथावायवावयविरूपतायां
परान्तदूषणावकाशस्तथाधर्मसंग्रहणिटीकायांबाल्यवस्तुप्रतिष्ठावसरेप्रतिपादितमिति॥ ततोवधार्यं॥ एवंजावअहेसत्तमापुढवीत्यादियथारत्नप्र
भा॥ पृथिवीप्रश्ननिर्वचनाभ्यामुक्ताएवंशर्करादयाअपिपृथिव्यःसौधर्मादीनिचविमानानिअनुत्तरविमानपर्यवसानानिईषत्प्राग्भारालोकश्चवक्तव्यः
सूत्रपाठोपिसुगमत्वात्स्वयंपरिभावनीयंसचैवंसक्करप्पभाणंभंतेपुढवीकिंचरमात्रचरमाचरमाणिअचरमाणिइत्यादि॥ एवमलोकेविइतिएवमुक्तेन
प्रकारेणालोकोपिवक्तव्यःसचैवंअलोएणंभंतेकिंचरमेअचरमेइत्यादि॥प्रश्नसूत्रंतथैवनिर्वचनसूत्रं गोयमाअचरमोचरमाणियचरमंतपदेसायअच
रमंतपएसाय॥ तत्रचरमाणियानिखंडानिलोकनिष्कुटेषुप्रतिष्ठानिशेषमन्यत्सर्वमचरमंचरमंचरमंखंडगताःप्रदेशाश्चरमांतप्रदेशाःअचरमखंडग
ताःप्रदेशाःअचरमांतप्रदेशाःसंप्रत्येतेषुरत्नप्रभादिषुप्रत्येकंचरमाचरमादिगतमल्पबहुत्वमभिधित्सुरिदमाह॥७॥ इमीसेणंभंतेरयणप्पभाएपुढवीअए
चरमस्सयचरमाणइत्यादि॥ प्रश्नसूत्रंसुगमंनिर्वचनसूत्रेसर्वस्तोकंद्रव्यार्थतयाअस्यारत्नप्रभायापृथिव्याअचरमखंडंकस्मादितिचेदतआह॥
एकंनिमित्तंकारणहेतुषुसर्वासांविभक्तीनांप्रायोदर्शनमितिन्यायादत्रहेतौप्रथमाततोयमर्थः॥ यस्मात्तथाविधैकस्कंधपरिणामपरिणतत्वादेकंततःस्तोकंत
स्मात्यानिचरमाणिखंडानितान्यसंख्येयगुणानितेषामसंख्यातत्वात्॥ अथाचरमंचरमाणिचसमुदितानिविशेषाधिकानिविनिशंकायामाह॥अचरमंचर

माणिचसमुदितानिविशेषाधिकानि॥ तथाहियदचरमद्रव्यंतनचरमद्रव्येषुप्रक्षिप्तंततश्चरमेभ्यएकेनाधिकत्वात्विशेषाधिकत्वात्विशेषाधिकसमुदायोभव
निप्रदेशार्थत्वचिंतायांसर्वस्तोकाश्चरमांतप्रदेशायतश्चरमखंडानिमध्यखंडापेक्षयातिसूक्ष्माणिततस्तेषामसंख्येयगुणानामपियेप्रदेशास्तेमध्यखंडगत
प्रदेशापेक्षयासर्वस्तोकास्तेभ्योचरमप्रदेशाअसंख्येयगुणाः॥ अचरमखंडस्यैकस्यापिचरमखंडसमुदायापेक्षयाक्षेत्रतोअसंख्येयगुणत्वात्चरमांतप्रदेशा
अचरमांतप्रदेशाश्चद्वयेपिसमुदिताअचरमांतप्रदेशाधिकाः कथमितिचेदुच्यते इहचरमांतप्रदेशाअचरमांतिप्रदेशापेक्षयाअसंख्येयभागप्रमाणा
स्ततोःचरमांतप्रदेशेषुचरमांतप्रदेशप्रक्षेपेपितेअचरमांतप्रदेशेभ्योविशेषाधिकाएवाद्यंतिद्रव्यार्थप्रदेशार्थचिंतायांअचरमंचरमाणियदोविविसेसा
हियाइंचरमंतपएसाअसंखेज्जगुणाइति॥ अचरमचरमसमुदायाच्चरमांतप्रदेशाअसंख्येयगुणाःकथंउच्यते इहयदचरमखंडंतदसंख्येयप्रदेशावगाढ
मपिद्रव्यार्थतयाएकंतचरमेषुपुनःखंडेषुप्रत्येकमसंख्येयाःप्रदेशास्ततोभवंति॥ चरमाचरमद्रव्यसमुदायादसंख्येयगुणाश्चरमांतप्रदेशाःतेभ्योप्यचर
मांतप्रदेशाःसंख्येयगुणास्तेभ्योपिचरमाचरमप्रदेशाःसमुदिताविशेषाधिकाइतिपूर्ववत्अलोकस्त्रप्रदेशार्थतयासर्वस्तोकाअलोकस्यचरमांतप्रदेशा
लोकनिष्कुटोघवर्तास्तेषांभावात् तेभ्यःचरमांतप्रदेशाअनंतगुणाअलोकस्यानंतत्वात् चरमांतप्रदेशाअचरमांतप्रदेशाश्चसमुदिताविशेषाधिकाः
चरमांतप्रदेशाह्यचरमांतप्रदेशापेक्षयाअनंतभागकल्पास्ततस्तेषामचरमांतप्रदेशराशौप्रक्षेपेपितेअचरमांतप्रदेशेभ्योविशेषाधिकाएवभवंति॥ संप्रति
लोकालोकसमुदायविषयंप्रश्नसूत्रमाह॥ ७॥ लोगालोगस्सणंभंतेअचरमस्सयचरमाणयइत्यादि॥ प्रश्नसूत्रंसुगमंनिर्वचनमाह॥ ७॥ योगमेत्यादि गोतम
लोकमयपतएकैकमचरमखंडंततस्तोकमेकत्वात् तेभ्योलोकस्यचरमखंडद्रव्याण्यसंख्येयगुणानितेषामसंख्यातत्वात्तेभ्योप्यलोकस्यचरमखंडानिवि
शेषाधिकानिकथमितिचेत्उच्यतेइहयद्यपिलोकस्यचरमखंडानितत्वतोसंख्येयानितथापिप्रागुपदर्शितपृथ्व्यामपरिकल्पनयानान्यष्टौपरिकल्प्यंते॥ ८३
तद्यथा॥ एकैकंचतसृषुदिक्षुएकैकंचविदिक्षिति॥ अलोकचरमखंडानिचन्यासपरिकल्पनयापरिगण्यमानानिद्वादशतद्यथाएकैकंचतसृषुविक्षुद्वेद्वेविदिक्षि
तिद्वादशचाष्टभ्योनद्विगुणानित्रिगुणानिचकिंतुविशेषाधिकानितेभ्योपि॥ अलोकचरमखंडेभ्योलोकस्यचरमखंडानित्रलोकस्यचरमखंडानिसमुदितानिवि

विशेषाधिकानितथाहिलोकस्यचरमखंडानिप्रागुक्तपरिकल्पनयाअष्टावेकमचरमखंडमित्युभयमीलनेनच अलोकस्यापिचरमखंडानिसमुदितानित्रयोदश
एभ्येषामेववर्मीलनेहाविंशतिसाचद्वादशभ्योनद्विगुणाकिंतुविशेषाधिकेति अलोकस्यचरमखंडेभ्योलोकालोकचरमखंडानिसमुदितानिविशेषाधि
कानि प्रदेशार्थताचिंतायांसर्वस्तोकालोकस्यचरमांतप्रदेशाः अष्टखंडसत्कानामेवप्रदेशानांभावात्तेभ्योलोकस्यचरमांतप्रदेशाविशेषाधिकाःतेभ्यो
पिलोकस्याचरमांतप्रदेशाअसंख्येयगुणाःक्षेत्रस्यातिप्रभूततयातत्प्रदेशानामपिअतिप्रभूतत्वाभावात् तेभ्योप्यलोकस्यचरमांतप्रदेशाअनंतगुणाःक्षे
त्रस्यानंतगुणत्वात्तेभ्योपिलोकस्यचरमांतप्रदेशाअचरमांतप्रदेशाअलोकस्यापिचचरमांतप्रदेशाअचरमांतप्रदेशाः समुदिताविशेषाधिकाः कथमि
तिचेदुच्यते इहअलोकस्याचरमांतप्रदेशराशौलोकस्यचरमाचरमाचरमांतप्रदेशाअलोकस्यचरमांतप्रदेशाश्चप्रक्षिप्यंते तेचसर्वसंख्ययाप्यसंख्ये॥
याश्चानंतराशयपेक्षयातिस्तोकाइतिप्रक्षेपेपितेअलोकस्याचरमांतप्रदेशेभ्योविशेषाधिकाएवतदनुसारेणद्रव्यार्थप्रदेशार्थचिंतास्त्रमपिस्वयंपरिभा
वनीयं॥ नवरंलोकालोकचरमाचरमखंडेभ्योलोकस्यचरमांतप्रदेशाअसंख्येयगुणाइतिलोकस्यकिलचरमाणिखंडान्यष्टौएकैकस्मिंश्चखंडेप्रदे
शाअसंख्येयालोकालोकचरमखंडानिचसमुदितानिद्वाविंशतिस्ततस्तेभ्योलोकालोकचरमचरमखंडेभ्योलोकस्यचरमांतप्रदेशाअसंख्येयगुणाःशेष
पदभावनाप्राग्वत्सव्वदव्वाविसेसाहियाइतिलोकालोकचरमाचरमांतप्रदेशेभ्यःसर्वद्रव्याणिविशेषाधिकानिअनंतानंतसंख्यानांजीवानांतथापर
माणवाअनंतस्कंधपर्यंतानांप्रत्येकानामनंतसंख्यानांपृथक्द्रव्यत्वात्तेभ्योपिसर्वप्रदेशाअनंतगुणाः तेभ्योपिसर्वपर्यायाअनंतगुणाःप्रतिप्रदेशंस्वपरभेदभि
न्नानांपर्यायाणामानंत्यात्तदेवंरत्नप्रभादिकंचरमादिकंभेदतश्चिंतितमिदानींपरमाण्वादिकंचिंतयन्नाह॥ परमाणुपुग्गलेणंभंतेइत्यादि॥ अत्रप्रश्नसूत्रेष
ड्विंशतिभंगाःयतस्त्रीणिपदानिचरमाचरमावक्तव्यलक्षणानितेषांचैकैकसंयोगेप्रत्येकमेकवचनान्त्यपोभंगास्तद्यथा॥ चरमः १ अचरमः २ अवक्तव्यः ३ त्रयोबहुवचनेन
तद्यथा॥ चरमाणि १ अचरमाणि २ अवक्तव्यानिसर्वसंख्ययाषट्द्विकसंयोगास्तुपरस्तद्यथाचरमपदयोरेकश्चरमावक्तव्यकपदयोद्वितीयः अचरमावक्तव्य
कपदयोद्वितीयः अचरमावक्तव्यकपदयोस्तृतीयः एकैकस्मिंश्चत्वारोभंगास्तत्रप्रथमेद्विकसंयोगएवं॥ चरमश्चाचरमश्चचरमश्चावमाश्चचरमाश्चाचरम

श्च॥ चरमाश्चस्थापना ॥ ६९ ६। ६९ एकमेवचतुर्भंगाचरमावक्तव्यपदयोः ॥ एवमेववाचरमावक्तव्यपदयोः ॥ सर्वसंख्ययाद्विकसंयोगेद्वादशभंगाः त्रिक
संयोगेएकवचनबहुव चनाभ्यामष्टौस्थापना ॥ ७॥ ॥ ।३। ।३। ।३३ ६।। ६।६ ६६। ६६६ सर्व ६। ६। ६९ संकलनयाषड्विंशतिरत्रनिर्वच ६। ६९ नमाहगोयमापरमाणुपुद्गलानोचरमेइत्यादि
परमाणुपुद्गलश्चरमोनभवति॥ चरमत्वंह्यन्यापेक्षंन चा न्यापेक्षणीयमस्तितस्याविवक्षणात्नवमाणुर्येनाशापेक्षयाचरमत्वंप्रकल्पं
तनिरवयवत्वात्तस्मान्नचरमोनाप्यचरमोनिरवयवत यामध्यत्वायोगात्॥ किंत्ववक्तव्यः चरमव्यपदेशकारणतःस्वन्यतयाचरमशब्देनाचरम
शब्देनवाव्यपदेष्टुमशक्यत्वात्॥ वक्तुंशक्यंहिवक्तव्यं यत्तुचरमशब्देनाचरमशब्देनवास्वस्वनिमित्तशून्यतयावक्तुमशक्यंतदवक्तव्यमितिस्था
पना ० शेषास्तुभंगाःप्रतिषेध्याःपरमाणोतेषामसंभ वात्वक्ष्यतिवपरमाणुंमियतइउअस्यायमर्थःपरमाणोपरमाणुचिंतायांतृतीयोभंगः
परिग्राह्यः शेषानिरवयत्वेनप्रतिषेध्यादुपएसिणंभंतेइत्यादिप्रश्नसूत्रंप्राग्वत्निर्वचनमाह॥ गोयमासियचरमेनोअचरमेएइत्यादिद्विप्रदेशकः
स्कंधः स्यात्कदाचिच्चरमःकथमितिचेतउच्यते॥ इहयदाद्विप्रदेशकः स्कंधोद्वयोराकाशप्रदेशयोरवगाढोभवतिसमश्रेण्याव्यवस्थितयास्थापना [०]
तदाएकोपिपरमाणुरपरमाण्वपेक्षयाचरमोऽपरोप्यपरपरमाण्वपेक्षयाचरमइतिचरमः॥ अचरमस्तुनभवतिसर्वद्रव्याणामपिकेवलाचरमत्वस्यायोगा
त्॥ यदातुसएवद्विप्रदेशिकः स्कंधएकस्मिन्नाकाशप्रदेशेऽवगाहते॥ तदासतथाविधैकत्वपरिणामपरिणतयापरमाणुवत्चरमव्यपदेशकारणस्य
त्वान्नचरमशब्देनव्यपदेष्टुंशक्यते॥ नाप्यचरमशब्देनेतिअवक्तव्यः॥ शेषास्तुभंगाःप्रतिषेध्याःतथाचवक्ष्यति॥ पढमोतइयहोइदुपएसअस्यायमर्थः॥ द्विप्र
देशकेस्कंधेप्रथमोभंगाश्चरमइति॥ तृतीयोवक्तव्यइतिभवति॥ शेषास्तुप्रतिषेध्याअसंभवात्सचासंभवस्तुप्रतीतएवतिपराएसाणंभंतेखंधेइत्यादिप्र
श्नसूत्रंप्राग्वत्निर्वचनंगोयमासियचरमेइत्यादि॥ इहयदात्रिप्रदेशिकः स्कंधोद्वयोराकाशप्रदेशयोः समश्रेण्याव्यवस्थितयोरेवमवगाढोभवति
स्थापना [ः] तदासोचरमः सचचरमत्वभावनाद्विप्रदेशिकस्कंधवत्भावनीयाअचरमप्रतिषेधःप्राग्वत्स्यादवक्तव्यइतियदापुनःसएवत्रिप्रदेशिकः ८४
स्कंधएकस्मिन्नाकाशप्रदेशेअवगाहतेतदापरमाणुवत्चरमाचरमव्यपदेशकारणशून्यतयाचरमाचरमशब्दाभ्यांव्यपदेष्टुमशक्यत्वादवक्तव्यः

चतुर्थादयोःसप्तमपर्यंताःप्रतिषेध्याःअसंभवात्असंभवस्तुप्रतीतत्वात्स्वयंयुद्धवक्तव्यः नवमस्तुप्राह्यस्तथाचा हसियचरमाईयअचरिमेयप्राकृतेद्विवे
पिबहुवचनंततोयमर्थः स्यात्कदाचिदयंभंगश्चरमौचाचरमश्चतत्रयदासत्रिप्रदेशिकः स्कंधस्त्रिष्वाकाशप्रदेशेषुसमश्रेण्याव्यवस्थितेष्वेवमवगाहतेस्था
पना [०|०|०] दोतंदिमांतिमौद्वौपरमाणूपर्यंतवर्तित्वाच्चरमौमध्यमस्तुमध्यवर्तित्वादचरमइतिदशमस्तुप्रतिषेध्यस्कंधस्यत्रिप्रदेशिकतयाचरमाचरम
शब्दयोर्बहुःवचननिमित्तासंभवात्एकादशस्तुग्राह्यस्तथाचाहसियचरमेयअवत्तव्वएयस्यात्कादाचिदयंभंगश्चरमश्चावक्तव्यश्चतत्रयदासत्रिप्र
देशिकःसमश्रेण्याविश्रेण्यांचैवमवगाहतेस्थापना [०ः] तदाद्वौपरमाणोसमश्रेण्याव्यवस्थितावितिद्विप्रदेशावगाढद्विप्रदेशकस्कंधवच्चरमव्यप
देशकारणभावश्चरमएकश्चपरमाणुर्विश्रेणिस्थश्चरमाश्चरमशब्दाभ्यांव्यपदेष्टुमशक्यइत्यवक्तव्यः शेषास्तुभंगाःसर्वेपिप्रतिषेध्याःवक्ष्यतिचपढमो
ऽतइउनवमोइक्कारसमोयतिपएसा॥ अस्यायमर्थस्त्रिःप्रदेशकेस्कंधेप्रथमोभंगश्चरमईतितृतीयोवक्तव्यइतिनवमश्चरमौचाचरमश्चचरमश्चाव
क्तव्याश्चतिभवतिशेषाभंगानघटंते॥ चउप्पएसिणंभंतेखंधेइत्यादिप्रश्नसूत्रंप्राग्वन्निर्वचनमाह॥ गोयमासियचरमेइत्यादि अत्रप्रथमतृतीयनवम
दशमएकादशद्वादशत्रयोविंशतितमरूपाःसप्तभंगाग्राह्याःशेषाप्रतिषेध्याःतत्रप्रथमभंगोयंस्याच्चरमइतिइहयदाचतुःप्रदेशकस्कंधोद्वयोराका
शप्रदेशयोःसमश्रेण्याव्यवस्थितयोरेवगाहतेस्थापना [००|००] तदाचरमःसाचरमत्वभावनासमश्रेणिव्यवस्थितद्विप्रदेशावगाढद्विप्रदेशिकस्कंध
वद्भावनीया॥ तृतीयोभंगःस्यादवक्तव्यइति॥ सचैवं॥ यदाएवचतुःप्रदेशकः स्कंधएकस्मिन्नाकाशप्रदेशेवगाहतेस्थापना [ः ः] तदापरमाणुवदवक्त
व्यः नवमंस्याच्चरमौचाचरमश्चसचैवंयदासचतुःप्रदेशात्मकेः स्कंधस्त्रिष्वाकाशप्रदेशेष्ववगाहते [०|००|०] तदाआद्यंतप्रदेशावगाढौचरमौमध्यप्रदेश
गादस्त्वचरमः स्याच्चरमौचाचरमौच॥ तत्रयदासचतुःप्रदेशकः स्कंधःसमश्रेण्याव्यवस्थितेषुचतुर्ष्वाकाशप्रदेशेष्वेवमवगाहते [०|०|०|०] तदाद्यावंतद्वि
प्रदेशावगाढौद्वौपरमाणोचरमौद्वयोस्तुमध्यमयोराकाशप्रदेशयोरवगाढौद्वौपरमाणूअचरमावितिएकादशःस्याच्चरमश्चावक्तव्यः॥ सचैवंयदास
चतुःप्रदेशकःस्कंधस्त्रिष्वाकाशप्रदेशेषुसमश्रेण्याविश्रेण्याचैवमवगाहतेस्थापना [०|०|०] तदासमश्रेणिव्यवस्थितंद्विप्रदेशावगाढस्त्वयः

परमाणवोद्विप्रदेशावगाढद्विप्रदेशकंस्कंधवत्चरमः एकश्चविश्रेणिस्थः परमाणुरिवचरमशब्दाभ्यांव्यपदेष्टुमशक्यत्वादवक्तव्यइतिद्वादशः स्याच्चरम
श्चावक्तव्यौच संचैवंयदासचतुःप्रदेशात्मकःस्कंधश्चतुर्ष्वाकाशप्रदेशेष्वेवमवगाहतेद्वौपरमाणूद्वयोः समश्रेण्याव्यवस्थितयोराकाशप्रदेशयो
द्वौचपरमाणूद्वयोर्विश्रेण्याव्यवस्थितयोःस्थापना ०० तदाद्वौपरमाणूसमश्रेण्याव्यवस्थितौद्विप्रदेशावगाढद्विप्रदेशकस्कंधवच्चरमः द्वौचपरमाणू
विश्रेणिव्यवस्थितौकेवलपरमाणुवच्चरमाचरमशब्दाभ्यांव्यपदेष्टुमशक्यावितस्यात्रयोविंशतितमः स्याच्चरमौवाचरमश्चावक्तव्यश्चकथमितिचेत्
उच्यतेइहयदासचतुःप्रदेशकःस्कंधश्चतुर्ष्वाकाशप्रदेशेष्वेवमवगाहतेत्रयःपरमाणवस्त्रिषुसमश्रेण्याव्यवस्थितेष्वाकाशप्रदेशेष्वेकोविश्रेणिस्थेप्र
देशेस्थापना ००० तदात्रिषुपरमाणुषुसमश्रेणिव्यवस्थितेषुमध्येआद्यंतौपरमाणूपर्यंतवर्तित्वाच्चरमौमध्यस्थेचरमोविश्रेणिस्थोऽवक्तव्यइति वक्ष्य
तिचपटमोतइउनवमोदसमोएक्कारसोयबारसमोभंगाचउप्पएसेतेवीसइमोयबोधव्वोगतार्थाः ६७ पंचपएसिएणंभंतेइत्यादिप्रश्नसूत्रंप्राग्वत्निर्वचनमा
ह गोयमासियचरमेइत्यादिइहप्रथमतृतीयसप्तमदशमैकादशद्वादशत्रयोदशत्रयोविंशतितमचतुर्विंशतितमपंचविंशतितमरूपाएकादशभंगा
ग्राह्याःशेषाःप्रतिषेध्याः वक्ष्यतिचपढमोतईउस त्तमनवदसएक्कारसबारतेरसमोतेवीसचउवीसोपणवीसइमोयपंचमए तत्रायंप्रथमभंगःस्याच्च
रमइतिइहयथापंचप्रदेशात्मकःस्कंधोद्वयोराकाशप्रदेशयोःसमश्रेण्याव्यवस्थितयोरेवमवगाहतेत्रयःपरमाणवएकस्मिन्नाकाशप्रदेशेद्वौद्विती
येइतिस्थापना ः ः तदाद्विप्रदेशावगाढद्विप्रदेशस्कंधवच्चरमः तृतीयोवक्तव्यः सचैवंयदासपंचप्रदेशात्मकःस्कंधएकस्मिन्नाकाशप्रदेशेअवगा
हतेस्थापना ः३ तदासपरमाणुवदवक्तव्यःसप्तमःस्याच्चरमश्चाचरमश्चसचैवंयदासपंचप्रदेशकःस्कंधःपंचस्वाकाशप्रदेशेष्वेवगाहतेत 
दायेचरमाश्चत्वारःपरमाणवस्तेषामेकसंबंधिपरिणामपरिणतत्वादेकवर्णत्वादेकगंधत्वादेकस्पर्शत्वाच्चैकत्वव्यपदेशाच्चरमइतिव्यपदेशोमध्यस्तुपर
माणुर्मध्यवर्तित्वादचरमइतिनवमश्चरमौचाचरमश्चतत्रयदासपंचप्रदेशकःस्कंधस्त्रिष्वाकाशप्रदेशेषुसमश्रेण्यव्यवस्थितेष्वेवमवगाहतेद्वौपरमा
णूआद्येआकाशप्रदेशावगाढौद्वौचरमौद्वावंत्यप्रदेशावगाढौचरमइतिचरमौमध्यमस्तुमध्यवर्तित्वादचरमः दशमश्चरमौवाचरमौचतत्रयदासपं

चप्रदेशात्मकःस्कंधश्चतुर्ष्वाकाशप्रदेशेषुव्यवस्थितेष्वेवमवगाहते त्रयःपरमाणवस्त्रिष्वाकाशप्रदेशेष्वेकस्मिन्द्वावितिस्थापना ०००ः तदाआद्यप्रदेश
वर्तीपरमाणुश्चरमोद्वौचान्त्यप्रदेशवर्तिनौचरमइतिचरमौ द्वौचमध्यौमध्यवर्तित्वादचरमौएकादशश्चरमश्चावक्तव्यश्चकथमितिचेदुच्यतेयदा
सपंचप्रदेशस्त्रिष्वाकाशप्रदेशेषुसमश्रेण्यावैवमवगाहतेद्वौद्वौपरमाणूद्वयोराकाशप्रदेशयोःसमश्रेण्याव्यवस्थितयोरेकोविश्रेणिस्थःस्थाप
ना ः॰ तदाचत्वारःपरमाणवोद्विप्रदेशावगाढद्विप्रदेशकस्कंधवच्चरमएकश्चविश्रेणिस्थःपरमाणुरवक्तव्यः द्वादशश्चरमश्चावक्तव्यौचतत्रय
दासपंचप्रदेशात्मकःस्कंधश्चतुर्ष्वाकाशप्रदेशेषुसमश्रेण्याविश्रेण्यावैवमवगाहतेद्वौपरमाणूद्वयोराप्रदेशयोःसमश्रेण्याव्यवस्थितयोरेकोविश्रेणिस्थोद्वौ
चान्यस्मिन्विश्रेणिस्थेस्थापना ०० तदाद्वौपरमाणूसमश्रेणिव्यवस्थितद्विप्रदेशावगाढौद्विप्रदेशावगाढद्विप्रदेशकस्कंधवच्चरमः द्वौचविश्रेणि
स्थःपृथगेकैकाकाशप्रदेशावगाढौचावक्तव्यौ त्रयोदशश्चरमौवाचक्तव्यश्चतत्रयदासपंचप्रदेशावगाढःपंचस्वाकाशप्रदेशेष्वेवगाहतेद्वौपरमा
णूउपरिद्वयोराकाशप्रदेशयोःसमश्रेण्याव्यवस्थितयोरवगाढौद्वौचद्वयोस्तथैवाधएकःपर्यंतेमध्यसमेस्थापना ०० तदाद्वावुपरितनौद्विप्र
देशावगाढद्व्यणुकस्कंधवच्चरमोद्वावधस्तनौचरमइतिचरमौ एकश्चकेवलःपरमाणुरिवावक्तव्यइतित्रयोविंशतितमः चरमौवाचरमश्चा
वक्तव्यश्च संचैवंयदापंचप्रदेशकः ०० स्कंधश्चतुर्ष्वाकाशप्रदेशप्रदेशेषुसमश्रेण्याविश्रेण्यांचैवमवगाहतेत्रिष्वाकाशप्रदेशेषुसमश्रेण्या
व्यवस्थितेष्वाद्येएकपरमाणुर्मध्येद्वौअंतेएकःचतुर्थोपिविश्रेणिस्थःएकः ०ः॰ तदात्रिष्वाकाशप्रदेशेषुमध्येआद्यंतप्रदेशावगाढौचरमौमध्यप्र
देशवर्तीतुद्व्यणुकोमध्यवर्तित्वादचरमोविश्रेणिस्थ श्चावक्तव्यइति चतुर्विंशतितमःचरमौवाचरमश्चावक्तव्यौचकथमितिचेत्उच्यते स
यदासःस्कंधःपंचस्वाकाशप्रदेशेषुसमाश्रेण्यावैवमवगाहते त्रयः परमाणवस्त्रिष्वाकाशप्रदेशेषुसमश्रेणिव्यवस्थितेषुद्वौचद्वयोःपरमाणू
विश्रेणिस्थयोःस्थापना ०ः॰ तदात्रिष्वाकाशप्रदेशेषुमध्येद्वावाद्यंतप्रदेशवर्तिनौचरमौमध्यश्चाचरमोद्वौचविश्रेणिस्थावक्तव्यौपंचविंशति
मःचरमौवाचरमौवाक्तव्यश्चसचैवंयदासपंचप्रदेशकःस्कंधःपंचस्वाकाशप्रदेशेषुसमश्रेण्याविश्रेण्याचैवमवगाहते चत्वारश्चतुर्ष्वाकाश

प्रदेशेषु समश्रेणिव्यवस्थितेषु एको विश्रेणिस्थ इति स्थापना ०००० तदा चतुर्षु आकाशप्रदेशेषु मध्ये द्वावाद्यंतप्रदेशवर्तिनौ चरमौ द्वौ च मध्यवर्तिनावच
रमादेको विश्रेणिस्थो ऽवक्तव्यः ७॥ छप्पएसिएणं भंते इत्यादि प्रश्नसूत्रं प्राग्वत् निर्वचनं गोयमा॥ सिय चरमे इत्यादि॥ इह द्वितीयश्चतुर्थपंचमष
ष्ठपंचदशषोडशसप्तदशाष्टादशविंशतितमैकविंशतितमरूपा एकादश भंगाः प्रतिषेध्याः वक्ष्यति च बिचउत्थपंचछठंपण्णरसोलं च सत्तरठा
रं वीसेक्कवीस चारीसगं च वज्जेय छठंमि॥ शेषाः स्वकादयः परिग्राह्या घटमानत्वात् तत्र यथाद्यास्त्रयो न घटंते एकादयस्तु घटंते न तथा भाव्यंते द्विपद
पद्धदेशकः स्कंधो द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोरेवमवगाहते एकस्मिन्नप्याकाशप्रदेशे त्रयः परमाणवो ऽपरस्मिन्नपि त्रय इति स्था
पना ⁝⁝ तदा द्विप्रदेशात् द्विप्रदेशस्कंधवच्चरमः अचरमलक्षणस्तु द्वितीयो भंगो न घटंते चरमरहितस्य केवलस्यासंभवात्॥ न खलु प्रांताभावे म
ध्यं भवतीति भावनीयमेतत्॥ तृतीयो वक्तव्यलक्षणः सचैवं यदा समध्यंदेशात्मकः स्कंधः एकस्मिन्नाकाशप्रदेशे वगाहते ⁝⁝⁝ तदा परमाणुव
च्चरमावचरमाचरमशब्दैर्न व्यपदेष्टुमशक्यत्वदवक्तव्यः॥ चतुर्थश्चरमाणीति पंचमो अचरमाणीति॥ षष्ठो ऽवक्तव्यानीति॥ पंचदशो ऽचरमश्चा
वक्तव्यश्च षोडशो ऽचरमश्चावक्तव्यानि च सप्तदशोऽचरमाणि चावक्तव्यश्चाष्टादशो ऽचरमाणि चावक्तव्यानि। चैत्येते सप्त भंगा उघत एव न संभ
वंति तथा प्रकाराणां द्रव्याणामेवासंभवात् न हि एवं जगति केवलानि चरमादीनि द्रव्याणि संभवति असंभवश्च प्रागुक्तभावनानुसारेण सम्य
गत्वा स्वयं भावनीयः सप्तमश्चरमश्चाचरमश्चैवंरूप एवं यदा सषट्प्रदेशात्मकः स्कंधः पंचस्वाकाशप्रदेशेषु एकपरिक्षेपेण व्यवस्थितेष्वेवमव
गाहते स्थापना द्वौ पर माणू मध्यमप्रदेशे एकैकः शेषेषु तदा तेषां चतुर्णां चरमाणूनामेकसंबंधिपरिणामपरिणतत्वादेकवर्णत्वादे
कगंधत्वादेकगंध त्वादेकरसत्वादेकस्पर्शत्वात् स्वैकत्वव्यपदेशवच्चाचरम इति व्यपदेशो यौ तु द्वौ परमाणू मध्ये तावेकत्वपरि
णामपरिणतावित्यचरमः अष्टमश्चाचरमौ वक्तव्यं यदा सएव षट्प्रदेशात्मकः स्कंधः षट्सु प्रदेशेषु एकपरिक्षेपेणैकाधिकेनैवमवगाहते स्था
पना  तदा पर्यंतवर्तिनः परिक्षेपेणावस्थिताश्चत्वारः परमाणवः प्रागुक्तयुक्तेरेकश्चरमौ द्वौ च मध्यवर्तिनावचरमावितिः अन्यत्वतिर

DR. BHAU DAJI MEMORIAL

धति चतुर्णां परमाणूनां द्वे च प्रदेशांतरव्यवहिताधिवक्त्वपरिणामो न भवति तदभावाच्च नैष भंगउपपद्यते प्रतिषिद्धश्च सूत्रे पतीवक्ष्यति बिचउत्थपंच
छठमिति भत्रछठमिति प्राकृतशैल्या छठ अठ इत्यनयोः पदयोर्निर्देशस्ततोयमर्थः षष्ठमष्टमं च वर्जयित्वेति अथ नामैवंरूपोपि भंगो भवति तदेवं
गम्यं तेय एकवेष्टका अव्यवधानेन चत्वारः परमाणवस्ते तथाविधैकत्वपरिणामपरिणतत्वाच्चरमः तस्मादधिकोपि समश्रेण्यैव प्रतिबद्धत्वान्न तदति
रिक्त इति सोपि तस्मिन्नेव चरमे गण्यते॥ इत्येकं चरमं पुनश्च यो धिकमध्ये व्यवर्तित्वात् अनेकपरिणामित्वाच्च वस्तुनो ऽचरमोपि ततो ऽचरमावित्यपि
भवति अत्रापि न कश्चिद्विरोधस्तत्त्वं पुनः केवलिनो विदंति॥ नवमश्चरमौ चाचरमश्च यदा सएव षट्प्रदेशकः स्कंधस्त्रिष्वाकाशप्रदेशेषु समश्रे
ण्या व्यवस्थितेष्ववगाहते एकैकस्मिन्नाकाशप्रदेशे द्वौ द्वौ परमाणू चरमौ द्वावंत्यप्रदेशवर्तिनौ चरम इति चरमौ द्वौ तु मध्यप्रदेशवर्तिनौ वेको
ऽचरम इति॥ दशमश्चरमौ चाचरमौ च सचैवं यदा षट्प्रदेशेषु समश्रेण्या व्यवस्थितेष्ववमवगाहते॥ द्वावाद्ये प्रदेशे द्वौ द्वितीये एकस्तृतीये ए
कश्चतुर्थे इति स्थापना ⁝⁝·· तदा द्वौ परमाणू प्रथमप्रदेशवर्तिनावेकश्चरम एको ऽंत्यप्रदेशवर्ती चरम इति चरमौ द्वौ परमाणू च द्वितीय
प्रदेशवर्तिनावेको ऽचरम एकस्तृतीयस्तृतीयप्रदेशवर्ती अचरम इत्यचरमावपि द्वौ॥ एकादशश्चरमश्चावक्तव्यश्च सचैवं यदा सएव ष
ट्प्रदेशात्मकः स्कंधस्त्रिष्वाकाशप्रदेशेषु समश्रेण्यान्वेवमवगाहते॥ द्वावाद्ये प्रदेशे द्वौ समश्रेण्या व्यवस्थिते द्वितीयप्रदेशे द्वौ विश्रेणिस्थि
ततृतीयप्रदेशे स्थापना॥ ⁝⁝⁝ तदा द्विप्रदेशावगाढाश्चत्वारः परमाणवः समश्रेणिव्यवस्थितद्विप्रदेशावगाढद्व्यणुकस्कंधवदेकश्चरमो
द्वौ च विश्रेणिस्थप्रदेशावगाढौ परमाणू वदेको ऽवक्तव्यः द्वादशश्चरमश्चावक्तव्यौ च तत्र यदा सषट्प्रदेशेषु समश्रेण्या विश्रेण्या चैव
मवगाहते द्वौ परमाणू प्रथमप्रदेशे द्वौ समश्रेणिव्यवस्थिते द्वितीयप्रदेशे एकस्ततः परमुपरि तृतीयप्रदेशे एदेशे एकस्याधश्चतुर्थे इति
स्थापना ⁝⁝· तदा चत्वारः परमाणवो द्विप्रदेशावगाढाः पूर्ववदेकश्चरमो द्वौ च विश्रेणिस्थप्रदेशद्वयावगाढावक्तव्याविति त्रयोदशश्चरमौ
चावक्तव्यश्च यदा सएव षट्प्रदेशकः स्कंधः पंचस्वाकाशप्रदेशेषु समश्रेण्या चैवमवगाहते॥ द्वौ परमाणू द्वयोराकाशप्रदेशयोः समश्रेणि

व्यवस्थितयोराकाशप्रदेशयोः श्रेणिद्वयमध्यभागसमश्रेणिस्थैकस्मिन्नाकाशप्रदेशे द्वितीयस्थापना तदाद्विप्रदेशावगाढद्व्यणुकस्कंधवदुपरितन
द्विप्रदेशावगाढौ द्वौ परमाणू एकश्चरमो द्वावधस्तनावितिद्विचरमौ द्वावेकप्रदेशावगाढौ परमाणुवदेको ऽवक्तव्यः चतुर्दशश्चरमौ चावक्तव्यौ च। तत्र यदा स एव षट्प्रदेश
कः स्कंधः षट्स्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते द्वौ परमाणू द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोरेवाधः समश्रेणिव्यवस्थितयो
राकाशप्रदेशयोरेकः श्रेणिद्वयमध्यभागसमश्रेणिस्थप्रदेशे एक उपरितनयोर्द्वयोर्द्विश्रेणिस्थस्थापना तदा द्वावुपरितनावेकश्चरमो द्वावधस्तना
वितिचरमौ द्वौ चावक्तव्यकाविति। एकोनविंशतितमश्चरमश्चाचरमश्चावक्तव्याश्च सर्वैवं यदा स षट्प्रदेशकः स्कंधः षट्स्वाकाशप्रदेशेषु एकपरिक्षेपेण
विश्रेणिस्थैकादि कमवगाहते स्थापना तदा एकत्वेपुनश्चत्वारः परमाणवः प्रागुक्तयुक्तेरेकश्चरम एको ऽचरमो मध्यवर्ती एको ऽवक्तव्यो
यश्च विंशतितमश्चरमश्चावक्तव्यौ च स्थापना ॰ सप्तप्रदेशस्यैवोपपद्यते न षट्प्रदेशकस्य योप्येकविंशतितमश्चरमश्चाचरमो वावक्तव्यश्च स्था
पना सोपि सप्रदेशकस्यैव न षट्प्रदेश कस्य यस्तु द्वाविंशतितमः चरमश्चाचरमौ वावक्तव्यौ च स्थापना सो ऽष्टप्रदेशकस्यैवेति
त्रयोविं तित्रयोप्येकोनविंशत्यादयो ऽप्रतिषिद्धाः यश्च त्रयोविंशतितमश्चरमौ चरमश्चावक्तव्यश्च स एवं यदा स एव षट्प्रदेशश्चतुर्ष्वाकाशप्रदेशे
ष्वेवमवगाहते द्वौ द्वौ परमाणू द्वयोराकाशप्रदेशयोरेव समश्रेणिस्थे तृतीये आकाशप्रदेशे एको विश्रेणिस्थे इति स्थापना तदा आद्यप्रदेशाव
गाढौ द्वौ परमाणू चरमस्तृतीयप्रदेशावगाढश्चरमो द्वितीयप्रदेशावगाढौ द्वौ परमाणू चरमस्तृतीयप्रदेशावगाढश्चरमो द्वितीयप्रदेशावगाढौ द्वौ पर
माणू अचरमो विश्रेणिस्थो ऽवक्तव्य चतुर्विंशतितमः चरमो वाचरमश्चावक्तव्यौ च तत्र यदा स एव षट्प्रदेशात्मकः स्कंधः पंचस्वाकाशप्रदेशेषु
समश्रेण्या विश्रेण्या चैवमवगाहते त्रिष्वाकाशप्रदेशेषु समश्रेणिव्यवस्थितेष्वाद्ये एको द्वितीये एकस्तृतीये द्वौ द्वयोर्विश्रेणिस्थयोरेकैक इति स्थापना
तदा आद्यंतप्रदेशावगाढौ चरमौ मध्यावचरमो विश्रेणिस्थप्रदेशद्वयावगाढौ अवक्तव्यौ पंचविंशतितमः चरमौ वावक्तव्यश्च यदा स एव प्रदेशा
त्मकः स्कंधः पंचसु प्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते चतुर्ष्वाकाशप्रदेशेषु समश्रेणिव्यवस्थितेष्वाद्यप्रदेशद्वये एकैकश्चतुर्थे द्वौ पंचमे

विश्रेणिस्थे एकः तदा आद्यंतप्रदेशवर्तिनौ चरमौ मध्यप्रदेशद्वयवर्तिनौ द्वावचरमौ विश्रेणिप्रदेशस्थ एको ऽवक्तव्यः षड्विंशतितमः चरमौ वाचरमौ वा
वक्तव्यौ च सर्वैवं यदा स षट्प्रदेशकः स्कंधः षट्स्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवगाहते स्थापना तदा आद्यंतप्रदेशावगाढौ द्वौ चरमौ द्वौ विश्रे
णिस्थप्रदेशद्वयावगाढावक्तव्याविति॥ ७२॥ सत्तपएसिएणं भंते खंधे इत्यादि प्रश्नसूत्रं प्राग्वत् निर्वचनमाह। गोयमा सत्तपएसिएणं खंधे सिय चरमे नो अच
रमे इत्यादि इह द्वितीय चतुर्थ पंचम षष्ठ पंचदश षोडश सप्तदश अष्टादश द्वाविंशतितमरूपा नव भंगाः प्रतिषेध्याः शेषा उपादेयाः वक्ष्यति च बिय चउत्थ पंच छट्ठं पन्न
रसोलं च सत्तरट्ठारं वक्तियबावीसइमं सेसा भंगा ऊसत्तमए तत्र द्वितीयादीनामष्टादशपर्यंतानां प्रतिषेधकारणं प्रागुक्तमनुसर्त्तव्यं न केवलमत्र किंतु सर्वेष्वपि पुनर
पुस्कंधेषु यस्तु द्वाविंशतितमः सो ऽष्टप्रदेशकस्यैव घटते न सप्तप्रदेशकस्येत्युक्तं प्राक् तत इह प्रतिषेधः शेषास्तु प्रथमादयः षड्विंशतितमः पर्यंताः सप्तदश भंगाः
सप्तप्रदेशकस्कंधस्य वा भावनीयाः केवलं विनेयजनानुग्रहाय स्थापनामात्रेणोपदर्श्यंते प्रथमो भंगः चरमभंगः तृतीयो अवक्तव्यः सप्तमश्चरमश्चाव
रमश्च अष्टमश्चरमाश्चाचरमौ च नवमश्चरमौ वाचरमश्च दशमश्चरमौ वाचरमौ च एकादशश्चरमश्चावक्तव्यश्च द्वादशश्च
रमश्चावक्तव्यौ च त्रयोदशश्चरमौ वावक्तव्यश्च चतुर्दशश्चरमौ वावक्तव्यौ च एकोनविंशतितमश्चरमश्चावक्तव्यश्च विंशतितम
श्चरमश्चाचरमश्चावक्तव्यौ च एकविंशतितमश्चरमश्चाचरमौ वावक्तव्यश्च त्रयोविंशतितमश्चरमौ वाचरमश्चावक्तव्यौ च पंचविंश
तितमश्चरमौ वाचरमौ चा ऽवक्तव्यश्च षड्विंशतितमश्चरमौ वा चरमौ चाचरमौ चाचरमौ वाचरमौ वाचरमौ चाचरमौ वावक्तव्यौ च इह यथा
सप्तप्रादेशिकस्कंधएकस्मिन्नाकाशप्रदेशे अवगाहते द्वयोरपि त्रिष्वपि तत एवं भंगाः संभवंति॥ ७३॥ अठपएसिएणं भंते खंधे इत्यादि पृच्छासूत्रं अठपएसिए
णं खंधे सिय चरमे इत्यादि अत्र द्वितीय चतुर्थ पंचम षष्ट पंचदश षोडश सप्ताष्टादश रूपा अष्टौ भंगाः प्रतिषेध्याः शेषा ग्राह्याः वक्ष्यति च बिउ चउत्थ पंच
छट्ठं पण्णरसोलं च सत्तरट्ठारं एए वज्जिय भंगा सेसा सेसेसु खंधेसु गमा नवरं सेसा सेसेसु खंधेसु इति शेषा भंगाः शेषेषु सप्तप्रदेशकात् स्कंधादितरेषु
अष्टप्रदेशादिकेषु स्कंधेषु द्रष्टव्याः अन्ये त्वेवमुत्तरार्धं पठंति एए वज्जिय भंगा तेण परम वद्धिया सेसा स गमं ते च प्रथमादयो भंगाः षड्विंशतिपर्यंता अष्टाद

शभावनातः स्थापनातश्चप्राग्वन्भावनीयाः नचरमश्चाचरमौचावक्तव्यौवेत्येवंरूपोद्वाविंशतितमोभंगः स्थापनातएवं [diagram] अथद्विप्रदेशकादिषुस्कंधे
ष्ववक्तव्याविप्येवंरूपः षष्ठोभंगः कस्मात्प्रतिषिध्यते। तस्यापियुक्तितः संभवात्। तथाहिपदाएकः परमाणुरेकस्मिन्नाकाशप्रदेशेद्वितीयोविश्रेणिस्थप्र
देशेस्थापना [diagram] तदाएकोप्यवक्तव्योद्वितीयोप्यवक्तव्यइतिभवत्यवक्तव्याविति भंगस्त्रिप्रदेशकचिंतायामेकस्मिन्नेकपरमाणुरपरस्मिन्द्वौचतुःप्रदेशक
चिंतायांप्रत्येकंद्वौद्वौपरमाणूइत्यादिसत्यमेतत्। केवलमेवंरूपंजगतिद्रव्यमेवनास्तिकथमेनदवसितमितिचेतुच्यते। अतएवप्रतिषेधवचनात्यदि
हितथारूपंद्रव्यंसंभवेन्नाचार्यः प्रतिषेधंकुर्यादिति। यदिवासंभवेपिजातिपरनिर्देशात्तृतीयभंगकएवांतर्भावोवेदितव्यः यथाचाष्टप्रदेशकेस्कंधेभंगाः
प्रतिषेध्याविधेयाश्चउक्तास्तथासंख्यातप्रदेशकेअसंख्यातप्रदेशकेअनंतप्रदेशकेवप्रत्येकंवक्तव्यस्तथाचाह। संखेज्जपएसिएअसंखेज्जपएसिएइत्यादि
पाठसिद्धंनवरमियंसर्वचभावनायस्मादेकादिष्वप्याकाशप्रदेशेष्वष्टप्रदेशकादीनांस्कंधानामवगाहोभवति। तथाघटंतेयथोक्ताःसर्वेपिभंगाः नन्वसंख्या
तप्रदेशात्मकस्यानंतप्रदेशात्मकस्यवस्कंधस्यकथमेकस्मिन्नाकाशप्रदेशेऽवगाहउच्यतेतथामाहात्म्याच्चैतदुपपत्तुंयुक्तितः संभाव्यमानत्वात्तथाह्य
नंतानंताहिप्रदेशकाः स्कंधायावदनंताः नंताः संख्येयप्रदेशात्मकाः स्कंधा अनंतानंता असंख्येयप्रदेशात्मकाः स्कंधाअनंतानंता अनंतप्रदेशात्मका
लोकश्चसर्वात्मनाप्यसंख्येयप्रदेशात्मकस्तेचसर्वेपिलोकएवावगाढानालोकेततोवसीयतेसंत्येकस्मिन्नप्याकाशप्रदेशेवगाढाबहवः परमाणवो
बहवोद्विप्रदेशकाः स्कंधायावबहवोऽनंतप्रदेशात्मकाः स्कंधास्तथाचात्रपूर्वसूरयप्रदीपदृष्टांतमुपवर्णयंति यथैकस्यप्रदीपस्यगृहमध्येप्रज्वलितस्य
प्रभापरमाणवः सर्वमेवगृहंव्याप्नुवंति। तथाप्रत्येकंप्रदीपसहस्रस्यापितचप्रतिप्रदीपंप्रभापरमाणवोनभिन्नाः प्रतिप्रदीपंपुरुषस्यमध्यस्थितस्यछायाभेददर्श
नात्। ततोयथैतेस्थूलाअपिप्रदीपप्रभापरमाणवएकस्मिन्नप्याकाशप्रदेशेबहवोमांतितथापरमाण्वादयोपीतिनकश्चिद्दोषः आकाशश्चतथातथाव
काशदानस्वभावतयावस्तूनांचविचित्रपरिणमनस्वभावतयाविरोधाभावात्संप्रतिपरमाण्वादिषुयेभंगाग्राह्यायेचषष्ठादिषुनग्राह्यास्तसंग्राहिकाः ८८
संग्रहिणिगाथाआह। ७। परमाणुंमियतइउइत्यादिपाठसिद्धंभावितार्थत्वात्तनवरंषट्प्रदेशादिचिंतायांप्रतिषेधाभंगास्तोकाइतिलाघवार्थंतएवसंगृही

ताः इहानंतरंस्कंधानांचरमाचरमादिवक्तव्यतोक्तास्कंधाश्चयथायोगंपरमंडलादिसंस्थानेभवंतीत्यतः संस्थानवक्तव्यतामाह ७। कइणंभंतेसंठाणापन्न
त्ताइत्यादिसुगमंपरिमंडलादीनांसंस्थानानांस्वरूपस्याधः प्रथमपदाधसविस्तरंप्ररूपितत्वात्शेषंपाठसिद्धंनवरंपरिमंडलेणंभंतेसंठाणेसंखेज्जपएसिए
किंसंखेज्जपएसोगाढेपुच्छागोयमासंखेज्जपएसोगाढेनोअसंखेज्जपएसोगाढइतियस्मात्तस्यसंख्येयाएवप्रदेशास्ततःकथमसंख्येयेष्वनंतेषुवाप्रदेशे
ष्ववगाहेतेइतिअसंख्यातप्रदेशात्मकंवापुनःपरिमंडलसंस्थानंसंख्येयेषुवाप्रदेशेष्ववगाहेतविरोधाभावान्नानंतप्रदेशेषुअसंख्यातप्रदेशात्मकस्यानंतेषुप्र
देशेष्ववगाहनाविरोधात्अनंतप्रदेशात्मकस्यापिविरोधएवयस्माल्लोकोप्यसंख्यातप्रदेशात्मकएवलोकादन्यत्रचपुद्गलानांगत्यसंभवस्तस्मादनंतप्रदेश
कमप्यसंख्येयेषुप्रदेशेष्ववगाहेतेषुएवंवृत्तादीन्यपिसंस्थानानिप्रत्येकंभावनीयानिसंख्यातप्रदेशासंख्यातप्रदेशानंतप्रदेशपरिमंडलादिसंस्थानचरमाचर
मादिचिंतायांनिर्वचनसूत्राणिरत्नप्रभायाइवप्रत्येतव्यानि। अनेकावयवविभागात्मकत्वाविवक्षयाअचरमंचरमाणिचेतिनिर्वचनंप्रदेशविवक्षायांचरमां
तप्रदेशाश्चाचरमांतप्रदेशाश्च। संप्रतिसंख्यातप्रदेशस्यसंख्यातप्रदेशावगाढस्यपरिमंडलादेश्चरमादिविषयमल्पबहुत्वमभिधित्सुराह। परिमंडलस्सणं
भंतेइत्यादिसुगमंनवरंद्रव्यार्थताचिंतायांचरमाणिसंखेज्जगुणाइंइति। सर्वात्मनापरिमंडलसंस्थानस्यसंख्यातप्रदेशात्मकत्वात्असंख्यातप्रदेशस्यासं
ख्यातप्रदेशावगाढस्याल्पबहुत्वंरत्नप्रभायाइवभावनीयमनंतप्रदेशकस्याप्यसंख्यातप्रदेशावगाढस्यनवरंसंक्रमेअनंतगुणाइतिशेषचिंतातोयदा
द्रव्यचिंतांप्रतिसंक्रमणंतदातानि। चरमाण्यनंतगुणानिवक्तव्यानि तद्यथासव्वत्थोवेएगेअचरमाइंखेत्ततोअसंखेज्जगुणाइंदव्वतोअनंतगुणाइंअच
रमंचचरमाइंणियदोविसेसाहियाइंइतितदेवंसंस्थानान्यपिचरमाणिदिविभागेनचिंतितानिसंप्रतिजीवादीन्चरमाचरमविभागेनचिंतयाति ७।
जीवेणंभंतेगतिचरमेणंकिंचरमेइत्यादिगतिपर्यायरूपंचरमंगतिचरमंतेनजीवोभदंतचिंत्यमानः किंचरमोवाभगवानाह। गोतमस्याच्चरमः स्यादचरमः कश्चि
च्चरमकश्चिदचरमइत्यर्थः तत्रयः पृच्छासमयेसामर्थ्यान्मनुष्यगतिरूपेपर्यायेवर्तमानोऽनंतरंनकिमपिगतिपर्यायमवाप्स्यतिकिंतुमुक्तएवचिंतासग
तिचरमशेषस्त्वगतिचरमः। ७। नेरइएणंभंतेगइचरमेइत्यादिनैरयिकोभदंतगतिचरमेणसामर्थ्यान्नरकगतिपर्यायरूपेणचरमेणचिंत्यमानः

किंचरमोवाभगवानाह।गोतमेस्याच्चरमःस्यादचरमोयोनरकगतिपर्यायादुद्धृत्तोनाभूयोपिनरकगतिपर्यायमनुभविष्यति।सचरमःशेषस्तुचरम। एवंचतुर्विं
शतिदंडकक्रमेयानिरंतरंतावदुक्तव्यंयावद्वैमानिकोवैमानिकसूत्रंबहुवचनदंडकसूत्रेनिर्वचनंचरमाविति पृच्छासमयेकेवनर्नैरयिकास्तेषांमध्येऽचरमं
केचनर्नैरयिकगतिपर्यायेणाचरमाइतरेत्वचरमास्तेतएकमेवेदमत्रनिर्वचनंचरमाअपिएवंसर्वस्थानेष्वपितांतांगतिमधिकृत्यभावनीयं।७।नेरई
एणंभंतेठिइचरमेणइत्यादिनैरयिकोभदंतनत्रैवनरकेषुचरमसमयेस्थितिपर्यायरूपेणचरमेणचिंत्यमानःकिंचरमोअचरमोवाभगवानाहस्यादच
रमःकिमुक्तंभवतियोभूयोपिनरकमागम्यस्थितिचरमसमयंप्राप्स्यतिसोचरमःशेषस्तुचरमःएवंनिरंतरंयावद्वैमानिकःबहुत्वदंडकचिंतायांचरमा
विअचरमाविइतिइहयेपृच्छासमयेस्थितिचरमसमयवर्त्तनेतिचिंत्यंतेइत्येतन्नअन्यथाउद्वर्त्तनायाविरहस्यापिसंभवात्एकादीनामपिकोद्वर्तनाया
भावात्चरमाविअचरमावीत्युभयत्रापिवस्तुसंभाविनाबहुवचनेननिर्वचनंनोपपद्येतकिंतुयेपृच्छासमयेवर्तनेतेक्रमेणस्वस्थितिचरमसमयं
प्राप्ताःसंतस्तेनरूपेणाचरमावाइत्येतद्बहुवचनेनउपपद्यतेयथोक्तंनिर्वचनमिति।भवचरमसूत्रंगतिचरमसूत्रवत्।७।नेरइएणंभंतेभासाचर
मेणमित्यादिभाषाचरमंचरमाभाषातत्तोयमर्थःनैरयिकोभदंतचरमयाभाषयाकिंचरमोऽचरमोवाशेषंसुगमं।बहुवचनसूत्रेप्रश्नभावा
र्थयेपृच्छासमयेनारकास्तिस्वकालक्रमेणाचरमांभाषांप्राप्ताःसंतस्तयाचरमयाभाषयाचरमाअचरमावाइतिततोनिर्वचनसूत्रमप्युपपन्नं
वगुच्छासाहारसूत्रेअपिभावनीयेभावऔदयिकःशेषंसुगमं।७।इतिश्रीमलयगिरिविरचितायांप्रज्ञापनाटीकायांदशमंचरमाख्यं
पदंसमाप्तं।७।।एतदेवंव्याख्यानंदशमंपदमिदानीमेकादशमारभ्यतेतस्यचायमभिसंबंधःइहानंतरपदेसत्वानांयदुपपातक्षेत्रंरत्नप्र
भादितस्यचरमाचरमविभागःप्रतिपादितइहतुभाषापर्याप्तानांसत्यादिभाषाविभागःविभागोपदर्शनंक्रियतेतत्रेदमादिसूत्रं।७।सेनूणंभंते
मण्णामिइइहारिणीभासाइत्यादिसेशब्दोऽथशब्दार्थःसचवाक्योपन्यासेनूनमुपमानावधारणतर्कप्रश्नहेतुषुइहावधारणेभदंतइत्यामंत्रणेमा
न्यअवबुध्येइतिएवंयदुतअवधार्यतेअवगम्यतेअर्थोऽनायत्यवधारणीअवबोधबीजभूतादित्यर्थःभाष्यतेइतिभाष्यतेइतिभाषात द्योग्यतथा

परिणामितमिसृष्टनिसृज्यमानद्रव्यसंहतिःएषपदार्थःवाक्यार्थःपुनरयंअथभदंतएवमहंमन्येयदुतवेऽयमवधारणीभाषेति।नचैतत्सकृत्प्रनालो
च्यैवमन्येकिंतुचिंतयामियुक्तिद्वारेणापिपरिभावयामिइतिएवंयदुतअवधारणीभाषेतिएवमात्मीयमभिप्रायंभगवतेनिवेद्यातिकृतार्थविनिश्चय
निमित्तमेवंभवंगतपृच्छति।अहमन्नामीइउहारिणीभासाइतिअथप्रक्रियाप्रश्नानंतर्यमंगलोपन्यासप्रतिवचनसमुच्चयेषुइहप्रश्नेकाक्वास्य
सूत्रस्यस्तपाठस्त तोयमर्थः।अथभगवन्नेवमहमन्येएवमहंमननंकुर्यांयथाअवधारणीभाषेति।द्वितीयाभिप्रायनिवेदनमधिकृत्यप्रश्नमाह।
अहंचेतेमीहारिणीभासाइति।अथभगवन्नेवमहंचिंतयामिएवमहंचिंतनंकुर्यांयदुतावधारणीभाषेतिनिरवद्यमेतदिस्याभिप्रायःसंप्रतिपृच्छां
समयात्यथापूर्वमननंचिंतनंवाकृतवानिदानीमपिपृच्छासमयेतथैवमननंचिंतनंवाकरोमिनान्यथेतिभगवद्वानेसंवादयितुकामःपृच्छति।अहमन्ना
मीइउहारिणीभासाअहचिंतामीइउहारिणीभासाइतितयेतिसमुच्चयनिर्देशावधारणसाद्वयप्रेष्येषुइहनिर्देशेकाक्वाचास्यापिपाठस्ततःप्रश्नार्थत्वाव
गतिःभगवन्यथापूर्वमतवानिदानीमप्यहंतथामान्यइतिएवंयदुतअवधारणीभाषेतिकिमुक्तंभवतिनेदानींनमनर्न्यचमदीयमर्वापस्यकश्चिद्वि
शेषोस्त्येतद्भगवन्निति।तथायथापूर्वंभगवन्चिंतितवानिदानीमप्यहंतथाचिंतयामि।इतिएवंयदुतअवधारणीभाषेति।अस्सेतदिति।एवंगौतमे
नाभिप्रायनिवेदनेप्रश्नेचकृतेभगवानाह।हंतागोयमामन्नामीइउहारिणीभासाइति।हंतेतिसंप्रेषणप्रत्यवधारणविवादेषुइहप्रत्यवधारणामन्नामी
त्यादीनिक्रियापदानिप्राकृतशैल्याछादसत्वान्मुष्मदर्थप्रयुज्यंते।ततोयमर्थःहंतागौतममन्यसेत्वंयदुतअवधारणीभाषेतिजानाम्यहंकेवलज्ञाने
नेदमित्यभिप्रायः।तथाचिंतयसित्वमित्येवंयदुतावधारणीभाषेति।इदमप्यहंचेद्मिकेवलित्वात्अहमन्नामीइउहारणीभासाइति।अथेत्यानंतर्य
मसंमतत्वात्।उद्धनिःशंकंमन्यस्वइत्येवंयदुतअवधारिणीभाषेतिअथइतउद्धनिशंकंचिंतयइत्येवंयदुतावधारणीभाषाइतिअतीवेदंसाध्व
नवद्यमित्यभिप्रायः।तथातथाअविकलंपरिपूर्णमन्यस्वइत्येवंयदुतावधारणीभाषेतियथापूर्वंमतवान्किमुक्तंभवति।यथात्वयापूर्वंमननंकृत
मिदानीमपिमननमसंमतत्वात्सर्वनार्थेवमन्यस्वमामनागपिशंकांकार्षीरिति।तथातथाअविकलंपरिपूर्णचिंतयइत्येवंयदुतावधारणीभा

षाइतियथाइतियथापूर्वंचिंतितवान्मामनागपिशंकिष्टाइति॥नदेवंभाषाअवधारिणीतिनिर्णीतमिदानीमियमवधारिणीभाषासत्याउतमृषेत्यादिनिर्णा
यार्थंपृछति॥ओहारिणीणंभंतेइत्यादि॥अवधारिणीअवबोधबीजभूताणमितिप्राग्वत्॥भदंतभाषाकिंसत्यामृषासत्यामृषाअसत्यामृषेतितत्रसंतो
मुनयस्तेषामेवाभगवदाज्ञासम्यगाराधकतयापरमशिष्टत्वात्सद्भ्योहिताइहकत्वेनमुक्तिप्रापिकासत्यायुगादिपाठाद्युपगमात्यःप्रत्ययःयदायायसै
हितःसतत्रसाधुरितिसत्सुसाध्वीसत्यानत्रसाधाविनियप्रत्ययःयदिवासंतोमूलोत्तरगुणास्तेषामेवजगतिमुक्तिपदप्रापदप्रापकतयापरमशोभन
त्वात्‌अथवासंतोविद्यमानास्तेचभगवदुपदिष्टाणवजीवादयः॥पदार्थाअन्येषांकरअनामात्ररचितसत्ताकतयात्वाताऽसत्त्वात्॥तेभ्योहितानि
षुसाध्वीवायथावस्तुतत्वप्ररूपणं नसत्याविपरीतस्वरूपामृषाउभयस्वभावासत्यामृषायापुनस्तिसृष्वपिभाषास्वनधिकृतानद्लक्षणायोगतस्त्वानंत
र्भाविनीसाआमंत्रणाज्ञापनादिविषयाअसत्यामृषाउक्तंच॥सब्भाहियासयामिहसंतोमुणयोगुणापयत्थावा॥तव्विवरीयामिहसंतोमुणयोगुणाप
यत्थावा॥तव्विवरीयामोसासामीसाजानदुभयसहावा॥अणहिगयाजातीसुविसद्दोच्चियकेवलोअसच्चमोसाइतिभगवानाहगोतमसियसच्चाइत्या
दिस्यात्सत्यासत्यापिभवतीत्यर्थःएवंस्यादसत्यास्यात्सत्यामृषास्यादसत्यामृषेति॥अत्रैवार्थेप्रश्नमाहसेकेणठेणंभंतेइत्यादि॥सुगमंभगवा
नाह॥गोतमआ राधनीसत्याइहविप्रतिपत्तौसत्यांवस्तुप्रतिष्ठापनबुध्यायासर्वज्ञमतीनुसारेणभाष्यतेअस्त्यात्मासदसन्नित्याद्यनेकधर्मकला
पालिंगितइत्यादिसायथावस्थितवस्त्वभिधायिनीआराध्यतेमोक्षमार्गो ऽनयेत्याराधनीआराधनीत्वात्सत्येतिविराधनीमृषेतिविराध्यतेमुक्तिमार्गो
ऽनयेतिविराधनीविप्रतिपत्तौसत्यांवस्तुप्रतिष्ठाशयासर्वज्ञमतप्रातिकूल्येनयाभाष्यते॥यथानास्त्यात्माएकांतनित्योवेत्यादि॥तथासत्यापिप
रपीडोत्पादिकासाविपरीतवस्त्वभिधानात्परपीडाहेतुत्वाद्वामुक्तिविराधनाद्विराधनीत्वाच्चमृषेति॥यानुकिंचननगरंपत्तनंवाधिकृत्यपंचस
दारकेषुनातिष्वेवमभिधीयतेयथास्मिन्नद्यदशदारकाजाताइति॥सापिस्वव्यवहारनयमतेनआराधनविराधनीइयंहिपंचानांदारकाणां
यज्जन्मतावतांशेनसंवादसंभवादाराधनीदशानपूर्यंतइत्येतावतांशेनविसंवादसंभवात्विराधनीराआधनीचासौविराधनीचआराध

नविराधनीकर्मधारयत्वात्पुंभावःआराधनविराधनी लाच्चसत्यामृषायामुनेवाराधनीतद्लक्षणविगमात्॥नापिविराधनीविपरीतवस्त्वभिधाना
भावात्परपीडाहेतुभावाच्चनाप्याराधनविराधनीएकदेशसंवादविसंवादविसंवादाभावात्हेसाधोप्रतिक्रमणंकुरुकुरुस्थानिप्रत्युपेक्षस्वेत्या
दिव्यवहारपतिताआमंत्रिण्यादिभेदभिन्नासाअसत्यामृषानामचतुर्थीभाषासेएणंठेणमित्याद्युपसंहारवाक्यं॥इहयथावस्थितवस्तुतत्वाभि
धायिनीभाषाआराधनीत्वात्सत्येत्युक्तंततःसंशयापन्नस्तदपनोदायपृछति॥७॥अहभंतेगाउमियाइत्यादिअथभदंतगावःप्रतीताःपशवा
ऽज्ञाःपक्षिणोपिप्रतीताःप्रज्ञापनीप्रज्ञाप्यते ऽर्थोनयेतिप्रज्ञापनीअर्थप्रतिपादनाप्ररूपणीयेतियावत्एणमितिपूर्ववत्एषाभाषानैषाभाषामृषे
तिइयमत्रभावनागावइतिभाषागोजातिंप्रतिपादयतिजातौचत्रिलिंगाअप्यर्थाअभिधेयालिंगत्रयस्यापिजातौसंभवात्॥एवंमृगपशुपक्षि
ष्वपिभावनीयं॥नचैतेशब्दास्त्रिलिंगाभिधानिनस्तथाप्रतीतेरभावात्॥किंतुपुलिंगगर्भास्ततःसंशयःकिमयंप्रज्ञापनीकिंवानेतिभगवाना
ह॥हंतागोयमाहंतेतिप्रत्यवधारणेगोतमेत्यामंत्रणंगावइत्यादिकाभाषाप्रज्ञापनीतदर्थकथनायप्ररूपणीयथावस्थितार्थप्रतिपादकतयाम
त्यत्वात्॥तथापिजात्यभिधायिनीयंभाषाजातिश्चत्रिलिंगार्थसमवायिनीततोजात्यभिधानेनत्रिलिंगाअपियथासंभवंविज्ञेयाअभिहिताभवंतीति
भवतियथावस्थितार्थाभिधानादियंप्रज्ञापनीयार्येतियदापुनःकिंतुपुल्लिंगगर्भाइतितत्रशब्दलिंगव्यवस्थालक्षणवशात्लक्षणंचस्त्रीपुंनपुंस
होक्तौपरंतथाग्राम्याशिशुध्द्रिंचुरसंघेस्त्रीप्रायइत्यादिति॥ततोभवतुकचित्शब्दलक्षणवशात् स्त्रीत्वंकुचित्पुंस्त्वंकचित्नपुंसकत्वंवा
परमार्थतःपुनःसर्वोपिनातिशब्दस्त्रिलिंगानप्यर्थान्ततद्देशकालप्रस्तावादिसामर्थ्यवशाऽभिधत्तेइतिनकश्चिद्दोषःनचेयंपरपीडाजनिकानाम
पिविप्रतारणादिदुष्टविवक्षासमुत्थाततोनमृषेतिप्रज्ञापनाअहभंतेजयइछिवकुइत्यादिअथेतिप्रश्नेभदंतइत्यामंत्रणेयावस्त्रीवाकुस्त्रीलिं
गप्रतिपादिकाभाषायथामालतेत्यादिलक्षणायापुरुषवाकुघटःपटइत्यादिरूपायानपुंसकवाकुकुडंकांडमित्यादिलक्षणाप्रज्ञापनीयंभा
षानैषामृषेतिकिमत्रसंशयकार णंयेनेत्थंपृछतीतिचेत्इहयद्यपकुघादयःशब्दायथाक्रमंस्त्रीपुंनपुंसकलिंगाभिधायिनःस्त्रीपुंनपुंस

कानांचलक्षणमिदंयोनिर्मृदुत्वमस्थैर्यंमुग्धताक्लीबतास्तनौपुंस्कामितेतित्तिलिंगानिसप्तस्त्रीत्वेप्रचक्षतेमेहनंखरतादार्ढ्यंशौंडीर्यंस्मश्रुधृष्टता
स्त्रीकामितेतित्तिलिंगानिसप्तपुंस्त्वेप्रचक्षतेनादिस्मश्रुकेशादिभावाभावसमन्वितंनपुंसकंबुधाःप्राहुर्मोहानलसदीपितं नथान्यत्रोक्तंस्तनके
शवतीस्त्रीस्यात्पुरुषःस्मृतः उभयोरंतरंयच्चतत्रभावेनपुंसकंनचैवंरूपाणिस्त्र्यादिलक्षणानिषष्ठादिषूपलभ्यंतेतथाहियद्येकैकावयव
पृथक्करणेनसम्यग्निभालनंक्रियतेनथापिनतेषांस्त्र्यादिलक्षणानांतत्रोपलंभोस्तिनतःप्रज्ञापनीयंभाषानवेतिजातसंशयस्तदपनोदायपृछ
तिस्म अतभगवानाह हंतागोयमेत्यादिअक्षरगमनिकाप्राग्वत्भावार्थस्वयंनेहशब्दप्रवृत्तिचिंतायांयथोक्तानिस्त्र्यादिलक्षणानिस्त्रीलिंगा
दिशब्दाभिधेयानिकिंत्वभिधेयधर्मादयमयमिदंशब्दव्यवस्थाहेनवउपदेशपारंपर्यगम्याःस्त्रीलिंगादिशब्दाभिधेयानचैतेकल्पनामात्रंव
स्तुनस्तत्तच्छब्दाभिधेयतयापरिणमनभावात्तेषामपिधर्म्मांणांनत्वतस्तात्त्विकत्वात् आहचशाकटस्तनुरपिइयमयमिदमितिशब्दव्यव
स्थाहेतुरभिधेयधर्मउपदेशगम्यःस्त्रीपुंसनपुंसकत्वातिव्यवस्थापितश्चायमर्थोविस्तरतस्केणस्वोपज्ञशब्दानुशासनविवरणादृतिततःशब्द
व्यवहारापेक्षयायथावस्थितार्थप्रतिपादनात्प्रज्ञापनीयंभाषादुष्टविवक्षातःसमुत्पत्तेरभावात्परपीडाहेतुत्वाभावाच्चनमृषेति ६८
अहभंतेइत्यादि अथभदंतयावस्याज्ञापनीआज्ञाप्यतेआज्ञासंपादनेप्रयुज्यतेनयासाआज्ञापनीस्त्रियाआज्ञापनीस्याज्ञापनीस्त्रिया
आदेशदायिनीत्यर्थः यावपुमाज्ञापनीनपुंसकाज्ञापनीप्रज्ञापनीयंभाषानैषामृषेति अत्रेदंसंशयकारणंकिलसत्याभाषाप्रज्ञाप
नीभवतिइयंचाभाषाआज्ञासंपादनक्रियायुक्ताभिधायिनीआज्ञाप्यमानश्चस्यादिस्तथाकुर्यान्नवाततःसंशयमापन्नोविनिश्चयायपृ
भत्र
छतिभगवानाहहंतागोयमाइत्यादिअक्षरगमनिकास्कगमानिकास्कगमाभावार्थस्त्वयमाज्ञापनीभाषाविधापरलोकाबाधिनीइतरावत ९३
त्रयास्वपरानुग्रहबुद्ध्यान्नाव्यवर्मंतरेणआमुष्मिकफलसाधनायप्रतिपन्नेहिकालंबनप्रयोजनाविवक्षितकार्यप्रसाधनसामर्थ्ययुक्ताववि
नीतस्त्र्यादिविनेयजनविषयासापरलोकाबाधिनीएषैवसाधूनांप्रज्ञापनीपरलोकाबाधनानइतरत्विनारविषयामावस्वपरसंक्लेशज

ननान्मृषेत्यप्रज्ञापनीसाधुवर्गस्यउक्तंच अविर्णायमाणवंठोकिलसर्वभासईमुसंतहयघंटालोहंमाउक्कोकंडकरणेपज्जत्तेधात्क्रियाहिद्द
व्यंविनमयतिनाद्रव्यंविनमयतिनाद्रव्यमित्यभिप्रायःअहभंतेजायइत्थिपण्णवणीइत्यादि अथभदंतयाचभाषास्त्रीप्रज्ञापनीस्त्रील
क्षणप्रतिपादिकायोनिर्मृदुत्वमस्थैर्यमुग्धतेत्यादिरूपायाचपुंप्रज्ञानीपुरुषलक्षणप्रतिपादिकामेहनंखरतादार्ढ्यमित्यादिरूपायाच
ग्रंथाग्रं ६००० नपुंसकप्रज्ञापनीनपुंसकलक्षणाभिधायिनीस्तनादिस्मश्रुकेशादिभावाभावसमन्वितमित्यादिलक्षणोप्रज्ञापनीयंभा
षानैषाभाषामृषेतिकोशभिप्रायइतिचेत्उच्यते इहस्त्रीलिंगादयःशब्दव्यवहारबलादन्यत्रापिप्रवर्तंतेयथाखट्वाघट्टकुट्यादयःखट्वा
दिष्वर्थेषुनखलुतत्रयथोक्तानिस्त्र्यादिलक्षणानिसंतियथोक्तंप्राकृततःकिमियमव्यापकत्वात्स्त्र्यादिलक्षणप्रतिपादिकाभाषानवक्त
व्या आहोश्विन्नवक्तव्येतिसंशयमापन्नपृष्टवान् अत्रभगवानाह हंतागोयमाइत्यादिअक्षरगमनिकाप्रतीताभावार्थस्त्वयंइहस्त्र्यादिल
क्षणद्विधाशब्दव्यवहारानुगतंवेदानुगतंचतत्रयदाशब्दव्यवहाराश्रितंप्रतिपादयितुमिष्यतेतेदैवंनवक्तव्यमव्यापकत्वात्यथावाव्यापक
तातथाप्राग्भेवलेशतोदर्शितविस्तरतस्तुस्वोपज्ञशब्दानुशासनविवरणेननइयंतदधिकस्माप्रज्ञापनीयदानुगतंप्रतिपादयितुमिष्यते तदा
यथावस्थितार्थाभिधानात्प्रज्ञापान्यवनमृषेति अहभंतेजाजाइइत्थिचउइत्यादिअथभदंतयाजातिस्त्रीवाक्जातौस्त्रीवचनंसत्तेतियाजा
तौपुंवाक्पुंवचनभावइतियाचजातौनपुंसकवाक्सामान्यमितिप्रज्ञापनीएषाभाषानैषाभाषामृषेतिकोशभिप्रायइतिचेत्उच्यते जातिरि
हसामान्यमुच्यते सामान्यस्यचनलिंगसंख्याभ्यांयोगोवस्तूनामेवलिंगसंख्याभ्यांयोगस्यतीर्थांतरीयैरभ्युपगमात्तलोयदियरं
जातावौत्सर्गिकवचनंनपुंसकलिंगंचोपपद्येतनत्रिलिंगताअथचत्रिलिंगाभिधायिनोपिशब्दाःप्रवर्तंते यथोक्तमनंतरंततःसंशयःकि
मेषाभाषाप्रज्ञापनीकिंवानेतिअत्रभगवानाह हंतागोयमाइत्यादिअक्षरार्थःसुगमोभावार्थः स्त्वयंजातिर्नामजातिमसामान्यमुच्यते सामा
न्यंचनपरपरिकल्पितमेकमनवयवमक्रियंतस्यप्रमाणबाधितत्वात्तथार्घटीकायांभावितमिततत्तोवधार्यंकिंतुसमानःपरिणामोवस्तुनएव

समानः परिणामोयः सपंचसामान्यमितिवचनात्॥ समानपरिणामश्चानेकधर्म्माधर्म्माणांपरस्परंधर्म्मिणोपिचसहान्योन्यानुवृत्यभावात्तथा
प्रमाणेनोपलभ्यमानोघटेनजानेरपित्रिलिंगतेति प्रज्ञापन्येषाभाषानमृषेति॥ ७॥ अहभंतेइत्यादि अथभदंतयाजातिस्त्र्याज्ञापनीजातिमधिकृत्यस्त्रि
याआज्ञापनीयथाअस्मकाब्राह्मणीक्षत्रिया॥ एवंकुर्यादितिएवंजातिमधिकृत्यनपुंसकाज्ञापनीएषाभाषामृषेतिअत्रापिसंशयकारमिदंआज्ञा
पनीहिनामआज्ञासंपादनक्रियायुक्तस्याभिधायिनीस्यादिश्चाप्यमानस्तथाकुर्यान्नवेतिसंशयः किमस्य प्रज्ञापनीकिंवान्येतिअत्रनिर्वचन
माह॥ हंतागोयमेत्यादि अक्षरार्थसुगमोभावार्थस्वयंआज्ञापनीहिनामपरलोकाबाधिनीसाप्रोच्यतेयास्वपरानुग्रहबुद्ध्याविवक्षितार्थसंपादन
सामर्थ्योपेतविनीतस्त्र्यादिविनेयजनविषयायथाअमुकाब्राह्मणीसाध्वीशुभेनक्षत्रमध्येस्वमुकमंगंश्रुतस्कंधंचपठेदित्यादिसाप्रज्ञापन्येवंदोषाभा
वाच्छेषानुस्वपरपीडाजननान्मृषेत्यप्रज्ञापनीति॥ ७॥ अहभंतेइत्यादि॥ अथभदंतयाजातिस्त्रीप्रज्ञापनीजातिमधिकृत्यस्त्रियास्त्रीलक्षणस्यप्रति
पादिकायथास्त्रीस्वभावात्तुच्छाभवति॥ गौरवबहुलाचलेंद्रियादुर्बलाचधृत्येति॥ उक्तंच॥ तुच्छागारवबहुलाचलिंदियादुब्बलायधीईएइत्यादियाचजाति
मधिकृत्यपुनप्रज्ञापनीपुरुषलक्षणस्यप्ररूपिकायथापुरुषःस्वभावात्गंभीराशयोभवतिमहत्यामपिआपदिनक्लीनतांभजतेइत्यादियाचजाति
मधिकृत्यनपुंसकप्रज्ञापनीनपुंसकजातीप्ररूपिकायथानपुंसकः॥ स्वभावात्क्लीबोभवतिप्रबलमोहानलज्वालाकलापज्वालितयेत्यादिप्रज्ञाप
न्येषाभाषानैषाभाषामृषेतिअत्रापिदंसंशयकारणंवर्ण्यतेखलुजातिगुणाएवंरूपाःपरंक्वचित्कदाचित्व्यभिचारोपिदृश्यते॥ तथाहिस्त्र्यपिकाचि
त्गंभीराशयाभवतिधृत्यावातीवबलवतीपुरुषोपिचकश्चित्तुच्छप्रकृतिरुपलभ्यतेस्त्रीकायामपिचापिचापिचापिदिक्लीबतांभजमानोनपुंसकोपिकश्चि
न्मंदमोहानलोवसत्वश्चततःसंशयाकिमेषाप्रज्ञापनीकिंवानेति अत्रभगवानाह॥ हंतागोयमाइत्यादिअक्षरार्थःसुगमोभावार्थस्त्वयंइहजातिगुणप्र ९२
रूपणंबाहुल्यमधिकृत्यभवतिनसमस्तव्यक्त्याक्षेपेणातएवजातिगुणान्प्ररूपयंतोविमलधियःप्रायःशब्दमुच्चारयंतिप्रायेणेदंद्रष्टव्यं॥ यत्रापिनप्रायः
शब्दश्रवणंतत्रापिसद्रष्टव्यःप्रस्तावाततःक्वचित्कदाचित्व्यभिचारोपिदोषाभावात्प्रज्ञापन्येषाभाषानमृषेतिइहभाषाद्विधादृश्यतेएकासम्यगुपयु

MEMORIAL

क्तस्यद्वितीयाच्चितरस्यतत्रयःपूर्वापरानुसंधानपाटवोपेतःश्रुतज्ञानेनपर्यालोच्यार्थान्भाषतेसमम्यगुपयुक्तः सचैवंजानातिअहमेतत्भाषेइति
यस्तुकरणापटिष्ठतयावातादिनोपहतचैतन्यकतयावापूर्वापरानुसंधानविकलोयथाकथंचिन्मनसाचिन्मनसाविकल्प्यविकल्प्यभाषतेसइतरः सचै
वजरगवस्तुअहभंतेमंदकुमारएवाइत्यादि॥ अथभदंतमंदकुमारकउत्तानशयाबालिकाभाषमाणा॥ भाषायोग्यान्पुद्गलानादायभाषात्वेन
परिणमय्यविसृजतीएवंजानातियथाहमेतत् ब्रवीमीतिभगवानाहगौतमनायमर्थःसमर्थोनायमर्थोनायमर्थोयुक्त्युपपन्नोयतोयद्यपिमनःपर्या
स्तापर्याप्तस्तथापितस्याद्यापिमनः॥ करणमपटुअपटुत्वाच्चमनःकरणस्यक्षयोपशमोपिमंदंश्रुतज्ञानावरणस्यहिक्षयोपशमःप्रायोमनःकरण
पटिष्ठतामप्यवलंब्योपजायतेतेननजानातिमंदकुमारिकावाभाषमाणायथाहमेतत्ब्रवीमीतिकिंसर्वेपिकिंनजानातीत्यतआह॥ नन्नत्थसण्णिणो
इतिअन्यत्रशब्दोत्रपरिवर्जनार्थःदृष्टश्चान्यत्रापिपरिवर्जनार्थोयथाअन्यत्रद्रोणभीष्माभ्यांसर्वेयोधाःपराङ्मुखाइतिद्रोणभीष्मौवर्जयित्वाइत्यर्थः संज्ञी
अवधिज्ञानीजातिस्मरःसामान्यतोविशिष्टमनःपाटवोपेतोवातस्मादन्योनजानातिसंज्ञानुयथोक्तस्वरूपोजानातिएवमाहारादिविषयाण्यपिचत्वारिसू
त्राणिभावनीयानि॥ नवरमतिराउलेइतिदेशीपदमेतत्स्वामिकुलमित्यर्थः॥ भट्टिदारएइतिभर्त्तास्वामीतस्यदारकःपुत्रोभर्तृदारकः॥ एवमुष्ट्रादिवि
षयाण्यपिपंचसूत्राणिभावयितव्यानिनवरमुष्ट्रादयोप्यतिबालावस्थापरिग्राह्यानजरठावस्थायांहिपटुविज्ञानस्यसंभवात्॥ संप्रत्येकवचनादिभाषा
विषयसंशयापनोदार्थंपृच्छति॥ अहंभंतेइत्यादि॥ अथभदंतमनुष्योमहिषोअश्वोहस्तीसिंहोव्याघ्रावृकएतेप्रतीतोद्वीपीचित्रकविशेषःऋक्षोअ
च्छभल्लः॥ तरक्षोव्याघ्रोजातिविशेषःपरस्सरोगंडः॥ शृगालोगोमायुःबिडालोमार्जारःशुनकोमृगदंशःकाकशुनकोमृगयाकुशलःश्वाशशकःप्र
तीतःकोकंठियालुंकटीचित्रकःप्रतीतःचिल्लुलकआरण्यःपशुविशेषःजेयावण्णेतहप्पगाराइतियेपिचान्येतथाप्रकाराएकवचनांताइत्यर्थः॥ सर्वा
साएकवाकुएकत्वप्रतिपादकावाणी॥ अयमत्रप्रश्नहेतुरभिप्रायःइहवस्तुधर्म्मधर्म्मिसमुदायात्मकंधर्म्माश्चप्रतिवस्त्वनंताःमनुष्यइत्याद्युक्तेच
सकलंवस्तुधर्म्मिसमुदायात्मकंपरिपूर्णप्रतीयतेतथाव्यवहारदर्शनात्एकस्मिंश्चार्थेएकवचनंबहुषुबहुवचनं॥ अत्रबहवोधर्म्माअभिधेयास्त

नःकथमेकवचनं॥ अथचदृश्यतेलोकेएकवचनेनापिव्यवहारइतिपृच्छतिसर्वासाएकत्वप्रतिपादिकावाग्भवति॥ काक्वाचेदंपठ्यतेततःप्रश्ना
र्थत्वाच्चगतिःभगवानाहहंतागोयमाइत्यादि॥ अक्षरार्थःसुगमोभावार्थस्त्वयं॥ शब्दप्रवृत्तिरिहविवक्षाचततत्प्रयोजनवशाद्वक्तुःक्वचित्क
दाचित्कथंचिद्भवतीत्यनियतातथाहिसएवैकःपुरुषोयदायंमेजनकइतिपुत्रेणविवक्ष्यतेतदाजनकइत्यभिधीयते॥ सएवयदातेनैवममध्या
पयतीतिविवक्ष्यततदारूपाध्यायइतितत्रयदाउपसर्जनीभूतधर्म्माधर्म्मीप्राधान्येनविवक्ष्यते॥ तदाधर्मिणएकत्वात्एकवचनंधर्माश्चधर्मिण्यंतर्ग
तादितिपरिपूर्णवस्तुप्रतीतिर्यथात्वपसर्जनीभूतधर्मिणोधर्माःपांडित्यपरोपकारित्वमहादानदायित्वादयःप्राधान्येनविवक्ष्यंतेतदाधर्म्माणां
बहुत्वादेकस्मिन्नपिबहुवचनंयथापूज्यमिति॥ ततइहापिमनुष्यइत्यादौचुपसर्जनीकृतधर्माधर्म्मीप्राधान्येनविवक्षितभवतिसर्वाप्येवंजातीया
एकत्वप्रतिपादकावाक्॥ ७७॥ अहभंतेमणुस्साइत्यादि॥ अक्षरगमनिकाप्राग्वत्अत्रापीदंसंज्ञायकारणंमनुष्यादयःशब्दाजातिवाचकाजातिश्च
सामान्यंसामान्यंचैकंएकंनित्यंनिरवयवमक्रियंसर्वगंचसामान्यमितिवचनात्ततःकथमत्रबहुवचनंअथचदृश्यतेबहुवचनेनापिव्यवहारइति
पृच्छतिसर्वासाबहुत्वप्रतिपादिकावाग्भवतिकाक्वापाठात्प्रश्नार्थत्वाच्चगतिःअत्रभगवानाह॥ हंतागोयमाइत्यादि॥ अक्षरार्थःसुगमोभावार्थस्त्वयं
यद्यपितेमेजातिवाचकाःशब्दाःतथापिजातिरभिधीयतेसमानपरिणामःसमानपरिणामश्चासमानपरिणामाविनाभावीत्यन्यथैकत्वापरितःसमा
नत्वायोगात्ततोयदासमानपरिणामसंकुलितःप्राधान्येनविवक्ष्यंतेतदासमानपरिणामस्यप्रतिव्यक्तयाभिन्नत्वात्तदभिधानेचबहुवचनं॥
यथाघटाइतियदातुसएवैकःसमानपरिणामःप्राधान्येनविवक्ष्यते॥ इतरस्त्वसमानपरिणामउपसर्जनीभूतस्तदासर्वत्रापिसमानपरिणामस्यै
कत्वात्तदभिधानेएकवचनंयथासर्वोपिघटःपृथुबुध्नोदराद्याकारइतिअत्रापिमनुष्याइत्यादौसमानपरिणामोऽसमानपरिणामसंकुलि
तःसंकुलितःप्राधान्येनविवक्षितइतितस्यानेकत्वभावाद्बहुवचनं॥ अहंभंतेमणुस्सीइत्यादि॥ अत्रेदंसंज्ञायकारणंइहसर्ववस्तुत्रिलिं
गंतथाहिमृद्रूपोयमितिपुल्लिंगताःमृत्परिणतिरियंघटाकारापरिणतिरियमितिस्त्रीलिंगता॥ इदंचस्थितिनपुंसकलिंगतातत्रैवंशबलरूपे

वस्तुनिव्यवस्थितेकथमेकलिंगमात्राभिधायीशब्दस्तदभिधायीभवतिनखलुनरसिंहसिंहशब्दोनरशब्दोवाकेवलस्तदभिधायीभवति॥ अथचदृ
श्यतेतदभिधायितयापिलोकेव्यवहारस्ततःपृच्छतिवक्रइतिसर्वासाएवंप्रकारास्त्रीवाक्स्त्रीलिंगविशिष्टार्थप्रतिपादकावाक्भवति॥ काक्वापाठात्
प्रश्नार्थत्वाच्चगतिःभगवानाहहंतागोयमाइत्यादि॥ अक्षरार्थःसुगमोभावार्थस्त्वयंयद्यपिनामशबलरूपंवस्तुतथाप्येषशब्दोन्याय्योयेनधर्मेणवि
शिष्टःप्रतिपादयितुमिष्यते॥ सतंप्रधानीकृत्यतेनविशिष्टंअन्यस्तुतेशेषधर्माणांधर्मिणंप्रतिपादयति॥ यथापुरुषत्वेशास्त्रज्ञत्वेदातृत्वेभोक्तृत्वे
ध्यापयितृत्वेचयुगपद्व्यवस्थितेपिपुत्रःसमागच्छंतमवलोक्यपिताऽऽगच्छतीतिब्रूतेशिष्यस्तूपाध्यायइति॥ एवमिहापियद्यपिमनुष्याप्रभृति
कंसर्वंत्रिलिंगात्मकंतथापियोनिमृदुत्वास्थैर्यादिलक्षणंस्त्रीत्वमत्रप्रतिपादयितुमिष्टमितिततःप्रधानीकृत्यतेनविशिष्टंअन्यस्तुतेशेषधर्माणांधर्मि
णंप्रतिपादयतीतिभवतिसर्वासास्त्रीवाक्एवंपुंवाक्नपुंसकवाक्चावाच्यपिभावनीये॥ अहभंतेपुढवीइत्यादिसुगमंनवरंआउइतिपुल्लिंगताप्राकृतल
क्षणवशात्संस्कृतेतुस्त्रीत्वमेव॥ अहाभंतेपुढवीइथिलिंगआणवणीइत्यादि॥ अथभदंतपृथिवीकुरुपृथिवीमानयेत्येवंस्त्रियास्त्रीलिंगेपृथि
व्याआज्ञापनीएवंआऊइतिपुमाज्ञापनीधान्यमितिनपुंसकाज्ञापनीएषाभाषानैषामृषेतिभगवानाहहंतागोयमाइत्यादिसुगमं॥ अहभंतेइत्यादि
अथभदंतपृथिवीइतिस्त्रीप्रज्ञापनीस्वरूपस्यस्त्रीत्वप्ररूपणा॥ एवंआऊइतिपुंप्रज्ञापनीधान्यमपिनपुंसकप्रज्ञापनीआराधनीमुक्तिमार्गप्रतिपं
थिनीएषाभाषानैषाभाषामृषेतिविमुक्तंभवतिनैवंवदनोमिथ्याभाषित्वप्रसंगःभगवानाह॥ आराधनीएषानैषाभाषामृषेतिशाब्दव्यवहारापेक्षया
यथावस्थितत्वप्ररूपणात्॥ इहकियत्प्रतिपदंप्रष्टुंशक्यमेतेनतोदेशेनपृच्छतिइथिवंभंतेइत्यादिइतिरूपदर्शनेएवंशाब्दःप्रकारेउपदर्शितेनप्रकारेणान्य
दपिस्त्रीवचनंनपुंसकवचनंनपुंसकवचनंवावदतिसाधुस्तदास्तस्मिन्नेवंवदति॥ याभाषासाप्रज्ञापनीभाषामाप्रज्ञापनीभाषानैषाभाषामृषेति॥
भगवानाहप्रज्ञापनीएषाशाब्दव्यवहारानुसरणतोदोषाभावात्॥ अन्यथास्थितेहिवस्तुन्यन्यथाभाषणंदोषोयदातुयथावस्थितंतत्तथाभाष्यते॥ न
दायंदोषइतितदेवंभाषाप्रतिपादनविषयायेकेचनसंदेहास्तेसर्वेप्यपनीताःसंप्रतिसामान्यतोभाषायाःकारणादिपिपृच्छिषुराह॥ ७८॥ भासाणंभंते

किमाइयाइत्यादि भाषाअवबोधबीजभूतामिति वाक्यालंकारे किमादिका उपादनकारणव्यतिरेकेण किमादिर्मौलिकारणं यस्याः सा किमादिका तथा
किंप्रभवा कस्मात्प्रभ उत्पादो यस्याः सा किंप्रभवा सत्यपि मौलिकारणे पुनः कस्मात्कारणांतरादुत्पद्यते इति भावः॥ तथा किंसंस्थिता किंनाकारेण सं
स्थिता कस्येव संस्थानमस्या इति भावः तथा किंपर्यवसिता इति कस्मिन्स्थाने पर्यवसिता निष्ठांगता किंपर्यवसिता भगवानाह॥ गोतम जीवादिका जीव
आदिर्मौलिकारणं यस्याः सा जीवादिका जीवमंतरेण तथाविधप्रयत्नमंतरेणावबोधबीजभूतभाषाया असंभवात् आह च भगवान्भद्रबाहुस्वामीति
विहं मिशरीरं मीजीवपएसाहवंतिजीवस्स॥ जेहिउगेण्हइगहणंतो भासइ भासउ भासं॥ किंप्रभवा इत्यस्य निर्वचनमाह॥ शरीरप्रभवा उदारिक
वैक्रियाहारकान्यतमशरीरसामर्थ्यादेव भाषाद्रव्यविनिर्गतेः तथा किंसंस्थिता इत्यस्य निर्वचनं वज्रसंस्थिता वज्रस्येव संस्थितं संस्थानं यस्याः
स्या वज्रसंस्थिता भाषाद्रव्याणि हि तथाविधप्रयत्ननिसृष्टानि संति सकलमपि लोकमभिव्याप्नुवंति लोकश्च वज्राकारसंस्थिता इति सापि वज्र
संस्थिता किंपर्यवसिते त्यस्य निर्वचनं॥ लोकांतपर्यवसिता परतो भाषाद्रव्याणां गत्युपष्टंभकधर्मास्तिकायाभावतो गमनासंभवात् प्रज्ञाप्ताम
याशेषे श्वतीर्थकृद्भिः पुनरपि प्रश्नमाह॥ ६७॥ भासाकतोयतोयएभवाइत्यादि भाषाकुतो योगात्प्रभवति उत्पद्यते काययोगाद्वाग्योगाद्वात
थाकतिभिः समयैर्भाषा भषेति किमुक्तं भवति कतिभिः समयैर्निसृज्यमानद्रव्यसंहत्यात्मिका भाषा भवति तथा भाषा कतिप्रकारा कतिप्रभेदाः
कति वा भाषा साधूनां चक्रमनुगता अनुज्ञाता अत्र निर्वचनं सरीरप्पवहा इत्यादि अत्र शरीरग्रहणेन शरीरयोगः परिगृह्यते शरीरमात्र
प्रभवत्वस्य प्रागेव निर्णीतत्वात् शरीरप्रभवा इति कोऽर्थः काययोगप्रभवा तथाहि काययोगेन भाषायोग्यान्पुद्गलान्गृहीत्वा भाषात्वेन परि
णमय्य वाग्योगेन निसृजति॥ ननु काययोगबलाद्भाषा उत्पद्यते इति काययोगप्रभवेत्युक्तं आह च भगवान्भद्रबाहुस्वामी गिण्हइयकाइएणंनि
सरइतहएणवाइएणमितिकइहिंवसमएहिंभासइभासमित्यस्य निर्वचनं द्वाभ्यां समयाभ्यां भाषते भाषा तथाह्येकेन समयेन भाषायोग्यान्पुद्ग ९४
लान्गृह्णाति द्वितीये समये भाषात्वेन परिणमय्य निसृजतीति भासाकइप्पगाराइत्यस्य निर्वचनं भाषा सत्यादिभेदाच्चतुःप्रकारास्ते च सत्यादयो भे

दाः प्रागेव भाविता इति कइवा भासा अणुमयाय इत्यस्य निर्वचनं द्वे भाषे साधूनां चक्रमनुमते तद्यथा सत्या असत्यामृषा च॥ अर्थान्ये मृषा सत्या
मृषा न तेनानुज्ञाते तयोरयथावस्थितार्थप्रतिपादनपरतया मुक्तिप्रतिपंथित्वात् पुनः प्रश्नयति॥ कइविहाणं भंते इत्यादि॥ पद्यत्तियाय अपद्यत्ति
याइति पर्याप्तानाम यया प्रतिनियतरूपतया ऽवधारयितुं शक्यते सचासत्यामृषा वा द्रष्टव्या उभयोरपि प्रतिनियतरूपतया वधारयितुं शक्य
त्वान्यातु मिश्रतया उभयप्रतिनियतरूपतया अवधारितुं शक्यते सा अपर्याप्ता सा च सत्यामृषा ऽसत्यामृषा च उभयोरपि प्रतिनियतेन रूपेणावधा
रयितुमशक्यत्वात्॥ पद्यत्तियाणं भंते इत्यादि भावितं नवरं सत्यादिमृषाचेत्युक्तमतः सत्याभेदावगमाय प्रश्नमाह॥ सच्चाणं भंते भासा पद्यत्तिया
कइविहा पण्णत्ता इति पाठसिद्धं भगवानाह॥ गोयमा इत्यादि॥ जणवयसच्चा इति तं तं जनपदमधिकृत्येष्टार्थप्रतिपत्तिजनकतया व्यवहारहेतुत्वा
त्सत्या जनपदसत्या यथा कोंकणादिषु पयः पिच्चमित्यादि सम्मतसत्या या सकललोकसामान्येन सत्यतया प्रसिद्धा॥ कुमुदकुवलयोत्पलयो
त्पलतामरसानां समानेपि पंकसंभवे गोपालजानां अरविंदमेव पंकजं मन्यते तन शेषमित्यरविंदे पंकजमिति सम्मतसत्या स्थापनासत्या यात्थाविधंम
कादिविन्यासं मुद्राविन्यासं चोपलभ्य प्रयुज्यते यथा एकं परतो बिंदुद्वयसहितमुपलभ्य शतमिदमिति बिंदुत्रयसहितं सहस्रमिति त
थाविधं मुद्राविन्यासमुपलभ्य मृत्तिकादिषु माषोयं कार्षापणोयमिति तथा नामतः सत्या नामसत्या॥ यथा कुलमवर्द्धयन्नपि कुलवर्द्धन इति त
था रूपतः॥ सत्या रूपसत्या यथा दंभतो गृहीतप्रव्रजितरूपः प्रव्रजितोयमिति॥ तथा प्रतीत्याश्रित्य वस्त्वंतरं सत्या यथा अनामिकाया कनिष्ठा
मधिकृत्य दीर्घत्वं मध्यमामधिकृत्य ह्रस्वत्वं ननु वाच्यं कथमेकस्या ह्रस्वत्वं दीर्घत्वं च नान्विकं परस्परविरोधादिति भिन्ननिमित्तत्वे परस्पर
विरोधासंभवात् तथाह्रितामेव पदिकनिष्ठां मध्यमां वा एकामंगुलिमंगीकृत्य ह्रस्वत्वं दीर्घत्वं च प्रतिपाद्येन नो विरोधः संभवेत्॥ एकनि
मित्त परस्परविरुद्धकार्यद्वयासंभवात्॥ यदा त्वेकामधिकृत्य ह्रस्वत्वमपरामधिकृत्य दीर्घत्वं तदा सत्वयोर्विभिन्ननिमित्तत्वान्न परस्प
रं विरोधः॥ अथ यदि तान्विके ह्रस्वत्वदीर्घत्वे तत ऋजुत्ववत्कस्मान्नैव कस्मान्नपरनिरपेक्षेन प्रतिभासेते तस्मात्परोपाधिकत्वात्॥ काल्प

प्रज्ञा० वृत्ति० निकेइमेइतितदयुक्तंद्विविधाहिवस्तुनोधर्म्माःसहकारिव्यंग्यरूपाइतरेचतत्रयेसहकारिव्यंग्यरूपास्तेसहकारिसंपर्कवशात्प्रतीतिपथमा
९८ यांतियथापृथिव्यांजलसंपर्कतोगंधइतरेत्वेवमेवापियथाकर्पूरादिगंधाःह्रस्वत्वदीर्घत्वेअपिचसहकारिव्यंग्यरूपेनतस्तेतंसहकारिणमासाद्या
भिव्यक्तिमायांतइतिअदोषःतथाव्यवहारोलोकविवक्षाव्यवहारतःसत्याव्यवहारसत्यायथागिरिर्दह्यतेगलतिभाजनंअनुदराकन्या
अलोमिकाएडकालोकोहिगिरिगततृणादाहेतृणादिनासहगिरेरभेदंविवक्षित्वागिरिर्दह्यतेइतिब्रूतेभाजनादुदकेस्रवति।उदकभाजनयोरभेदं
विवक्षित्वागलतिभाजनमितिसंभोगजबीजप्रभवोदराभावेअनुदरेतिस्खलनयोग्यलोमाभावेअलोमिकेति।ततोलोकव्यवहारमपेक्ष्यसाधोरपि
तथाब्रुवतंभाषाव्यवहारसत्याभवतितथाभावोवर्णादिभावतःसत्याभावसत्याकिमुक्तंभवति।योभावोवर्णादिर्यस्मिन्नुत्कटोभवतितेनयासत्याभा
षासाभावसत्यायथासत्यपिपंचवर्णसंभवेबलाकाशुक्लेतितथायोगःसंबंधस्तस्मात्सत्यायोगसत्यायथाछत्रयोगात्विवक्षितशब्दप्रयोगका
लेछत्राभावेपिछत्राभावेपिछत्रयोगस्यसंभवाछत्रीएवंदंडयोगात्दंडीऔपम्यसत्यायथासमुद्रवत्तडागाअत्रैवार्थेविनेयजनानुग्रहायसंग्र
हणिगाथामाह।जणवयसम्मयठवयसम्मयणाइत्यादिभाविनार्थामृषाभाषादशविधा।तद्यथाकोहेनिस्सियाइत्यादिक्रोधादिसृता।क्रो
धाद्विनिर्गताइत्यर्थः।एवंसर्वत्रापिभावनीयंतत्रक्रोधादिभूतोविसंवादनबुध्यापरंप्रत्यायत्सत्यमसत्यंवाभाषतेतत्सर्वंमृषातस्यहिआशयोऽ
तीवदुष्टस्ततोयद्यपिघुणाक्षरन्यायेनसत्यमापततिशाव्यबुध्यावापेव्यसत्यंभाषतेतदाप्याशयदोषदुष्टमितिमृषेतिमाननिःसृतापूर्वमन
नुभूतमस्माभिस्तदानीमिवमेश्वर्यमित्यादिवदतःमायानिसृतायत्परवंचनाभिप्रायेणसत्यमसत्यंवाभाषतेलोभनिसृतायल्लोभाभि
भूतःकूटतुलादिकृत्वायथोक्तप्रमाणमिदंतुलादीतिवदतःप्रेमनिसृतायदतिप्रेमवशाद्दासोहंतवेत्यादिवदतःद्वेषनिसृतायत्प्रतिनिर्वि ९८
ष्टस्तीर्थकरादीनामप्यवर्णभाषणंहास्यनिःसृतायत्केलिवशतोनृतभाषणंभयनिःसृतायत्केलिवशतोनृतभाषणं।भयनिःसृतातस्करादिभये
नासमंजभाषणंआख्यायिकानिःसृतायत्कथास्वसंभाव्याभिधानंउपघातनिःसृताचौरस्त्वमित्याद्यसदभ्याख्यानंअत्रापिसंग्रहणिगाथा

माह।कोहेमाणेइत्यादि।भाविनार्थासत्यामृषादशविधातद्यथा।उपपन्नमिश्रिताअनुत्पन्नैःसहसंख्यापूरणाययत्रसाउत्पन्नमिश्रिताएवमन्यत्रा
पियथापिमभायोगंभावनीयंततोत्पन्नमिश्रितायथाकस्मिंश्चिद्ग्रामेनगरेवाऊनेषुअधिकेषुवादारकेषुजातेषुदशदारकाअस्मिन्नद्यजा
ताइतिआदि।एवमेवमरणकथनेविगतमिश्रितातथाजन्मतोमरणस्यचक्षतपरिणामस्याभिधानेविसंवादनेचोत्पन्नविगतमिश्रिता।त
थाप्रभूतानांजीवतांस्तोकानांचमृतानांचशंखशंखनकादीनामेकत्रराशौदृष्टेयदाकश्चिदेवंवदतिअहोमहान्जीवराशिरयमितितदासा
जीवमिश्रितासत्यामृषात्वंचास्याजीवत्सुसत्यत्वात्मृतेषुमृषात्वात्तथायथाप्रभूतेषुमृतेषुस्तोकेषुजीवत्सुएकत्रराशीकृतेषुशंखादिष्वेवं
वदतिअहोमहानयंमृतोजीवराशिरितितदासाअजीवमिश्रिताअस्याअपिसत्यामृषात्वंमृतेषुसत्यत्वात्जीवत्सुमृषात्वात्तथातस्मिन्ने
वराशौएतावंतोऽनमृताइतिनियमेनावधारयतोविसंवादेजीवाजीवमिश्रितातथामूलकादिकमनंतकायंतस्यैवसत्कैःपरिपांडुपत्रैरन्यै
नवारकेनचित्प्रत्येकवनस्पतिनामिश्रमवलोक्यसर्वोप्येषोऽनंतकायिकइतिवदतोऽनंतमिश्रितातथाप्रत्येकवनस्पतिसंघातमनंतकाय
केनसहराशीकृतमवलोक्यप्रत्येकवनस्पतिरयंसर्वोपिवदतःप्रत्येकमिश्रिता।तथाअद्धाकालःसचेहप्रस्तवात्दिवसोरात्रिर्वापरिगृह्यते
समिश्रितोययासाऽद्धामिश्रितायथाकश्चित्कंचनत्वरयन्दिवसेवर्तमानएववदतिउत्तिष्ठरात्रिर्जातेतिरात्रौवावर्तमानायामुत्तिष्ठोद्गतःसूर्य
इति।स्तथादिवसस्यरात्रेर्वाएकदेशोऽद्धाद्धासामिश्रिताययासाऽद्धाद्धामिश्रितायथाप्रथमपौरुष्यामेववर्तमानायांकश्चित्कंचनत्वरयन्
एवंवदतिचलमध्यान्हीभूतमिति।असत्यामृषाद्वादशविधातद्यथा।आमंतणयइत्यादि।तत्रआमंत्रणीहेदेवदत्तइत्यादि।तथाहिप्रा
गुक्तसत्यादिभाषात्रयलक्षणाविकलत्वान्नसत्याना पिसत्यामृषाकेवलंव्यवहारमात्रप्रवृत्तिहेतुरित्यसत्यामृषाएवंसर्वत्रभावना
कार्याआज्ञापनी।कार्येपरस्यप्रवर्त्तनंयथेदंकुर्विति याचनीकस्यापिवस्तुविशेषस्यदेहीतिमार्गणंपृच्छनीअविज्ञातस्यसंदिग्धस्यकस्यचि
दर्थस्यपरिज्ञानायतद्वि दःपार्श्वेचोदनंप्रज्ञापनीविनीतविनयस्यविनेयजनस्योपदेशदानंयथाप्राणिवधान्निवृत्ताभवंतिभवांतरेणप्रा

णिनोदीर्घायुषइत्यादिः उक्तंचपाणिवहाउनियदाहवंतिदीहाउया अरोगायणमाईपण्णत्तापण्णवणीवीयरागेहिंयाचमानस्यप्रतिषेधवचनात्प्रत्याख्या
नीइच्छानुलोमानामयथाकश्चित्किंचित्कार्यमारभमाणः कंचनपृच्छतिसप्राहकरोतुभवान्ममाप्यैतदभिप्रेतमितिअनभिग्रहायत्रप्रतिनियतार्थान
धारणं यथाबहुषुकार्येषूपस्थितेषुकश्चित्कंचनपृच्छतिकिमिदानींकरोमि॥ सप्राहयत्प्रतिभासतेतत्कुर्विति अभिगृहीताप्रतिनियतार्थावधारणं य
थाइदमिदानींकर्तव्यमिदंनेति संशयकरणीयाएकावाक् अनेकार्थाभिधायितयापरस्य संशयमुत्पादयति॥ यथासैंधवमानीयतामि
त्यत्रसैंधवशब्दोलवणवस्त्रपुरुषवाजिषुव्याकृताप्रतिनियतार्थावधारणंयथाइदमिदानींकर्तव्यमिदंनेति संशयकरणीयाएकावाक् अनेकार्था
भिधायितयापरस्यसंशयमुत्पादयति॥ यथासैंधवमानीयतामित्यत्रसैंधवशब्दोलवणवस्त्रपुरुषवाजिषुव्याकृतायाप्रकटार्थाअव्याकृता
अतिगंभीरशब्दार्थाअव्यक्ताक्षरप्रयुक्तावाअविभावितार्थत्वात् शेषंसुगमं॥ यावत्कइण्णंभंतेभासिज्जायाइत्यादि॥ कतिभदंतभाषाज्ञातानि
भाषाप्रकाररूपाणिप्रज्ञप्तानिइदं भागुक्तायामपिभूयोप्युपात्तंसूत्रांतरसंबंधनार्थंतान्येवसूत्रांतराणिदर्शयतिजीवाणंभंतेकिंसच्चंभासंभासंति
इत्यादि॥ सुगमंनवरंद्वित्रिचतुरिंद्रियेषुसत्यादिभाषात्रयप्रतिषेधस्तेषांसम्यक्परिज्ञानपरिवंचनाद्यभिप्रायासंभवात् तिर्यग्पंचेंद्रियाअपिनस
म्यग्यथावस्थितवस्तुप्रतिपादनाभिप्रायेणभाषंतेनापिपरविप्रतारणबुध्या किंतुयदाभाषंतेतदाकुपितामपियरंमारयितुकामाअप्येवमेवभाषं
ते॥ नतस्तेषामपिभाषा असत्यामृषा किंसर्वेषामसत्याहतत्रसत्यादिकांभाषांनभाषंतेशिक्षादेरन्यत्रशिक्षापूर्वकंपुनःशुकसारिकादयः
संस्कारविशेषात्तथाकश्चित्तथाविधक्षयोपशमविशेषाज्जातिस्मरणरूपांविशिष्टव्यवहारकौशलरूपांवालब्धिंप्रतीत्यसत्यादिकांचतु
र्विधामपिभाषांभाषंतेशेषंसुगमं॥ संप्रतिभाषाद्रव्यग्रहणादिविषयसंशयापनोदनार्थमाह॥ ७॥ जीवेणंभंतेजाइंदव्वाइंभासत्ताए
गेण्हइंइत्यादिसुगमंनवरं॥ ठियाइंतिस्थितानिनगमनक्रियावंतिद्रव्यतश्चिंतायामनंतप्रादेशिकानि अनंतपरमाण्वात्मकानिगृण्हा ९६
तिनैकपरमाण्वाद्यात्मकानितेषांस्वभावतएवजीवानांग्रहणायोग्यत्वात्॥ क्षेत्रतश्चिंतायामसंख्यातप्रदेशावगाढानि॥ एकप्रदेशा

द्यवगाढानांतथास्वभावतयाग्रहणायोग्यत्वात् कालतश्चिंतायामेकसमयस्थितिकान्यपियावदसंख्येयसमयस्थितिकान्यपिगृण्हाति॥ पुद्गला
नामसंख्येयमपिकालंयावदवस्थानमपिसंभवात्॥ तथाचोक्तं॥ व्याख्याप्रज्ञप्तौसेजनिरेजपुद्गलावस्थानचिंतायांअणंतपएसिएणंखंधेकेव
इकालंसेएणोयमाजहन्नेणंएक्कंसमयंउक्कोसेणंआवलियाएअसंखेज्जइभागंनिरेएजहण्णेणंएक्कंसमयंउक्कोसेणंअसंख्येयंकालमिति
तेषांचगृहीतानांग्रहणानंतरसमयेअवश्यंनिसर्गइतिस्वभावेस्थानांतरसमयेग्रहणंप्रतिपत्तव्यं॥ अन्येतुव्याचक्षतेएकसमयस्थितिकान्यपी
तिआदिभाषापरिणामापेक्षयाद्रष्टव्यंविविशेक्षिपुद्गलानांपरिणामः ततएकप्रयत्नगृहीतमुक्ताअपितेकेचिदेकंसमयंभाषात्वेनावतिष्टंति॥
केचिद्द्वौसमयौयावत्केचिदसंख्येयानपिसमयानितिनतथागहणदव्वाइंइतिगृह्यंतेइतिग्रहणानिवतानिद्रव्याणिचग्रहणद्रव्याणिकिमुक्तं
भवति॥ यानिग्रहणेयोग्यानिद्रव्याणितानिकानिचित्वर्णपरिणामेनएकेनवर्णेनोपेतानिकानिचितद्वाभ्यांकानिचित्त्रिभिः कानिचित्
चतुर्भिःकानिचित्पंचभिः॥ यदापुनरेकगृहीतानामपिसमुदायोविवक्ष्यतेतदानियमात्पंचवर्णानिगृण्हातिएवंगंधरसेष्वपिभावनायं
स्पर्शनचिंतायामेवस्पर्शप्रतिषेधएकस्यापिपरमाणोरवश्यंस्पर्शद्वयभावात्॥ तथाचोक्तं॥ कारणमेवदंपत्यंसूक्ष्मोनित्यश्चभवतिपरमा
णुएकरसगंधवर्णोद्विस्पर्शाकार्यलिंगश्चद्विस्पर्शानिमृदुशीतानिमृदूष्णीनीत्यादिजावचउपासाइंतियावच्छब्दकरणात्त्रिस्पर्शपरिग्रहःत
त्रत्रिस्पर्शान्येवंकानिचित्द्रव्याणिकिलमृदुशीतस्पर्शानिकानिचित्मृग्धस्पर्शानितत्रमृदुस्पर्शेमृदुस्पर्शनइत्येकस्पर्शः शीतस्निग्धरूपौ
तुद्वावन्योस्पर्शाविति समुदायमधिकृत्यत्रिस्पर्शानिएवंस्पर्शांतरयोगेपित्रिस्पर्शानिभावनीयानिकानिचिच्चचतुःस्पर्शानितत्रचतुःस्प
र्शेषुमृदुलघुरूपोद्वौस्पर्शावचस्थितौसूक्ष्मस्कंधेषुतयोरवश्यंभावात् अन्यौतुद्वौस्पर्शौस्निग्धोष्णौस्निग्धशीतौवासर्वसमुदायमुपेक्ष्य
नियमानितानिचतुःस्पर्शानिगृण्हाति॥ तत्रयोद्वौमृदुलघुरूपौस्पर्शाववस्थितौतानवस्थितत्वादेवव्यभिचाराभावान्नगण्येते॥ येत
न्येस्निग्धादयश्चत्वारस्तेकिलवैकल्पिकाइतितानधिकृत्यसूत्रमाह॥ तंजहासीयफासाइंगेण्हइत्यादिसुगमंयावत्जाइंभंतेअणंतगुणलु

६

रकोइंगिण्हिइइतिघावनाज्ञाइंभंतेएगगुणकालवन्नाइंगेण्हइइत्यादि यद्यपिद्रव्यंनाइंभंतेकिंपुट्ठाइंत्यादिनानिभदंतकिंस्पृष्टान्यात्मप्रदेशासंस्पृ
ष्टानिगृण्हातिउतास्पृष्टानिभगवानाहगौतमस्पृष्टान्यात्मप्रदेशैःसहसस्पर्शमागतानिगृण्हातिनास्पृष्टानि॥७॥इहात्मप्रदेशैःसंस्पर्श
नमात्मप्रदेशावगाढक्षेत्राद्बहिरपिसंभवतिततःप्रश्नयति॥जाइंभंतेइत्यादि॥अवगाढान्यात्मप्रदेशैःसहएकक्षेत्रावस्थितानिगृण्हातिनान
वगाढानि॥७॥जाइंभंतेइत्यादिअनंतरावगाढानिअव्यवधानेनावस्थितानिगृण्हातिनपरंपरावगाढानिकिमुक्तंभवति॥येष्वात्मप्रदेशेषु
यानिभाषाद्रव्याण्यवगाढानितैरात्मप्रदेशैस्तान्येवगृण्हातिनत्वेकद्वित्र्याद्यात्मप्रदेशैर्व्यवहितानि॥७॥जाइंभंतेअणंतरोगाढाइंइत्यादि॥अ
णून्यपिस्तोकप्रदेशान्यपिगृण्हातिबादराण्यपिप्रभूतप्रदेशोपचितान्यपिइहाणुत्वबादरत्वेतेषामेवभाषायोग्यानांस्कंधानांप्रदेशस्तोकबाहु
ल्यापेक्षयाव्याख्यानेमूलटीकाकारेणव्याख्यानात्॥७॥जाइंभंतेअणूइंगेण्हइइत्यादि॥ऊर्द्धमपिअधोपितिर्यगपीतिइहजीवस्यया
तिक्षेत्रेग्रहणयोग्यानिभाषाद्रव्याण्यवस्थितानितावत्येवक्षेत्रेऊर्द्धाधस्तिर्यक्चद्रष्टव्यं॥७॥जाइंभंतेउट्टंपिगेण्हइत्यादि॥यानिभाषाद्रव्याण्यंत
र्मुहूर्तकालंयावद्ग्रहणोचितानितानिग्रहणोचितकालस्यउत्कर्षतोअंतर्मुहूर्तप्रमाणस्यादावपिप्रथमसमयेपिगृण्हातिमध्येपिद्वितीयादि
ष्वपिसमयेषुगृण्हातिपर्यवसानेपिपर्यवसानसमयेपिगृण्हाति॥७॥जाइंभंतेआइंपिगेण्हइत्यादिस्वविषयान्स्वगोचरान्स्पृष्टावगाढानंत
रावगाढान्यान्गृण्हातिनत्वविषयान्स्पृष्टादिव्यतिरिक्तान्॥७॥जाइंभंतेसविसएगेण्हइइत्यादिआनुपूर्वीनामग्रहणापेक्षयायथासन्न
त्वंनत्विपरीताअनानुपूर्वीतत्रानुपूर्व्यागृण्हातिनत्वनानुपूर्व्या॥७॥जाइंभंतेआणुपुव्विंगेण्हइत्यादितिदिसिंतित्रिदिशोगृण्हातितिसृभ्योदि
ग्भ्यआगतानिगृण्हातिएवंचतुर्दिशिपंचदिशिषड्दिशिच॥एवमुक्तेभगवानाहगौतमनियमात्षड्दिशिगृण्हातिषड्भ्योदिग्भ्यआगतानि
गृण्हाति॥भाषकाहिनियमाच्चसमाश्रमन्यत्रत्रसकायासंभवात्॥त्रसनाड्यांचव्यवस्थितस्यनियमात्षड्दिगागतपुद्गलसंभवः॥एतेषा ९७
मेवार्थानांसंग्रहणिगाथामाह॥पुट्ठोगाढअणंतरमित्यादिप्रथमतःस्पृष्टविषयंसूत्रंतदनंतरमवगाढसूत्रंततोनंतरावगाढसूत्रं

ततोऽणुबादरविषयंसूत्रं॥तदनंतरमूर्द्धाधःप्रभृतिविषयंततआइइतिउपलक्षणमेतत्॥आदिमध्यावसानसूत्रंततोविषयसूत्रंतदनंतरमा
नुपूर्वीसूत्रंततोनियमात्षड्दिशीतिसूत्रं॥जीवेणंभंतेजाइंदव्वाइंइत्यादिजीवेणमितिवाक्यालंकारेभदंतयानिद्रव्याणिभाषकत्वेनगृण्हा
तितानिकिंसांतरंसव्यवधानंगृण्हातिकिंवानिरंतरंनिर्व्यवधानंभगवानाहसांतरमपिगृण्हाति॥निरंतरमपिउभयथापिग्रहणसंभवात्तत्र
सांतरनिरंतरग्रहणयोःप्रत्येकंकालमानंप्रतिपादयति॥संतरंगृण्हमाणेइत्यादि॥सांतरंगृण्हन्जघन्यतएकंसमयमंतरंकृत्वागृण्हातिएतच्च
जघन्यतएकंसमयमंतरंसततंभाषाप्रवृत्तस्यभाषमाणस्यावसेयं॥तत्रैवंकश्चिदेकस्मिन्समयेभाषापुद्गलान्गृहीत्वातदनंतरंमोक्षसमये
अनुपादानंकृत्वापुनस्तृतीयेसमयेगृण्हात्येवचनमुंचति॥द्वितीयसमयेप्रथमसमयगृहीतान्पुद्गलान्मुंचतिअन्यानादत्तेअथान्येन
प्रयत्नविशेषेणग्रहणमन्येनचप्रयत्नविशेषेणचनिसर्गंतोपरस्परविरुद्धौपरस्परविरुद्धकार्यैकरणात्ततःकथमेकस्मिन्समयेतौ
स्यातांतदयुक्तं॥जीवस्यहितथास्वाभाव्यात्द्वावुपयोगावेकस्मिन्समयेनस्यातांयेतुक्रियाविशेषास्तेबहवोप्येकस्मिन्समयेघटंतएव
तथाह्येकापिनर्तकीभ्रमणादिकृत्वंविदधानाएकस्मिन्नपिसमयेहस्तपादादिगताविचित्राःक्रियाःकुर्वतीदृश्यतेसर्वस्यापिवस्तुनःप्रत्येक
मेकस्मिन्समयेउत्पादव्ययावुपजायेतेएकस्मिन्नेवचसमयेसंघातपरिशाटावपिततोनकश्चिद्दोषःआहचभाष्यकृत्॥गहणविसग्गपय
त्तापरोप्परविरोहिणोकहंसमए॥दोउवयोगानहोज्जकिरियाणकोदोसोइ॥तृतीयेपुनःसमयेतानेवद्वितीयसमयोपात्तान्भाषापुद्गला
न्मुंचतिनपुनरन्यानादत्तेउत्कर्षेणत्वासंख्येयान्यावन्निरंतरंगृण्हाति॥तथाचाहउत्कर्षेणासंख्येयान्समयान्गृण्हातीतियोगः॥
कदाचित्परोऽसंख्येयेःसमयैरेकंग्रहणमन्येतनआह॥अनुसमयंप्रतितदपिकदाचिद्विरहितमपिव्यवहारतोऽनुसमयमित्येवमुच्य
ते॥ततस्तदाशंकाव्यवच्छेदार्थमाह॥अविरहितंएवंनिरंतरंगृण्हाति॥तत्राद्येसमयेग्रहणमेवननिसर्गःअगृहीतस्यनिसर्गाभावात्॥प
र्यंतसमयेमोक्षएवभाषाभिप्रायोपरमतोग्रहणासंभवात्॥शेषेषुद्वितीयादिषुसमयेषुग्रहणनिसर्गौयुगपत्करोतिस्थापनाचेयं ——

ग्र।म्र। ग्र।ग्र।ग्र।ग्र॥ जीवाणंभंतेजाइंदव्वाइंभासत्तएगहियाइंनिसरइत्यादि॥ प्रश्नसूत्रं॥ सूत्रमंनिर्वचनमाहसांतरंनितरंमियमत्रभावनाइह
१॥ नि॥नि।नि।नि॥ तावत्ग्रहणंनिरंतरमुक्तं॥ तथाचानंतरसूत्रंत्र्अणुसमयविरहियंनिरंतरंगेन्हइति॥ ततोनिसर्गोपिप्रथमवर्जेषुशेषेषुसमयेषु
निरंतरंप्रतिपत्तव्योग्रहीतस्यावश्यमंतरसमयेनिसर्गान्ततोयदुक्तंसांतरंनिसृजन्ति।नोनिरंतरमितितत्रग्रहणापेक्षयाद्रष्टव्यतथाह्ययस्मिन्
समयेयानिभाषाद्रव्याणिगृण्हातिनतानितस्मिन्नेवसमयेमुंचतियथाप्रथमसमयगृहीतानिनतस्मिन्नेवप्रथमसमयेकिंतुपूर्वस्मिन्२समयेगृही
तानिउत्तरस्मिन्नुत्तरस्मिन्समयेततोग्रहणेपूर्वोनिसर्गोगृहीतस्यनिसर्गायोगादितिसांतरोनिसर्गउक्तः॥आहचभाष्यकृत्अणुसमयमणंत
रियंगहणंभणियंजतोविमोक्खोविनुत्तोनिरंतरंवियभणइकहंसंतरोभणिउ॥ गहणावरक्खाएतउनिरंतरंजंमिन्नाइंगहियाइं॥नउतंमिचे
वनिसिरइजहपढमेनिसिरणंनथि॥निसिरिज्यइनागहियंगहणंतरियंतिसंतरंतेणइतिएतदेवसूत्रकृदपिस्पष्टयतिसंतरंनिसरमाणोएगेणं
समएणंनिसरइइति॥ एकेनपूर्वपूर्वरूपेणसमयेनगृन्हाति॥एकेनोत्तरोत्तररूपेणसमयेननिसृजति॥अथवाग्रहणापेक्षानिसर्गाभावादेए
केनाप्यनसमयेनगृन्हातिवननिसृजस्यगृहीतस्यनिसर्गासंभवात्॥तथाएकेनपर्यन्तसंतसमयेननिसृजत्येवनगृन्हातिभाषाभिप्रायोपरमेनोग्रह
णासंभवात्॥ शेषेषुद्वितीयादिषुसमयेषुयुगपद्ग्रहणनिसर्गोकरोतितौचनिरंतरंजघन्यतोद्वौसमयौउत्कर्षतोऽसंख्येयान्समयान्एतदेवाह
निसिरणोवाएगंजहन्नेणंदुसमइयंउक्कोसेणंअसंखेज्जसमइयंअंतोमुहुत्तयंगहणंनिसिरणंकरेइइति॥८॥जीवेणंजाइंदव्वाइंइत्यादि प्रश्न
सूत्रंसुगमंभगवानाहगोतमभिन्नान्यपिनिजति॥अभिन्नान्यपिइयमत्रभावना॥इहद्विविधोवक्तामंदप्रयत्नस्तीव्रप्रयत्नश्चतत्रयोव्याधिविशे
षतोऽनादरतोमंदप्रयत्नः सभाषाद्रव्याणितथाभूतान्येवस्थूलखंडात्मकानिनिसृजतियस्तुनीरोगद्वौतौगुणयुक्तस्तथाविधादरभावतस्तीव्रप्र
यत्नःसभाषाद्रव्याणिआदाननिसर्गप्रयत्नाभ्यांखंडशःकृत्वानिसृजति॥आहचभाष्यकृत् कोइमंदपयत्तोनिसिरइंदव्वाइंअभिन्नातिच्चपयत्तो
सोमुंचतिंदिउंताईं तदुक्तंभिन्नाइंपि।निसिरइइतिअभिन्नाइंपिनिसरइ जाइं भिन्नाइंनिसरइइत्यादि॥यानितीव्रप्रयत्नेनवक्ताप्रथमतए

वभिन्नानिसृजतितानिसूक्ष्मत्वाद्बहुत्वाच्चप्रभूतान्यन्यानिद्रव्याणिवासयंतितदन्यद्रव्यवासकत्वादेवचानंतगुणवृद्ध्यापरिवर्द्धमानानिषड्दिक्षु
लोकांतंस्पृशंतिलोकांतंप्राप्नुवंतीत्यर्थः॥ सूत्रं॥ भिन्नाइंसुहुमयाएअणंतगुणवड्ढियाइंलोगंतपावंतिपूरयंतियभासाएनिरंतरंलोगंयानिपुनर्मं
दप्रयत्नेनवक्तायथाभूतान्येवसकलान्यभिन्नानिभाषात्वेनपरिणमयानिसृजति॥नान्यसंख्येयाअवगाहनावर्गण्यगत्वाअवगाहनाएकैकस्याभा
षाद्रव्यसाधारभूताअसंख्येयप्रदेशात्मकक्षेत्रविभागरूपास्तासामवगाहनानांवर्गणाःसमुदायास्ताअसंख्येयाअतिक्रम्यभेदमापद्यंतेविशरा
रुभावंविभ्रतीत्यर्थः॥विशरारुभावंविभ्राणानिचसंख्येयानियोजनानीतिगत्वाविध्वंसमागच्छंतिशब्दपरिणामंविजहतीत्यर्थः॥सूत्रं॥गंतुम
संखेज्जाउअवगाहणवग्गणाअभिन्नाइंभिज्जंतिधंसमिंतियसंखेज्जजोयणेगंतुंभिन्नान्यपिनिसृजतीत्युक्तं॥तत्रकतिविधःशब्दद्रव्याणांभेदइति
तेसिणंभंतेदव्वाणमित्यादि॥तत्रखंडभेदोलोहखंडादिवत्॥प्रतरभेदोऽभ्रपटभूर्जपत्रादिवत्चूर्णिकाभेदःक्षिप्तपिष्टवत्॥अनुतटिकाभेदइक्षुत्व
गादिवत्उत्करिकाभेदःमुत्याद्यवर्षवत्एतानेवभेदान्याख्यातुकामःप्रश्ननिर्वचनसूत्राण्याह॥सेकिंतंखंडभेदेइत्यादिपाठसिद्धंनवरमनुतटिका
भेदेअवगाःकूपाःतडागाःनिद्रहदाअपिभनाद्या गिरिनद्यादयःव्यूप्यश्चतुरस्राकाराःताःपुष्करिण्यःदीर्घिकास्ताएवनद्यःवक्रानद्योगुंजालि
काःबहूनिकेवलंकेवलानिपुष्पप्रकरवत्विप्रकीर्णानिसरांसितान्येवएकैकपंक्त्याव्यवस्थितानिसरःपंक्तयःयेषुसरस्सुपंक्त्याव्यवस्थितेषुकू
पोपादकंप्रणालिकयासंचरतिसासरःसरःपंक्तिः॥अप्रतीताभेदालोकतःप्रत्येतव्याः॥अल्पबहुत्वंसूत्रप्रामाण्यात्तथेतिप्रतिपत्तव्यंसुकरंविष
यत्वात्॥ शेषंसूत्रंसर्वमपिपाठसिद्धं॥जावकइविहेणंभंतेवयणेपन्नत्तेइतिद्विवचनंपुरुषावितिबहुवचनंपुरुषाइति॥स्त्रीवचनमियंस्त्रीपुरु
षवचनमयंपुमान्नपुंसकवचनमिदंकुंडंअध्यात्मवचनंयदान्याञ्चंतमनिधायविप्रतारकबुध्यान्यदभिणिषुरपिसहसायत्तेतमेवदेवब्रू
तेउपनीतवचनंप्रशंसावचनंयथारूपवतीयंस्त्रीअपनीतवचनंनिंदावचनंयथेयंकुरूपास्त्रीउपनीतापनीतवचनं॥यत्प्रशस्यंनिंदतियथारूपव
तीस्त्रीपरंदुःशीला॥अपनीतवचनं॥यन्निंदित्वाप्रशंसतियथेयंकुरूपापरंसुशीलेतिअतीतवचनमकरोदिप्रत्युत्पन्नवचनंवर्त्तमानकालवचनंक

MEMORIAL

गेतीत्यादि अनागतकालवचनंकरिष्यतीत्यादिप्रत्यक्षवचनमयमित्यादिपरोक्षवचनंसइत्यादि॥एतानिचषोडशापिवचनानियथावस्थितव
स्तुविषयाणिनकाल्पनिकानितनोयदैतानिसम्यगुपयुज्यवदतितदासाभाषाप्रज्ञापनीद्रष्टव्या॥तथाचाहइच्चेयंभंतेएगवयणंदुवयणमित्या
दि॥भाविनार्थमक्षरार्थःप्रतीतएवसंप्रतिप्रागुक्तमेवसूत्रंसूत्रांतरसंबंधनार्थंभूयःपठति॥७५॥कइणंभंतेभासज्जायापन्नत्ताइत्यादिसुगमंन
वरंआउत्तंभासमाणेइति॥सम्यक्प्रवचनमालिन्यादिरक्षणपरतयाभाषमाणस्तथाहिप्रवचनोड्डाहरक्षणादिनिमित्तंगुरुलाघवपर्यालोचनेन
नमृषापिभाषमाणःसाधुराराधकएवेति॥एणपरमित्यादि॥ततआयुक्तंभाषमाणात्परोऽसंयतोमनोवाक्कायसंयमविकलोऽविरतोविरमति
स्माविरतोनविरतोऽविरतःसावद्यव्यापारादनिवृत्तमनाइत्यर्थः॥अतएवनप्रतिहतंमिथ्यादुःकृतदानप्रायश्चित्तप्रतिपत्त्यादिनाननाशितम
तीतंतथाप्रत्याख्यानंभूयोऽकरणतयानिषिद्धमनागतंपापकर्मयेनासावप्रतिहताप्रत्याख्यानपापकर्माशेषंपाठसिद्धंअल्पबहुत्वचिंतायां
सर्वस्तोकाःसत्यभाषकाःइहयःसम्यगुपयुज्यसर्वज्ञमतानुसारेणवस्तुप्रतिष्ठानबुद्ध्याभाषतेससत्यभाषकस्तेचप्रश्नकालेकतिपयाएव
लभ्यंतेइतिसर्वस्तोकाःतेभ्योसंख्येयगुणाःसत्यमृषाभाषकाःबहूनांप्रयोयथातथासत्यमृषाभाषणसंभवाल्लोकेतथादर्शनात्॥तेभ्यः
संख्येयगुणामृषाभाषकाःक्रोधातिभूतानांपरवंचनाद्यभियुक्तानांचप्रभूततराणामुपलंभात्तेषांचमृषाभाषकत्वात्तेभ्योऽसंख्येयगुणाअ
सत्यामृषाभाषकाःद्वींद्रियादीनामप्यसत्यामृषाभाषकत्वात्तेभ्योऽनंतगुणाभाषकाःसिद्धानामेकेंद्रियाणांचानंतत्वात्॥७७॥इतिश्रीमल
यगिरिविरचितायांप्रज्ञापनाटीकायांभाषाख्यमेकादशमंपदंसमाप्तं॥७७॥तदेवंव्याख्यातमेकादशंपदमिदानींद्वादशमारभ्यतेअ
स्यचायमभिसंबंधः॥इहानंतरपदेजीवानांसत्यादिभाषाविभागोपदर्शनंकृतंभाषाचशरीरायत्ताशरीरप्रवहाभाषेत्यत्रैवप्रतिपादितत्वा
त्॥अन्यत्राप्युक्तं॥गेण्हइयकाइएणंनिसरइतहवाइएणमितितः॥शरीरप्रविभागप्रदर्शनार्थमिदमारभ्यते॥तत्रेदमादिसूत्रंकइणं
भंतेशरीरापण्णत्ताइत्यादि॥उत्पत्तिसमयादारभ्यप्रतिक्षणंशीर्यतेइतिशरीराणितानिभदंतकतिकियत्संख्याकानिप्रज्ञप्तानीतिवाक्याळं

कारेप्रज्ञप्तानिभगवानाह॥पंचशरीराणिप्रज्ञप्तानितान्येवनामतआह॥उरालियाएइत्यादिअमीषांशब्दार्थमात्रंचक्षमामंत्रथापिस्थानाशू
न्यार्थंकिंचिदुच्यते॥उदारंप्राधानंप्राधान्यंचास्यतीर्थकरगणधरशरीरापेक्षयाततोन्यस्यानुत्तरसुरशरीरस्याप्यनंतगुणहीनत्वात्अथ
वाऊरालंनामविस्तरवत्विस्तरवत्ताचास्याचस्थितस्वभावस्यसातिरेकयोजनसहस्रमानत्वात्वैक्रियंचैतावदवस्थितप्रमाणंनलभ्यतेउत्क
र्षतोप्यवस्थितप्रमाणस्यपंचधनुःशतप्रमाणत्वात्तच्चैतावत्प्रमाणंसप्तम्यांनान्यत्रयत्तूत्तरवैक्रियंयोजनलक्षप्रमाणंनतदवस्थितमानवव
र्त्तित्वाभावात्ततोनतदपेक्ष्याआहचचूर्णिकृतउरालंनामविस्तरालंविसालंतिजंभणियंहोइ॥कहंसाइरेगजोयणसहस्समवठिय
प्पमाणमोरालियंअन्नमेद्दहमेत्तंनत्थिविउव्वियंहोज्जातंतुअणवठियंपुणपंचधणुसयाइंअहेसत्तमाएइमंपुणअवठियप्पमाणंसाइ
रेगंजोयणसहस्संवनस्सतीनामितिअथवाउरालंविरलप्रदेशंतनुघनंस्वल्पप्रदेशंरूपवि ... त्वात्वृहत्त्वाच्च॥भेण्हवत्यदिवाओरा
लंसमयपरिभाषयामांसास्थिस्नाय्वाद्यवबद्धंसर्वत्रचस्वार्थिकइकप्रत्ययःउदारमेवउरालमेवउरलमेवचाऊदारिकंमृषोदरादित्वादिष्टरू
पनिष्पत्तिःप्राकृतत्वानऊरालियमिति॥उक्तंच॥तत्थोदारमुरालंऊरलंओरालमहवविण्णेयं॥ऊरालियंतिपढमंपडुच्चतित्थेसरस
रीरंभण्णइयतण्होरालंवित्थरवंतंचणस्सयंपप्पपगइएनत्थिअण्णंएद्दहमेत्तंविसालंतिउरलंघेवपएसोवचियंपिमहद्दुगंजहाभिण्हं
मंसठिण्हारुबद्धंऊरालंसमयपरिभासा॥तथाविविधाविशिष्टावाक्रियाविक्रियातस्यांभवंवैक्रियं॥उक्तंच॥विविहाविसिट्ठगावाकिरि
यातीएहजंभवंतमिहवेउव्वियंतयंपुणनारगदेवाणयगईएअथवावैकुर्विकमितिशब्दसंस्कारःतत्रविकुर्वइतिसिद्धोयंधातुःविकुर्वणं
विकुर्वःविविधाक्रियाइत्यर्थः॥तेननिर्वृत्तंवैकुर्विकं॥तथाचतुर्दशपूर्वविदाकार्योत्पत्तौयोगबलेनाह्रियतेइत्याहारकंतेजसोविकार
स्तैजसं॥कर्मणोजातंकर्मजमितितत्त्वौदारिकादीनांशरीराणामिथमुपन्यासेकिंचिदस्तिप्रयोजनमुतयथाकथंचिदेषप्रवृत्तइतिउच्यते
अस्तीतिब्रूमःकिंतदितिचेत्उच्यते॥परंपरंप्रदेशसौक्ष्म्यंपरंपरंवर्गणाकृप्रदेशबाहुल्यंतथाह्यौदारिकात्वैक्रियस्यप्रदेशसौक्ष्म्यंवैक्रिया

द्य्याहारकादपिकार्मणस्यतथाऔदारिकाद्वैक्रियस्यवर्गणास्कप्रदेशबाहुल्यंवैक्रिया॥दाहारकस्याहारकात्तैजसस्यतैजसात्कार्मणस्ये
ति॥एतान्येवशरीराणिनैरयिकादिषुसंभवतश्चिंतयति॥ ७, नेरइयाणंभंतेकेवइयाशरीरापन्नत्ताइत्यादि॥पाहसिद्धंशरीराणिचजीवा
नांद्विविधानिनद्यथाबद्धानिचतत्रयानिचिंताकालेजीवैःपरिगृहीतानिवर्त्तंतेतानिबद्धानिचपूर्वभवेषुपरित्यक्तानितानिमुक्तानितेषांबद्धा
नांमुक्तानांचपरिमाणमिदानींद्रव्यक्षेत्रकालैःप्ररूपणीयंतत्रद्रव्यैरभव्यादिभिःक्षेत्रेणश्रेणिप्रतराणिनाकालेनावलिकादिना॥तत्रौदारि
कशरीरमधिकृत्याहकेवइयाणंभंतेउरालियशरीरापन्नत्ताइत्यादि॥इहप्राकृतलक्षणवशादिल्लुप्रत्ययश्चस्वार्थेततोबद्धिल्लयाइतिब
द्धानीत्यर्थः॥मुक्किल्लयाइतिमुक्तानीत्यर्थः॥तत्रबद्धान्यसंख्येयानिअसंख्येयत्वमेवप्रथमतःकालतोनिरूपयति॥असंखेज्जाहिंइत्यादि
प्रतिप्रतिसमयमेकैकशरीरापहारेअसंख्येयाभिरुत्सर्प्पिणीभिरनवयवशोऽपह्रियंतेकिमुक्तंभवति॥असंख्येयास्कउत्सर्प्पिणीषुयावंतःस
मयास्तावत्प्रमाणानिबद्धान्यौदारिकशरीराणिवर्त्तंते॥इदंकालतःपरिमाणंक्षेत्रतआह॥खित्ततोऽसंखेज्जालोगाइति॥क्षेत्रतःपरिसंख्या
नमसंख्येयालोकाएतदुक्तंभवतिसर्वाण्यपिबद्धान्यौदारिकशरीराणिआत्मीयात्मीयाचगाहनाभिराकाशप्रदेशेषुपरस्परमपिंडीभावेन
क्रमेणस्थाप्यंतेनतदानीतैरेवमास्तीर्यमाणैरसंख्येयालोकाव्याप्यंते॥इहएकैकस्मिन्नप्याकाशप्रदेशेएकैकौदारिकशरीरस्थापनयाप्य
संख्येयालोकाव्याप्यंतेपरंपूर्वाचार्याआत्मीयावगाहनास्थापनयाप्ररूपणांकुर्वंति॥ततोऽपसिद्धांतदोषोमाप्रापदित्यस्माभिरपित
थैवप्ररूपणाक्रियते॥आहचूर्णिकारोपिजइचिइक्केक्केपएसेसरीरमेगंठविज्जइतोविअसंख्येज्जालोगाभवंतिकिंतुअवसिद्धंतदोसपरिहरण
त्थमप्पप्पणियाहिंउगाहणाहिंठविज्जंतेइति॥आहनन्वनंताजीवास्ततःकथमसंख्येयान्यौदारिकशरीराणि॥उच्यतेइहद्विविधाजी
वाप्रत्येकशरीरिणोऽनंतकायिकाश्चतत्रयेप्रत्येकशरीरिणस्तेषांप्रतिजीवमेकैकौदारिकशरीरमन्यथाप्रत्येकशरीरत्वायोगात्येत्वनंत १००
कायिकास्तेषामनंतानामनंतानामेकैकमौदारिकशरीरमतःसर्वसंख्ययाप्यसंख्येयान्यौदारिकशरीराणिमुक्तान्यौदारिकशरीराण्यनंतानि

तच्चानंतत्वंकालक्षेत्रद्रव्यैर्निरूपयति॥अणंताहिंइत्यादिकालतःपरिमाणंप्रतिसमयमेकैकशरीरापहारेऽनंताभिरुत्सर्प्पिण्यवसर्प्पिणीभिःसर्वात्मना
पह्रियंतेकिमुक्तंभवत्यनंतास्कउत्सर्प्पिण्यवसर्प्पिणीषुयावंतःसमयास्तावत्प्रमाणानीति॥क्षेत्रतःपरिमाणमनंतालोकाअनंतेषुलोकप्रमाणेष्वाकाशखं
डेषुयावाइआकाशप्रदेशास्तावत्प्रमाणानीत्यर्थः॥द्रव्यतःपरिमाणमभवसिद्धिकेभ्योऽभव्येभ्योऽनंतगुणानियद्येवंतर्हिसिद्धराशिप्रमाणानिभविष्यंति
तत आह सिद्धानामनंतभागोऽनंतभागमात्राणिननुद्वयोरपिराश्योर्भवसिद्धिकसिद्धरूपयोर्मध्येपठ्यंतेप्रतितसम्यग्दृष्ट्यस्ततःकिंतद्राशिप्रमाणा
निभवेयुःउच्यतेयदितत्प्रमाणानिस्युस्तर्हितथैवनिर्देशःक्रियेतस्कस्वप्रतिपत्तिकतप्रतिज्ञाहिभगवंतआर्यश्यामास्ततस्तथानिर्देशाभावादवसीयतेन
तद्राशिप्रमाणानिनतुर्हितेषांप्रतिपतितसम्यग्दृष्टीनामधस्ताद्वर्त्तेयुरुपरिवाउच्यते॥कदाचिदधस्तात्कदाचिदुपरिकदाचित्तुल्यान्यपिनियतप्रमा
णत्वाननुसर्वकालंतत्प्रमाणानिआहचचूर्णिकृत्॥तोकिंपरिवडियसम्मद्दिट्ठिरासिप्पमाणाइंहोज्जातेतेसिंदांपहविरासीणंमज्झेपढिज्जंतित्तिका
उंअप्पाइजइतप्पमाणाइंहोताइंतोतेसिंचेवनिद्देसोहोतोतम्हाननप्पंमाणाइंतोकिंतेसिंहिट्ठाहोज्जाउवरिंहोज्जाभन्नइकयाईहेट्ठाकयाईउव
रिंहोंतिकयाइतुल्लाइंभनिच्चकालंतप्पमाणाइंइति॥अपरःप्राह॥कथंमुक्तानि॥यथोक्तानंतसंख्याप्रमाणान्युपपद्यंतेयतोयदितावदौदारिकादि
शरीराणियावदविकलानितावद्गृह्यंतेततस्तेषामनंतकालमवस्थानाभावादनंतत्वंनघटतेयदिह्यनंतमपिकालमवस्थानंभवेत्॥ततोऽनंतेनत
त्छरीरगणनादनंतानिभवेयुः॥यावतानंतंकालमवस्थानंनास्तिपुद्गलानामुत्कर्षतोऽप्यसंख्येयकालावस्थानाभिधानात्॥अथयेपुद्गलाजीवे
नौदारिकत्वेनगृहीत्वामुक्ताअतीताद्धा — १तेषांग्रहणंतर्हिसर्वेपिपुद्गलाःसर्वैरपिजीवैःप्रत्येकमौदारिकत्वेनगृहीत्वामुक्ताइतिसर्वपुद्गलग्रह
णमापन्नं॥तथाचसतियदुक्तमभवसिद्धिकेभ्योऽनंतगुणानिसिद्धानामनंतभागमात्राणीतितद्विरुध्यतेसर्वजीवेभ्योपिपरतोनानंतगुणकारेणा
नंतगुणत्वस्यप्रसक्तत्वादिति॥उच्यतेइहमुक्तानामौदारिकशरीराणांनाविकलानामेवकेवलानांग्रहणंनाप्यौदारिकत्वेनयेगृहीत्वामुक्ताः
पुद्गलास्तेषामुक्तदोषप्रसंगात्किंतुयत्शरीरमौदारिकंजीवेनगृहीत्वामुक्तंतत्विशरारिभावंविभ्राणमनंतभेदभिन्नंभवति॥तेचानंताभेदाभवं

तोयावन्तेपुद्गलाश्चौदारिकपरिणामंनजहतितावत्प्रत्येकमौदारिकशरीरव्यपदेशंलभंतेयेपुनरौदारिकपरिणामंत्यक्तवंतस्तेनगण्यंते ततएवमे
कस्यापिशरीरस्यानंतानिशरीराणिजातानि एवंसर्वशरीरेष्वपिभावनीयं तथाचस्यत्येकैकस्यशरीरस्यानंतद्भेदभिन्नत्वादेकस्मिन्नपिसमयेप्र
भूतान्यनंतानिशरीराण्यवाप्यंते तेषांचासंख्येयंकालमवस्थानंतत्रासंख्येयेनकालेनान्यानिजीवैर्विप्रमुक्तान्यसंख्येयान्यवाप्यंते तान्यपिच
प्रत्येकमनंतभेदभिन्नानितेषुचमध्येतावताकालेनयान्यौदारिकशरीरपरिणामंविजहतितानिपरित्यज्यंते शेषाणिगण्यंतेततएवमुक्तानि यथोक्त
प्रमाणानंतसंख्याकान्यौदारिकशरीराण्युपपद्यंते इतिनचैतत्स्वमनीषिकाविजृंभितंयत आह चूर्णिकृत् नवि अभिद्धाणमेवकेवलाणंगहणं
यंनयउरालियगहणमुक्काणंसव्वपुग्गलाणं किंतुजंशरीरमोरालियंजीवेणमुक्कंतंचेव अणंतभेयभिन्नं होइ जावते पुग्गला तंजीवनिवत्तियं उरालियं
शरीरकायप्पयोगंनमुंचंति ततोवअण्णपरिणामेणपरिणामंतितताइंपत्तेयं२ शरीराइंभण्णंति एवमेक्किक्कस्सउरालियसरीरस्सअणंतभेयभिन्न
त्तणऊअणंताइंचेवउरालियसरीराइंभवंतिइत्यादि आहकथमेकैकशरीरद्रव्यदेशस्यत्वेनव्यवह्रियंते उच्यते लवणदृष्टांतेन तथाहिसार्द्धपलिव
णमुच्यतेद्रोणोपिलवणमाढकोपिलवर्णयावदेकापिशर्करालवणमेवमिहापिसकलमप्यौदारिकशरीरंशरीरमुच्यते तदर्द्धमपितदेकदेशोपिया
वदनंतभागोपिशरीरमितिकोत्राभिप्रायइतिचेत उच्यतेइहयथालवणंचपरिणामपरिणतः स्तोकोबहुर्वापुद्गलसंघातोलवणमुच्यते तथौ
दारिकशरीरयोग्यपुद्गलसंघातोपिऔदारिकत्वेनपरिणतः स्तोकोबहुर्वाऔदारिकशरीरव्यपदेशंलभते अथवाभवतिसमुदायैकदेशेपिसमु
दायशब्दोपचारोयथा अंगुल्यग्रेस्पृष्टेस्पृष्टोमयादेवदत्तइत्यादौततउपचारात्तकश्चिद्दोषः ननुयद्येवंकथंतान्यनंत लोकाकाशप्रदेशप्रमाणा
न्यौदारिकशरीराण्येकैकस्मिन्लोके९वगाढानिउच्यतेप्रदीपप्रकाशवत् तथाहियथैकस्यापिप्रदीपस्यार्चीषिसकलभवनावभासीनिभवंतिअन्येषा १०१
मप्यन्येकेषांप्रदीपानामर्चीषितत्रैवानुविशंतिपरस्परमविरोधात्तथौदारिकाण्यपिएवंशेषशरीरेष्वपिमुक्तेष्वायोज्यंनतुद्रव्यक्षेत्रेविहायकिमि
तिप्रथमतःकालेनप्ररूपणाकृताउच्यते कालांतरावस्थायितयापुद्गलेषुशरीरोपचारोनान्यथाततःकालोगरीयानितिप्रथमतस्तेनप्ररूपणा

उक्तान्यौदारिकाणिसंप्रतिवैक्रियसूत्रमाह केवइयाणं भंते इत्यादि बद्धान्यसंख्येयानितत्रकालतः परिमाणंप्रतिसमयमेकैकशरीरापहारेणामस्यना
संख्येयाभिरुत्सर्पिण्यवसर्पिणीतिरपह्रियंते किमुक्तंभवति असंख्येयासूत्सर्पिण्यवसर्पिणीषुयावंतः समयाः स्तावत्प्रमाणानीतिक्षेत्रतो ऽसं
ख्येयाः श्रेणयः तासांचश्रेणीनांपरिमाणंप्रतरस्यासंख्येयोभागः किमुक्तंभवति प्रतरस्यासंख्येयतमेभागेयावंत्यः श्रेणयः स्तासुचश्रेणिषुयावंत
आकाशप्रदेशास्तावत्प्रमाणानिबद्धानिवैक्रियशरीराणीति अथश्रेणिरितिकिमभिधीयते उच्यते घनीकृतस्यलोकस्यसर्वतः सप्तरज्जुप्रमाण
स्यायामतः सप्तरज्जुप्रमाणामुक्तावलिरिवैकैकाकाशप्रदेशपंक्तिः कथंपुनर्लोकोघनीक्रियते कथंवासप्तरज्जुप्रमाणोभवतीतिचेत् उच्यते
॥ इहलोक ऊर्द्धाधश्चतुर्दशरज्जुप्रमाणोऽधस्तान्विस्तरतोदेशोनसप्तरज्जुप्रमाणः एकरज्जुर्मध्यभागेब्रह्मलोकप्रदेशेबहुमध्यदेश
भागेपंचरज्जुरुपर्यंतेकारज्जुर्लोकांतेरज्योश्चपरिमाणंस्वयंभूरमणसमुद्रस्यपूर्ववेदिकांतादारभ्यापरवेदिकांतंयावत् एवंप्रमाणस्यलो
कस्यवैशाखस्थानस्थकटिस्थकरयुग्मपुरुषाकारस्यबुद्ध्यात्रसनाड्यादक्षिणभागवर्त्यधोलोकखंडमधोदेशोनत्रिरज्जुविस्तारमतिरिक्तसप्त
रज्जूच्छ्रयंपरिगृह्यत्रसनाड्याउत्तरपार्श्वेऊर्ध्वाधोभागविपर्यासेनसंघात्यतेऊर्ध्वभागोऽधः क्रियतेअधोभागस्तूर्द्धमितिसंघात्यतेइति तत
ऊर्द्धलोकेत्रसनाड्यादक्षिणभागवर्त्तिनीयेद्वेखंडेकूर्पराकारसंस्थितेप्रत्येकंदेशोनार्द्धचतुष्टयरज्जूच्छ्रयेतेबुद्ध्यासमादायवैपरीत्येनोत्त
रपार्श्वेसंघात्येतेएवंचकिंजातमधस्तनंलोकार्द्धंदेशोनचतूरज्जुविस्तारंसातिरेकसप्तरज्जूच्छ्रयंउपरितनमर्द्धंत्रिरज्जुविस्तारंदेशोनसप्त
रज्जूच्छ्रयंततउपरितनमर्द्धंबुद्ध्यागृहीत्वाअधस्तनस्यार्द्धस्योत्तरपार्श्वेसंघात्यतेतथाचसतिसातिरेकसप्तरज्जूच्छ्रयोदेशोनसप्तरज्जुविस्ता
रोघनोजातः अंतःसप्तरज्जूनामुपरियदधिकंतत्परिगृह्यऊर्द्धाधआयतमुत्तरपार्श्वेसंघात्यतेततोविस्तरतोपिपरिपूर्णाःसप्तरज्जवोभ
वंति एवमेवलोकोघनीकृतश्चसप्तरज्जुप्रमाणोनभवतियत्ररज्जुचनघनत्वेनसप्तरज्जुप्रमाणवानपूर्यते तत्रबुद्ध्यापूरणीयमेतच्चप
द्दिकादौलिखित्वादर्शयितव्यंसिद्धांतेचयत्रक्वचनापिश्रेणि६प्रतरस्यचाग्रहणंतत्रसर्वत्राप्येवंघनीकृतस्यलोकस्यसप्तरज्जुप्रमाणस्या

वसानव्यं॥ मुक्तान्यौदारिकवद्भावनीयानि॥ आहारकविषयंसूत्रंकेवइयाणंभंतेआहारगशरीरगाइत्यादिबद्धानिसियअत्थिसियनत्थि
इतिअस्तीतिनिपातोबहुवचनगर्भःकदाचित्संतिकदाचिन्नसंतीत्यर्थः॥ यस्मादंतरमाहारकशरीरस्यजघन्यनएकःसमयउत्कर्षतःष
ण्मासाः॥ उक्तंच॥ आहाराइंलोएछम्मासेजानहोंतिविकयाइं ऊक्कोसेणंनियमाएक्कंसमयंजहन्नेणंइति॥ यदापिजघन्यतएकंद्वेवाउत्क
र्षतःसहस्रपृथक्त्वं॥ मुक्तान्यौदारिकवत्तैजसविषयंसूत्रमाह॥ ७॥ केवइयाणंभंतेयगसरीराइत्यादि॥ तत्रबद्धान्यनंतानिअनंतत्वंका
लक्षेत्रद्रव्यैर्निरूपयति॥ अणंताहिंइत्यादि॥ कालतःपरिमाणमनंतोत्सर्पिण्यवसर्पिणीसमयप्रमाणानिक्षेत्रतोऽनंतलोकप्रमाणाकाश
खंडप्रदेशपरिमाणानिद्रव्यतःपरिमाणंसिद्धेभ्योऽनंतगुणानितैजसंहिशरीरंसर्वसंसारिजीवानांप्रत्येकंसंसारिणश्चजीवाःसिद्धेभ्योऽ
नंतगुणास्ततस्तैजसशरीराण्यपिसिद्धेभ्योऽनंतगुणानिभवंति॥ सव्वजीवाणंअणंतभागूणाइति॥ सर्वजीवानांयोऽनंततमोभागस्तेनोना
नियमत्रभावनासिद्धानांतैजसशरीरंनविद्यतेसर्वशरीरातीतत्वात्तेषांसिद्धाश्चसर्वजीवानामनंतभागेस्ततस्तेनोनानिभवंति॥ मुक्तानि
अनंतानितदेवानंतत्वंकालक्षेत्रद्रव्यैःप्ररूपयति॥ अणंताहिंइत्यादिकालक्षेत्रतस्तत्रप्राग्वत्द्रव्यतःपरिमाणंसर्वजीवेभ्योऽनंतगुणानि
कथमितिचेत्उच्यतेइहएकैकस्यसंसारिजीवस्यएकैकंतैजसशरीरंतानिचजीवैर्विप्रयुक्तानिसंतिप्रागुक्तयुक्तेरनंतभेदभिन्नानिभवंति
तेषांचासंख्येयंकालंयावदवस्थानंतावताचकालेनजीवैर्विप्रयुक्तान्यन्यानितैजसशरीराणिप्रतिजीवमसंख्येयानिःवाप्यंतेतेषामपि
प्रत्येकंप्रागुक्तयुक्त्याअनंतभेदभिन्नत्वेनभवेयुस्ततश्चाहजीवर्गस्यअणंतभागोइतिजीववर्गस्यानंतभागप्रमाणानिजीववर्गप्र
माणानिकस्मान्नभवंतीतिचेत्उच्यतेयदिएकैकस्यजीवस्यसर्वजीवराशिप्रमाणानिकिंचित्समधिकानिवाभवेयुर्वेनसिद्धानंतभागपू
रणंभवंति॥ वर्गोहितेनैवराशिनातस्यराशेर्गुणनेभवति॥ यथाचतुष्कस्यचतुष्केनगुणनेषोडशात्मकोवर्गइतिनचैकैकस्यसर्वजीवप्रमा १०२
णानिकिंचित्समधिकानिवातैजसशरीराणिकिंत्वतिस्तोकानितान्यपिअसंख्येयकालावस्थायीनितावताकालेनयान्यन्यान्यानिभवंति

तान्यपिस्तोकानिकालस्यस्तोकत्वात्ततोजीववर्गप्रमाणानिभवंति॥ किंतुजीववर्गस्यानंतभागमात्राणिअनंतभागप्रमाणतायांचपूर्वाचा
र्यप्रदर्शितमिदंनिदर्शनंसर्वजीवास्तत्वतस्त्वाअनंताअपिअसत्कल्पनयादशसहस्राणितेषांचदशसहस्राणांवर्गोदशकोटयःतैजसशरी
राणिचमुक्तान्यसत्कल्पनयादशलक्षप्रमाणानिततःसर्वजीवेभ्यःकिशतगुणानीतिसर्वजीवेभ्योऽनंतगुणान्युक्तानिजीववर्गस्यचशत
भागेवर्ततेततोजीववर्गस्यानंतभागमात्राणिएवंकार्मणशरीराण्यपिबद्धानिमुक्तानिचभावनीयानि॥ तेजसैःसहसमानसंख्यत्वात्उक्ता
न्यौधिकानिपंचापिशरीराणिसंप्रतिनैरयिकादिविशेषणविशेषितानिचिंत्यंतेनेरइयाणंभंतेइत्यादिनैरयिकाणांबद्धान्यौदारिकाणिश
रीराणिनसंतिभवप्रत्ययतस्तेषामौदारिकशरीरासंभवात्॥ मुक्तान्यौधिकमुक्तौदारिकशरीरवत्वैक्रियाणिबद्धानियावंतोनैरयिकास्ता
वत्प्रमाणानितानिचासंख्येयानितदेवासंख्येयत्वंकालक्षेत्राभ्यांप्ररूपयत्वंप्ररूपयति॥ असंखेज्जाहिंइत्यादिकालतःपरिमाणंप्रतिसमय
मेकैकशरीरापहारेसामस्त्येनासंख्येयाभिसर्पिण्यवसर्पिणीभिरपहियंतेकिमुक्तंभवंतिअसंख्येयास्तत्सर्पिण्यवसर्पिणीषुयावंतःसमया
स्तावत्प्रमाणानीतिक्षेत्रतोऽसंख्येयाःश्रेणयःअसंख्येयासुश्रेणिषुअयावंतआकाशप्रदेशास्तावत्प्रमाणानीतिभावः अथप्रतरेपिसर्वेऽसं
ख्येयाःश्रेणयोभवंतितरस्यार्द्धभागेत्रिभागादौचततःकियत्संख्याकास्ताःश्रेणयइत्याशंकायांविशेषनिर्द्धारणार्थमाह॥ प्रतरस्यासंख्येयभा
गकिमुक्तंभवतिप्रतरस्यासंख्येयतमेयतमेभागेयावत्यःश्रेणयस्तावत्यःपरिगृह्यंतेइदमन्यत्रविशेषतरपरिमाणंतासिणंसेदीणंदिक्खंभसूईइत्या
दितासांश्रेणीनांविष्कंभतोविस्तारमधिकृत्यसूचिरेकप्रादेशिकीश्रेणिरंगुलप्रथमवर्गमूलंद्वितीयवर्गमूलगुणितंइयमत्रभावना॥ इहप्रज्ञापकेनघ
नीकृतःसप्तरज्जुप्रमाणोलोकःपट्टिकादौरूपनीयःश्रेणयश्चस्वरिवाकारेणदर्शनीयाःदर्शयित्वाचैवंप्रमाणंवक्तव्यंअंगुलप्रमाणस्यक्षेत्रस्यया
वत्प्रदेशराशिस्तस्यासंख्येयानिवंवर्गमूलानिभवंति॥ तद्यथा॥ प्रथमंवर्गमूलंतस्यापियद्वर्गमूलंतस्यापियत्वर्गमूलंतृतीयंवर्गमूलमे
वमसंख्येयानिवर्गमूलानिभवंतितत्रप्रथमंयत्वर्गमूलंतत्द्वितीयेनवर्गमूलेनगुण्यंतेगुणितेचसतियावंतःप्रदेशाभवंतितावत्प्रदेशात्मि

कामृविबुध्याक्रियंनेकत्वाचविष्कंभतोदक्षिणोत्तरायततयारूपनीयानयाचरूप्यमानयायावत्यःश्रेणयःस्पृश्यंतेतावत्यःपरिगृह्यंते॥तत्रेदंनिदर्श
नमंगुलमात्रक्षेत्रप्रदेशराशिस्तत्वतोऽसंख्यातोप्यसत्कल्पनयाषट्पंचाशदधिकेद्वेशतेकल्प्यतेतयाःप्रथमंवर्गमूलंषोडशद्वितीयंचत्वार
स्तृतीयंद्वौ॥तत्रद्वितीयेनवर्गमूलेनचतुष्कलक्षणेनप्रथमवर्गमूलंषोडशलक्षणंगुण्यतेजाताचतुःषष्टिरेतावत्यःश्रेणयःपरिगृह्यंते
अमुमेवार्थंकरणांतरेणकथयति॥अहवणमित्यादि॥अथवेतिप्रकारांतरेणमितिवाक्यालंकारेअंगुलमात्रक्षेत्रप्रदेशराशेर्द्वितीयस्यवर्ग
मूलस्यासत्कल्पनयाचतुष्कलक्षणस्ययोघनस्तावत्प्रमाणाइहयस्यराशेर्योवर्गःसतेनराशिनागुण्यतेतथाघनोभवतियथाद्विकस्याष्टौ तथा
हिद्विकस्यवर्गश्चत्वारस्तेद्विकेनगुण्यंतेजाताअष्टावितिएवमिहापिचतुष्कस्यवर्गःषोडशतेचतुष्केनगुण्यंते॥ततश्चतुष्कस्यघनोभवतितत्रापिसैवच
तुःषष्टिरितिप्रकारद्वयेप्यर्थाभेदइहायंगणितधर्मोयबहुस्तोकेनगुण्यतेततःस्तवकृताप्रकारद्वयमेवोपदर्शितमन्यथान्यतीयोपिप्रकारोस्ति अंगु
लविइयवर्गमूलंपढमवग्गमूलपडुप्पण्णमिति॥अन्येत्विदधतिअंगुलमात्रक्षेत्रप्रदेशराशेःस्वप्रथमवर्गमूलेनगुणितेयावान्प्रदेशराशिर्भवति
तावत्प्रमाणयासूच्यायावत्स्पृष्टाःश्रेणयस्तावतीषुश्रेणिषुयावंतस्त्वाकाशप्रदेशास्तावत्प्रमाणानिनैरयिकाणांबध्वानिवैक्रियशरीराणीतिमुक्ता
न्यौदारिकवत्॥आहारकाणिबद्धानिनसंति॥तेषांतल्लब्ध्यसंभवात्मुक्तानिपूर्ववत्तैजसकार्म्मणानिवैक्रियवत्॥मुक्तानिपूर्ववत्असुरकुमा
राणामौदारिकशरीराणिनैरयिकवत्वैक्रियाणिबध्दान्यसंख्येयानितदेवासंख्येयत्वंकालक्षेत्राभ्यांप्ररूपयति॥तत्रकालसूत्रंप्राग्वत्
क्षेत्रतोऽसंख्येयाःश्रेणयःअसंख्येयासुश्रेणिषुयावंतआकाशप्रदेशास्तावत्प्रमाणानीत्यर्थस्ताश्चश्रेणयःप्रतरस्यासंख्येयोभागःप्रत
रासंख्येयभागप्रमिताइत्यर्थः॥तत्रनारकचिंतायामपिप्रतरासंख्येयभागप्रमिताउक्तास्ततोविशेषतरंपरिमाणमाहतासिणमित्यादिनातासां
श्रेणीनांपरिमाणाययाविष्कंभसूचिसाअंगुलमात्रप्रदेशराशेःसंबंधिनःप्रथमवर्गमूलस्यसंख्येयोभागःकिमुक्तंभवति॥अंगुलमात्रक्षे १०३
त्रप्रदेशराशेरसत्कल्पनयाषट्पंचाशदधिकशतद्वयप्रमाणस्ययत्प्रथमवर्गमूलंषोडशलक्षणंतस्यसंख्येयभागेयावंतआका
शप्रदेशाअसत्कल्पनयापंचषट्वातावत्प्रदेशात्मिकाश्रेणिपरिमाणायविष्कंभसूचिरवसातव्या॥एवंचनैरयिकापेक्षयाऽसुराणांविष्कंभसूचि
रसंख्येयगुणाहीनातथाहिनैरयिकाणांश्रेणिपरिमाणायविष्कंभसूचिरंगुलप्रथमवर्गमूलंद्वितीयवर्गमूलप्रत्युत्पन्नंयावद्भवतितावत्प्र
देशात्मिकाद्वितीयंचवर्गमूलंततोऽसंख्यातप्रदेशात्मकंततोऽसंख्येयगुणाप्रथमवर्गमूलप्रदेशात्मिकानैरयिकानांसूचिरसुरसूचीत्वंगुल
प्रथमवर्गमूलसंख्येयभागप्रदेशात्मिकेतियुक्तंचैतत्तस्मान्महादंडकेसर्वेपिभवनपतयोरत्नप्रभानैरयिकेभ्योप्यसंख्येयगुणहीनाउक्ता
स्ततःसर्वनैरयिकापेक्षयातेषामसंख्येयगुणहीनाभवंति॥मुक्तान्यौघिकमुक्तवत्आहारकाणिनैरयिकवत्तैजसकार्म्मणानिबद्धानि
बध्दवैक्रियवत्॥मुक्तान्यौघिकमुक्तवत्॥यथाचासुरकुमाराणामुक्तंतथाशेषाणामपिभवनपतीनांवाच्यंयावत्स्तनितकुमाराणांपृथिव्य
प्तेजःसूत्रेषुबद्धान्यौदारिकशरीराणिअसंख्येयानितत्रापिकालतःपरिमाणचिंतायांप्रतिसमयमेकैकशरीरापहारेसामस्त्येनासंख्येयाभि
रुत्सर्पिण्यवसर्पिणीभिरपह्रियंतेक्षेत्रतःपरिमाणचिंतायामसंख्येयलोकाआत्मीयाआत्मीयावगाहनाभिरसंख्येयालोकाव्याप्यंते मुक्ता
न्यौघिकमुक्तवत्॥तैजसकार्म्मणानिबद्धानिबद्धौदारिकवत्॥मुक्तान्यौघिकमुक्तवत्॥वातकायस्यौदारिकशरीराणिपृथिव्यादिवत्॥
वैक्रियाणिबद्धान्यसंख्येयानितानिचप्रतिसमयमेकैकशरीरापहारेपल्योपमासंख्येयभागेननिःशेषतोऽपह्रियंतेकिमुक्तंभवति॥पल्योप
मासंख्येयतमेभागेयावंतःसमयास्तावत्प्रमाणानीति॥नपुनरभ्यधिकानिस्युस्तथाहिवायुकायिकाश्चतुर्विधास्तद्यथासूक्ष्माबादराश्च
एकैकेद्विधापर्याप्ताअपर्याप्ताश्चतत्रबादरपर्याप्तव्यतिरिक्ताःशेषास्त्रयोपिप्रत्येकमसंख्येयलोकाकाशप्रमाणायेतुबादरपर्याप्तास्तेप्र
तरासंख्येयभागप्रमाणास्तत्रत्रयाणांराशीनांवैक्रियलब्धिरेवनास्तिबादरपर्याप्तानामपिसंख्येयभागमात्राणांलब्धिर्नशेषाणामाहचचू
र्णिकृत्तिण्हंतावरासीणंवेउव्वियलद्धीणंचेवनत्थिबायरपज्जत्ताणंपिसंखेज्जइभागमेत्ताणंलद्धीअत्थि॥ततःपल्योपमासंख्येयभागसमय
प्रमाणाएवपृच्छासमयेवायवोवैक्रियवर्त्तिनोऽवाप्यंतेनाधिकाइति॥इहकेचिदाचक्षतेसर्वेवायवोवैक्रियवर्त्तिनएवावैक्रियाणांचे

स्थायाण्यासंभवात् ॥ तदसमीचीनंवस्तुगतेरपरिज्ञानात्वायवोहिस्वभावाञ्चलास्ततोवैक्रियाअपितेवांनीतिप्रतिपत्तव्यंचानाद्यायुरितिव्युस
नेः॥ आहचचूर्णिकृत् ॥ जेणसव्वेसुच्चेसुवेवलंगागसिसुचलावायवोवायंतिनम्हाअवेउव्वियाविवायावायंतीतिघित्तव्वमिति ॥ मुक्तानिवैक्रि
याणियौघिकमुक्तवत् ॥ तैजसकार्म्मणानिबद्धानिबद्धौदारिकवत्मुक्तान्यौघिकमुक्तवत् ॥ तैजसकार्मणानिबद्धानिबद्धौदारिकवत्मुक्तान्यौ
घिकमुक्तवत् ॥ वनस्पतिकायिकचिंतायामौदारिकाणिपृथिव्यादिवत् तैजसकार्म्मणवत् ॥ द्वींद्रियस्तत्रबद्धान्यौदारिकशरीराणिसंख्येयानित
त्रकालतःपरिमाणचिंतायाभिरुत्सर्प्पिण्यवसप्पिणीभिरपहियंते ॥ असंख्यातास्वुत्सपिण्यवसर्पिणीषुयावंतःसमयास्तावत्प्रमाणानीतिभावः
क्षेत्रतोऽसंख्येयाश्रेणयोऽसंख्यातासुश्रेणिषुयावंतआकाशप्रदेशास्तावत्प्रमाणानीत्यर्थः ॥ तासांचश्रेणीनांपरिमाणविशेषनिर्द्धारणार्थ
माप्रतरस्यासंख्येयभागप्रमिताअसंख्येयाःश्रेणयःपरिगृह्यंतेइतिभावः ॥ प्रतरासंख्येयभागोनैरयिकभवनपतीनामपिप्रतिपादितस्ततोवि
शेषतरपरिमाणनिरूपणार्थंसूचीमानमाह ॥ तासिणंसेढीणमित्यादिनायांश्रेणीनांपरिमाणावधारणायथाविष्कंभसूचीसाअसंख्येया
योजनकोटीकोट्यःअसंख्येययोजनकोटीकोटिप्रमाणाइत्यर्थः ॥ अथवेदमन्यद्विशेषतःपरिमाणं ॥ असंखेज्जाइंसेढिवग्गमूलाइंइतिएक
स्याःपरिपूर्णायाःश्रेण्यःप्रदेशराशिस्तस्यप्रथमंवर्गमूलंद्वितीयंचवर्गमूलंयावदसंख्येयतमंवर्गमूलंएतानिसर्वाण्ययेकत्रसंकल्प्यंते
तेषुचसंकलितेषुयावान्प्रदेशराशिर्भवति ॥ तावत्प्रदेशात्मिकाविष्कंभसूचिसेयाअत्रनिदर्शनंश्रेण्योकिरुप्रदेशाअसंख्याअप्यसत्कल्पनया
पंचषष्ठिसहस्राणिपंचशतानिषट्त्रिंशदधिकानि ६५५३६ तेषांप्रथमंवर्गमूलंद्वेशतेषट्पंचाशदधिके २५६ द्वितीयंषोडश १६ तृ
तीयंचत्वारः ४ चतुर्थंद्वौ २ एतेषांचसंकलनेजातेद्वेशतेअष्टसप्तत्यधिके २७८ एतावतीकिलासत्कल्पनयाप्रदेशानांसूचिरिति
अथैतेद्वींद्रियाःकिंप्रमाणाभिरवगाहनाभिरास्तीर्यमाणाःकियताकालेनसकलंप्रतरमापूरयंतिउच्यतेअंगुलासंख्येयभागप्रमाणाभि १०४
रवगाहनाभिःप्रत्यावलिकासंख्येयभागमेकैकावगाहनारचनेनासंख्येयाभिरुत्सर्प्पिण्यवसर्प्पिणीभिरापूर्यंते ॥ इयमत्रभावनाएकैक

DR. BHAU DAJI MEMORIAL

स्मिन्नावलिकायाअसंख्येयतमेभागेएकैकाअंगुलाअसंख्येयभागप्रमाणाअवगाहनारच्यतेऽसंख्येयाभिरुत्सर्प्पिण्यवसप्पिणीभिःसकलम
पिप्रतरंद्वींद्रियशरीरैरापूर्यतेएतदेवापहारेणसूत्रकृदाह ॥ ७ ॥ बेइंदियाणमित्यादि द्वींद्रियाणांसंबंधिभिरौदारिकशरीरैर्बद्धैःप्रतरमसं
ख्येयाभिरुत्सर्प्पिण्यवसप्पिणीभिरपहियंतेअत्रप्रतरमितिक्षेत्रतःपरिमाणंउत्सर्प्पिण्यऽवसर्प्पिणीभिरितिकालतःकिंप्रमाणेनपुनःक्षे
त्रेणकालेनचाअपहरणमतआह अंगुलपयरस्सआवलिआएयअसंखेज्जइभागपलिभागेणंति अंगुलमात्रस्यप्रतरस्यएकप्रादे
शिकश्रेणिरूपस्यअसंख्येयभागेनअसंख्येयभागप्रमाणेनखंडेनइदंक्षेत्रविषयंपरिमाणंकालपरिमाणवलिकायाअसंख्येयभागप्रति
भागेनअसंख्येयतमेनप्रतिभागेनकिमुक्तंभवति ॥ एकेनद्वींद्रियेणांगुलासंख्येयभागप्रमाणंखंडमावलिकायाअसंख्येयतमेनभागे
नापहियतेद्वितीयेनापितावत्प्रमाणंखंडंतावत्कालेनएवमपहियमाणंप्रतरंद्वींद्रियैःसर्वैरसंख्येयाभिरुत्सर्प्पिण्यवसप्पिणीभिःसकल
मपहियतेइतिमुक्तान्यौघिकमुक्तावत्तैजसकार्मणानिबद्धानिबद्धौदारिकवत्वैक्रियाणिपुनर्बद्धानितेषांनसंतिमुक्तान्यौघिकमुक्त
वत् ॥ एवंत्रिचतुरिंद्रियाणामपितिर्यग्पंचेंद्रियाणांबद्धानिमुक्तानिचौदारिकाणिद्वींद्रियवत्वैक्रियाणिबद्धानिअसंख्येयानित
त्रकालतःपरिमाणचिंतायामसंख्येयाभिरुत्सर्पिण्यवसर्प्पिणीभिरपहियंतेक्षेत्रतोऽसंख्येयासुश्रेणिषुयावंतआकाशप्रदेशास्ताव
त्प्रमाणानितासांचश्रेणीनांपरिमाणंप्रतरस्यासंख्येयोभागःतथाचाहजहाअसुरकुमाराणमिति ॥ यथाअसुरकुमाराणांतथावक्तव्यं
नवरंविष्कंभसूचिपरिमाणचिंतायांतत्रांगुलप्रमाणवर्गमूलस्यसंख्येयोभागउक्तइहत्वसंख्येयोभागोवक्तव्यःकिमुक्तंभवति ॥ अंगु
लमात्रक्षेत्रप्रदेशराशेःयत्प्राथमंवर्गमूलंतस्यासंख्येयतमेभागेयावंतआकाशप्रदेशास्तावत्प्रदेशात्मिकासूचिःपरिगृह्यतेतताव
त्याचसूच्यायाःश्रेणयःस्पृष्टास्तासुश्रेणिषुयावंतआकाशप्रदेशास्तावत्प्रमाणानितिर्यग्पंचेंद्रियाणांबद्धानि ॥ वैक्रियशरीराणिउक्तं
च ॥ अंगुलमूलासंखियभागप्पमयाउसेढिसेढीउ ॥ उत्तरविउव्वियाणंतिरियाणंसन्नियाणंसन्निपद्माणं ॥ मुक्तान्यौघिकमुक्तवानतैजस

कार्मणानि बद्धौदारिकवत् मुक्तान्यौधिकमुक्तवत् ॥ मनुष्याणां बद्धान्यौदारिकशरीराणि स्यात्कदाचित्संख्येयानि कदाचिदसंख्येया
नि को ऽभिप्राय इति चेदुच्यते ॥ इह द्विधा मनुष्या गर्भव्युत्क्रांतिकाः संमूर्छिमाश्च तत्र गर्भव्युत्क्रांतिकाः सदावस्थायिनो न स कश्चित्काला
सि यो गर्भव्युत्क्रांतिकमनुष्यरहितो भवति संमूर्छिमाश्च कदाचिद्भवंति कदाचिद्भवंति कदाचित्सर्वथा तेषामभावो भवति ॥ तेषामुत्कर्षतो
ह ऽन्तर्मुहूर्तायुष्कत्वात् उत्पत्त्यंतरस्य चोत्कर्षतश्चतुर्विंशतिमुहूर्तप्रमाणत्वात् ततो यदा सर्वथा संमूर्छिममनुष्या न विद्यंते केवलाः गर्भव्युत्क्रांता
एव तिष्ठंति तदा स्यात्संख्येयाः संख्येयानामेव गर्भव्युत्क्रांतिकानां भावात् महाशरीरत्वे प्रत्येकशरीरत्वे च सति परिमितक्षेत्रवर्तित्वात् य
दा तु संमूर्छिमा अपि तदा असंख्येयाः संमूर्छिमाणामुत्कर्षतः श्रेण्यसंख्येयभागवर्तिनो नभःप्रदेशराशिप्रमाणत्वात् तथा चाह जघन्नपदे संवे
ज्जाइत्यादि ॥ जघन्यपदं नाम यत्र सर्वस्तोकाः मनुष्याः प्राप्यंते आह किमत्र संमूर्छिमाणां ग्रहणमुत गर्भव्युत्क्रांतिकानां उच्यते गर्भव्युत्क्रां
तिकानां तेषामेव सदावस्थायितया संमूर्छिमविरहे सर्वस्तोकतया प्राप्यमाणत्वात् ॥ उत्कृष्टपदे त्वभयेषामपि ग्रहणं यदाह मूलटीकाका
रः सेतराणां ग्रहणमुत्कृष्टपदे जघन्यपदे गर्भव्युत्क्रांतिकानामेव केवलानां ग्रहणमिति ॥ अस्मिन् जघन्यपदे संख्येया मनुष्याः तत्र संख्ये
ये भेदभिन्नमिति न ज्ञायते कियंतस्ते इति विशेषसंख्यानिर्धारयति संख्येयाः कोटीकोट्यः अथवा इदमन्यत् विशेषतरं परिमाणं तिजम
लपयस्स उवरिं चउजमलपयस्स हेट्ठा इति इह मनुष्यसंख्या प्रतिपादिकान्येकोनत्रिंशदंककस्थानानि वक्ष्यमाणानि तत्र समयपरिभाष
या अष्टानामष्टानामंकस्थानानां यमलपदमिति संज्ञा चतुर्विंशत्या चांकस्थानैः त्रीणि यमलपदानि लब्धानि उपरि पंचांकस्थानानि
तिष्ठंति ॥ अथ च यमलपदमष्टभिरंकस्थानैस्ततश्चतुर्थं यमलपदं न प्राप्यते तेन त उक्तं त्रयाणां यमलपदानामुपरि पंचभिरंकस्थाने १०५
वर्द्धमानत्वात् चतुर्थस्य यमलपदस्याधस्तात् त्रिभिरंकस्थानैर्हीनत्वात् ॥ अथवा द्वौ द्वौ वर्गौ समुदितौ एकं यमलपदं चत्वारो वर्गाः
समुदिता द्वे यमलपदे षड्वर्गाः समुदितास्त्रीणि यमलपदानि अष्टौ वर्गाः समुदिताश्चत्वारि यमलपदानि तत्र यस्मात् षण्णां वर्गाणामु

परि वर्त्तंते सप्तमस्य वर्गस्याधस्तात् तत उक्तं त्रियमलपदस्योपरि चतुर्थयमलपदस्याधस्तादिति त्रियमलपदस्येति त्रयाणां यमलपदानां समाहा
रस्त्रियमलपदं तस्य ॥ तथा चतुर्णां यमलपदानां समाहारश्चतुर्यमलपदं तस्य संप्रति स्पष्टतरं संख्यानमुपदर्शयति ॥ अहवणं छट्ठवग्गो पंच
मवग्गपडुप्पण्णो इति अथवेति प्रकारांतरेण णमिति वाक्यालंकारे षष्ठो वर्गः पंचमवर्गेण प्रत्युत्पन्नो गुणितः सन् यावान् भवति तावत्प्रमाणा
जघन्यपदे मनुष्यास्तत्र एकस्य वर्ग एक एव स च वृद्धिं न गत इति वर्गो न गण्यते ॥ द्वयोर्वर्गश्चत्वार एष प्रथमो वर्गः ४ चतुर्णां वर्गः षोडश एष
द्वितीयो वर्गः १६ षोडशानां वर्गो द्वे शते षट्पंचाशदधिके एष तृतीयो वर्गः २५६ द्वयोः शतयोः षट्पंचाशदधिकयोर्वर्गः पंचषष्टिसहस्रा
णि पंचशतानि षट्त्रिंशदधिकानि एष चतुर्थो वर्गः ६५५३६ एतस्य वर्गस्य वर्गश्चत्वारि कोटिशतानि एकोनत्रिंशत्कोटय एकोनपंचा
शल्लक्षाः सप्तषष्टिः सहस्राणि द्वे शते षण्णवत्यधिके एष पंचमवर्गः ४२९४९६७२९६ उक्तं च ॥ चत्तारियकोडिसया अउणत्तीसं च हों
ति कोडीओ अउणावण्णं लक्खा सत्तट्ठिं चेव य सहस्सा दो य सया छण्णउई पंचमवग्गो समासओ होइ एयस्स कदो वग्गो छट्ठो जो हो इतं बोच्छं
एतस्य पंचमवर्गस्य यो वर्गः स्तस्य परिमाणमेकं कोटीकोटीकोटीशतसहस्रं चतुरशीतिः कोटीकोटीसहस्राणि चत्वारि सप्तषष्ट्यधि
कानि कोटीशतानि चतुश्चत्वारिंशत् कोटिलक्षाणि सप्त कोटीसहस्राणि त्रीणि सप्तत्यधिकानि कोटिशतानि पंचनवतिर्लक्षा एकपंचाश
त्सहस्राणि षट् शतानि षोडशोत्तराणि १८४४६७४४०७३७०९५५१६१६ एष षष्ठो वर्गः ॥ उक्तं च ॥ लक्खं कोडाकोडी चउरासीई भवे सह
स्साइं ॥ चत्तारियसत्तट्ठा होंति सया कोडिकोडीणं ॥ चोयालं लक्खाई कोडीणं सत्त चेय सहस्सा ॥ तिण्णि सया चत्तारो कोडीणं होंति नायव्वा ॥ पंचाण
उई लक्खा एकावण्णं भवे सहस्साइं छसोलस सत्तरसया एसो छट्ठो हवइ वग्गो ॥ इति एष षष्ठो वर्गः पंचमवर्गेण गुण्यते सति यावान् राशिर्भ
वति तावत्प्रमाणा जघन्यपदे मनुष्याः ते चामी तावंति ७९२२८१६२५१४२६४३३७५९३५४३९५०३३६ एतान्येकोनत्रिंशदंकस्थाना
नि एतानि च कोटीकोट्यादि द्वारेण कथमपि अभिधातुं न शक्यंते पर्यंतवर्तिनो ऽंकस्थानादारभ्यांकस्थानसंग्रहमात्र पूर्वपुरुषप्रणीतेन गाथा

दयेनाभिधीयते छत्तिणितिण्णिसुण्णं पंचेवय नवय तिण्णि चत्तारि पंचेव तिन्नि नव पंच सत्त तिण्णेव २ चउछ्छदो चउ एक्को पंच दो छक्क मेक्कगं अठ
वदो दो णव सत्तेवय ठाणाई उवरि हुंताइं अथ वा यमक स्थानं प्रथमाक्षर संग्रहः छतितिसु पण नवति चए तिणपसति ति वछदो चए
यदो छा एआ विवेउण सापदमरकर सन्निय ठाणा ॥ एतेषामेव एकोनत्रिंशदंकस्थानानां पूर्वांगैः परिसंख्यानं कृतं तदुपदर्श्यते तत्र चतुरशी
तिर्लक्षाणि पूर्वांगं चतुरशीतिलक्षाश्चतुरशीतिलक्षैर्गुण्यंते ततः पूर्वं भवति ॥ तस्य परिमाणं सप्ततिः कोटिलक्षाणि षट्पंचाशत् तत्कोटि
सहस्राणि ७०५६०००००००००० एतेन भागो ह्रियते ततः इदमागतं एकादश पूर्व कोटी कोट्यो द्वाविंशतिः पूर्व कोटी लक्षाणि चतुरशी
तिः पूर्व कोटी सहस्राणि अष्टोदशोत्तराणि पूर्व कोटि शतानि ॥ एकाशीतिः पूर्व लक्षाणि पंचनवतिः पूर्व सहस्राणि षट्पंचाशदधिकानि पूर्व
शतानि अत ऊर्ध्वं पूर्वैर्भागो न लभ्यते ततः पूर्वांगैर्भागहारणं तच्चेदमागतं ॥ एकविंशतिः पूर्वांग लक्षाणि सप्ततिः पूर्वांग सहस्राणि षट् एकोन
षष्ट्यधिकानि पूर्वांग शतानि तत ऊर्ध्वं च इदमन्यदुद्धरितं भवति त्र्यशीतिर्लक्षाणि पंचाशत्सहस्राणि त्रीणि शतानि षड्द्विंशदधिकानि मनुष्याणा
मिति ॥ तथा च पूर्वाचार्य प्रणीता अत्र गाथा माणुयाण जहण्ण पदे एक्कारस पुव्व कोडि कोडीउ ॥ बावीस कोडि लक्खा कोडि सहस्सा य चुलसीई ॥ अट्ठेव य
कोडि सया पुव्वाणु दसुत्तरा उ होंति ॥ एक्कासीई लक्खा पंचाणउई सहस्सा य छप्पन्नातिन्निसया पुव्वाणं पुव्व वण्णिया अण्णे एत्तो पुव्वंगाई इमाइं अण्णाइं लक्खाइं
एगवीसं गाण सयरी सहस्सा य छच्चेव एगूणट्ठा पुव्वंगाणं सया होंति ॥ तेसीइ सय सहस्सा पण्णासं खलु भवे सहस्सा य ॥ तिण्णि सया छत्तीसा एवइया विग
ला मणुया इति ॥ इमामेव संख्यां विशेषोपलंभनिमित्तं प्रकारांतरेणाह ॥ अवण्ण छन्नउई छेयण गदायरासी इति अथ वा इति प्राग्वत् षण्णवति छेद
नकानि यो राशिर्ददाति स षण्णवति छेदनकदायी राशिः किमुक्तं भवति यो राशिरर्द्धेनार्द्धेन छिद्यमानः षण्णवतीं वारान् छेदं सहते पर्यंते च सक
लमेकं रूपं पर्यवसितं भवति स षण्णवति छेदनकदायी राशिरिति कः पुनरेविध इति चेदुच्यते ॥ एष एव षष्ठो वर्गः पंचम वर्ग गुणितः ॥
कोत्र प्रत्यय इति चेदुच्यते ॥ इह प्रथमो वर्गश्छिद्यमानो द्वे छेदनके ददाति ॥ तद्यथा प्रथमं छेदनकं द्वौ द्वितीयमेकमिति द्वितीय एकमिति द्वितीयो व

र्गश्चत्वारि छेदनकानि तत्र प्रथममष्टौ द्वितीयं चत्वारस्तृतीयं चत्वारस्तृतीयं द्वौ चतुर्थमेक इति एवं तृतीयो वर्गोऽष्टौ छेदनकानि प्रयच्छति चतुर्थः षोड
शापंचमो द्वात्रिंशतं षष्ठः चतुःषष्टिं स एव पंचम वर्गेण गुणितः षण्णवतिं कथमेतदवसेयमिति चेदुच्यते ॥ इह यो यो वर्गो येन येन वर्गेण गुण्य
ते तत्र योर्द्वयोरपि छेदनकानि प्राप्यंते यथा प्रथम वर्गेण गुणिते द्वितीये वर्गे षट् तथाहि द्वितीयो वर्गः षोडशलक्षणः प्रथम वर्गेण चतुष्करू
पेण गुण्यते जाता चतुःषष्टिः तस्याः प्रथमं छेदनकं द्वात्रिंशत् द्वितीयं षोडश तृतीयमष्टौ चतुर्थं चत्वारः पंचमं द्वौ षष्ठं एक इति एवमन्यत्रापि भाव
नीयं तत्र पंचम वर्गे द्वात्रिंशत् छेदनकानि षष्ठे चतुःषष्टिः ततः पंचम वर्गेण षष्ठे वर्गे गुणिते षण्णवति छेदनकानि प्राप्यंते अथ वा एकं रूपं
स्थापयित्वा ततः षण्णवति वारान् द्विगुण द्विगुणी क्रियते कृतं च सत् यदि तावत्प्रमाणो राशिर्भवति ततो ऽवसातव्यमेष षण्णवति छेदनकदायी रा
शिरिति तदेवं जघन्य पदमभिहितमिदानीमुत्कृष्ट पदमाह ॥ उक्कोसपए असंखेज्जा इत्यादि उत्कृष्ट पदे ये मनुष्या भवंति ते असंख्येयास्तत्रा
पि कालतः परिमाण चिंतायां प्रति समयमेकैक मनुष्यापहारे सामस्त्येनासंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियंते क्षेत्रतो रूपे प्रक्षिप्ते मनु
ष्यैरेका श्रेणिः परिपूर्णा एह्रियते किमुक्तं भवति उत्कृष्ट पदे ये मनुष्यास्तेषु मध्ये एकस्मिन्नसत्कल्पनया रूपे प्रक्षिप्ते सकलापि श्रेणिरेकापह्रि
यते तस्याश्च श्रेणेः क्षेत्र कालाभ्यामपहार मार्गणा कालतस्तावदसंख्येयाभिरुत्सर्पिणीभिः क्षेत्रतोंगुल प्रथम वर्गमूलं तृतीय वर्गमूल प्रत्युत्पन्नं
किमुक्तं भवत्यंगुण मात्र क्षेत्र प्रदेश राशिरसत्कल्पनया षट्पंचाशदधिक शतद्वय प्रमाणस्तस्य यत्प्रथमं वर्गमूलमसत्कल्पनया षोडशलक्ष
णं ततस्तृतीयेन वर्गमूलेनासत्कल्पनया द्विक लक्षणेन गुण्यते गुणिते च सति यावान् प्रदेश राशिर्भवति असत्कल्पनया द्वात्रिंशत् एतावत्प्रमाणैः
खंडैरपह्रियमाणा यावत् श्रेणिर्निष्ठामियर्त्ति तावन्मनुष्या अपि निष्ठामुपयांति आह कथमेकस्याः श्रेणेर्यथोक्त प्रमाणैः खंडैरपह्रियमाणा
या असंख्येया उत्सर्पिण्यवसर्पिण्यो लगंति उच्यते क्षेत्रस्यातिसूक्ष्मत्वात् ॥ उक्तं च सुत्तेपि सुहुमो य होइ कालो तत्तो सुहुमयरयं हवइ खि
त्तं अंगुल सेढीमित्ते उसप्पिणीउ असंखेज्जा इति ॥ मुक्ताश्चौघिक मुक्तवत् वैक्रियाणि बद्धानि संख्येयानि गर्भव्युत्क्रांतिकानामेव केषांचित् वैक्रिय

लब्धिसंभवात् मुक्तान्यौधिकमुक्तवत् ॥ आहारकाण्यौधिकआहारकवत् तैजसकार्म्मणानि बद्धानि बद्धौदारिकवत् ॥ मुक्तान्यौधिकमुक्तवत् ॥ व्यंतराणामौदारिकाणि यथा नैरयिकाणां वैक्रियाणि बद्धान्यसंख्येयानि तत्र कालतः परिमाणचिंतायां प्रतिसमयमेकैकापहारे असंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिर्ह्रियंते ॥ क्षेत्रतोऽसंख्येयाः श्रेणयः असंख्याता सु श्रेणिषु यावंत आकाशप्रदेशास्तावत्प्रमाणानीति भावः ताश्च श्रेणयः कियत्य इति चेत् उच्यते प्रतरस्यासंख्येयो भागः ॥ प्रतरासंख्येयभागप्रसिता इत्यर्थः ॥ तथा चाह वेउव्विय सरीरा जहा नेरइयाणमिति वैक्रियशरीराणि व्यंतराणां यथा नैरयिकाणां केवलं सूच्यां विशेषस्तथा चाह ॥ नवरमित्यादि नवरं तासां श्रेणीनां विष्कंभसूचिर्वक्तव्येति शेषः सा च स्वप्रसिद्धत्वान्नोक्ता कथं स्वप्रसिद्धेति चेदुच्यते ॥ इह महादंडके पंचेंद्रियतिर्यग्नपुंसकेभ्यः संख्येयगुणहीना व्यंतराः पठ्यंते तत एषां विष्कंभसूचिरपि तिर्यक्पंचेंद्रियविष्कंभसूचेः संख्येयगुणहीना वक्तव्या इति ॥ आह च मूलटीकाकारोपि जम्हा महादंडए पंचेंदियतिरियनपुंसएहिंतो असंखेज्जगुणहीणा वाणमंतरा पढिज्जंति ॥ तम्हा विक्खंभसूई वि तेहिंतो असंखेज्जगुणहीणा चेव भावियव्वा इति ॥ संप्रति प्रतिभाग उच्यते प्रतिभागो नाम खंडं संखेज्जजोयणसयवग्गपलिभागो पयरस्स इ संखेज्जयोजन शतवर्गप्रमाणः प्रतिभागः प्रतरपूरणे अपहरणे अपहरणे वा इति वाक्यशेषः ॥ इयमत्र भावना संख्येययोजनशतवर्गप्रमाणे श्रेणिखंडे यद्येकैको व्यंतरः स्थाप्यते ततस्ते सकलमपि प्रतरमापूरयंति यदि वा यद्येकैकव्यंतरापहारेणैकैकं संख्येययोजनशतवर्गप्रमाणं श्रेणिखंडमपह्रियते ततएकत्र व्यंतरा निष्ठां यांति अपरत्र सकलं प्रतरमिति मुक्तान्यौधिकवत् ॥ आहारकाणि नैरइकवत् ॥ तैजसकार्म्मणानि बद्धानि बद्धवैक्रियवत् ॥ मुक्तान्यौधिकमुक्तवत् ॥ ज्योतिष्काणामौदारिकाणि नैरयिकवत् ॥ वैक्रियाणि बद्धान्यसंख्येयानि तत्र कालतो मार्गणायां प्रतिसमयमेकैकापहारे सामस्त्येनासंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियंते क्षेत्रतोऽसंख्येयाः श्रेणयस्ताश्च श्रेणयः प्रतरासंख्येयभागप्रसितास्तथा चाह जोइसियाणं एवं चेव इति नवरमित्यादिना विशेषं दर्शयति नवरं तासां श्रेणीनां विष्कंभसूचिर्वक्तव्येति शेषः इयमपि स्वप्रसिद्धत्वान्नोक्ता कथमियं स्वप्रसिद्धेति चेदुच्य १०७

ते यस्मान्महादंडके व्यंतरेभ्यो ज्योतिष्का संख्येयगुणाः उक्तास्ततएतेषां विष्कंभसूचिरपि तेषां विष्कंभसूचेः संख्येयगुणा द्रष्टव्याः ॥ तथा चाह मूलटीकाकारो जम्हा वाणमंतरेहिंतो जोइसिया संखेज्जगुणा पढिज्जंति तम्हा विक्खंभसूई वि तेहिंतो संखेज्जगुणा चेव भवति इति नवरं प्रतिभागे स्पष्टतरो विशेषस्तमेवाह ॥ ७८ ॥ बिछप्पन्नंगुलसयवग्गपलिभागो पयरस्स इति षट्पंचाशदधिकशतद्वयांगुलवर्गप्रमाणे श्रेणिखंडे यद्येकैको ज्योतिष्कः स्थाप्यते ततस्ते सकलमपि प्रतरमापूरयंति यदि वा यद्येकैकज्योतिष्कापहारेणैकैकं षट्पंचाशदधिकशतद्वयवर्गप्रमाणं श्रेणिखंडमपह्रियते ततएकत्र ज्योतिष्का परिसमाप्तिमुपयांति अपरत्र सकलं प्रतरमिति ॥ एवं ज्योतिष्काणां व्यंतरेभ्यः संख्येयगुणहीनः प्रतिभागः संख्येयगुणाभ्यधिका सूचिः पंचसंग्रहे पुनः षट्पंचाशदधिकशतद्वयप्रमाण एव प्रतिभाग उक्तो न तु षट्पंचाशदधिकशतद्वयवर्गप्रमाणस्तथा च तद्ग्रंथः छप्पन्न दोसयंगुलसूइपएसेहिं भाइयं पयरं जोइसिएहिं हीरइ इति ॥ मुक्तान्यौधिकमुक्तवत् आहारकाणि नैरयिकवत् तैजसकार्म्मणानि बद्धानि बद्धवैक्रियवत् मुक्तान्यौधिकमुक्तवत् वैमानिकानामौदारिकाणि नैरयिकवत् वैक्रियाणि बद्धानि असंख्येयानि तत्र कालतो मार्गणा ज्योतिष्कवत् क्षेत्रतो मार्गणा ऽसंख्येयाः श्रेणयः किमुक्तं भवति ॥ संख्येयासु श्रेणिषु यावंत आकाशप्रदेशास्तावत्प्रमाणानीति ॥ तासां च श्रेणीनां परिमाणं प्रतरस्यासंख्येयो भागः प्रतरासंख्येयभागप्रसिता इत्यर्थः ॥ तत्र प्रतरासंख्येयभागे नैरयिकादिमार्गणायामपि गृहीत इति विशेषतरं परिमाणं प्रतिपादयति तासिणमित्यादि ॥ तासां श्रेणीनां विष्कंभसूचिरंगुलद्वितीयवर्गमूलं तृतीयवर्गमूलप्रत्युत्पन्नं एतदुक्तं भवति ॥ अंगुलमात्रक्षेत्रप्रदेशराशेरसत्कल्पनया षट्पंचाशदधिकशतद्वयप्रमाणस्य यत् द्वितीयं वर्गमूलमसत्कल्पनया चतुष्कलक्षणं तत् तृतीयेन वर्गमूलेनासत्कल्पनया द्विकरूपेण गुणितेन्वसति यावान् प्रदेशराशिर्भवत्यसत्कल्पनया अष्टौ चावत्प्रदेशात्मिका विष्कंभसूच्यापरिमिताः श्रेणयः परिग्राह्याः तत्रापि ता एव अष्टौ श्रेणय इति प्रकारद्वयेप्यर्थाभेदः ॥ मुक्तान्यौधिकमुक्तवत् आहारकाणि नैरयिकवत् ॥ तैजसकार्म्मणानि बद्धानि बद्धवैक्रियवत् मुक्तान्यौधिक

मुक्तवत्॥ वैमानिकानामौदारिकाणि नैरयिकवत् वैक्रियाणि बद्धानि असंख्येयानि तत्र कालतो मार्गणा ज्योतिष्कवत् क्षेत्रतो मार्गणा असंख्ये
याः श्रेणयः किमुक्तं भवति॥ असंख्येयासु श्रेणिषु यावंत आकाशप्रदेशास्तावत्प्रमाणानीति॥ तासां च श्रेणीनां परिमाणं प्रतरस्यासंख्येयो भागः प्रतरासंख्येय
भागवर्तिन्य इत्यर्थः॥ तत्र प्रतरासंख्येयभागो नैरयिकादिमार्गणायामपि गृहीत इति विशेषतरं परिमाणं प्रतिपादयति तासिणमित्यादि॥ तासां श्रेणीनां विष्कंभ
सूचिरंगुलद्वितीयवर्गमूलं तृतीयवर्गमूलप्रत्युत्पन्नं एतदुक्तं भवति॥ अंगुलमात्रक्षेत्रप्रदेशराशेः असत्कल्पनया षट्पंचाशदधिकशतद्वयप्रमाणस्य यत् द्वितीयं वर्गमूलम
सत्कल्पनया चतुष्कलक्षणं तत् तृतीयेन वर्गमूलेनासत्कल्पनया द्विकरूपेण गुणितं वर्त्तते यावान् प्रदेशराशिर्भवत्यसत्कल्पनयाष्टौ तावत्प्रदेशात्मिका
या विष्कंभसूच्या परिमिताः श्रेणयः परिग्राह्याः तत्रापि ताः एवाष्टौ श्रेणय इति प्रकारद्वयेप्यर्थाभेदः॥ मुक्तान्यौधिकमुक्तवत् आहारकाणि नैरयिकवत् तैजस
कार्म्मणानि बद्धानि बद्धवैक्रियवत्॥ मुक्तान्यौधिकमुक्तवत्॥ ॥इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां द्वादशं पदं समाप्तं॥ ५॥
तदेवं व्याख्यातं द्वादशं पदं संप्रति त्रयोदशमारभ्यते तस्य चायमभिसंबंधः इहानंतरपदे औदारिकादिशरीरविभाग उक्तस्तानि पुनः श
रीराणि तथा परिणामे सति भवंति नान्यथा ऽतः परिणामस्वरूपदनार्थमिदमारभ्यते तत्र चेदमादिसूत्रं॥ ५॥ कइविहेणं भंते परिणामे पण्णत्ते
इत्यादि॥ कतिविधः कतिप्रकारो णमिति वाक्यालंकारे भदंत परिणामः प्रज्ञप्तः परिणमनं परिणामः अकर्त्तरीति भावे घञ्प्रत्ययः परिणमनं च नयभे
देन विचित्रं नयाश्च नैगमादयोऽनेके तेषां च सर्वेषामपि संग्राहकौ प्रवचने द्वौ नयौ तद्यथा द्रव्यास्तिकनयः पर्यायास्तिकनयश्च॥ तथा चाहुः॥ श्रीमद्वा
दिनः संगहविसेसपच्छारमूलवागरणादचचिऊयपद्यवत्तडयसेसाविगप्पासिं तत्र द्रव्यास्तिकनयमतेन परिणमनं नाम यत्कथंचित्सदेवोत्तरप
र्यायरूपमर्थांतरमधिगच्छति न च पूर्वपर्यायस्यापि सर्वथावस्थानं नाप्येकांतेन विनाशस्तथा चोक्तं॥ परिणामो ह्यर्थांतरगमनं न च सर्वथा व्यवस्थानं न
च सर्वथा विनाशः परिणामस्तद्विदामिष्टः पर्यायास्तिकनयमतेन पुनः परिणमनं पूर्वसत्पर्यायापेक्षया विनाश उत्तरेण चासता पर्यायेण प्रादुर्भा १०८
वस्तथा चामुमेव नयमधिकृत्यान्यत्रोक्तं सत्पर्यायेण विनाशः प्रादुर्भावोऽसता च पर्ययतः द्रव्याणां परिणामः प्रोक्तः खलु पर्ययनयस्य भगवाना

हगोतम द्विविधः परिणामः प्रज्ञप्तस्तद्यथा जीवपरिणामश्चाजीवपरिणामश्च तत्र जीवस्य परिणामो जीवपरिणामः स प्रायोगिकः अजीवस्य परिणामो ऽजी
वपरिणामः स वैस्रसिकः चशब्दौ स्वगतानेकभेदसूचकौ तांश्च भेदानग्रे स्वयमेव वक्ष्यति तथा चाह जीवपरिणामे णं भंते इत्यादि॥ दशविधो जीवप
रिणामस्तद्यथा गतिपरिणाम इत्यादि॥ तत्र गम्यते नैरयिकादिगतिकर्मोदयवशादवाप्यते॥ इति गतिर्नैरयिकत्वादिपर्यायपरिणतिर्गतिरेव परिणामः त
था इंदनादिंद्र आत्मा ज्ञानलक्षणपरमैश्वर्ययोगात्॥ तस्येदमिंद्रियमिति निपातनादिंद्रशब्दादिय प्रत्ययः इंद्रियाण्येव परिणाम इंद्रियपरिणामस्तथा क
षंति हिंसंति परस्परं प्राणिनो अस्मिन्निति कषः संसारस्तमयंते अनेनार्इ गत्यर्थत्वात् गमयंति प्रापयंतीत्येते कषायाः कर्मणोऽणित्यण प्रत्ययः कषाया ए
व परिणामः कषायपरिणामः लेश्या दिशब्दार्थो वक्ष्यमाणः लेश्या एव परिणामः योग एव परिणामः उपयोग एव परिणामः उपयोग एव परिणाम
उपयोगपरिणामः एवं ज्ञानपरिणाम दर्शनपरिणाम चारित्रपरिणाम वेदपरिणामेष्वपि भावनीयं संप्रत्यमीषां पदानामित्थं क्रमेणोपन्यासे कारण
मभिधीयते॥ तत्र सर्वभावास्तत्र द्राचा श्रिनागतिपरिणामं विना प्रादुःषंति नतः प्रथमो गतिपरिणाम उक्तः गतिपरिणामे च सत्यवश्यमिंद्रियपरिणा
म इति तदनंतरमिंद्रियपरिणाम उक्तः॥ इंद्रियपरिणामे च सति इष्टानिष्टविषयसंबंधाद्रागद्वेषपरिणतिरुपजायत इति तदनंतरं कषायपरिणामः कषायपरि
णामश्चावश्यं लेश्यापरिणामाविनाभावी न तथा हि लेश्यापरिणामः सयोगिकेवलिनामपि यावद्भवति यतो ले श्यानां स्थितिनिरूपणावसरे लेश्या
ध्ययने शुक्ललेश्याया इयं जघन्या उत्कृष्टा च स्थितिः प्रतिपादिता॥ मुहुत्तद्धं तु जहन्ना उक्कोसा होइ पुव्वकोडीओ॥ नवहिं वरिसेहिं ऊणा नायव्वा सुक्कलेसाए इति
सा च नववर्षोनपूर्वकोटिप्रमाणउत्कृष्टा स्थितिः शुक्ललेश्यायाः सयोगिकेवलिन्युपपद्यते॥ अन्यत्र कषायपरिणामस्तु सूक्ष्मसंपरायं यावद्भवति ततः क
षायपरिणामो लेश्यापरिणामाविनाभूतो लेश्यापरिणामश्चाकषायपरिणामं विनापि भवति ततः कषायपरिणामानंतरं लेश्यापरिणाम उक्तो
न तु लेश्यापरिणामानंतरं कषायपरिणामः॥ तथा लेश्यापरिणामो योगपरिणामात्मको योगपरिणामा लेश्या इति वचनात् उपपादयिष्यते चा
यमर्थो लेश्यापदे सविस्तरमतो लेश्यापरिणामानंतरं योगपरिणाम उक्तः संसारिणां च योगपरिणतो उपयोगपरिणतिस्ततो योगपरिणामानंत

रमुपयोगपरिणामः सतिचोपयोगपरिणामेज्ञानपरिणामइतितदनंतरंज्ञानपरिणामउक्तः ज्ञानपरिणामश्चद्विधासम्यक्ज्ञानपरिणामोमिथ्या
ज्ञानपरिणामश्चतौचनसम्यक्त्वमिथ्यात्वव्यतिरेकेणभवतइतितदनंतरंदर्शनपरिणामेवजीवानांजिनवचनाकर्ण्णनतोनवनवसंवेगादिभावत
श्चारित्रावरणकर्मक्षयोपशमतश्चारित्रपरिणामउपजायते॥ ततोदर्शनपरिणामः चारित्रपरिणामवशाच्चवेदपरिणामंप्रलयमुपनयंति
महासत्वास्ततश्चारित्रपरिणामानंतरंवेदपरिणामानंतरंवेदपरिणामउक्तः स्तदेवउक्ताजीवस्यगत्यादयः परिणामविशेषाः संप्रत्येतेषामे
वयथाक्रमंभेदानउपदर्शयति गइपरिणामेणंभंतेकइविहेपण्णत्तेइत्यादिपाठसिद्धंसंप्रतिनैरयिकादयोयैः परिणामविशेषैर्विशिष्टास्ता
नयथाप्रतिपादयति॥ नेरइयाइत्यादिकगमंनवरंनैरयिकाणांकृष्णनीलकापोतरूपास्तिस्रएवलेश्यानशेषास्ताअपितिस्रः पृथिवीक्रमे
णोवंआद्ययोर्द्वयोः पृथिव्योः कापोतलेश्याः तृतीयस्यांकापोतलेश्यानीललेश्याचचतुर्थ्यांनीललेश्यापंचम्यांनीललेश्याकृष्णलेश्या
चषष्ठीसप्तम्योः कृष्णलेश्येततः॥ ततउक्तंकन्हलेसाविनीललेसाकाउलेसावि॥ तथातिर्यग्पंचेंद्रियमनुष्यव्यतिरेकेणान्यत्रचारित्रपरि
णामः सर्वथानभवतिभवस्वाभाव्यात्ततसूत्रचारित्रपरिणामनिषेधः॥ वेदपरिणामचिंतायांचनैरयिकाणांनपुंसकाएवनस्त्रियेनापिपुरुषाः
नारकसंमूर्छिमानपुंसकानीतिवचनात्एवमसुरकुमाराअपिनवरंगतिमधिकृत्यदेवगतिकास्तेषांचमहर्द्धिकानांतेजोलेश्यापिभवति॥ त
तउक्तंतेइलेस्साविति॥ वेदपरिणामचिंतायांस्त्रियः पुरुषावानपुंसकादेवानांनपुंसकत्वस्यासंभवात्तथापृथिवीकायसूत्रेनवरंलेसापरिणामे
णमित्यादिइहपृथिव्यंबुवनस्पतीनांतेजोलेश्यापिसंभवति॥ येनसौधर्मेशानपर्यंतानांदेवानामेतेषूत्पातसंभवात्॥ ततउक्तंतेउलेसाविइतितेषांच
पृथिव्यादीनांपंचानामपिसासादनसम्यक्त्वमपिनाभवति॥ आगमेनिषेधात्ततोज्ञाननिषेधः सम्यक्त्वनिषेधश्चसूत्रतः सम्यग्मिथ्यात्वपरिणामस्तु १०९
संज्ञिपंचेंद्रियाणामेवभवति॥ नशेषाणामस्तन्निषेधः द्वींद्रियादीनांपुनः केषांचित्करणपर्याप्तावस्थानांसासादनसम्यक्त्वमवाप्यतेनत
तोज्ञानपरिणतात्र्यपिसम्यग्दृष्टयोयुक्तास्तिर्यक्पंचेंद्रियाणांचषडपिलेश्याः संभवंति॥ ततः सूत्रेउक्तंजावसुक्कलेस्साविइति॥ तथादेशतः

चारित्रपरिणामोपितेषामुपलभ्यतेतिततउक्तंचरित्ताचरित्तीविइतितथाज्योतिष्काणांतेजोलेश्यैवकेवलानशेषालेश्यस्ततोभिहितंलेइत्यादिस्निग्धबं
धनपरिणामश्चरूक्षबंधनपरिणामश्चतत्रस्निग्धस्यसतोबंधनपरिणामः स्निग्धबंधनपरिणामः तथारूक्षस्यसतोबंधनपरिणामोरूक्षबंध
नपरिणामश्चशब्दौस्वगतानेकभेदसूचकौ अथकथंस्निग्धस्यरूक्षतोबंधनपरिणामोभवति कथंवारूक्षस्यसद्इतिबंधनपरिणामस्यलक्षणमा
हसमनिद्धयाएइत्यादि परस्परंसमस्निग्धतायागुणसमस्निग्धतायांतथापरस्परंसमरूक्षतायांबंधोनभवतिकिंतुयदिपरस्परंस्निग्धत्वस्यरूक्ष
त्वस्यचविषममात्राभवतितदाबंधः स्कंधानामुपजायते इयमत्रभावनासमगुणस्निग्धस्यपरमाण्वादेः समगुणस्निग्धेनपरमाण्वादिनासहसंबं
धोनभवति॥ तथासमगुणरूक्षस्यापिपरमाण्वादिनासहसंबंधोनभवति किंतुयदिस्निग्धःस्निग्धेनरूक्षेणसहविषमगुणाभवति तदाविषममा
त्रत्वाद्भवतितेषांपरस्परंसंबंधः॥ विषममात्रयाबंधोभवतीत्युक्तं ततोविषममात्रानिरूपणार्थमाह ५॥ णिद्धस्सणिद्धेगदुयाहिएणेत्यादि यदि
स्निग्धस्यपरमाण्वादेः स्निग्धगुणेनैवसहपरमाण्वादिनासंबंधोभवितुमर्हति॥ तदानियमतद्व्याद्यधिकेनद्व्यादिकादिगुणेनैवपरमाण्वादिनेतिभावः
रूक्षगुणस्यापिपरमाण्वादेरूक्षगुणेनपरमाण्वादिनासहयदिबंधोभवति॥ तदातस्यापितेनद्व्याधिकादिगुणेनैवमान्यथायदापुनः स्निग्धरूक्ष
योर्बंधस्तदाकथमितिचेदतआहनिद्धस्सलुक्खेणेत्यादिस्निग्धस्यरूक्षेणसहबंधउपैति उपपद्यते जघन्यवर्जोविषमः समोवाकिमुक्तंभवति
एकगुणरूक्षंचमुक्त्वाशेषस्यद्विगुणरूक्षंचमुक्त्वाशेषस्यद्विगुणरूक्षंचमुक्त्वाशेषस्यद्विगुणस्निग्धादिद्विगुणरूक्षादिनासर्वेणबंधोवेभवतीति
उक्तोबंधनपरिणामोऽधुनागतिपरिणाममाह॥ गइपरिणामेणंभंतेइत्यादिद्विविधोगतिपरिणामस्तद्यथास्पृशद्गतिपरिणामोऽस्पृशद्गति
परिणामश्चतत्रवस्तुवशतोयोगतिपरिणामः सस्पृशद्गतिपरिणामोयथाचिक्कणिकायाजलस्योपरिप्रयत्नेनतिर्यक्प्रक्षिप्तायाः साहितथाप्रक्षि
प्तासतीअपांतरालेजलंस्पृशंतीस्पृशंतीगच्छति॥ बालजनप्रसिद्धमेतत्॥ तथास्पृशतोगतिपरिणामोऽस्पृशद्गतिपरिणामः यद्वस्तुनकेनापि
सहायांतरालेसंस्पृशमनुभवति॥ तस्यास्पृशतिद्गतिपरिणामइतिभावः॥ अन्येतुव्याचक्षतेस्पृशद्गतिपरिणामोनामयेनप्रयत्नविशेषात्क्षेत्रप्र

देशान्स्पृशद्गच्छतिसस्पृशद्गतिपरिणामोयेनक्षेत्रप्रदेशान्स्पृशन्नेवगच्छति। तन्त्रबुध्यामहेनसःसर्वव्यापिनयातत्प्रदेशसंस्पर्शव्यतिरेकेणगतेरसंभ
वात्। बहुश्रुतेभ्योवापरिभावनीयं॥ अत्रैवप्रकारांतरमाह॥ अहवाहीहगतिपरिणामेयहस्सगइ। परिणामेयइति। अथवेतिप्रकारेऽन्यथा
वागतिपरिणामोह्रस्वद्गतिपरिणामश्च। तत्रविप्रकृष्टदेशांतरप्राप्तिपरिणामोदीर्घगतिपरिणामस्तद्विपरीतोह्रस्वगतिपरिणामः परिमंडलादिसं
स्थानविशेषाःखंडभेदादयश्चप्रागेवव्याख्याताइतिभूयोनव्याख्यायंते। अगुरुलघुपरिणामो भाषादिपुद्गलानांकम्मगमणभासाईएयाइं
अगुरुलहुयाइंइतिवचनात्तथाऽनंतप्रदेशिकद्रव्याणांचाकाशादीनांअगुरुलघुपरिणामग्रहणमुपलक्षणंतेनगुरुलघुपरिणामोपिद्रष्टव्यः॥
सचौदारिकादिद्रव्याणांतैजसद्रव्यपर्यंतानामवसेयः। उरालियवेउव्वियआहारगतेयगुरुलहुदव्वाइतिवचनात्सुभिसद्देइति। शुभशब्दः
दुब्भिसद्देइति॥ अशुभःशब्दइति॥ ॥इतिश्रीमलयगिरिविरचितायांप्रज्ञापनाटीकायांत्रयोदशंपदंसमाप्तं॥ १३॥ तदेवंव्याख्यातंत्रयोद
शंपदमधुनाचतुर्दशमारभ्यते। तस्यचायमभिसंबंधःइहानंतरपदेगत्यादिलक्षणोजीवपरिणामःसामान्येनोक्तः। सामान्यंचविशेषनिष्ठम
तःसएवविशेषतःकश्चित्क्वचित्प्रतिपाद्यतेतत्रैकेंद्रियाणामधिक्रोधादिकषायभावात्सकषायत्वाज्जीवःकर्मणोयोगात्पुद्गलानादत्ते
इतिवचनात्प्राधान्यबंधहेतुत्वादादावेवविशेषतःकषायपरिणामप्रतिपादनार्थमिदमारभ्यते। तत्रचेदमादिसूत्रं कइणंभंतेकसायाइत्यादि
कतिकियत्संख्याकाःकषायाणमितिपूर्ववत्। भतिकियत्संख्याकाःकषायाणमितिपूर्ववत्। भदंतपरमकल्याणयोगिन्कषायाःप्रज्ञप्ताःकषंतिहिं
सन्तेप्राणिनोऽनेनेतिकषंकर्मभवोवाकषायःकर्मरूपंक्षेत्रंसुखदुःखस्योत्पादनाययेतिकषायाःकृष्यादिकआदाप्रत्ययोनिपातनात्ककारस्यअकारःयदिवाकलुषयं
तिशुद्धस्वभावंसंतंकर्ममलिनंकुर्वंतिजीवमितिकषायाःपूर्ववत्। आयप्रत्ययःनिपातनाच्चकलुषशब्दणितत्स्यकषादेशउक्तंच। सुहदुक्खबहुस्स
इयंकम्म २ खेत्तंकसंतितेजम्हाकलुसिंतिजंचजीवंतेणकसायत्तिवुच्चंतिनिर्वचनसूत्रंक्षुण्णार्थंनैरयिकादिदंडकसूत्रमपिसुगमं। कइपइठिए
णंभंतेइत्यादिकषुकियत्सुप्रकारेषुप्रतिष्ठितोभदंतक्रोधःभगवानाहचतुःप्रतिष्ठितस्तद्यथाआत्मप्रतिष्ठितआत्मप्रतिष्ठितआत्मप्रतिष्ठितःकि ११०

DR. BHAU DAJI MEMORIAL

मुक्तंभवतिस्वयमाचरितस्यैहिकंप्रत्यपायमवबुध्ययदाकश्चिदात्मनएवोपरिक्रुध्यतितदाआत्मप्रतिष्ठितःक्रोधःपरप्रतिष्ठितइतियदापरउदीर
यतिआक्रोशादिनाकोपंतदाकिलतद्विषयःक्रोधउपजायतेइतिसपरप्रतिष्ठितइतिनैगमनयदर्शनेनैतन्नैगमनयोदितद्विषयतामात्रेणापितत्प्रति
ष्ठितंमन्यते॥ यथाजीवेसम्यग्दर्शनमजीवेसम्यग्दर्शनमित्यादयोऽष्टौभंगाःसम्यग्दर्शनस्याधिकरणचिंतायामावश्यकेतदुभयप्रतिष्ठितआत्मपरोभ
यप्रतिष्ठितःयदाकश्चित्तथाविधापराधवशादात्मपरविषयक्रोधमाधत्तेइतिअप्रतिष्ठितोनामयदैषस्वयंदुश्चरणमाक्रोशादिकंचकारणनिरालंबन
एवकेवलात्क्रोधवेदनीयादुपजायतेसहिनाअप्रतिष्ठितःस्वयंदुश्चरणाभावतश्चात्मविषयत्वाभावात्नापिपरप्रतिष्ठितःपरस्यापिनिरपराधतयाअप
राधसंभावनायाअभावतःक्रोधालंबनत्वायोगात्दृश्यतेचकस्यापिकदाचिदेवमेवकेवलक्रोधवेदनीयोदयादुपजायमानःक्रोधस्तथाचसपश्चा
द्भूतेआहामेनिष्कारणःकोपोनैप्रविरूपंभाषते॥नकिंचिद्विनाशयतीतिअतएवोक्तं॥पूर्वमहर्षिभिःसापेक्षाणिचनिरपेक्षाणिचनिरपेक्षाणि
चकर्माणिफलविपाकेषु॥सोपक्रमंयनिरुपक्रमंचदृष्टंयथायुष्कमितिएवंमानमायालोभाअपिआत्मपरोभयप्रतिष्ठिताश्चभावनीयाःतदेव
मधिकरणभेदेनभेदउक्तःसंप्रत्युत्पत्तिकारणभेदतोभेदमाह॥१४॥कइहिंणंभंतेठाणेहिंकोहुप्पत्तीहवइइत्यादिकतिभिःकियद्भिरितिस्थानानिकारणानिकति
भिःकियत्संख्याकैःस्थानैःकारणैःक्रोधोत्पत्तिर्भवति॥भगवानाहचतुर्भिःस्थानैस्तान्येवस्थानान्याह॥खेत्तंपडुच्चइत्यादि॥तत्रनैरयिकाणांनैरयिकक्षे
त्रंप्रतीत्यतिरश्चांतिर्यक्क्षेत्रंमनुष्याणांमनुष्यक्षेत्रंदेवानांदेवक्षेत्रंवत्थुंपडुच्चेतिवस्तुसचेतनंवाशरीरंप्रतीत्यदुःसंस्थितंविरूपंवाउपधिंप्रतीत्यनियत
यत्यस्योपकरणंतस्यतच्चौरादिनापह्रियमाणमनुथाचाप्रतीत्यएवंनैरयिकादिदंडकसूत्रमपिभावनीयंसम्यग्दर्शनादिगुणाविथात्तत्वेनभेदमाह॥
१५॥कइविहेणंभंतेइत्यादिअनंतानुबंध्यादिकर्मप्रकृतिपदेवक्ष्यामोभावार्थस्त्वयं। सम्यक्त्वगुणविघातकृदनंतानुबंधीदेशविरतिघातीअप्रत्याख्या
नःसर्वविरतिगुणघातीप्रत्याख्यानावरणः यथाख्यातचारित्रविघातकःसंज्वलनःएताश्चतुर्गतिनैरयिकादिदंडकक्रमेणचिंतयति॥एवंमानमा
यालोभाअपिप्रत्येकंचतुर्विधासामान्यतोदंडकक्रमेणचभावनीयाःसंप्रत्येतेषामेवक्रोधादीनांनिर्वृत्तिभेदतोऽवस्थाभेदतश्चभेदमाह॥१६॥कइवि

हेणंभंतेइत्यादियदापरस्यापराधंसम्यगवबुध्यकोपकारणंचव्यवहारतःपुष्टमवलंब्यनान्यथाशिक्षोपजायतेइत्याभोग्यकोपंविधत्तेंतदासकोपआभोगनि
र्वर्तितः॥यदात्वेवमेवतथाविधमुहूर्त्तवशाद्गुणदोषविचारणाशून्यःपरवशीभूयकोपंकुरुते॥तदासकोपोऽनाभोगनिर्वर्तितः॥उपशांतोऽनुदयावस्थ
नुपशांतउदयावस्थः॥एवमेतद्विषयंदंडकसूत्रमपिभावनीयंएवंमानमायालोभाःप्रत्येकंचतुःप्रकाराःसामान्यतोदंडकक्रमेणवक्तव्याःसंप्रति
फलभेदेनकालत्रयवर्त्तिनांभेदमभिधातुकाममाह॥जीवाणंभंतेकइहिंठाणेहिंअट्ठकम्मपयडीउचिणिंसुइत्यादिजीवाभदंतकतिभिःस्थानैर
ष्टौकर्मप्रकृतीश्चितवंतःचयनंनामकषायपरिणतस्यकर्मपुद्गलोपादानमात्रंभगवानाह॥गोतमचतुर्भिःस्थानैःतद्यथाक्रोधेनमानेनमाययालोभेन
चएवंनैरयिकादिदंडकेपिवक्तव्यं॥एषदंडकोऽतीतकालविषयः॥एवंवर्त्तमानकालभविष्यत्कालविषयावपिवाच्यौएवमुपचयबंधोदीरणवेदननिर्जराविषया
अपिप्रत्येकंत्रयस्त्रयोदंडकावाच्याइति॥सर्वसंख्ययाष्टादशदंडकास्तत्रउपचयोनामस्वस्वाबाधाकालस्योपरिज्ञानावरणीयादिकर्मपुद्गलादीनांवेदना
र्थंनिषेकःसचैवंप्रथमस्थितौसर्वप्रभूतंद्वितीयस्यांस्थितौविशेषहीनंएवंविशेषहीनंतावद्वाच्यं॥यवत्तत्कालबध्यमानायाःस्थितेश्चरमास्थि
तिरेतत्त्रसविस्तरंकर्मप्रकृतिटीकायांपंचसंग्रहटीकायांचाभिहितमितिनतोवधार्यंबंधनंनामज्ञानावरणीयादिकर्मपुद्गलानांयथोक्तप्रका
रेणास्वस्वाबाधाकालोत्तरकालंनिषक्तानांयद्भूयःकषायपरिणतिविशेषान्निकाचनंउदीरणाकारणवशातःकर्मपुद्गलानामनुदयप्राप्ताना
मुदयावलिकायांप्रवेशनंतदपिहिकिंचित्तथाविधकषायपरिणतवशाद्भवतीतिचउहिंठाणेहिंउदीरिंसुउदीरिस्संतीत्युक्तमन्यथाकषायव्यति
रेकेणापिक्षीणमोहादयोज्ञानावरणादीनामुदीरकावर्त्ततेइतिवेदनास्वस्वाबाधाकालक्षयादुदयप्राप्तस्यउदीरणाकरणेनवाउदयमुपनी
तस्यकर्मणउपभोगः निर्जराकर्मपुद्गलानामनुभूयानुयाकर्मत्वापादनमात्मप्रदेशैःसहसंश्लिष्टानांज्ञानावरणीयादिकर्मपुद्गलानामनुभ ३३१
यशाननमितिभावः॥उक्तंच॥पुव्वकयकम्मसाडणंनिर्जरादृतिइयंचदेशनिर्जराद्रष्टव्या॥कषायजनितत्वान्नसर्वनिर्जरासाहिनिष्कषायस्य
सर्वनिरुद्धयोगस्यमोक्षप्रासादमधिरोहतोभवतिनशेषस्य॥अतएवचतुर्विंशतिदंडकसूत्रमप्यविरुद्धंदेशनिर्जरायाःसर्वकालंसर्वेषा

मपिभावात्संप्रतियत्पदमधिकृत्यप्राक्सूत्राण्युक्तानितानिविनेयजनानुग्रहाणिगाथयानिर्दिशतिआयपयट्ठिगत्यादिप्रथमंसामान्यसूत्रंस
प्रतीतमिति॥तसंग्रहीतंद्वितीयमात्मप्रतिष्ठितपदोपलक्षितंसूत्रंततोऽनंतानुबंधिपदोपलक्षितं तदनंतरमाभोगपदोपलक्षितंतत्श्चयोपचयबंधोदी
रणवेदनीयनिर्जराविषयाणिक्रमेणअत्रचिणेतिउपचयसूत्रोपलक्षणं॥ ७॥ इतिमलयगिरिविरचितायांप्रज्ञापनाटीकायांचतुर्दशपदंसमा
प्तं॥ ७॥ ॥एतदेवंव्याख्यातंचतुर्दशंसंप्रतिपंचदशमारभ्यते इहानंतरपदेप्रधानबंधहेतुत्वात्विशेषतःकषायपरिणामउक्तस्तदनंतरमिंद्रिय
वतामेवलेश्यादिसद्भावइतिविशेषतइंद्रियपरिणामनिरूपणार्थमिदमारभ्यते अत्रचद्वावुद्देशकौतत्रचप्रथमोद्देशकेयेऽर्थाधिकारास्तत्संग्राहकमि
दंगाथाद्वयंसंठाणंबाहल्लंइत्यादिप्रथममिंद्रियाणांसंस्थानंवक्तव्यंसंस्थानंनामआकारविशेषःततोबाहुल्यंवक्तव्यं॥बाहुल्यंनामबहुलतापिंडत्वमितिभा
व॥स्तदनंतरंपृथुत्वंवक्तव्यंपृथुत्वंविस्तारः तदनंतरंकतिपदेसतिकतिप्रदेशमिंद्रियमितिवक्तव्यं॥तदनंतरमवगाहनादिविषयंकर्कशादिगुणवि
षयंवाल्पत्वंततःपुट्ठत्तिस्पृष्टग्रहणमुपलक्षणंतेनस्पृष्टविषयसूत्रंवक्तव्यं॥तदनंतरंपविट्ठत्तिप्रविष्टाप्रविष्टविषयचिंताविषयं ततोविषयपरिमाणं ततो
नगारपरिमाणं॥ततोनगारविषयंसूत्रंतदनंतरमाहारविषयंततआदायत्तिआदर्शनविषयंतदनंतरमसिविषयंततोमणिविषयं ततस्तैल विषयंततःफा
णितविषयंतदनंतरंवशाविषयंततःकंबलविषयंततःस्थूणाविषयंतदनंतरंथिअलत्तिआकाशाथिग्गलविषयंततोद्वीपोदधिविषयंततोलोकविषयंतदनंत
रमलोकविषयंइति॥तत्रसंस्थानादिकमिंद्रियाणांवक्तव्यमितिप्रथमतइंद्रियविषयंसूत्रमाह॥ ७॥ कइणंभंतेइंदियापण्णत्ताइत्यादिकतिकि
यत्संख्याकानिणमितिवाक्यालंकारेभदंतइंद्रियाणिप्राग्निरूपितशब्दार्थानिप्रज्ञप्तानि॥भगवानाहगोतमपंचेंद्रियाणिप्रज्ञप्तानितान्येव
नामतआह॥सोइंदियएत्यादिएतानिचपंचापींद्रियाणिद्विधानद्यथाद्रव्यतोनिर्वृत्त्युपकरणरूपाणिभावतोलब्ध्युपयोगात्मिकानिआहचत
त्वार्थसूत्रकृत्निर्वृत्त्युपकरणेद्रव्येंद्रियंलब्ध्युपयोगौभावेंद्रियमितितत्रनिर्वृत्तिर्नामप्रतिविशिष्टःसंस्थानविशेषःसापिद्विधाबाह्याआभ्यं
तराचतत्रबाह्याकर्णपर्पटिकादिरूपासाचविचित्रानप्रतिनियतरूपतयोपदेष्टुंशक्यते॥तथाहिमनुष्यस्यश्रोत्रेनेत्रयोरुभयपार्श्वतो

भाविमीपुचौचोपरितनश्रवणबंधापेक्षयासमोवाजिनोनेत्रयोरुपरितीक्ष्णंवाग्रभागेइत्यादिजातिभेदान्नानाविधा॥ अभ्यंतरातुनिर्वृत्तिः सर्वेषामपि
जंतूनांसमानातामेवचाधिकृत्यवक्ष्यमाणानिसंस्थानादिविषयाणिसूत्राणिकेवलंस्पर्शनेंद्रियस्यनिर्वृत्तेर्बाह्याभ्यंतरभेदोनप्रतिपत्तव्यः॥ पूर्वसूरि
भिर्निषेधादतएवचबाह्यसंस्थानविषयमेवतत्सूत्रंवक्ष्यतिफासिंदिएणंभंतेकिंसंठाणसंठिएपण्णत्तेइति॥ उपकरणंखङ्गस्थानीयायाबाह्यनि
र्वृत्तेर्याखड्गधारासमानास्वच्छतरपुद्गलसमूहात्मिकाभ्यंतरानिर्वृत्तिस्तस्याःशक्तिविशेषः इदंचोपः इदंचोपकरणरूपंद्रव्येंद्रियमांत
रनिर्वृत्तेः कथंचिदर्थांतरंशक्तिमतोःकथंचिद्भेदात्कथंचिद्भेदश्चसत्यामपितस्यामांतरनिर्वृत्तौद्रव्यादिनोपकरणस्यविघातसंभवात्तथाहि
सत्यामपिकदंबपुष्पाद्याकृतिरूपायामांतरनिर्वृत्तावतिकठोरतरघनगर्जितादिनाशक्त्युपघातेसतिनपरिच्छेत्तुमीशतेजंतवःशब्दादिकमितिभा
वेंद्रियमपिद्विधालब्धिरुपयोगश्चतत्रलब्धिःश्रोत्रेंद्रियादिविषयः सर्वात्म प्रदेशानांतदावरणक्षयोपशमःउपयोगःस्वस्वविषयेलब्ध्य
ऽनुसारेणात्मनोव्यापारःप्रणिधानमिति॥ सांप्रतमाभ्यंतरानिर्वृत्तिमधिकृत्यसंस्थानादिविचिंतयिषुःप्रथमतःसंस्थानंचिंतयति ७, सोइंदिएणं
भंतेकिंसंठिएपण्णत्तेइत्यादिपाठसिद्धमधुनाबाहुल्यंचिंतयति॥ सोइंदिएणंभंतेकेवइयंबाहल्लेणंपण्णत्तेइत्यादि॥ इदमपिपाठसिद्धं उक्तं
श्चायमर्थोऽन्यत्रापिबाहल्लओपसव्वाइंअंगुलअसंखभागमिति॥ अत्राहयद्यंगुलस्यासंख्येयभागोबाहल्यंस्पर्शनेंद्रियस्यततःकथंखड्गक्षु
रिकाद्युपघातेऽप्यंतःशरीरस्यवेदनानुभावःतदेतदसमीचीनंसम्यग्वस्तुतत्वापरिज्ञानात्त्वगिंद्रियस्यहियथाचक्षुषोरूपंगंधोघ्राणस्यतथाखड्गक्षु
रिकाद्युपघातेऽप्यंतःशरीरस्यशीतादिस्पर्शवेदनमस्तिकिंतुकेवलंदुःखवेदनंतच्चदुःखरूपवेदनमात्माकलनापिशरीरेणादुभवति
नकेवलेनत्वगिंद्रियेणज्वरादिवेदवत्॥ ततोनकश्चिद्दोषः अथशीतलपानकादिपानेऽप्यंतःशीतस्पर्शवेदनाप्यनुभूयतेततःकथंमाघ
टामटायते॥ इतिउच्यते॥ इहत्वगिंद्रियसर्वत्रापिप्रदेशपर्यंतवर्त्तिविद्यते॥ तथापूर्वसूरिभिर्व्याख्यानात्तथाचाहमूलटीकाकारः॥ सर्वप्रदे ११२
शपर्यंतवर्त्तित्वात्त्वचोऽभ्यंतरेऽपिशुषिरस्योपरित्वगिंद्रियस्यभावादुपपद्यतेऽंतरपिशीतस्पर्शवेदनानुभवः॥ अधुनापृथुत्वविषयंसूत्रमाह ७,

सोइंदिएणंभंतेकेवइयंपहुत्तेणंपण्णत्तेइत्यादि॥ इहपृथुत्वंस्पर्शनेंद्रियव्यतिरेकेणशेषाणांचतुर्णामिंद्रियाणामात्मांगुलेनप्रतिपत्तव्यं॥ स्पर्शने
द्रियस्यतूच्छ्रयांगुलेननतुदेहाश्रितानींद्रियाणिदेहश्चोच्छ्रयांगुलेनप्रमीयते॥ उस्सेहपमाणतोमिणसुदेहमितिवचनात्॥ नतदिंद्रियाण्युच्छ्र
यांगुलेनमाउंपुत्र्यंतेनात्मांगुलेनेतितदयुक्तं॥ जिह्वादीनामुच्छ्रयांगुलेनपृथुत्वप्रमितत्वाभ्युपगमेत्रिगव्यूतानांमनुष्याणांरसाभ्यवहा
रोच्छेदप्रसक्तेस्तथाहित्रिगव्यूतादीनांचहस्त्यादीनांचस्वस्वशरीरानुसारितयाऽतिविशालानिमुखानिजिह्वाश्चततोयद्युच्छ्रयांगुले
नतेषांक्षुरप्राकारतयोक्तस्याभ्यंतरनिर्वृत्तिलक्षणस्यजिह्वेंद्रियस्यांगुलपृथक्त्वलक्षणोविस्तारःपरिगृह्यते॥ तदा अल्पतयानससर्वाजि
ह्वांव्याप्नुयात्सर्वव्यापित्वाभावेचयोसौबाहुल्येनसर्वात्मनाजिह्वायारसवेदनलक्षणःप्रतिप्राणिप्रसिद्धोव्यवहारःसव्यवच्छेदमाप्नुयादे
वंघ्राणादिविषयेऽपियथायोगंगंधादिव्यवहारोच्छेदोभावनीयःतस्मादात्मांगुलेनजिह्वादीनांपृथुत्वमवसेयंनोच्छ्रयांगुलेनेति॥ आहभाष्य
कृत्॥ इंद्रियमाणेविनयंभयणिज्जंजंतिगाउयाईणंजिब्भिदियाइमाणंसंववहारेविरुज्झेया॥ अस्याक्षरगमनिकाननुउच्छ्रयांगुलमिंद्रि
यमानेपिआस्तामिंद्रियविषयपरिमाणचिंतायामित्यपिशब्दार्थभजनीयंविकल्पनीयंविकल्पिगृह्यतेक्वापिनगृह्यतेइत्यर्थः॥ किमुक्तंभ
वतिस्पर्शनेंद्रियपृथुत्वपरिमाणचिंतायांग्राह्यमन्येंद्रियपृथुत्वपरिमाणचिंतायांनग्राह्यं॥ षामात्मांगुलेनपरिमाणकरणादिति क
थमेतदेवमवसेयमितिचेत्॥ अतआहयत्पस्मात्सर्वेषामपींद्रियाणामुच्छ्रयांगुलेनपरिमाणकरणेत्रिगव्यूतादीनामादिशब्दात्द्वि
गव्यूतादिपरिग्रहोजिह्वेंद्रियादिमानंसूत्रोक्तंसंव्यवहारेविरुध्येतयथाविरुध्यतेतथानंतरमेवभावितमितिसंप्रतिकतिप्रदेशावगा
हनाद्वारेप्रतिपादयति॥ ७॥ सोइंदिएणंभंतेइत्यादि॥ निगदसिद्धमल्पबहुत्वद्वारमाह॥ ७॥ एएसिणंभंतेइत्यादिसर्वस्तोकंचक्षुरिं
द्रियमवगाहनार्थतयाकिमुक्तंभवति॥ सर्वस्तोकप्रदेशावगाढंचक्षुरिंद्रियंततःश्रोत्रेंद्रियमवगाहनार्थतयासंख्येयगुणंप्रभूतेषुप्रदेशे
षुतस्यावगाहनाभावात्॥ ततोपिघ्राणेंद्रियमवगाहनार्थतयासंख्येयगुणमतिप्रभूतेषुप्रदेशेषुतस्यावगाहनोपपत्तिः॥ ततोपिजि

ह्वेंद्रियमवगाहनार्थतया असंख्येयगुणंतस्यांगुलपृथक्त्वप्रमाणविस्तारात्मकत्वात्यस्तुदृश्यतेपुस्तकेषुपाठःसंख्येयगुणइति सोपपा
गेयुक्त्यनुपपन्नत्वात्तथाहिचक्षुरादीण्यपींद्रियाणिप्रत्येकमंगुलासंख्येयभागविस्तारात्मकानिजिह्वेंद्रियत्वंगुलपृथक्त्वविस्तारमतो
ऽसंख्येयगुणामवतदुपपद्यतेननुसंख्येयगुणमिति॥ततःस्पर्शनेंद्रियंसंख्येयगुणं॥ नथाह्यंगुलपृथक्त्वप्रमाणविस्तारजिह्वेंद्रियंपृथ
क्त्वंचद्धिप्रभृत्यानवभ्यःस्पर्शेंद्रियं [illegible] तुशरीरप्रमाणमितिसमहदपितदुपपद्यतेसंख्येयगुणमितियस्तुबहुषुपुस्तकेषुदृ
श्यतेपाठोऽसंख्येयगुणमितिसोऽपपाठोयुक्तिविकलत्वात्तथाह्यांगुलपृथक्त्वपरिमाणंजिह्वेंद्रियंशरीरपरिमाणंतुस्पर्शनेंद्रि
यंशरीरंतूत्कर्षतोपिलक्षयोजनप्रमाणंततःकथमसंख्येयगुणमुप पद्यतेइति॥अनेनैवचक्रमेणप्रदेशार्थतयापिसूत्रंपरिभाव
नीयंउक्तप्रकारेणैवबोभयसूत्रमपियानितुकर्कशगुरुणादिसूत्राणितानिपाठसिद्धानितत्रमल्पबहुत्वसूत्रेचक्षुश्रोत्रघ्राणजि
ह्वास्पर्शनेंद्रियाणांयथोत्तरंकर्कशगुरुणाममीषामेवचपश्चानुपूर्व्यायथापूर्वंमृदुलघुगुणास्तथैवयथोत्तरंकर्कशतयायथापू
र्वंचातिकोमलतयापलभ्यमानत्वात् युगपदुभयाल्पबहुत्वसूत्रेफासिंदियकक्खडगुरूयगुणेहिंतोतस्सचेवमउयलहुयगुणाअनं
तगुणाइति॥शरीरेहिकतिपयाएवप्रदेशाउपरिवर्त्तिनःशीतानपादिसंपर्कतःकर्कशावर्त्तंते॥अन्येतुबहवस्तदंतर्गताअपिमृदवइति
घटतेस्पर्शनेंद्रियस्यकर्कशगुणेभ्यामृदुलघुगुणाअनंतगुणाइतिअस्तन्येवसंस्थानादीन्यल्पबहुत्वपर्यंतानिद्वाराणिनैरयि
कादिषुचिंतयंति॥नेरइयाणंभंतेइत्यादिसुगमं नवरंनेरइयाणंभंतेफासिंदिएकिंसंठिएपण्णत्तेइत्यादि॥ द्विविधाहिनैरयिकाणांश
रीरंभवधारणीयमुत्तरवैक्रियंचतत्रभवधारणीयंतेषांभवस्वभावतएवनिर्मूलविलुप्तपक्षोत्पाटितसकलग्रीवादिरोमपक्षि ११३
शरीरवत्अतिबीभत्ससंस्थानोपेतंयदप्युत्तरवैक्रियंतदपिहुंडसंस्थानमेवतथाहिययपितेवयंमतिसुंदरंशरीरंविकुर्विष्याम
इत्यभिसंधिनावैक्रियशरीरमारभंते॥तथापितेषांमत्यंताशुभतथाविधनामकर्मोदयादयदतीवाशुभतरमेवोपजायतेइति॥

असुरकुमार सूत्रेभवधारणीयंसमचतुरस्रसंस्थानंतथाभवस्वाभाव्यात् उत्तरवैक्रियंतुनानासंस्थितंस्वेच्छयातस्यनिष्पत्तिभावा
तपृथिव्यादिविषयाणितुसूत्राणिसूत्राणिसुप्रतीतान्येवसंप्रतिपृष्टद्वारमाह॥ पुठाइंभंतेसद्दाइंसुणेइइत्यादि प्राकृतत्वात्सूत्रेशब्द
शब्दस्यनपुंसकत्वमन्यथापुंस्त्वंप्रतिपत्तव्यंस्पृष्टानभदंतेश्रोत्रेंद्रियामितिकर्तृपदंसामर्थ्याद्गम्यतेशब्दान्शृणोतिअस्पृष्टान्वाभग
वानाहस्पृष्टान्शृणोतितत्रस्पृशंतेइतिस्पृष्टास्तान्तनौरेणुमिवालिंगितमात्रानित्यर्थःपुठरेणुंचतणुंमिइतिवचनात्शिष्यंतेप्रति
पाद्यंतेअर्थाएभिरितिशब्दाः तान्शृणोतिसन्हातिउपलभतेइतियावत्किमुक्तंभवतिस्पृष्टमात्राण्येवचशब्दद्रव्याणिश्रोत्रेंद्रियमु
पलभंतेननुप्राणेंद्रियादिवत्बद्धस्पृष्टानीतिकस्मादितिचेत्उच्यते इहशब्दद्रव्याणिघ्राणेंद्रियादिविषयभूयतेभ्योद्रव्येभ्यःसूक्ष्मा
णितथाबहूनि॥तथातंक्षेत्रभाविशब्दयोग्यद्रव्यवासकानिचततसूक्ष्मत्वादतिप्रभूतत्वाच्चदन्यवासकत्वाच्चात्मप्रदेशैःस्पृष्टमात्राण्या
पिनिर्वृत्तींद्रियमध्येप्रविश्यप्रविश्यकपरणेंद्रियमभिव्यंजयमभिव्यंजयतिश्रोत्रेंद्रियंचघ्राणेंद्रियाद्यपेक्षयास्वविषयपरिच्छेदेपटु
तरंततःस्पृष्टमात्राण्यपितानिश्रोत्रेंद्रियमुपलभ्यतेनास्पृष्टान्सर्वथात्मप्रदेशैःसहसंबंधमप्राप्तानश्रोत्रेंद्रियस्याप्राप्तविषयपरिच्छेद
स्वभावत्वान्यथाश्रोत्रेंद्रियस्यप्राप्तकारितातथानंद्यध्ययनटीकादौचर्चितमिति॥ततोवधार्यं॥पुगइंतेरूवाइंइत्यादिसुगमं॥निर्वच
नमाह॥ गोतमनस्पृष्टानिरूपाणिपश्यतिचक्षुःविंत्वस्पृष्टानिचक्षुषोऽप्राप्तकारित्वात्तच्चाप्राप्तमंकारित्वंतत्वार्थटीकादौविस्त
रेणप्रसाधितमितिततोवधारणीयंगंधादिविषयाहिसूत्राणिसुप्रसिद्धानिनवरंस्पृष्टान्गंधान्आजिघ्रतीत्यादियद्यप्युक्तं॥
तथापिबद्धस्पृष्टानितिद्रष्टव्यं॥यतउक्तमानिबद्धस्पृष्टानितिद्रष्टव्यंयतउक्तमावश्यकनिर्युक्तौ॥पुठंसुणेइसद्दंरूवंपुणपासईअ
पुठंतु॥गंधरसंचबद्धपुठंविआगरेइति॥तत्रस्पृष्टानितिपूर्ववत्॥ बद्धानितिआत्मप्रदेशैरात्मीकृतान्बद्धमप्पीकयंपएसेहिंइति
वचनात्विशेषणसमासश्चबद्धाश्चतेस्पृष्टाश्चबद्धस्पृष्टास्तान्इहस्पर्शमात्रेणापिभवंतियथाशब्दस्ततःस्पर्शमात्रव्यवच्छेदेन

स्पर्शविशेषप्रतिपत्तिरव्याहतास्यादिनिबद्धग्रहणंबद्धरूपायेस्पृष्टास्तानपरिछिनत्तिनान्यानितिकस्मादिवमितिचेनुउच्यते ॥ गंधादिद्रव्याणांबादर
त्वात्अल्पत्वादभावत्वाच्चघ्राणादींद्रियाणामपिचश्रोत्रेंद्रियापेक्षयात्वाद्विन्नमंदशक्तिकत्वादिति ॥ संप्रतिप्रविष्टविषयचिंताकुर्वन्नाह ॥ ७.
पविठाइंभंतेसदाइंइत्यादिपाठसिद्धंनवरंस्पर्शस्तनौरेणोरिवापिभवतिप्रवेशोमुखेकेवलस्येयेतिशब्दार्थस्यभिन्नविषयनास्पृष्टप्रविष्ट
सूत्राणामितिसंप्रतिविषयपरिमाणनिरूपणार्थमाह ॥ ७. सोइंदियस्सणंभंतेकेवइएविसएपण्णत्तेइत्यादि ॥ इहश्रोत्रादीनिप्राप्तविषय
छेदकत्वात्अंगुलासंख्येयभागादप्यागतंशब्दादिद्रव्यंपरिछिदंति ॥ नयनंवाप्राप्तकारीति ॥ ततजघन्यतोंऽगुलसंख्येयभागादव्यवहितं
परिछिन्नत्तिविमुक्तंभवति ॥ जघन्यतोंगुलसंख्येयभागमात्रेव्यवस्थितंपश्यतिननुतनोप्यर्वाक्तरमिष्टश्चायमर्थस्तथावनातिसन्निकृष्टमंजन
रजोमलादिकंचक्षुःपश्यतीति ॥ उक्तंच ॥ अवरमसंखद्यंगुलभागातोनयणवद्याणंसंखेद्यंगुलभागोनयणस्सइति ॥ उत्कर्षतस्तुश्रोत्रेंद्रि
यंद्वादशभ्योयोजनेभ्यआगतान्अछिन्नान्अव्यवहितान्नान्यैःशब्दांतरैर्वातादिकैर्वाप्रतिहतशक्तिकानित्यर्थः ॥ पुद्गलान्अनेनपौद्गलिकः
शब्दोनांबरगुणइतिप्रतिपादितंयथाचशब्दस्यपौद्गलिकतानथातत्वार्थटीकायांप्रपंचितमितिनभूयःप्रपंच्यते ॥ स्पृष्टान्स्पृष्टमात्रान्
शब्दान्प्रविष्टान्निर्वृतींद्रियमध्यप्रविष्टान्शृणोतिनपरतोप्यागतान्कस्मादितिचेत्उच्यते ॥ परतआगतानां ॥ तेषांमंदपरिणामत्व
भावात्तथाहिपरतःआगतास्वलुतेशब्दपुद्गलास्तथास्वाभाव्यात्मंदपरिणामास्तथोपजायंतेयेनस्वविषयंश्रोत्रविज्ञानंनोत्पादयितुमीश्व
राःश्रोत्रेंद्रियस्यापिचतथाविधंअद्भुततरंबलंनविद्यतेयेदपरतोपिआगतान्शब्दान्शृणुयादितिचक्षुरिंद्रियमुत्कर्षतःसातिरेकान्योजनशत
सहस्रादारभ्याछिन्नान्कटकुद्यादिभिरव्यवहितान्पुद्गलान्अस्पृष्टान्दूरस्थितान्अतएवाप्रविष्टान्रूपादिइतिरूपात्मकान्पश्यति ॥ पर
तोऽव्यवहितस्यापिपरिछेदचक्षुषःशक्त्यभावात्तत्वंगुलमिहत्रिधातद्यथाआत्मांगुलमुत्सेधांगुलंप्रमाणांगुलंच ॥ तत्रजेणंजयामणूसाते ३३४
सिंजंहोइमाणरूवंतुतंभणियंगुलमपायेयमाणेपुणइमंतुइत्येवंरूपमात्मांगुलंपरमाणूरहरेणूतसरेणूअग्गंयंचवालस्सलिक्खजूयाय

जवोअट्ठगुणविवद्धियाकमसोइत्यादिरूपमुत्सेधांगुलंतृतीयंउस्सेहंगुलमेगंहवइपमाणंगुलंसहस्सगुणं ॥ तंचेवदुगुणियंखलुवीरस्सायंगु
लंभणियंमित्येवंप्रमाणांगुलंतत्रआत्मांगुलेनमीयंतेतत्कालेवापीकूपादिकंवस्तुउत्सेधांगुलेननरतिर्यग्देवनैरयिकशरीराणिप्रमाणांगु
लेनपृथिवीविमानानि ॥ उक्तंच ॥ आयंगुलेनवत्थुउस्सेहपमाणतोमिणसुदेहं ॥ नगपुढविविमाणाइंमिणसुपमाणंगुलेणंतु ॥ तत्रेदमिंद्रि
यविषयपरिमाणंकिमात्मांगुलेनाहोश्विनुउत्सेधांगुलेनउच्यतेआत्मांगुलेनतथाचाहचक्षुरिंद्रियविषयपरिमाणविषयचिंतायांभाष्य
कृत्अप्पत्तकारिनयणंमणोयनयणंस्सविसयपरिमाणं ॥ आयंगुलेणलक्खंअइरित्तंजोयणाणंतु ॥ ननुदेहप्रमाणमुत्सेधांगुलेनक्रियते
देहाश्रितानिचेयाणितत तेषांविषयपरिमाणमपिउत्सेधांगुलेनकर्तुमुचितंकथमुच्यतेआत्मांगुलेनेतितैनेषदोषःयद्यपिहिनामदेहा
श्रितानींद्रियाणितथापितेषांविषयपरिमाणमात्मांगुलेनैवदेहादन्यत्वाद्विषयपरिमाणस्यतथाचामुमेवार्थमाक्षपपुरस्सरंभाष्यकृदप्याह
नणुभणियमुस्सयंगुलपमाणतोजीवदेहमाणाइं ॥ देहपमाणंतंचियनउइंदियविसयपरिमाणं ॥ अत्रदेहप्रमाणंतंचियइतियत्तत्रउत्सेध
यांगुलमेयत्वेनोक्तंततदेहप्रमाणमात्रमेवनत्विंद्रियविषयपरिमाणंतस्यात्मांगुलप्रमेयत्वादिति ॥ अथयदिविषयपदिविषयपरिमाणमिं
द्रियाणामुत्सेधांगुलेनस्यात्ततःकोदोषआपद्यतेउच्यते ॥ पंचधनुशतादिमनुष्याणांविषयव्यवहारविछेदस्तथाहियत्भरतस्यात्मांगुलं
तत्किलप्रमाणांगुलंतच्चप्रमाणांगुलमुत्सेधांगुलसह स्रेणभवति ॥ उस्सेहंगुलमेगंहवइपमाणंगुलंसहस्सगुणमितिवचनात्ततोभरत
सगरादिचक्रवर्त्तिनांयाअयोध्यादयोनगर्योयेचस्कंधावाराआत्मांगुलेनद्वादशयोजनायामतयासिद्धांतेप्रसिद्धास्तेउत्सेधांगुलप्रमित्या
अनेकानियोजनसहस्राणिस्युःतथाचसतिलआयुधशालादिषुताडितभेर्यादिशब्दश्रवणंनसर्वेषामापद्येतबारसहिंजोयणेहिंसोयंअभिगे
ण्हएसद्दमितिवचनात् ॥ अथचसमग्रनगरव्यापीसमस्तस्कंधावारव्यापीचविजयढक्कादिशब्दआगमेप्रतिपाद्यतेतथैवचजनव्य
वहारस्तएवमागमप्रसिद्धःपंचधनुःशतादिमनुष्याणांविषयव्यवहारोव्यवछेदोमाप्रापदित्यात्मांगुलेनेंद्रियाणांविषयपरिमाणमवसातव्यं

नोच्छ्रयांगुलेनतथाभाष्यकृतजंतेणपंचधणुसयनरादिविसयविवहारवोच्छेउपोच्चइसहस्सगुणियंजेणपमाणंगुलंतत्तोअन्नतस्मादात्मांगुले
नैवेंद्रियाणांविषयपरिमाणंनोच्छेधांगुलेनेतिउपसंहारवाक्यंस्वतःपरिभावनीयं॥ यद्यप्युक्तंप्राक्देहाभिन्नानींद्रियाणीतितेषांविषयप
रिमाणमुच्छ्रयांगुलेनेति॥ तदप्ययुक्तमिंद्रियाणामपिकेषांचित्पृथुत्वस्यआत्मांगुलेनमीयमानत्वात्अभ्युपगमात्भाविन्यैवतप्रागपि
इंद्रियप्रमाणेचिंतियंभणिअमित्यादिभाष्यकारवचनावष्टंभेनेतितस्मात्सर्वमिंद्रियविषयपरिमाणमात्मांगुलेनैवेतिस्थितंननुभव
त्वात्मांगुलेनविषयपरिमाणंतथाधिकृतसूत्रोक्तंचक्षुरिंद्रियपरिमाणंनघटतेअधिकस्यापितद्विषयपरिमाणस्यागमांतरेप्रतिपादना
त्तथाहिपुष्कर वरद्वीपार्द्धेमानुषोत्तरपर्वतसमीपवर्तिनोपमनुष्याःकर्कसंक्रांतौप्रमाणांगुलनिष्पन्नैःसातिरेकैरेकविंशतियोजनलक्षैर्व्य
वस्थितमादित्यमवलोकमानाःप्रतिपाद्यंतेशास्त्रांतरेचतथाचतद्ग्रंथाइगवीसंखलुलखाचवुतीसंचेवसहस्सा॥ तहपंचसयाभणियास
त्ततीसाएअतिरित्ता॥ इइनयणविसयमाणंपुक्खरवरदीवद्धवासिमणुयाणं॥ पुव्वेणयअवरेणयपिहंपिहंहोइमणुयाणमित्यादितत्कथ
माधिकृतसूत्रमात्मांगुलेनापिघटतेप्रमाणांगुलेनापिव्यभिचारभावात्॥ उच्यते॥ लक्खेहिएकवीसाएसाइरेगेहिंपुक्खरद्धंमि॥ उदयेपेच्छं
तिनरासूरंउक्कोसएदिवसेणयमिंदियस्सतम्हाविसयपमाणंजहा॥ सएभणियंआउस्सेहपमाणंगुलाणएकेणविनजत्तंसत्यमेतत्के
वलमिदंचक्षुःप्रकाश्यविषयद्रष्टव्यंनतुप्रकाशकविषयंतःप्रकाशकेऽधिकाधिकतरमपिविषयपरिमाणं॥ नविरुध्यतेइतिनकश्चिद्दोषःकथमे
वंविधोर्थोवसीयतइतिचेतउच्यतेपूर्वसूरिकृतव्याख्यानात्सकलमपिहिकालिकश्रुतंपूर्वसूरिकृतव्याख्यानानुसारेणैवव्याख्यानयंतियो
नयथाक्षरमा सन्निवेशंपूर्वगतसूत्रार्थसंग्रह परतयाकालिकश्रुतस्यक्वचित्संक्षिप्तस्याप्यर्थस्यमहताविस्तरेणक्वचिद्विस्तरव
तोप्यतिसंक्षेपेणाभिधानेअर्वाक्तनैःसमपियथावस्थितार्थतयाज्ञातुमशक्यत्वात्तएवोक्तमिदमन्यत्रजंजहाभणिअंसुत्तेतहेवजइतंवियाल ३३८
णानत्थिकिंकालियाणुयोगोदिट्ठोदिट्ठिप्पहाणेहिंतस्मात्पूर्वसूरिकृतव्याख्यानात्अधिकृतग्रंथविरोधःआहचभाष्यकृत्सुत्ताभिप्पायोयंपया

सयणिद्धेनयंनउपयासेवरकाणाउविसेसोनहिसंदेहादिलक्खेणयाइति॥ तथाघ्राणेंद्रियजिह्वेंद्रियस्पर्शनेंद्रियाणिगंधादीनुत्कर्षतोनव
योजनेभ्यआगतान्स्वच्छिन्नान्द्रव्यांतरेरप्रतिहतशक्तिकान्परिच्छिंदंतिनपरतआगतान्परतआगतानांमंदपरिणामत्वभावातघ्राणा
दींद्रियाणांचतथारूपाणामपितेषांपरिच्छेदंकर्तुमशक्यत्वादआहचभाष्यकृत्वारसहिंतोमुत्तंसेसाणंनवहिंजोयाणहिंतोगेण्हंतिपत्तमत्थं
एत्तोपरतोनगिण्हंति॥ दव्वाणमंदपरिणामयाएपरतोनइंद्रियविषयाधिकारेइदमपिसूत्रं॥ अणगारस्सणंभंतेइत्यादि॥ नविद्यतेअगारंगृहं
द्रव्यतोभावतश्चयस्यासावनगारःसंयतस्तस्यणमितिवाक्यालंकारेभदंतभावियप्पणोइतिभावितोवासितआत्माज्ञानदर्शनचारित्रैस्तपोवि
शेषैश्चयेनसभावितात्मातस्यामारणांतिकसमुद्घातेनसमवहतस्ययेचरमाःशैलेशीकालांत्यसमयभाविनोनिर्जरापुद्गलाःअपगतकर्मभा
वाःपरमाणवःसहुमाणंतेपुद्गलाइतिणमितिनिश्चयेनिपातानामनेकार्थत्वात्निश्चितनिश्चितमेतत्॥ सूक्ष्माःचक्षुरादींद्रियपथमतिक्रांतास्ते
पुद्गलाःप्रज्ञप्ताभवद्भिःहेश्रमणहेआयुष्मनगौतमकृतंभगवतःसंबोधनमेतत्तथानिश्चितमेतत्सर्वलोकमपितेपुद्गलाःस्पृष्ट्वाणंवाक्यालंकृ
तौतिष्ठंति॥ एवंगौतमेनप्रश्नेकृतेभगवानाह हंतागोयमाहंतेतिप्रत्ययवधारणेएवमेवैतत्गौतमआणगारस्सणंभावियप्पणोइत्यादितदेव
पुनरपिप्रश्नः॥ छउमत्थेणंभंतेइत्यादि॥ अथकोस्यप्रश्नस्यावकाशउच्यतेइहप्रागुक्तंस्पृष्टानिप्रविष्टानिचशब्दद्रव्याणिशृणोतीत्यादिनिर्जरापुद्
लाअपिसर्वलोकस्पर्शिनइति॥ तेषामपिश्रोत्रादिषुस्पर्शनप्रवेशौनस्तइतिसंशयप्रश्नःछद्मस्थोभदंतमनुष्यःछद्मस्थग्रहणंकेवलिव्युदासार्थं
केवलीहिंसर्वैरप्यात्मशरीरप्रदेशैःसर्वंजानातिपश्यतिचयथोक्तंसर्वतोजाणइकेवलीसव्वओपासइकेवलीस्तुतिकारोप्याह॥ समन्ततःसर्वगुणंनि
रक्षमितिछद्मस्थस्वंगोपांगनामकर्मविशेषसंस्कृतेरेवेंद्रियद्वारैर्जानातिपश्यतिचेतिछद्मस्थग्रहणंअतएवेहछद्मस्थोविशिष्टवधिज्ञानवि
कलःपरिगृह्यतेतेषांनिर्जरापुद्गलानांतेषांपरस्परमितिभावः॥ नानात्वंपरनिरपेक्षमेकस्यैववर्णादिकृतवैचित्र्यं॥ उत्तमअवमताहीनत्वमितिया
वत्छत्वंनिस्सारतागुरुलघुत्वेप्रतीतेभगवानाह॥ नायमर्थःसमर्थोनायमर्थोयुक्त्युपपन्नःछद्मस्थमनुष्यस्तेषांनिर्जरापुद्गलानामन्यत्वा

दिकंजानातिपश्यतिवाअत्रैवार्थेप्रश्नमाह सेकेणठेणंभंतेइत्यादि॥ सुगमंभगवानाह देवेवियणमित्यादिदेवोप्यस्त्येकक: कश्चित्कर्मपुद्गलविषयावधिज्ञा
नविकलोयस्तेषांनिर्जरापुद्गलानांनकिंचिदप्यन्यथादिकंजानातिपश्यतिवाकिमुक्तंभवतिदेवानांकिलमनुष्येभ्य:पटुतराणिइंद्रियाणिविद्यंतितत्रदेवोपि
तावन्नजानातिपश्यतिवाकिमुतमनुष्यइति॥ सेएएणमित्याद्युपसंहारवाक्यंसुगमं॥ एएसुहुमाणंभंतेइत्यादि॥ एएइतिएतावन्मात्रेनसूक्ष्मास्तेपुद्गला
निर्जरापुद्गला: प्रज्ञप्ताहेश्रमणहेआयुष्मन्गौतमस्याभगवत्कृतंसंबोधनमेतत्सर्वलोकमपितेएवंरूपाअत्यंतसूक्ष्मा:पुद्गलाअवगाह्यतिष्ठंतिननुबादरूपा
अन्यथासांव्यवहारिकप्रत्यक्षप्रविरोधप्रशक्ते:सर्वलोकस्पर्शिनास्तेनिर्जरापुद्गलास्ततोऽयमपिप्रश्न: नेरईयाणंभंतेइत्यादि॥ नैरयिकास्तावत्तान्निर्ज
रापुद्गलाहारयंतीतिसिद्धंपुद्गलानांतत्तत्सामग्रीवशतोविचित्रपरिणामनस्वभावतयाहाररूपतयापितेषांपरिणमनंसंभवान्केवलमेतत्पृष्टव्यंते
नैरयिकाजानंतीत्यादिप्राकृतत्वात्त्रिपाहेतुत्वेपिवर्त्तमानानतोयमर्थ:जानंत:पश्यंतआहारयंतिउताजानंतोपश्यंतइतिभगवानाह॥अजानंतोपि
पश्यनइतिकस्मादितिचेत्उच्यते॥तेषामतिसूक्ष्मतयाचक्षुरादिपंथातीतत्वात्नैरयिकाणांच॥ कार्मणशरीरपुद्गलालंबनावधिज्ञानविकलत्वात्
एवमसुरादिविषयाण्यपिसूत्राणिताबद्वाच्यानियावत्तिर्यग्पंचेंद्रियसूत्रंमनुष्यसूत्रेसन्निभूयायइति।संज्ञिनोभूता:संज्ञिभूता:संज्ञित्वंप्राप्ताइत्यर्थ:॥
तद्व्यतिरक्ताअसंज्ञिभूता:संज्ञीदेहविशिष्टावधिज्ञानीपरिगृह्यतेयस्यतेकार्मणशरीरपुद्गलाविषयभावंबिभ्रतिशेषंसुगमंवैमानिकसूत्रेमायी
मिच्छद्दिट्ठीइत्यादिमायातृतीय:कषाय:सा न्येषापाणामुपलक्षणंमायाविद्यतेयेषांतेमायिनउत्कटरागद्वेषाइत्यर्थ:॥तेचतेमिथ्यादृश्यादृष्य
श्चमायिमिथ्यादृष्टयस्तथारूपानुपपन्नकाउत्पन्नामायिसम्यग्दृष्ट्युपपन्नकग्रहणेननचमग्रैवेयकपर्यंता:परिगृह्यंतेयद्यप्यारातीएअपि॥कल्पेषु
ग्रैवेयकेषुचसम्यग्दृष्टयोदेवा:संतितथापितेषामवधिर्नकार्मणशरीरपुद्गलविषयइतिमायिमिथ्यादृष्ट्युपपन्नकाइत्युपमानतोमायिमिथ्यादृष्ट्युपप
न्नकशब्देनोच्यंते॥ येत्वमायिसम्यग्दृष्ट्युपपन्नकास्तेअनुत्तरसुरास्तेपिद्विविधास्तद्यथाअनंतरोपपन्नकाश्चअनंतरमव्यवधानेनोपपन्नकाअनंतरोपप १३८
न्नकाउपपत्तिप्रथमसमयवर्त्तिनइत्यर्थ:॥परंपरयाउपपन्नकापरंपरोपपन्नकाउत्पत्त्यनंतरंद्वित्र्यादिसमयवर्त्तिनइत्यर्थ:॥तत्रानंतरोपपन्नकानजानं

ति॥ तथाहिएकसामायिकोपयोगसंभवादपर्याप्तत्वाच्चपरंपरोपपन्नकाअपिद्विधापर्याप्ताश्चतत्रापर्याप्तानजानंतेनपश्यंत्यपर्याप्तत्वेनसम्यगुपयोगा
संभवात्पर्याप्ताअपिद्विधाउपयुक्ताश्चतत्रानुपयुक्तानजानंतिनपश्यंतिसामान्यरूपतयावाविशेषरूपतयावापरिच्छेदस्यप्रणिधानमंतरेण
कर्त्तुमशक्यत्वात्येत्पयुक्तास्तेजानंतिपश्यंतिचकथमितिचेत्उच्यते॥ इहावश्यकेअवधिज्ञानविषयचिंतायामिदमुक्तंसंखेज्जकम्मदव्वेलो
गेथोवूणगंपलियंअस्यायमर्थ:कर्मद्रव्याणिकर्मशरीरद्रव्याणिपश्यन्क्षेत्रतोलोकस्यासंख्येयान्भागान्पश्यतिअनुत्तरसुराश्चसंपूर्णलो
कनाडींपश्यंतिसंभिन्नलोगनालिंपासंतिअणुत्तरादेवाइतिवचनात्ततस्तेउपयुक्ताजानंतिचावधिज्ञानेनतान्निर्जरापुद्गलानितिआहारयंतीति
चसर्वत्रापिलोमाहारेणेतिप्रतिपत्तव्यंइंद्रियाधिकारादयमपिप्रश्न:॥अद्दायंपेहमाणेइत्यादि॥ अद्दायमिति॥आदर्शंपेहमाणेइतिप्रेक्ष्यमाणो
मनुष्य:किमादर्शंप्रेक्ष्यतेआहोश्विदात्मानंअत्रात्मानंआत्मशब्देनशरीरमभिगृह्यतेउतपतिभागमितिप्रतिभागंप्रतिबिंबंभगवानाहअंद
र्शंतावत्प्रेक्षतएवतस्यस्फुटरूपस्ययथावस्थिततयातेनोपलंभात् आत्मानंआत्मशरीरंपुनर्नपश्यतितस्यतत्राभावात्स्वशरीरंहिस्वात्मनिव्य
वस्थितंनादर्शेततः कथमात्मशरीरंचतत्रपश्येदितिप्रतिभागंस्वशरीरस्यप्रतिबिंबंपश्यति॥अथकिमात्मकंप्रतिबिंबं॥उच्यतेछायापुद्गलात्मकंतथाहि
सहिसर्वमैंद्रियकंवस्तुस्थूलंचयाएचयधर्मकंरश्मिवच्चरश्मयइतिछायापुद्गला:व्यवह्रियंतेतेचछायापुद्गला:प्रत्यक्षतएवसिद्धा:सर्वस्यापिस्थू
लवस्तुन:छायाप्रत्यक्षत:प्रतिप्राणिप्रतीते:अन्यच्चस्थूलवस्तुव्यवहिततयादूरस्थिततयावानादर्शादिष्ववगाढरश्मिभवतितत्तोनतत्रतद्दृश्यते
तस्मादवसीयतेसंतिछायापुद्गलाइतितेचछायापुद्गलास्तत्सामग्रीवशाद्विचित्रपरिणमनस्वभावस्तथाहितेछायापुद्गलादिवावस्तुन्यभास्वरेप्रति
गता:संत:स्वसंबंधिद्रव्याकारमाबिभ्राणा:श्यामरूपतयापरिणमंतेनिशितुकृष्णाभा: एतच्चप्रसरतिदिवसेसर्यकरतिकरेनिशितुचंद्रोद्योतेप्र
त्यक्षतएवसिद्धं।तएवछायापरमाणवआदर्शादिभास्वरद्रव्यप्रतिगता: संत: स्वसंबंधिद्रव्याकारमादधाना: यादृग्वर्णा:स्वसंबंधिनिद्रव्येकृष्णो
नील:सित:पीतोवातदाभा:परिणमंतेएतदप्यादर्शादिष्वध्यक्षत: सिद्धंततोऽधिकृतसूत्रेपियेमनुष्यस्यछायापरमाणवआदर्शमुपसंक

म्यस्वदेहवर्णाभतयास्वदेहवर्णाभनयास्वदेहाकारतयाचपरिणमंते। तेषांतत्रोपलब्धिर्नशरीरस्यतेचप्रतिबिंबश   ब्दवाच्याअतउक्तं
नशरीरंपश्यतिकिंतुर्शनभागमितिनेचैतत्स्वमनीषि कविजृंभितंयतउक्तंमागमेसामाउदीयाछायात्रभास्करगतानिसिंतुकालाभासान्वेवभास्क
रगयासदेहवण्णामुण्णेयछाजेआवरिसंततोदेहावयवाहवंतिसंकंमता। तेसिंतछुवलद्धीपगासजोगानइयरेसिंमूलटीकाकारोप्याह यस्मा
त्सर्वमेवहिंऐद्रियकंस्थूलंद्रव्यंचयाएचधर्मकंरश्मिवच्चभवति। यतश्चादर्शादिषुछायास्थूलस्यदृश्यतेअवगाढश्मिनःनचादर्शेअनवगाढ
श्मिनः स्थूलद्रव्यस्यकस्यचिद्दर्शनंभवतिनचांतरितंदृश्यतिकिंचित्अतिदूरस्थंचाअतःपलिभागंप्रतिभागंदेहंतिपश्यतीतिएवमसिम
ण्यादिविषयाण्यपिषट्सूत्राणिभावनीयानिसूत्रपाठेप्येवं। असिंदेहमाणेमणूसेकिंअसिंदेहइअत्ताणंदेहइपलिभागंदेहइगोयमानोअसिं
देहइइत्यादि। इहनिर्जरापुद्गलाःछद्मस्थानामिंद्रियविषयेनभवति। तेषामतींद्रियत्वादित्युक्तमतो ऽतींद्रियप्रस्तावादिदमप्यतींद्रियविषयंप्रश्न
माह। ७। कंबलसाडएणंभंतेइत्यादि। कंबलशाटकःकंबलरूपंशाटकः कंबलशाटकइतिव्युत्तेःआवेष्टितःपरिवेष्टितोगाढतरंसंवेष्टितःए
वंभूतःसन्आवत्अवकाशांतरंयावत्आकाशप्रदेशानित्यर्थःस्पृष्ट्वाअवगाह्यतिष्टतिविरल्लिएचीतिविरल्लितोपिविरलीकृतोपितावदेवाव
शांतरंतावत्एवाकाशप्रदेशान्स्पृष्ट्वातिष्टतिभगवानाह। हंतागोयमाइत्यादिहंतेतिप्रत्यवधारणे। एवमेवैतत्। गोतमयत्कंबलसाडएणमि
त्यादितदेवंएषोत्रसंक्षेपार्थः यावतएवाकाशप्रदेशान्संवेलितःसन्कंबलसाटको ऽवगाह्यावतिष्टतेतावतएवाकाशप्रदेशान्वितनीकृतो
प्यवगाह्यावतिष्टतेवलंघनप्रतरमात्रकृतोविशेषःप्रदेशसंख्यात्तमयत्रापितुल्याउक्तश्चायमर्थोन्यत्रापितेत्रपटमधिकृत्यजहखलुमहापमाणो
नेत्तपडोकोडिउमहअंमितंमिविलाविइच्चियफुसइपएसेइतिएवंस्थूणासूत्रमपिभावनीयं। आगासथिग्गलेणंभंतेइत्यादि। आकाशथिग्गलंलोकः ११७
सहिमहतोबहिराकाशस्यवितनपटस्यथिग्गलमिवप्रतिभातिभदंतकेनस्पृष्टोव्याप्तःएतत्सामान्येनस्पृष्टमेतदेवविशेषतःप्रश्नयतिक
तिभिःकिंयत्संख्याकैःकायैःस्पृष्टःवाशब्दःपक्षांतरद्योतनार्थःप्रकारांतरंचसामान्याद्विशेषतःतान्कायान्प्रत्येकंपृच्छतिकिंधम्मथिकाए

णंफुडेइत्यादि सूत्रमंभगवानाह। गोतमधर्मास्तिकायस्यसर्वात्मनातत्रावगाढत्वात्। अतएवनोधर्मास्तिकायस्यदेशेनस्पृष्टोयोहियेनसर्वात्मनाव्या
प्तोनासौतस्यैवदेशेनव्याप्तोभवतिविरोधात्प्रदेशैस्तुव्याप्तःसर्वेषामपिधर्मास्तिकायप्रदेशानांतत्रावगाढत्वात्एवमधर्मास्तिकायविषयेपिनिर्वचनंवा
च्यंतथाआकाशास्तिकाशास्तिकायेनसकलेननद्रव्येणस्पृष्टआकाशास्तिकायदेशमात्रत्वाल्लोकस्यकिंतुदेशेनव्याप्तःप्रदेशैश्च। पृथिव्यादयोपिसूक्ष्माः
सकललोकापन्नावर्त्तनेनतस्तैरपिसर्वात्मनाव्याप्तःतसकाएणंसियफुडेइतियदाकेवलीसमुद्घातगतःसन्चतुर्थसमयेवर्त्तनेनदानेनस्वप्रदेशैःसक
ललोकापूरणायेनस्पृष्टःकेवलिनस्त्रसकायत्वात्शेषकालंतुनस्पृष्टःसर्वत्रत्रसकायानामभावत्वात्। एवंजंबूद्वीपादिविषयानामभावात्। एवंजं
बूद्वीपादिविषयाण्यपिसूत्राणिभावनीयानिनवरंबहिःपुष्करवरार्द्धचिंतायांअद्धासमएणंनफुडेइति। अद्धासमयोह्यर्द्धतृतीयद्वीपसमुद्रांतवर्ती
नबहिरंतश्चधर्मसंग्रहणिटीकायांभावितंततोबहिर्द्वीपसमुद्राणामद्धासमयस्पर्शनप्रतिषेधःजंबूद्दीवेलवणेगाहा। सर्वद्वीपसमुद्राणामाभ्यंत
रवर्तीजंबूद्वीपस्तत्परिक्षेपीलवणसमुद्रस्तदनंतरंधातकीखंडाभिधानोद्वीपस्ततः कालोदः समुद्रः तदनंतरंपुष्करवरोद्वीपः अतऊर्द्ध्वंद्वीपसदृश
नामानः समुद्राःततःपुष्करवरसमुद्रःतदनंतरंवरुणवरोद्वीपोवरुणोदःसमुद्रःक्षीरवरोद्वीपःक्षीरोदःसमुद्रः घृतवरोद्वीपोघृतोदःसमुद्रः इक्षुव
रोद्वीपइक्षुवरःसमुद्रःनंदीश्वरसमुद्रः एतेअष्टावपिचसमुद्राएकप्रत्यवताराःएकैकरूपाइतिभावः अतऊर्द्ध्वंतुद्वीपाःसमुद्राश्चत्रिप्रत्यवतारास्त
द्यथाअरुणइतिअरुणवरोरुणवरोवभासःकुंडलःकुंडलवरःकुंडलवरावभासःसचकोरुचकवरोरुचकवरावभासःइत्यादिएषचात्रक्रमःनंदी
श्वरसमुद्रानंतरमरुणोद्वीपोरुणःसमुद्रस्ततोऽरुणवरोद्वीपोऽरुणवरःसमुद्रइत्यादिकियंतःखल्वनामग्राहंद्वीपकुंशाकंयतेनतस्तन्नामसंग्रहमाह
आभरणवछेत्यादि गाथाद्वयं यानिकानिचिदाभरणनामानिहारार्द्धहाररत्नावलिकनकावलिप्रभृतीनियानिचवस्त्रनामानिचीनांशुकप्रभृती
नियानिचगंधनामानिकोष्ठपुटादीनिचोत्पलनामानिजलरुहचंद्रोद्योतप्रमुखाणियानिचतिलकप्रभृतीनिवृक्षनामानियानिचपद्मनामानिचप
द्मनामानिशतपत्रसहस्रपत्रप्रभृतीनियानिचपृथिवीनामानिपृथिवीशर्करावालुकेत्यादीनियानिचनवानांनिधीनांचतुर्दशानांचक्रवर्त्तिरत्नानां

क्षुद्रहिमवदादीनांवर्षधरपर्वतादीनांपद्मादीनांद्रहदानांगंगासिंधुप्रभृतीनांनदीनांकच्छादीनांविजयानांमाल्यवदादीनांवक्षस्कारपर्वतादीनांसौध
र्मादीनांकल्पानांशक्रादीनामिंद्राणांदेवकुरूत्तरकुरुमंदराणामावासानांशक्रादिसंबंधिनांमेरुप्रत्यासन्नादीनांक्षुद्रहिमवदादिसंबंधिनांनक्षत्राणां
कृत्तिकादीनांचंद्राणांचनामानितानिसर्वाण्यपिद्वीपसमुद्राणांत्रिप्रत्यवताराणिवक्तव्यानि॥तद्यथाहारोद्वीपोहारःसमुद्रःहारवरोद्वीपोहारवरःस
मुद्रः॥हारवराभासोद्वीपोहारवरावभासःसमुद्रः इत्यादिनाप्रकारेणत्रिप्रत्यवतारास्तावद्वक्तव्यायावत्सूर्योद्वीपःसूर्यःसमुद्रःसूर्यवरोद्वीपःसूर्य
वरःसमुद्रः॥सूर्यवरावभासोद्वीपःसूर्यवरावभासःसमुद्रः॥उक्तंच॥जीवाभिगमचूर्णौअरुणाईदीवसमुद्दातिपडोयारायावत्सूर्यवरावभासः
समुद्रः ततसूर्यवरावभासपरिक्षेपीदेवोद्वीपस्ततोदेव॥समुद्रः स्तदनंतरंनागोद्वीपोनागसमुद्रःस्ततोयक्षोद्वीपोयक्षःसमुद्रः ततोभूतोद्वीपो
भूतसमुद्रस्वयंभूरमणोद्वीपःस्वयंभूरमणःसमुद्रः एतेपंचदेवादयोद्वीपापंचदेवादयःसमुद्राएकरूपानपुनरेषांत्रिप्रत्यवताराः॥उक्तंच॥जी
वाभिगमचूर्णौएतेपंचद्वीपाःपंचसमुद्राःएकप्रकाराइतिजीवाभिगमसूत्रेप्युक्तं॥देवेनागेजक्खेभूएयसयंभुरमणेयएक्केक्काचेवभाणियव्वातिप
डोयारंनत्थिइति॥पूर्वमाकाशथिग्गलशब्देनलोकःपृष्टोऽधुनालोकशब्देनैवतंपिपृच्छिषुराह॥७॥लोएणंभंतेकिंणाफुडेइत्यादिपाठसिद्धं॥नवरंसेसे
अजीवदव्वसेसेइतिसअलोकएकोऽजीवद्रव्यदेशआकाशास्तिकायस्यदेशइत्यर्थः॥परिपूर्णस्त्वाकायोनभवतिलोकाकाशेनहीनत्वात्अनन्ता
गुरुलघुकोऽमूर्त्तत्वात्॥अनंतैरगुरुलघुकगुणैःसंयुक्तप्रतिप्रदेशंस्वपरभेदभिन्नानामनंतानामगुरुलघुपर्यायाणांभावात्॥ किंप्रमाणःसोऽलो
कइतिचेदत्तआह॥ सर्वाकाशमनंतभागोनंलोकाकाशमात्रखंडहीनसकलाकाशप्रमाणइतिभावः॥७॥ ॥इतिश्रीमलयगिरिविरचितायां
प्रज्ञापनाटीकायांमिद्रियपदस्याद्यउद्देशकःप्रथमःसमाप्तः॥७॥ ॥व्याख्यातःप्रथमउद्देशकःसंप्रतिद्वितीयआरभ्यते तत्रेवमादावर्थाधिकारसंग्रा
हकंगाथाद्वयं॥७॥इंदियउवचयइत्यादिप्रथमतइंद्रियाणामुपचयोवक्तव्यः॥उपचीयतेउपचयंनीयतेइंद्रियमनेनेत्युपचयः॥इंद्रियप्रायोग्य ११८
पुद्गलग्रहणसंपत्इंद्रियपर्याप्तिरित्यर्थः॥तदनंतरंनिर्वर्तनावक्तव्यानिर्वर्त्तनानामबाह्याभ्यंतररूपायानिर्वृत्तिराकारमात्रस्यनिष्पादनंतदनंतर

सानिर्वर्त्तनाकतिसमयाभवतीतिप्रश्नेअसंख्येयाःसमयास्तस्याभवेयुरितिनिर्वचनंवाच्यं॥ततइंद्रियाणांलब्धिस्तदावरणकर्मक्षयोपशमरूपाव
क्तव्या॥ ततउपयोगाद्धानदनंतरमल्पबहुत्वेचिंत्यमानेपूर्वस्याःपूर्वस्याउत्तरोत्तराउपयोगाद्धाविशेषाधिकावक्तव्या॥ततउग्गाहणाइतिअवग्रहणंपरि
छेदोवक्तव्यः॥सचपरिछेदोऽपायादिभेदादनेकश्चेति॥तदनंतरमपायोवक्तव्यस्ततईहातदनंतरंव्यंजनावग्रहश्चशब्दतुनाअर्थसमुच्चायकत्वादर्थावग्रहश्च
वक्तव्यः॥तदनंतरंद्रव्येंद्रियभावेंद्रियसूत्रं॥ततोऽतीतबद्धपुरस्कृतानिद्रव्येंद्रियाणितदनंतरंभावेंद्रियाणिचचिंतनीयानि॥तत्रयथोद्देशंनिर्देशइ
तिन्यायात्प्रथमतइंद्रियोपचयसूत्रमाह॥७॥कइविहेणंभंतेइंदियोवचएपण्णत्तेइत्यादि॥सुगमंनवरंजस्सजइइंदियाइत्यादि॥यस्यनैरयिका
देर्यतियावंतियाणिसंभवंति॥तस्यततिविधस्तावत्प्रकारइंद्रियोपचयोवक्तव्यः॥तत्रनैरयिकादीनांस्तनितकुमारपर्यवसानानांपंचविधः॥पृथिव्यप्ते
जोवायुवनस्पतीनामेकविधोद्वीन्द्रियादीनांद्विविधस्त्रीन्द्रियादीनांत्रिविधश्चतुरिन्द्रियाणांचतुर्विधः तिर्यक्पंचेंद्रियमनुष्यव्यंतरज्योतिष्कवैमानिका
नांपंचविधः क्रमश्चैवंस्पर्शनरसनघ्राणचक्षुःश्रोत्राणीति॥एवमिंद्रियनिर्वर्तनादिसूत्राण्यपिवेदितव्यानिप्रायःसुगमत्वात्नवरंइंदिउवउगद्धाइति
यावंतंकालमिंद्रियैरुपयुक्तआस्तेतावान्कालइंद्रियोपयोगाद्धाकतिविहाणंभंतेइंदियउग्गाहणापन्नत्ताइतिकतिविधंकतिप्रकारंभदंतइंद्रियैरव
ग्रहणंपरिछेदःप्रज्ञप्तएनत्सामान्यतःपृष्टंसामान्यंचविशेषनिष्टमतोऽपायादिविशेषविषयाणिसूत्राण्याह॥ कतिविहेणंभंतेइंदियअवाएपण्णत्तेइ
त्यादि॥तत्रावग्रहज्ञानेनावगृहीतस्यईहाज्ञानेनईहितस्यार्थस्यनिर्णयरूपोयोऽध्यवसायःसोऽपायःशांखएवायंशार्ङ्गएवायंइत्यादिरूपोऽवधारणा
त्मकोनिर्णयोऽपायइतिभावःईहाइतिईहचेष्टायामीहनमीहासद्भूतार्थपर्यालोचनरूपाचेष्टाइत्यर्थःकिमुक्तंभवतिअवग्रहादुत्तरकालमपायात्पूर्वं
सद्भूतार्थविशेषोपादानाभिमुखोऽसद्भूतार्थविशेषपरित्यागाभिमुखःप्रायोऽत्रमधुरत्वादयःशांखादिशब्दधर्मादृश्यंते॥ नकर्कशनिष्ठुरतादयः
शार्ङ्गादिशब्दधर्माइत्येवंरूपोमतिविशेषईहा॥आहचभाष्यकृत्भूयाभूयविसेसादाणच्चायाभिमुहमीहाउ विहेउत्तहेपण्णत्तेतंजहा॥वंजणोग्गहे
अत्थोग्गहेयइति॥अवग्रहोद्विविधोऽर्थावग्रहोव्यंजनावग्रहश्च॥तत्रअवग्रहः॥अर्थस्यावग्रहोऽर्थावग्रहःअनिर्देश्यसामान्यमात्ररूपार्थग्रहणमि

तिभावः॥ आह चनंद्यध्ययनचूर्णीकृत्॥ सामन्नस्सरूवाइविसेसणरहियस्स अनिद्दिस्सस्स अवग्गहणमवग्गहइति॥ तथाप्युक्तं तत्त्वार्थ॥ प्रदीपेनेव घट
इति व्यंजनं तत्रोपकरणेंद्रियस्य शब्दादिपरिणतद्रव्याणां चयः परस्परं संबंधः संबंधे हि सति सोर्थः श्रोत्रादींद्रियेण व्यंजितुं शक्यते नान्यथा
ततः संबंधो व्यंजनं॥ आह च भाष्यकृत्॥ वंजिज्जइ जेणत्थो घडो व दीवेण वंजणं तं च॥ उवगरणिंदियसद्दाइपरिणयद्दव्वसंबंधो व्यंजनेन संबंधेनाव
ग्रहणं संबंध्यमानस्य शब्दादिरूपस्यार्थस्याव्यक्तरूपः परिच्छेदो व्यंजनावग्रहः॥ अथवा व्यंज्यंते इति व्यंजनानि कृद्बहुलमिति वचनात्कर्मण्यनट्
व्यंजनानां शब्दादिरूपतया परिणतानां द्रव्याणामुपकरणेंद्रियसंप्राप्तानामवग्रहो ऽव्यक्तरूपः परिच्छेदो व्यंजनावग्रहः आह प्रथमं व्यंजनावग्रहो
भवति॥ ततोऽर्थावग्रहस्ततः कस्मादिह प्रथममर्थावग्रह उपन्यस्तः॥ उच्यते स्पष्टतयोपलभ्यमानत्वात् तथा ह्यर्थावग्रहः स्पष्टरूपतया सर्वैरपि जं
तुभिः संवेद्यते शीघ्रतरगमनादौ सकृत्सत्वरमुपलभ्यं न किंचिद्दृष्टं न परिभावितं सम्यगिति व्यवहारदर्शनात्॥ अपि चार्थावग्रहः सर्वेंद्रियमनो
भावी व्यंजनावग्रहस्तु नेति प्रथममर्थावग्रह उक्तः॥ संप्रति तु व्यंजनावग्रहादूर्द्ध्वमर्थावग्रह इति क्रममाश्रित्य प्रथमं व्यंजनावग्रहस्य रूपं तिपिपादयि
षुः प्रश्नं कारयति शिष्यं व्यंजणोग्गहे णं भंते कइविहे पण्णत्ते इह व्यंजनमुपकरणेंद्रियस्य शब्दादिपरिणतद्रव्याणां च परस्परं संबंध इत्युक्तं प्राक् ततश्च
तुर्णामेव श्रोत्रादीनामिंद्रियाणां व्यंजनावग्रहो न नयनमनसोस्तयोरप्राप्यकारित्वात् सा चाप्राप्यकारिता नंद्यध्ययनटीकायां प्रदर्शितेति नेह प्रदर्श्य
ते अर्थावग्रहः षड्विधस्तद्यथा॥ सोइंदियअत्थोग्गहइत्यादि॥ श्रोत्रेंद्रियेणार्थावग्रहो व्यंजनावग्रहोत्तरकालमेकसामायिकमनिर्देश्यसामान्यमात्रा
र्थग्रहणं श्रोत्रेंद्रियार्थावग्रहः॥ एवं घ्राणजिह्वास्पर्शनेंद्रियार्थावग्रहेष्वपि वाच्यं चक्षुर्मनसोस्तु व्यंजनावग्रहो न भवति॥ ततस्तयोः प्रथममेव स्वरूप
द्रव्यगुणक्रियाकल्पनानात्मनिर्देश्यसामान्यमात्रस्वरूपार्थाव्यग्रहणमर्थाव्यग्रहणमर्थावग्रहो वसेयः॥ नोइंद्रियस्याप्यवग्रहो इति नोइंद्रि ११९
यं मनस्तच्च द्विधा द्रव्यरूपं भावरूपं च तत्र मनःपर्याप्तिनामकर्मोदयतो यत् मनःप्रयोग्यवर्गणादलिकमादाय मनस्त्वेन परिणमितं तद्द्रव्य
रूपं मनस्तथा चाह नंद्यध्ययनचूर्णिकृत् मणपज्जत्तिनामकम्मोदयतो जोग्गे मणोदव्वे घित्तुं मणत्तेण परिणामियादव्वा दव्वमणो भन्नइ इति॥

तथा द्रव्यमनोवष्टंभेन जीवस्य यो मनःपरिणामः स भावमनस्तथा चाह नंद्यध्ययनचूर्णिकृत् देव जीवो पुण मणपरिणामकिरियावंतो भावमणो किंभ
णियं होइ मणदव्वालंबणो जीवस्स मणवावारो भावमणो भन्नइ इति॥ तत्रेह भावमनसा प्रयोजनं तद्ग्रहणे ह्यवश्यं द्रव्यमनसोपि ग्रहणं भवति॥ द्रव्य
मनोऽन्तरेण भावमनसोऽसंभवात्॥ भावमनो विनापि च द्रव्यमनो भवति यथा भवस्थकेवलिनस्ततउक्तं भावमनसा प्रयोजनं तत्र नोइंद्रियेण भावमन
सार्थावग्रहो द्रव्येंद्रियव्यापारनिरपेक्षो घटाद्यर्थस्वरूपपरिभावनाभिमुखः प्रथममेकसामायिको रूपाद्यर्थाकारादिविशेषचिंताविकलोऽनिर्देश्यसामान्य
मात्रचिंतात्मको बोधो नोइंद्रियार्थावग्रहः अवग्रहग्रहणं चोपलक्षणं तेन नोइंद्रियार्थावग्रहश्च साक्षादितरयोस्तु उपलक्षणात् उपादानं चिंत्यत्वा
नुसूत्रगतेरित्यदोषः॥ कइविहा णं भंते इंदिया पण्णत्ता इति द्रव्येंद्रियभावेंद्रियसूत्रं सुगमं प्रागभावितत्वात् कइ णं भंते दव्विंदिया पण्णत्ता इत्या
दि॥ द्रव्येंद्रियसंख्याविषयं दंडकसूत्रं च पाठसिद्धं॥ एकैकजीवविषयातीतबद्धपुरस्कृतद्रव्येंद्रियचिंतायां पुरस्कडा अट्ठवा सोलसावा॥ सत्तरसवा सं
खेज्जावा असंखेज्जावा अणंतावा इति यो नैरयिको ऽनंतरं भवे मनुष्यत्वमवाप्स्यति तस्य मानुषभवसंबंधीन्यष्टौ यः पुनरन्यतरवेतिर्यग्पंचें
द्रियत्वमवाप्य तेत उद्धृतो मनुष्येषु गत्वा सेत्स्यति तस्याष्टौ तिर्यग्पंचेंद्रियभवसंबंधान्यष्टौ मनुष्यभवसंबंधीनीति षोडश यः पुनरनंतरं नरकादुद्धृत
स्तिर्यग्पंचेंद्रियत्वमवाप्य तदनंतरमेकं भवं पृथिवीकायादिको भूत्वा मनुष्येषु समागत्य सेत्स्यति तस्याष्टौ तिर्यग्पंचेंद्रियभवसंबंधीनि एकं पृथिवीकायो
दिभवसंबंधि अष्टौ मनुष्यभवसंबंधी संख्येयं कालं संसारावस्थायिन इह विजयादिषु चतुर्षु गताः प्राकृतसंख्येयसंख्येयमनंतं वा बालं संसारेनाच
निष्ठंते॥ ततः संख्येया वा इत्येवोक्तसंख्येया वा अणंता इति॥ सर्वार्थसिद्धस्त्वनंतरं भवे नियमतः सिध्यति॥ ततस्तस्य जघन्योत्कृष्टं पुरस्कृतान्यष्टा
वेवेति बहुवचनचिंतायां नैरयिकसूत्रबद्धानि द्रव्येंद्रियाणि सप्तदश संख्येयकायं संसारावस्थायिनः संख्येयानि॥ अनंतकालमनंतानि॥ असुर
कुमारसूत्रे पुरस्कडा अट्ठवा नववा इत्यादि॥ तत्रासुरभावादुद्धृत्यानंतरभवे मनुष्यत्वमवाप्य सेत्स्यतस्तनोष्टौ असुरकुमारादयस्त्वीशानपर्यंताः पृथि
व्यप्वनस्पतिषूत्पद्यंते॥ ततो यो ऽनंतरभवे पृथिव्यादिषु गत्वा तदनंतरं भवे पृथिव्यादिषु गत्वा तदनंतरं मनुष्यत्वमवाप्य सेत्स्यति॥ तस्य नव संख्ये

यादिभावनाप्राग्वत्॥ पृथिव्यवनस्पतिसूत्रेषुपुरस्कडाअणंतावानवंबेति॥ पृथिव्यादयोह्यनंतरमुद्धृत्तामनुष्येषुसमुत्पद्यंतेसिध्यंतिचतत्रयोऽनंतरभवेम
नुष्यभवसंबंधीन्यष्टौयस्त्वनंतरमेकंपृथिव्यादिभवमवाप्यतदनंतरंमनुष्योभूत्वासेत्स्यतितस्यनवतेजोवायवोऽनंतरंमुद्धृत्तामनुष्यत्वमेवनप्राप्नुवंति
द्वित्रिचतुरिंद्रियास्त्वनंतरंमनुष्यत्वमवाप्नुवंतिपरंनसिध्यंतिततस्तेषांसूत्रेषुजघन्यपदेननवदेतिवक्तव्यंशेषभावनाप्रागुक्तानुसारेणकर्त्तव्या
मनुष्यसूत्रेषुपुरस्कृतानिद्रव्येंद्रियाणिकस्यापिसंतिकस्यापिनसंतीतितद्भवसिद्धिकोनसंतिशेषस्यसंतीतिभावः यस्यापिसंतिसोपियद्यनंतरभ
वेभूयोपिमनुष्योभूत्वासेत्स्यतितस्याष्टौयःपुनःपुनःपृथिव्याद्येकभवांतरितोमनुष्योभूत्वासिद्धिगामीतस्यनवशेषभावनाप्राग्वत्॥ सनत्कुमा
रादयोदेवाअनंतरमुद्धृत्तानपृथिव्यादिष्वायांतिकिंतुपंचेंद्रियेषुततस्तेनैरयिकवद्वक्तव्याः॥ तथाचाहसणंकुमारमाहिंदबंभलोयलंतग
सुक्कसहस्सारआणयपाणयआरणअच्चुयगेवेज्जगदेवस्सयजहानेरयस्सविजयादिदेवचतुष्टयसूत्रेषुयोऽनंतरभवेमनुष्यत्वमवाप्यसे
त्स्यतितस्याष्टौयःपुनरेकवारंमनुष्योभूत्वाभूयोपिमनुष्यत्वमवाप्यसेत्स्यतितस्यषोडशयस्त्वपांतरालेदेवत्वमनुभूयमनुष्योभूत्वासिद्धिगा
मीतस्यचतुर्विंशतिमनुष्यभवेष्वष्टौदेवभवेष्वष्टौभूयोपिमनुष्यभवेअष्टावितिसंख्येयानियाण्यसंख्येयानिनैरयिकायामसंख्यातत्वात्॥ एवं
शेषसूत्रेष्वप्युपयुज्यवक्तव्यंनवरंमनुष्यसूत्रेसियसंख्येयाइहसंमूर्छिममनुष्याःकदाचित्सर्वथानसंति॥ तदनंतरस्यचतुर्विंशतिमुहूर्तप्रमाण
स्यप्रागभिधानात्तत्रयदाप्रच्छासमयेसर्वथानसंतितदासंख्येयानिगर्भजमनुष्याणांसंख्येयत्वात्यदातुसंमूर्छिमाअपिसंतितदाअसं
ख्येयानिसर्वार्थमहाविमानदेवाःसंख्येयाःबादरत्वेमहाशरीरत्वेचसतिपरिमितपरिमितक्षेत्रवर्तित्वाततोबद्धानिपुरस्कृतानिचानितेषांद्र
व्येंद्रियाणिसंख्येयानि॥ ७॥ एगमेगस्सणंभंतेनेरइयस्सनेरइयत्तइत्यादिकस्सइअत्थिकस्सइनत्थिइतियोनरकादुद्धृत्तोभूयोपिनैरयि
कत्वंनाबाप्स्यतितस्यनभवंतियस्त्ववाप्स्यतितस्यसंतिसोपियद्येकवारमागामीततोष्टौद्वौवारौचेत्तर्हिषोडशयदित्रीन्वारान्ततश्चतु
र्विंशतिसंख्येयान्वारानागामिनःसंख्येयानीत्यादिमनुष्यत्वचिंतायांकस्सइअत्थिकस्सइनत्थिइतिनवक्तव्यं॥ मनुष्येष्वागमनस्यावश्यंभा

वित्वात्ततोजघन्यपदेअष्टौउत्कर्षतोऽनंतानीतिवक्तव्यंविजयविजयंतापराजितचिंतायामतीतानिद्रव्येंद्रियाणि॥ नसंतिकस्मादितिचेदुच्यते
इहविजयादिषुचतुर्षुगतोजीवोवियमात्ततउद्धृत्तोनजातुचिदपिनैरयिकादिषुपंचेंद्रियतिर्यक्पर्यवसानेषुतथाव्यंतरेषुज्योतिष्केचमध्येसमा
गमिष्यतितथास्वाभाव्यात्मनुष्येषुसौधर्मादिषुचागमिष्यतिनचापिजघन्यतएकंद्वौवाभवावुत्कर्षतःसंख्येयानअनंतान्वाततोनैरयिकस्य
विजयादित्वेअतीतानिद्रव्येंद्रियाणिनसंतीत्युक्तंपुरस्कृतानिअष्टौषोडशवाविजयादिषुहिरुत्पन्नस्यानंतरंभवेनियमतोमोक्षगमनात्
एवंयथानैरयिकस्यनैरयिकत्वादिषुचतुर्विंशतौस्थानेषुचिंतास्तातथाअसुरकुमारादीनामपिप्रत्येकंकर्त्तव्या॥ पूर्वोक्तभावनानुसारेण
चस्वयमुपयुज्यपरिभावनीयाभावेंद्रियसूत्राण्यपिसुगमान्येवंकेवलद्रव्येंद्रियगतभावभावनानुसारेणतत्रभावनाभावयितव्या॥ ७॥
इतिश्रीमलयगिरिविरचितायांप्रज्ञापनाटीकायांपंचदशमिंद्रियपदाख्यंपदंसमाप्तं॥ ७॥ तदेवंव्याख्यातंपंचदशमधुनाषोडशमारभ्यते
॥तस्यचायमभिसंबंधः॥ इहानंतरपदेप्रधानबंधहेतुत्वादिंद्रियवतामेवलेश्यादिसद्भावात्विशेषतइंद्रियवतामेवलेश्यादिसद्भावात् विशे
षतइंद्रियपरिणामउक्तस्ततस्तदनंतरमिहपरिणामसाम्यात्प्रयोगपरिणामप्रतिपाद्यतेतत्रचेदमादिसूत्रं॥ ७॥ कइविहेणंभंतेइत्यादि
कतिविधंकतिप्रकारेणमितिवाक्यालंकारेभदंतप्रयोगः प्रज्ञप्तः प्रयोगइत्यस्यघन्यंतस्यप्रयोगःपरिस्पंदक्रियाआत्मव्यापारइत्यर्थः अथ
वाप्रकर्षेणयुज्यतेव्यापार्यतेक्रियासुसंबध्यतेवासांपरायिकेर्यापथकर्मणासहात्मनेनतिप्रयोगः पुंनाम्नीतिकरणेघञ्प्रत्ययःभगवान्
हपंचदशविधःप्रज्ञप्तस्तदेवंपंचदशविधत्वंदर्शयतिसच्चमणप्पओगेइत्यादिसंतोमुनयःपदार्थावातेषुयथासंख्यंमुक्तिप्रापकत्वेनयथा
वस्थितवस्तुस्वरूपचिंतनेनचसाधुसत्यंअस्तिजीवःसदसद्रूपोदेहमात्रव्यापीत्यादिरूपतयायथावस्थितवस्तुचिंतनपरंसत्यंचतत्मनश्च
सत्यमनस्तस्यप्रयोगोव्यापारःसत्यमनःप्रयोगः असच्चमणपयोगेइतिसत्यविपरीतमसत्यंयथानास्तिजीवएकांतसद्रूपोवेत्यादि
कुविकल्पनपरंतच्चतन्मनश्चतस्यप्रयोगोऽसत्यमनःप्रयोगः॥ सच्चमोसमणप्पओगेइतिसत्यमृषासत्यासत्यंयथाधवखदिरपलाश

दिमिश्रेषुबहुषुशोकवृक्षेषुअशोकवनमेवेदमितिविकल्पनपरं तत्रह्विकतिपयाशोकवृक्षाणांसद्भावात्सत्यता अन्येषामपिधवखदिरादीनांसद्भा
वादसत्यताव्यवहारनयमतापेक्षयाचैवमुच्यते परमार्थतः पुनरिदमसत्यमेवयथाविकल्पितार्थायोगात् तच्चनम्मनश्चेत्यादिप्राग्वत् अथाअस
च्चामोसमणप्पउगइतियन्नसत्यनापिमृषानदसत्यामृषाइहविप्रतिपत्तौसत्यांयद्वस्तुप्रतिष्ठासयासर्वज्ञमतानुसारेणविकल्प्यतेयथाअस्ति
जीवः सदसद्रूपइत्यादितत्किलसत्यंपरिभाषितमाराधकत्वात् यत्पुनर्विप्रतिपत्तौसत्यांवस्तुप्रतिष्ठासयासर्वज्ञमतोत्तीर्णविकल्प्यतेयथाना
स्तिजीवएकांतनित्यादितदसत्यंविराधकत्वात् यत्पुनर्वस्तुप्रतिष्ठासामंतरेणस्वरूपमात्रपर्यालोचनयथापरंदेवदत्तात् घटआनेतव्यो
गौर्याचनीयाइत्यादिचिंतनपरंतत्असत्यामृषाइदंहिस्वरूपमात्रपर्यालोचनपरत्वात् नयथोक्तलक्षणंसत्यंनापिमृषएतदपिव्यवहारतया
मतापेक्षयाद्रष्टव्यमन्यथाविप्रतारणबुद्धिपूर्वकमसत्येऽन्तर्भवति अन्यत्तुसत्येतच्चतन्मनश्चतस्यप्रयोगो असत्यामृषामनःप्रयोगः एवंव
इपउगोविचउहाइतियथा मनःप्रयोगश्चतुर्द्धातथावाक्प्रयोगोपिचतुर्द्धा तद्यथा सत्यवाक्प्रयोगोमृषावाक्प्रयोगः असत्यामृषावाक्य
प्रयोगः एताश्चसत्यवागादयः सत्यमनःप्रभृतिवद्भावनीयाः पूर्वभाविताइति उरालियशरीरकायप्पउगेइति औदारिकादिशब्दार्थमग्रेव
क्ष्यामश्चौदारिकमेवशरीरं औदारिकशरीरं तदेवपुद्गलस्कंधसमुदायरूपत्वात् उपचीयमानत्वाच्चकायः औदारिकशरीरकायस्तस्यप्रयोगः
अयंचतिरश्चांमनुष्यस्यचपर्याप्तस्यउदारिकमिश्रशरीरकायप्रयोगइति औदारिकंचतत्मिश्रंच औदारिकमिश्रंकेनसहमिश्रमितिचेतदु
च्यते कार्मणेनतथाचोक्तंनिर्युक्तिकारेणशस्त्रपरिज्ञाध्ययने जोएणकम्मएणंआहारेइअणंतरंजीवोतेणपरंमिस्सेणंजावशरीरसनि
प्पत्तीनतुमिश्रत्वमुभयनिष्ठं तथाहि यथा औदारिकंकार्मणेनमिश्रंतथाकार्मणमप्यौदारिकेणमिश्रंततः कस्मादौदारिकमिश्रमेवतदुच्यतेनका
र्मणमितिउच्यते इहव्यपदेशाः सप्रवर्त्तनीयोयेनविवक्षितार्थप्रतिपत्तिरक्षाश्रोतृणामुपजायते अन्यथासंदेहापत्तितोविवक्षितार्थाप्रतिपत्त्याननेषा १२१
मुपकारः कृतस्यात् कार्मणंचशरीरमासंसारमविच्छेदेनावस्थितत्वात्सकलेष्वपिशरीरेषुसंभवितः कर्मणामिश्रमित्युक्तेनज्ञायतेकिंतिर्यगम

नुष्याणामपर्याप्तावस्थायांविवक्षितमुतदेवनारकाणामितितत उत्पत्तिमाश्रित्यौदारिकस्यप्रधानत्वात्कदाचित्कत्वाच्चनिःप्रतिपक्षवि
वक्षितार्थप्रतिपत्त्यर्थमौदारिकेणव्यदिश्यते औदारिकमिश्रमितितथायदौदारिकशरीरोवैक्रियलब्धिसंपन्नोमनुष्यास्तिर्यग्यंचेंद्रियो
पर्याप्तकबादरवायुकायिकोवावैक्रियंकरोति तदाकिलौदारिकशरीरप्रयोगएववर्तमानः प्रदेशान्विक्षिप्यवैक्रियशरीरयोग्यान्पुद्गला
नुपादायवैक्रियशरीरपर्याप्त्यायावत्तपर्याप्तिमुपगच्छतितावत्यद्यपिवैक्रियेणमिश्रतौदारिकस्योभयनिष्ठात्तथाप्यौदारिकस्यप्रारंभकतयाप्र
धानत्वात्तेनव्यपदेशश्चौदारिकमिश्रमितिनवैक्रियेणेति तथाआहारकमपिशरीरंयदाकश्चिदाहारकलब्धिमान्पूर्वधरः करोतितदाय
द्यप्याहारकेणमिश्रत्वमौदारिकस्योभयनिष्ठंतथाप्यौदारिकमारंभकतयाप्रधानमितितेनव्यपदेशप्रवर्त्तिरौदारिकमिश्रमितिनत्वाहारकेणेति
औदारिकमिश्रंचतनुशरीरंचेत्यादिपूर्ववत् वैक्रियशरीरकायप्रयोगोवैक्रियशरीरपर्याप्त्यापर्याप्तस्यवैक्रियमिश्रशरीरकायप्रयोगोदेवनार
कणामपर्याप्तावस्थायांमिश्रताचनदीनिकार्मणेनसहवेदितव्या अत्राक्षेपपरिहारौप्राग्वत्तथायदामनुष्यस्तिर्यग्यंचेंद्रियोवायुकायिकोवा
वैक्रियशरीरीभूत्वाकृतकार्योवैक्रियंपरिजिहीर्षुरौदारिकेप्रवेष्टुयततेतदाकिलवैक्रियशरीरबलेनौदारिकोपादानायस्वयर्त्ततेइतिवैक्रियस्य
प्राधान्यात्तेनव्यपदेशोनौदारिकेणेतिवैक्रियमिश्रमितितथाआहारकशरीरकायप्रयोग आहारकशरीरपर्याप्त्यापर्याप्तस्यआहारकमिश्र
शरीरकायप्रयोग आहारकादौदारिकंप्रविशतः एतदुक्तंभवतियदाआहारकत्वाशरीरीभूत्वाकृतकार्यः पुनरप्यौदारिकंगृह्णातितदायद्यपिमि
श्रत्वमुभयनिष्ठंतथाप्यौदारिकप्रवेशआहारकबलेनेत्याहारकस्यप्रधानत्वात्तेनव्यपदेशोनौदारिकेणाहारकमिश्रमिति एतच्चसिद्धांता
भिप्रायेणोक्तंकार्मग्रंथिकाः पुनर्वैक्रियस्यप्रारंभकालेपरित्यागकालेचवैक्रियमिश्रमाहारकशरस्यप्रारंभकालेपरित्यागकालेचवैक्रि
यमिश्रमाहारकशरीरस्यप्रारंभकालेपरित्यागकालेच आहारकमिश्रंनत्वेकस्यामप्यवस्थायामौदारिकमिश्रमितिप्रतिपन्नाः तै
जसकार्मणशरीरप्रयोगोविग्रहगतौसमुद्घातावस्थायांवातृतीयकेवलिनस्तृतीयचतुर्थपंचमसमयेषुइहतैजसंकार्मणेनसदाव्यभिचा

रीतियुगपत्तैजसकार्म्मणग्रहणंअमूनेवदशप्रयोगानजीवादिपुरूपनिपुचिंतयन्नाह॥जीवाणंभंतेकतिविहेपउगेपण्णत्तेइत्यादि॥तत्रजीवपदेपंच
दशापिप्रयोगानानजीवापेक्षयासदैवपंचदशानामपियोगानांलभ्यमानत्वात्नैरयिकपदेएकादश औदारिक औदारिकमिश्राहारकाहारकमिश्र
प्रयोगाणांतेषामसंभवात्॥एवंसर्वेष्वपिभवनपतिव्यंतरज्योतिष्कवैमानिकेषुभावनीयंपृथिव्यादिषुवायुकायवर्जेष्वेकेंद्रियेषुप्रत्येकंत्रयस्त्रयः
प्रयोगाऔदारिकौदारिकमिश्रकार्म्मणलक्षणाःवायुकायिकेषुपंचवैक्रियवैक्रियमिश्रयोरपितेषांसंभवात्द्वित्रिचतुरिंद्रियाणांप्रत्येकंचत्वा
रःऔदारिकमौदारिकमिश्रंकार्मणमसत्यामृषाभाषाचशेषास्तुसत्यादयोभाषास्तेषांनसंभवंतिगलेषुअसच्चमोसेवइतिवचनात्॥पंचेंद्रिय
तिर्य्यग्योनिकानांत्रयोदश॥आहारकाहारकमिश्रयोस्तेषामसंभवादसंभवश्चचतुर्दशपूर्वाधिगमासंभवात्॥मनुष्येषुपंचदशापिमनुष्या
णांसर्वभावसंभावात्॥अधुनाजीवादिषुपदेषुनियतप्रयोगभावंविचिंतयिषुरिदमाह॥जीवाणंभंतेइत्यादि॥प्रश्नसूत्रंसुगमंनिर्वचनसूत्रे
सर्वेपिताबद्भवेयुःसत्यमनःप्रयोगिनइत्यादिरेकोभंगःकिमुक्तंभवति॥सदैवजीवाबहवएवसत्यमनःप्रयोगिनोपियावद्वैक्रियमिश्रश
रीरकायप्रयोगिनोपिलभ्यंते॥तत्रसदैववैक्रियमिश्रशरीरकायप्रयोगिणोऽपिकर्मणशरीरकायप्रयोगिणोऽपिलभ्यंते॥तत्रसदैववैक्रि
यमिश्रशरीरकायप्रयोगिणोनारकादीनांसदैवोपपातोत्तरवैक्रियारंभसंभवात्सदैवकार्मणशरीरकायप्रयोगिनःसर्वदैववनस्पत्यादी
नांविग्रहेणावांतरगतौलभ्यमानत्वात्आहारकशरीरीचकदाचित्सर्वथानलभ्यंतेषण्मासान्यावदुत्कर्षतोऽतरस्याभावात्यदापिलभ्य
तेतदापिजघन्यपदेएकोद्वौवाउत्कर्षतःसहस्रपृथक्त्वं॥उक्तंच॥आहारगाइंलोएछम्मासेजानहोंतिविकयाइं॥उक्कोसेणंनियमाएक्कं
समयंजहण्णेणंहोंताइंजहन्नेणंएक्कंदोतिन्निपंचवहुतिवंउक्कोसेणउजगवंपुहुत्तमेत्तंसहस्साणं॥ततोयदाआहारकशरीरकायप्रयो
गीआहारकमिश्रशरीरकायप्रयोगीचैकोपिनलभ्यतेतदाबहुवचनविशिष्टत्रयोदशपदात्मकएकोभंगःत्रयोदशपदानामपिसदै १२२.
वबहुत्वेनावस्थितत्वात्यदात्वेशरीरकायप्रयोगीलभ्यते॥तदाद्वितीयः॥तेपियदाबहवोलभ्यंते॥तदात्तृतीयएवमेवआहारकमिश्र

शरीरकायप्रयोगिपदेनापिद्वौभंगौलभ्यतेइत्येककयोगेचत्वारोभंगाःद्विकयोगेपिप्रत्येकमेकवचनबहुवचनाभ्यांचत्वारइतिसर्वसंख्यया
जीवपदेनवभंगाः॥नैरयिकपदेसत्यमनःप्रयोगिप्रभृतीनिवैक्रियमिश्रशरीरकायप्रयोगिपर्यंतानि सदैवबहुवचनेनदशपदान्यवस्थि
तानीत्येकोभंगः॥अथवैक्रियमिश्रशरीरकायप्रयोगिणःसदैवकथंलभ्यंतेद्वादशमौहूर्त्तिकगत्युपपातविरहकालभावात्उच्यतेउत्तर
वैक्रियापेक्षया॥तथाहि॥यद्यपिद्वादशमौहूर्त्तिकोगत्युपपातविरहकालस्तथापितदानीमपिउत्तरवैक्रियारंभिणःसंभवंतिउत्तरवैक्रि
यारंभेभवधारणीयंवैक्रियारंभमिश्रंतद्बलेनोत्तरवैक्रियारंभात्॥भवधारणायप्रदेशेवोत्तरवैक्रियमिश्रंउत्तरवैक्रियबलेनभवधार
णीयेप्रवेशात्ततएवमुत्तरवैक्रियापेक्षयाभवधारणीयोत्तरवैक्रियमिश्रसंभवात्तदानामपिवैक्रियशरीरमिश्रकायप्रयोगिणोनैरयिका
लभ्यंतेकार्मणशरीरकायप्रयोगीचनैरयिकःकदाचिदेकोपिनलभ्यतेद्वादशमौहूर्त्तिकगत्युपपातविरहकालभावात्॥यदापिलभ्यते
तदापिजघन्यतएकोद्वौवाउत्कर्षतोऽसंख्येयाः॥ततोयदाएकोपिकार्मणशरीरकायप्रयोगीनलभ्यते॥तदाप्रथमोभंगोयदापुनरेकस्त
दाद्वितीयोयदाबहवस्तदातृतीयइति॥एतएवत्रयोभंगाभवनपतिव्यंतरज्योतिष्कवैमानिकेषुभावनीयाः॥पृथिव्यप्तेजोवनस्पतिषु
औदारिकशरीरकायप्रयोगिकमिश्रशरीरकायप्रयोगीकमिश्रशरीरकायप्रयोगिणोऽपिकार्मणशरीरकायप्रयोगिणोपिसदाबहव
एवलभ्यंते॥इतिपदत्रयबहुवचनात्मकःप्रत्येकमेकएवभंगःवायुकायिकेष्वौदारिकद्विकवैक्रियद्विककार्मणशरीरलक्षणपदपंचकबहुवच
नात्मकएकोभंगोद्वित्रिषुवैक्रियमिश्रशरीरिणांचसदैवबहुत्वेनलभ्यमानत्वात्॥द्वींद्रियेषुयद्यप्यंतर्मुहूर्त्तिकउपपातविरहकालस्तथा
प्युपपातविरहकालांतर्मुहूर्त्तलघुऔदारिकमिश्रगतमंतर्मुहूर्त्तमतिबहुप्रमाणातमतऔदारिकमिश्रशरीरकायप्रयोगिणोपितेषुस
दैवलभ्यंतेकार्मणशरीरकायप्रयोगीतुकदाचिदेकोपिनलभ्यतेआंतर्मुहूर्त्तिकोपपातविरहकालभावात्यदापिलभ्यतेतदापिज
घन्यतएकोद्वौवाउत्कर्षतोऽसंख्येयाः॥ततोयदाएकोपिकार्मणशरीरकायप्रयोगीनलभ्यते॥तदाप्रथमोभंगः॥यदापुनरेकःका

Dr. BHAU DAJI MEMORIAL

र्मणशरीरलभ्यंते॥तदाद्वितीयः यदाबहवस्तदातृतीयइति॥ एवंत्रिचतुरिंद्रिचतुरिंद्रियेष्वपिभावनीयं॥पंचेंदियतिरिक्खजोणियाजहानेरइयाइत्या
दि॥पंचेंद्रियतिर्यग्योनिकायथानैरयिकास्तथावक्तव्यानवरंवैक्रियवैक्रियमिश्रशरीरकायप्रयोगिस्थाने औदारिकमिश्रशरीरकायप्रयोगिनोवक्त
व्याः किमुक्तंभवति सत्यमनःप्रयोगिनोवक्तव्याःकिमुक्तंभवति सत्यमनःप्रयोगिनोपीत्यादि॥ तावद्वक्तव्यंयावदसत्यामृषावाक्प्रयोगिणोपितन
औदारिकशरीरकायप्रयोगिणोपि औदारिकमिश्रशरीरकायप्रयोगिणोपीतिवक्तव्यं॥ एतानिदशपदानिबहुवचनेनसदावस्थितानियद्यपिच
तिर्यक्पंचेंद्रियाणामप्युपपातविरहकालआंतर्मौहूर्तिकस्तथाप्युपपातविरहकालांतर्मुहूर्त्तलघुश्चौदारिकमिश्रांतर्मुहूर्त्तमपिबहुतिस्तत्रायौ
दारिकमिश्रशरीरकायप्रयोगिणःसदालभ्यंते॥यस्तुद्वादशमौहूर्तिकउपपातविरहकालःसगर्भव्युत्क्रांतिस्थानसामान्यपंचेंद्रियतिरश्चामि
तिरश्चामितिकार्मणशरीरकायप्रयोगीनुतेयपिकदाचिदेकोपि॥नलभ्यतेआंतर्मौहूर्तिकोपपातविरहकालभावात्॥ ततोयदाएकोपिकार्म
णशरीरीनलभ्यते॥तदाप्रथमोभंगः यदापुनरेकोलभ्यते॥ तदाद्वितीयः॥ यदाबहवस्तदातृतीयःमनुष्येषुमनश्चतुष्टयवाक्चतुष्टयौदारिक
वैक्रियद्विकरूपाण्येकादशपदानिसदैवबहुवचनेनलभ्यंतेवैक्रियमिश्रशरीरिणःकथंसदैवलभ्यंतेइतिचेत्उच्यते॥विद्याधराश्चपक्षयानथा
हिविद्याधराअन्येपिनकेचिन्मिथ्यादृष्ट्यादयोवैक्रियलब्धिसंपन्नाअन्यानभावेनसदैवविकुर्वणायांलभ्यंते आहचमूलटीकाकारःमनुष्या
वैक्रियमिश्रशरीरप्रयोगिणः॥ सदैवविद्याधरादीनांविकुर्वाणाभावादिति॥ औदारिकमिश्रशरीरकायप्रयोगीकार्मणशरीरकायप्रयो
गीच कदाचित्सर्वथानलभ्यतेद्वादशमौहूर्तिकोपपातविरहकालभावात्॥ आहारकशरीराआहारकमिश्रशरीरीचकदाचित्कप्रागे
वोक्तः ततऔदारिकमिश्राद्यभावेपदैकादशकबहुवचनलक्षणएकोभंगः॥ ततऔदारिकमिश्रपदेनएकवचनबहुवचनाभ्यांद्वौभं
गौआहारकपदेनद्वौचाहारकमिश्रपदेनद्वौकार्मणपदेनत्येककसंयोगेअष्टौभंगाःद्विकसंयोगेप्रत्येकमेकवचनबहुवचनाभ्या १२३
मौदारिकमिश्राहारपदयोश्चत्वारएवमेवऔदारिकमिश्राहारकमिश्रपदयोश्चत्वारः॥ औदारिकमिश्रकार्मणयोश्चत्वारःआहारकाहा

रकमिश्रयोश्चत्वारः॥ आहारककार्मणयोश्चत्वारःआहारकमिश्रकार्मणयोश्चत्वारइतिसर्वसंख्यायाद्विकसंयोगेचतुर्विंशतिर्भंगाःत्रिक
संयोगेऔदारिकमिश्राहारकमिश्रपदानामेकवचनबहुवचनाभ्यामष्टौभंगाः॥अष्टौऔदारिकमिश्राहारककार्मणानामष्टौऔदारिक
मिश्राहारकमिश्रकार्मणानामष्टावाहारकाहारकमिश्रकार्मणानामितिसर्वसंख्ययात्रिकसंयोगेद्वात्रिंशद्भंगाः॥औदारिकमिश्राहारका
हारकमिश्रकार्मणरूपाणांचतुर्णांपदानामेकवचनबहुवचनाभ्यांषोडशभंगाः॥सर्वसंकलनयाभंगानामशीतिरिति॥उक्तःप्रयोगःप्रयो
गवशाच्चजीवानांचगतिर्भवति॥ततोगतिनिरूपणार्थमाह॥७॥कइविहेणंभंतेगइप्पवाएइत्यादिगमनंगतिःप्राप्तिरित्यर्थः॥प्राप्तिश्चदेशांतर
विषयापर्यायांतरविषयाचउभयत्रापिगतिशब्दप्रयोगदर्शनात्॥ तथाहि॥ द्वगतोदेवदत्तःपत्तनंगतः॥तथावचनमात्रेणाप्यसौगतःकोपमि
तिलोकांतरेष्युभयथाप्रयोगः॥परमाणुरेकसमयेनएकस्माद्लोकांतादपरंलोकांतंगच्छति॥ तथानानितान्यध्यवसायांतराणिगच्छंतीतिगतेप्र
पातोगतिप्रपातः प्रज्ञप्तः॥ कुत्रकुत्रगतिशब्दप्रवृत्तिरूपनिपततीत्यर्थः॥भगवानाहपंचविधःप्रज्ञप्तः॥तदेवपंचविधत्वंदर्शयति॥प्रयोगगतिरित्यादिप्रयो
गःप्रागुक्तः॥पंचदशविधःसएवगतिःप्रयोगगतिः॥इयंदेशांतरेप्राप्तिलक्षणाद्रष्टव्याः॥सत्यमनःप्रभृतिपुद्गलानांजीवेनव्यापार्यमाणानां॥ यथायोग
मल्पबहुदेशांतरगमनाततःगईइति॥ ततोविस्तीर्णसचासौगतिश्चततगतिः॥तथाहियंग्रामंसन्निवेशंप्रतिप्रतिष्ठितोदेवदत्तादिस्तंग्रामादिकंयावदद्या
पिनप्राप्नोतितावदंतरा पथिएकैकस्मिन्पदन्यासेततदेशांतरप्राप्तिलक्षणागतिरस्तीतिततगतिः॥इयंविस्तीर्णत्वविशेषेणापृथगुपात्ताअन्यथाप्रयोग
गतावेवेयमंतर्भवति॥पादन्यासस्यशरीरप्रयोगात्मकत्वात्॥एवमुत्तरत्रापियथायोगंपरिभावनीयं॥ तथाबंधछेयणगईइतिबंधनस्यछेदनंबंध
नछेदनंतस्माद्गतिर्बंधनछेदनगतिः॥साचजीवेनविप्रमुक्तस्यशरीरस्यशरीराद्वाविच्युतस्यजीवस्याचसातव्या॥ननुकोशबंधविच्छेदादेरंडबी
जादेरूत्स्याविहायोगतिभेदत्वेनवक्ष्यमाणत्वात्उववायगईइतिउपपातःप्रादुर्भावसचक्षेत्रभवनोभवभेदात्त्रिविधः॥ तद्यथा॥ क्षेत्रोपपातोनोभ
वोपपातश्च॥तत्रक्षेत्रमाकाशंयत्रनारकादयोजंतवःसिद्धापुद्गलावाअवतिष्ठंते॥भवकर्मसंपर्कजनितोनैरयिकत्वादिकःपर्यायाभवतिक

र्मवशवर्त्तिनः प्राणिनोऽस्मिन्निति भवइतिव्युत्पत्तेः नोभवो भवव्यतिरिक्तः कर्मसंपर्कसंपाद्यनैरयिकत्वादिपर्यायरहितइतिभावः सचपुद्गलःसिद्धोवा
उभयस्यापि यथोक्तलक्षणभवानीतत्वात् ऊपपातगतिः विहायोगतिरिति विहायसाआकाशेन गतिर्विहायोगतिः साचोपाधिभेदात्सप्तदशविधा तद्यथा
स्पृशद्गतिरित्यादि तत्रपरमाण्वादिकं यदन्येनपरमाण्वादिकेन परस्परंसंस्पृश्यसंबंधमनुभूयामनुभूयेत्यर्थइतिभावः गच्छतिसाद्यःशद्गतिः स्पृश
तोगतिरितिव्युत्पत्तेः तद्विपरीताअस्पृशद्गतिः यत्परमाण्वादिनासहपरस्परंसंबंधमनाप्यगच्छति यथापरमाणुरेकेणसमयेनएकस्माल्लोकां
तात्परंलोकांतमिति उपसंपद्यमानगतिर्यदन्यमुपसंपद्याश्रित्यतदवष्टंभेनगमनंयथाधनसार्थवाहावष्टंभेनधर्मघोषसूरीणांअनुपसंपद्य
मानगतिर्यतःपरस्परमुपष्टंभरहितानांपथिगमनं मांडूगगतिर्यन्मांडूकस्येदोप्लुत्यगमनं नावागतिर्यन्नावामहनद्यादौगमनं नयगतिर्यन्न
यानांनैगमादीनांस्वस्वमतपोषणंअथवायन्नयानांसर्वेषांपरस्परसापेक्षाणांप्रमाणाबोधितवस्तुव्यवस्थापनंसानयगतिः छायागतिः छ
यामनुसृत्यतदुपष्टंभेनतांवासमाश्रयितुंगतिः छायागतिः छायानुपातगतिरितिछायायाः स्वनिमित्तपुरुषादेरनुपातेनअनुसरणेनगतिः
छायानुपातगतिः तथाहिछायापुरुषमनुसरतिनतुपुरुषश्छायामतश्छायायाअनुपातगतिः लेश्यागतिर्यत्तिर्यग्मनुष्याणांकृष्णादिलेश्याद्र
व्याणिनीलादिलेश्याद्रव्याणिसंप्राप्यतद्रूपादितयापरिणमंति लेश्यानुपातगतिरितिलेश्यायाअनुपातोऽनुसरणंतेनगतिर्लेश्यानुपात
गतिः लेश्यायाइत्यत्रविग्रहवेलायांकर्मणिषष्ठी यतोवक्ष्यतियानिलेश्याद्रव्याणिपर्यादायजीवःकालंकरोति तल्लेश्येषूपजायतेतल्ले
श्येषुततोजीवोलेश्याद्रव्याण्यनुसरति ननुतानिजीवमनुसरंतीतिउद्दिश्यप्रविभक्तगतिरिति प्रविभक्तंप्रतिभक्तंप्रतिनियतमाचा
र्यादिकमुद्दिश्ययत्तत्पार्श्वेगच्छतिसाउद्दिश्यप्रविभक्तगतिः चतुःपुरुषप्रविभक्तगतिरितिचतुर्णांपुरुषाणांप्रविभक्तागतिश्चतुःपुरुषप्रवि
भक्तगतिस्तच्चतुर्णांतंसमगमंपद्यवठियाइत्यादिनाग्रंथेनस्वयमेववक्ष्यतितथावंकावक्राचासौगतिश्चवंकगतिः साचतुर्धातद्यथाघट्टन १२४
तास्तंभनताश्लेषणताप्रपतनतातत्रघट्टनशब्दस्याभावः प्रवृत्तिनिमित्तंघट्टनताघट्टनमेवचेतिएवंशेषपदशब्दार्थोविभावनीयः

तत्रघट्टनंस्वंजागतिःस्तंभनंग्रीवायांधमन्यादीनांतिष्ठतोवात्मनोऽंगप्रदेशानांश्लेषणमूर्वादीनांजानुप्रभृतिभिःसंबंधःपतनंतिष्ठतएवग
च्छतोवायद्भुवनंएतानिचघट्टनादीनिजीवस्यानीप्सितत्वादशस्यत्वाच्च वंकगतिशब्दवाच्यानितथापंकेगतिःपंकग्रहणमुदकस्याप्युपलक्ष
णंतेनपंकेनुदकेवाऽतिदुस्तरंयदात्मीयंकायंकेनापिसहोद्वंध्यलेनगच्छतिसापंकगतिः बंधनविमोचनगतिरितिबंधनाद्विमोचनंतेनग
तिर्बंधनविमोचनगतिर्यदाम्रादिफलानामतिपरिपाकागतानामतएवबंधनाद्विच्युतानांयदधोविश्रसयानिर्व्याघातेनगमनंसाबंधनवि
मोचनगतिरितिभावः एतदेवसूत्रकृदुपदर्शयति सेकिंतंपयोगगइत्यादि सूत्रमपदपरिसमाप्तेः नवरंजंबुद्दीवेदीवे भरहेरवयवा
सस्सुसपरक्खंसपडिदिसिंसिद्धिखित्तोववायगईइतिजंबूद्वीपेद्वीपेयद्भरतवर्षमेरोपरिसिद्धक्षेत्रोपपातगतिर्भवति कथमित्याह सपक्षंसप्र
तिदिकतत्रसहपक्षाःपार्श्वाःपूर्वापरदक्षिणोत्तररूपायस्मिन्सिद्धक्षेत्रोपपातगतिभवनेतत्सपक्षंसहप्रतिदिशोविदिशोविदिशआग्नेय्या
दयोयस्मिन्तत्सप्रतिदिकक्रियाविशेषणमेततएषोऽत्रभावार्थः जंबूद्वीपेभरतैरावतवर्षयोरुपरिसर्वासुदिक्षुविदिक्षुचसर्वत्रसिद्धक्षेत्रो
पपातगतिर्भवतीति एवंशेषसूत्रेष्वपिभावनीयंउपसंपद्यमानगतिसूत्रेजेणजरायंवाइत्यादि राजापृथिवीपतिः युवराजागतोचिंताकारीराजप्रश्
रंईश्वरअणिमाद्यैश्वर्ययुक्तसूरवःपरितुष्टनरपतिप्रदत्तपट्टबंधविभूतिपितोराजस्थानीयःमाडंबिकःछिन्नमडंबाधिपः कौटुंबिकःकतिपयकुटुंबस्वा
मी इभमर्हतीइभ्योधनवान्श्रेष्ठीश्रीदेवताध्यासितसौवर्णपट्टभूषितोत्तमांगः सेनापतिर्नृपतिनिरूपितचतुरंगसैन्यनायकःसार्थवाहःसार्थनायकः नौ
गतिसूत्रेपुव्ववेतालिइत्यादि वेतालीशब्दोदेशीवचनत्वाद्वेतालातटवाची ॥१६॥ ॥इतिश्रीमलयगिरिविरचितायांप्रज्ञापनाटीकायांषोडशं
प्रयोगपदंसमाप्तं ॥१६॥ एतदेवमुक्तंषोडशंप्रयोगपदंसंप्रतिसप्तदशमारभ्यते अस्यचायमभिसंबंधः इहानंतरपदेप्रयोगप्रतिपरिणामउक्तःसंप्रति
परिणामसाम्याल्लेश्यापरिणामउच्यते अथलेश्येतिकःशब्दार्थउच्यतेलिश्यतेश्लिष्यतेआत्माकर्मणासहानयेतिलेश्याकृष्णादिद्रव्य
साचिव्यादात्मनःपरिणामविशेषः उक्तंच कृष्णादिद्रव्यसाचिव्यात्परिणामोयआत्मनःस्फटिकस्येवतत्रायंलेश्याशब्दःप्रवर्त्ततेअ

अकानिकृष्णादीनिद्रव्याणिउच्यन्तेइहयोगेसतिलेश्याभवतियोगाभावेचनभवतिनतोयोगेनसहान्वयव्यतिरेकदर्शनात्॥ योगनिमित्तालेश्येतिनि
श्चीयतेसर्वत्रापितन्निमित्तत्वनिश्चयस्यान्वयव्यतिरेकदर्शनमूलत्वात्योगनिमित्ततायामपिविकल्पद्वयमवतरतिकिंयोगांतर्गतद्रव्यरूपायोग
निमित्तंकर्माद्रव्यरूपाचातत्रतावद्योगनिमित्तकर्मद्रव्यरूपाविकल्पद्वयानतिक्रमात्॥ तथाहियोगनिमित्तकर्मद्रव्यरूपासतीघातिकर्मद्रव्य
पाअघातिकर्मद्रव्यरूपावानतावत्घातिकर्मद्रव्यरूपातेषामभावेपिसयोगिकेवलिनिलेश्यायाःसद्भावात्नाप्यघातिकर्मरूपातत्सद्भावेपि अ
योगिकेवलिनिलेश्यायाअभावात्ततःपारिशेष्यात्योगांतर्गतद्रव्यरूपाप्रत्येयानिद्रव्याणियावत्कषायास्तावत्तेषामप्युदयोपबृंहकाणिभ
वंतिदृष्टंचयोगांतर्गतानांद्रव्याणांकषायोदयोपबृंहणासामर्थ्यंयथापित्तद्रव्यस्यतथाहिपित्तविशेषादुपलक्ष्यतेमहान्प्रवर्द्धमानःकोपोऽन्यु
द्गवाह्यान्यपिद्रव्याणि॥कर्मणामुदयक्षयोपशमादिहेतवउपलभ्यंतेयथाब्राह्मीऔषधिज्ञानावरणक्षयोपशमस्यसुरापानंज्ञानावरणोदयस्यकथ
मन्यथायुक्तायुक्तविवेकविकलतोपजायतेदधिभोजनंनिद्रारूपदर्शनावरणोदयस्यतत्किंयोगद्रव्याणिनभवंति॥तेनयःस्थितिपाकविशेषो
लेश्यावशादुपगीयतेशास्त्रांतरेसमस्यगुपपन्नोयतःस्थितिपाकोनामानुभागउच्यतेतस्यनिमित्तंकषायोदयांतर्गतकृष्णादिरूपलेश्यापरिणामः
तेचपरमार्थतःकषायस्वरूपाएवतदंतर्गतत्वात्॥ केवलंयोगांतर्गतद्रव्यसहकारिकारणभेदवैचित्र्याभ्यांतेकृष्णादिभेदैर्भिन्नास्तारतम्य
भेदेनविचित्राश्चोपजायंतेतेनयत्भगवताकर्मप्रकृतिकृताशिवशर्माचार्येणशतकाख्येग्रंथेभिहितंठिइअणुभागंकसायउकुणइइतितद
पिसमीचीनमेवकृष्णादिलेश्यापरिणामानामपिकषायोदयांतर्गतानांकषायत्वात्तेनयदुच्यतेकैश्चित्योगपरिणामत्वेलेश्यानांयोगापयडिप
एसठियअणुभागंकसायउकुणइइतिवचनात्प्रकृतिप्रदेशबंधहेतुत्वमेवस्यात्नकर्मस्थितिहेतुत्वमितितदपिनसमीचीनंयथोक्तभावा १२५
र्थापरिज्ञानात्अपिचनलेश्याःस्थितिहेतवःकिंतुकषायालेश्यास्तुकषायोदयांतर्यांतर्गताःअनुभागहेतवःअतएवास्थितिविपा
कविपाकविशेषस्तस्यभवतिलेश्याविशेषेणेत्यनुभागप्रतिपत्त्यर्थेपाकग्रहणंएतच्च॥सुनिश्चितंकर्मप्रकृतिटीकादिषुनतःसिद्धांतपरि

ज्ञानमपिनसम्यक्तेषामस्तियदप्युक्तंकर्मनिःष्यंदोलेश्यानिष्यंदुरूपत्वेहियावत्कषायोदयस्तावन्निःष्यंदस्यापिसद्भावात्कर्मस्थितिहेतुत्वमपि
युज्यातएवेत्यादितदप्यश्लीलंलेश्यानामनुभागबंधहेतुनयास्थितिबंधहेतुत्वायोगात्अन्यकर्मनिष्यंदःकिंकर्मकल्कउतकर्मसारःनताव
त्कर्मकल्कस्तस्यासारत्वयोत्कृष्टानुभागबंधहेतुत्वानुपपत्तिप्रसक्तेः॥कल्कोह्यसारोभवति॥अस्यारूपकथमुत्कृष्टानुभागबंधहेतवो
पिलेश्याभवंति॥अथकर्मसारइतिपक्षस्तर्हिकस्य २ कर्मणःसारइतिवाच्यंयथायोगमष्टानामपीतिअष्टानामपिकर्मणांशास्त्रेवि
पाकावर्ण्यतेनचकस्यापिकर्मणोलेश्यारूपोविपाकउपदर्शितस्ततःकथंकर्मसारपक्षमंगीकुर्महेतस्मात्पूर्वाचार्यएवपक्षःश्रेयानित्यंगीकर्त
व्यस्तस्यहरिभद्रसूरिप्रभृतिभिरपितत्रप्रदेशेऽंगीकृतत्वादिति॥अस्मिंश्चलेश्यापदेषट्उद्देशकास्तत्रेयंप्रथमोद्देशकार्थसंग्रहगाथा॥आहा
रेत्यादिसमशब्दःपूर्वार्द्धेप्रत्येकमपिसंबध्यतेउत्तरार्द्धेप्रतिपदंसाक्षात्संबंधिनएवास्तेततोऽयमर्थःप्रथमोऽधिकारःसर्वेसमाहारासर्वेसमा
हाराःसर्वेसमोच्छ्वासाइतिप्रश्नोपलक्षितःद्वितीयःसमकर्माणइतितृतीयः॥समवर्णाइतिचतुर्थःसमलेश्याकाइतिपंचमःसमवेदनाका
इतिषष्ठः॥समक्रियाइतिसमायुषइति अथलेश्यापरिणामविशेषाधिकारेकथममीषामर्थानामुपन्यासोपपत्तिःउच्यतेअनंतरप्रयोगपदे
इदमुक्तंकइविहेणंभंतेगइप्पवाएइतिगोयमापंचविहेपयोगगईबंधणछेयणगईउववायगई॥नत्थजासाउववायगईसातिविहापन्न
त्तोववायगईभवोववायगईनोभवोववायगईतत्थभवोववायगईचउहानेरइयभवोववायगईतिरिक्खजोणियभवोववायगईमणुस्सभवोववा
यगईइति॥तत्रनारकत्वादिभवलेनोत्पन्नानांजीवानामुपपातसमयादारभ्याहाराद्यर्थसंभवोवशांभावीनतोलेश्याप्रक्रमेपितेषामुपन्यास
सत्वंयथोद्देशंनिर्देशइतिन्यायात्प्रथमंसमाहारइत्यादि॥प्रश्नोपलक्षितमर्थाधिकारमाह॥ ५४ नेरइयाणंभंतेइत्यादिप्रश्नसूत्रंसुगमंभगवाना
हगोयमानोत्यादिनायमर्थःसमर्थः॥नायमर्थोयुक्त्युपपन्नइतिभावः॥पुनःप्रश्नयतिसेकेणठेणमित्यादिसेशब्दोऽथशब्दार्थः॥अथकेनार्थेनकेन
प्रयोजनेनकेनकारणेनेतिभावः॥भदंतएवमुच्यतेनोनैरयिकाःसर्वेसमाहाराइत्यादि॥इहाल्पत्वंमहत्त्वंचापेक्षिकं॥तत्रजघन्यमल्पत्वमंगुला

संख्येयभागमात्रमुत्कृष्टंमहत्त्वंपंचधनुःशतमानत्वसेतच्चंभवधारणीयशरीरापेक्षया उत्तरवैक्रियापेक्षयातु जघन्यमल्पत्वमंगुलासंख्यातभा
गमात्रत्वमितरत्तुःसहस्रमानत्वंएतावतावकिंममशरीराइत्यस्यप्रश्नस्योत्तरमुक्तं अथशरीरस्यप्रश्नोद्वितीयस्थानोक्तःतत्कथमस्यप्रथमतए
वंनिर्वचनमुक्तंउच्यते शरीरविषमताभिधानेसत्याहारोच्छ्वासयोर्वैषम्यंस्तुप्रतिपादितंभवतिद्वितीयस्थानोक्तस्यापिशरीरप्रश्नस्यप्रथमंनिर्वच
नंमुक्तं इदानींमाहारोच्छ्वासयोर्निर्वचनमाह ७. तत्रणमित्यादितत्रात्पशरीररूपराशिद्वयमध्येणमितिवाक्यालंकृतौयेयतोमहाशरीरास्तेत
दपेक्षयाबहुतरान्पुद्गलान्आहारयंतिमहाशरीरत्वादेवदृश्यतेहिलोकेवृहच्छरीरोबह्वाशीयथाहस्ती अल्पशरीरोल्पभोजीशशकवत्
बाहुल्यापेक्षयाचेदमुदाहरणमुपन्यस्यंते अन्यथाकोपिबृहच्छरीरोल्पमश्नातिकश्चिदल्पशरीरोपिभूरिभुंक्ते तथाविधमनुष्यवत्तनारकाः
पुनरुपपातादिसंख्येयानुभावादन्यत्रासद्वेद्योदयवर्तित्वादेकांतेनयथामहाशरीरादुःखिनास्तीव्राहाराभिलाषाश्चभवंतितथानियमाद्बहुतरान्
पुद्गलानाहारयंति तथाबहुतरान्पुद्गलान्परिणामयंति आहारपुद्गलानुसारित्वात्परिणामस्यपरिणामश्चाभ्यवहृताहारकार्यमित्युक्तःतथा
बहुतरोपुद्गलेउच्छ्वसंतिइतिबहुतरान्पुद्गलानुच्छ्वासतयाकृष्टानिश्वसंतिइतिनिश्वासतयामुंचंतिमहाशरीरत्वादेवदृश्यंतेहिवृहच्छरीर
स्तद्यावतापिनरापेक्षयाबहूच्छ्वासनिश्वासाइतिदुःखिना अपितथैवदुःखिताश्चनारकाइतिआहारस्यैवकालकृतंवैषम्यमाहाअभिक्ख
णमित्यादिअभीक्ष्णंपौनःपुन्येनाहारयंतिमियतोमहाशरीरास्तदपेक्षयाशीघ्रतराहारग्रहणव्यापाराइत्यर्थः अभीक्ष्णमुच्छ्वसंतिअभीक्ष्णं
निश्वसंतिमहाशरीरत्वेनदुःखिततरत्वादनवरतमुच्छ्वासादिकुर्वंतीतिभावः तत्थणंजेतेइत्यादितत्रयेतेअप्पसरीरेइत्यादितावतैवार्थसिद्धेर्येतइति
उच्यतेतद्भाषामात्रमेवअल्पशरीरास्तेअल्पतरान्पुद्गलानाहारयंति येयतोमहाशरीरास्तेतदाहरणीयपुद्गलापेक्षयाअल्पतरान्पुद्ग १२६
लानाहारयंतिअल्पशरीरत्वादेवेतिभावार्थः आहच्चआहारयंतिइतिकदाचिन्नाहारयंतिमहाशरीराहारग्रहणांतरालापेक्षयाबहु
तरकालांतरतयेत्यर्थः आहच्चनीससंतिएतेह्यल्पशरीरत्वेनैवमहाशरीरापेक्षया अल्पतरदुःखत्वादाहच्चकदाचिन्मांतरमित्यर्थः उच्छ्वासा

दिकुर्वंतीतिभावः अथवा अपर्याप्तिकाले अल्पशरीराःसंतोलोमाहारापेक्षयानाहारयंतिउच्छ्वासापर्याप्तकत्वेननोच्छ्वसंतिअन्यदात्वाहारयंति
उच्छ्वसंतिचेत्यतआह आहच्चआहारयंतिआहच्चऊससंतीत्युक्तं सेएएणट्ठेणमित्यादिनिगमनवाक्यंसुगमंसंप्रतिसमकर्मकत्वाधिकार
माहनेरइयाणमित्यादिपुव्वोववन्नगायपच्छोववन्नगायइतिपूर्वंप्रथममुपपन्नाःपूर्वोत्पन्नास्तएवस्वार्थिककइतिप्रत्ययविधानात्पूर्वोत्पन्नका
एवंपश्चादुत्पन्नकास्तत्रपूर्वोत्पन्नपश्चादुत्पन्नानांमध्येयेपूर्वोत्पन्नास्तैर्नारकायुर्नरकगत्यसातवेदनीयादिकंप्रभूतंनिर्जीर्णमल्पंचावशिष्यते
इत्यल्पकर्माणोनारकाःइतरेतद्विपर्ययान्महाकर्माणोनारकाः एतच्चसमानस्थितिकायेनारकास्तानधिकृत्यप्रणीतमवसेयं अन्यथाहिरत्नप्रभाया
मुत्कृष्टस्थितिर्नारकस्यबहून्यायुःपिक्षयमितिपल्योपमावशेषेवतिष्ठतितस्यामेवरत्नप्रभायांदशवर्षसहस्रस्थितिनारकोऽन्यःकश्चिदुत्पन्नः
सकिंप्रागुत्पन्नकपल्योपमावशेषायुर्नारकयपेक्षयाबहुकर्माथवामहाकर्मेतिवर्णसूत्रेविशुद्धवर्णतरगाइतिविशुद्धतरवर्णाइत्यर्थः
कथमितिचेदुच्यते इहयस्मान्नैरयिकाणामप्रशस्तवर्णानामकर्मणःशुभास्तीव्रोऽनुभागोदयोभवापेक्षस्तथाचोक्तंकाऽभवंप्यतवोपक्के
उदउमविवागभविवागोयतत्वाएृषितत्रभविपाकान्युक्तानितत्रकथमप्रशस्तवर्णनामकर्मणउदयोभवापेक्षोवर्ण्यतेसत्यमेतत्तथाभीवर्ण
नामकर्मणोऽप्रशस्तस्योदयस्तीव्रानुभागोध्रुवश्चभवापेक्षः पूर्वाचार्यैर्व्यवहृतःसपूर्वोत्पन्नैःप्रभूतोनिर्जीर्णःस्तोकःशेषोवतिष्ठतिपुद्गल
विपाकिचवर्णनामतेनपूर्वोत्पन्नाविशुद्धतरवर्णाःपश्चादुत्पन्नैस्तुनाद्यापिप्रभूतोनिर्जीर्णइतितेअविशुद्धतरवर्णाएतदपिसमानस्थितिनै
रयिकविषयमवसेयमन्यथापूर्वोक्तरीत्याव्यभिचारसंभवात् एवंजहेववण्णंभणियाइत्यादि एवमुक्तेनप्रकारेणयथैववर्णोभणितातथैवले
श्यास्वपिवक्तव्या तद्यथानेरइयाणंभंतेसव्वेसमलेस्सागोयमाऽनोइणट्ठेसमट्ठेइत्यादिसुगमंचैतत् नवरंपूर्वोत्पन्नाविशुद्धलेश्यायस्मा
त्पूर्वोत्पन्नैःप्रभूतान्यप्रशस्तलेश्याद्रव्याण्यनुभूयानुपक्षयंनीतानि तानितस्मात्तेविशुद्धलेश्याःइतरेपश्चादुत्पन्नतयाविपर्ययाइदंपि
शुद्धलेश्याः एतदपिलेश्यासूत्रंसमानस्थितिकनैरयिकापेक्षमवसेयंसमवेदनपदोपलक्षितार्थाधिकारप्रतिपादनार्थमाह ७. नेरइयाणंभं

तेइत्यादिसमवेदनाः समानपीडाः सन्निभूयायइति संज्ञिनः संज्ञिपंचेंद्रियाः संतोभूताः नारकत्वंगताः सन्निभूताः तेमहावेदनास्तीव्राशुभाध्यवना
शुभतनकर्मबंध्यनेनमहानरकेषूत्पादात्असंज्ञिनोऽसंज्ञिनोऽसंज्ञिपंचेंद्रियाः संतोभूता असंज्ञिभूता असंज्ञिनोहि चन रत्नप्रभागतिषूत्पद्यंते
ततोद्योग्यायुर्बंधसंभवात्तथा चोक्तंव्यतिविहेपणर्त्तेअसण्णिआऊपण्णत्तेगोयमाचउव्विहं असन्निआउंपण्णत्तेतंजहानेरइयअसंज्ञिया
ऊतिरिक्खजोणियअसन्नियाउए देवअसण्णिआउएइतितत्रदेवेषूनैरयिकेषुच असंज्ञायुषोजघन्यतः स्थितिर्दशवर्षसहस्राणिउत्कर्ष
तः पल्योपमासंख्येयभागस्तिर्यक्षुमनुष्येषुजघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षत पल्योपमासंख्येयभागः एवंचासंज्ञिनः संतोर्थैर्नरकेषूत्पद्यंतेते
ऽतितीव्राशुभाध्यवसायाभावाद्रत्नप्रभायामनतितीव्रवेदनेषुनरकेषूत्पद्यंतेअल्पप्रतिकाश्चेत्यश्चेल्पवेदनाः अथवा संज्ञिभूताः पर्याप्त
काभूतास्तेमहावेदनापर्याप्तत्वादेवअसंज्ञिनस्त्वल्पवेदना अपर्याप्तत्वर्याप्तायोवेदनाया असंभवात्सन्निभूयन्तिसंज्ञासम्यग्दर्शनंसा
एषामस्तीतिसंज्ञिनः संज्ञिनोभूतायाताः संज्ञिभूताः संज्ञित्वंप्रामाइत्यर्थः तेमहावेदनास्तेषांहियथावस्थितंपूर्वकृतकर्मविपाकमनु
स्मरतामहोमहद्दुःखसंकटमिदमस्माकमापतितंनकृतोभगवदर्हत्प्रणीतः सकलदुःखक्षयकरोतिविषयविषमविषपरिभोगविप्रलब्धचे
तोभिर्द्धर्मइत्येवंमहद्दुःखमनस्युपजीयंततोमहावेदना असंज्ञिनस्तुमिथ्यादृष्टयः तेनुस्वकृतकर्मफलमित्येवंनजानंते अजानाश्चानुपत
प्तमानसा अल्पवेदनाइति अधुनासमकिरियाइत्यधिकारंविभावयिषुराह नेरइयाणंभंते सव्वेसमकिरियाइत्यादिसमास्तुल्याः क्रियाः कर्म
निर्बंधनाभूताआरंभिक्यादिकायेषांतेसमक्रियाः चत्तारिकिरियाउकज्जंतिइतिक्रियंतेइतिकर्मकर्त्तरिप्रयोगस्तेनभवंतीत्यर्थः आरंभः
पृथिव्याद्युपमर्दनः सप्रयोजनंकारणंयस्याः सा आरंभिकीपारिग्गहियत्तिपरिग्रहोधर्मोपकरणमूर्छावसप्रयोजनंयस्याः सापरिग्गहि १२७
कामायावत्तियाइतिमाया अनार्जवरूपलक्षणत्वात् क्रोधादिरपिचसप्रत्ययः कारणंयस्यासामायाप्रत्यया अपच्चक्खाणकिरिया
इति अप्रत्याख्यानेननिवृत्त्यभावेनक्रियाकर्मबंधकारणं अप्रत्याख्यानक्रियेति नेरइयाऊइतिनेयन्तिकयानियताइत्यर्थः अवश्यंभावित्वा

तसम्यग्दृष्टीनांत्वनियतादिषुव्यभिचारात् मिच्छादंसणवत्तियत्तिमिथ्यादर्शनंप्रत्ययः कारणंयस्याः सामिथ्यादर्शनप्रत्ययानन्विमिथ्यात्वावि
रतिकषाययोगाः कर्मबंधहेतवइतिप्रसिद्धिरिहत्वारंभिकादयस्तेऽभिहिताइतिकथंनविरोधः उच्यते इहारंभपरिग्रहशब्दाभ्यांयो
गः परिगृहीतोयोगानांतद्रूपत्वात्शेषपदैस्तुशेषाबंधहेतवइत्यदोषसव्वेसमाउयाइत्यादेः प्रश्नस्यनिर्वचनभंगीतद्भावनाक्रियते
निबद्धदशवर्षसहस्रप्रमाणायुषोयुगपच्चोत्पन्नाइतिप्रथमभंगाः तेषैवदशवर्षसहस्रस्थितिषुनरकेषुकेप्रथमतरमुत्पन्नाअपरे
पश्चादितिद्वितीयः अन्यैर्विषममायुर्निबद्धंकैश्चिद्दशवर्षसहस्रस्थितिषुकैश्चित्पंचदशवर्षसहस्रस्थितिषुकैश्चित्पंचदशसवर्षसहस्र
स्थितिषुउत्पत्तिः पुनर्युगपदितितृतीयः ३ केचित्सागरोपमस्थितयः किंचितुदशसहस्रस्थितयइत्येवंविषमायुषोविषमेवचोत्पन्नाइतिचतु
र्थः ४ संप्रत्यसुरकुमारादिष्वाहारादिष्वाहारादिपदनवकंविभावयिषुरिदअसुरकुमाराणंभंतेसव्वेसमाहाराइत्यादि तत्रास्मिन्सूत्रे
नारकसूत्रसमानेपिभावनाविशेषयालिख्यतेअसुरकुमाराणामल्पशरीरत्वंभवधारणीयशरीरापेक्षयाजघन्यतोंऽगुलासंख्ये
यभागमानत्वंमहाशरीरंतत्कर्षतः सप्तहस्तप्रमाणत्वंउत्तरवैक्रियापेक्षयात्वल्पशरीरत्वंजघन्यतोऽगुलऽसंख्येयभागमानत्वंमु
त्कर्षतोमहाशरीरत्वंयोजनलक्षमानत्वमितितत्रतेमहाशरीराबहुतरान्पुद्गलानाहारयंतिलोमाभोक्षणलक्षणाहारापेक्षयादेवानांह्यसौ
संभवतिप्रधानश्चप्रधानापेक्षयाव्यपदेशाश्चनिर्देशावस्त्वनांततोऽल्पशरीरयाह्याहारपुद्गलापेक्षयायेपुद्गलाबहुतरास्तेनात्आहारयंतिब
हुतरान्परिणामयंतीत्यादिपदत्रयव्याख्यानंप्राग्वत् तथाअभीक्ष्णमाहारयंति अभीक्ष्णमुच्छ्वसंति अत्रेयंचतुर्थादेरुयंतिस्तोकस
प्तकादेश्चोपरिउच्छ्वसंति तानाश्रित्याभीक्ष्णमुच्यतेअयमातिरेकवर्षसहस्रस्योपरि आहारयंति सातिरेकपक्षस्यचोपरिउच्छ्वसंतितानं
गीकृत्येतेषामल्पकालीनाहारोच्छ्वासत्वेनपुनःपुनराहारयंतीत्यादि व्यपदेशविषयत्वात् तथाअल्पशरीराअल्पतरान्पुद्गलाना
हारयंतिउच्छ्वसंतिच अल्पशरीरत्वादेवयत्पुनस्तेषांकादाचित्कत्वमाहारोच्छ्वासयोस्तन्महाशरीरोच्छ्वासांतरालापेक्षयाबहुतमां

नराकत्वात्तत्रांतरालेतेआहारादिनकुर्वंतितदन्यत्रतेकुर्वंतीत्येवंविवक्षणात्महाशरीराणामप्याहारोछ्वासयोरंतरालमस्तिकिंतु
तदल्पमित्यविवक्षित्वाभीक्ष्णमित्युक्तंसिद्धंचमहाशरीराणांतेषामाहारोछ्वासयोरल्पतरत्वं अल्पशरीराणांतुमहत्तरत्वंयथासौधर्मा
दिदेवानां सप्तहस्तमानतयामहाशरीराणांतयोरंतरंवर्षसहस्रद्वयंपक्षद्वयंचअनुत्तरसुराणांचहस्तमानयाअल्पशरीराणांत्रयस्त्रिं
शद्वर्षसहस्राणित्रयस्त्रिंशदेवपक्षाइतिएषांचमहाशरीराणामभीक्ष्णाहारोछ्वासाभिधानेनाल्पस्थितिकत्वमवसीयतेइतरेषांतुविपर्या
यो वैमानिकवेदवंति ॥ अथवा ॥ लोमहारापेक्षया अभीक्ष्णमनुसमयमाहारयंति ॥ महाशरीराः पर्याप्तकावस्थायांऊछ्वासस्तुयथोक्तमा
नापिभवनूपरिपूर्णाभवापेक्षयापुनःपुनरित्युच्यते ॥ अपर्याप्तकावस्थायांत्वल्पशरीरालोमाहारतोनाहारयंति ॥ ऊजआहारतएवाहारयं
तस्तेकदाचिदाहारयंतीत्युच्यते ॥ अपर्याप्तकावस्थायांनोछ्वसंति अन्यदातूछ्वसंति ॥ ततउच्यंतेआहत्योछ्वसंतीतिकर्मसूत्रमाह ॥ असु
रकुमाराणंभंतेसव्वेसमकम्माइत्यादि ॥ अत्रनैरयिकसूत्रापेक्षयाविपर्यासः नैरयिकाहिपूर्वोत्पन्नाअल्पकर्माणउक्ताइतरेतुमहाकर्मा
णः असुरकुमारास्तुयेपूर्वोत्पन्नास्तेमहाकर्माणइतरे अल्पकर्माणः कथमितिचेत्उच्यतेइहासुरकुमाराःस्वभावाद्नास्तिर्यक्षूत्पद्यंते
मनुष्येषुतिर्यक्षूत्पद्यमानाः केचिदेकेंद्रियेषुपृथिव्यब्वनस्पतिषूत्पद्यंते ॥ केचित्पंचेंद्रियेषुमनुष्येष्वपितेषूत्पद्यमानाः कर्मभूमकगर्भव्युत्क्रां
तिकमनुष्येषूत्पद्यंतेनशेषेषुषण्मासावशेषायुषश्चसंतः पारभविकमायुर्बध्नंति ॥ पारभविकमायुर्बंधकालेचयाएकांततिर्यग्योनि
कयोग्याएकांतमनुष्ययोग्यावाप्रकृतयस्ताउपचिन्वंतिततः पूर्वोत्पन्नामहाकर्मतरायेतुपश्चादुत्पन्नास्तेनाद्यापिपारभविकमायुर्बध्नं
तिनापितिर्यङ्मनुष्ययोग्याः प्रकृतीरुपचिन्वंतिततस्ते अल्पतराएतदपिसूत्रंसमानस्थितिकसमानभवपरिमितासुरकुमारविषयम् १२८
वसेयंपूर्वोत्पन्नकाअपिबद्धपारभविकायुषः पश्चादुत्पन्नाअपि अबद्धपारभविकायुषः स्तोककालांतरिताप्याद्याअन्यथातिर्य
ङ्मनुष्ययोग्यप्रकृतिबंधेपिपूर्वोत्पन्नकालपश्चादुत्पन्नउत्कृष्टस्थितिकोभिनवोत्पन्नोनंवसंसारिकश्चमहाकर्मतरएवभवति ॥ वर्णो

सूत्रेयेतेपूर्वोत्पन्नकास्तेऽविशुद्धवर्णतराः कथमितिचेत्उच्यते ॥ एतेषांहिभवापेक्षः प्रशस्तवर्णनाम्नः शुभस्तीव्रानुभागउदयः सचः पूर्वोपन्ना
नांप्रभूतःक्षयमुपगतइतितेअविशुद्धतरवर्णाः इतरेषुपश्चादुत्पन्नतयानाद्यापिप्रभूतानिजीर्णाइतिविशुद्धवर्णाः एतच्चसमानस्थितिकासुरकुमा
रविषयंसूत्रं ॥ एवंलेश्यासूत्रमपितेवंवर्णसूत्रवत्लेश्यासूत्रमपिवक्तव्यंपूर्वोत्पन्नाः अविशुद्धलेश्यावक्तव्याः पश्चादुत्पन्नाविशुद्धलेश्याइतिभावः ॥ कान्नभा
वनेतिचेत्उच्यते ॥ इहदेवानांनैरयिकाणांचतथाभवस्वाभाव्यात्लेश्यापरिणामउपपातसमयात्प्रभृत्याभवक्षयाद्भवति ॥ यतोवक्ष्यतितत्रैर्यलेश्यायांइसे
नृणंभंतेकण्हलेसेणेरईएकण्हलेसेसुनेरइएसुउववज्जइकण्हलेसेउववज्जई ॥ जल्लेसेउववज्जइतल्लेसेउववज्जइइति ॥ अस्याभावार्थः पंचें
द्रियतिर्यग्योनिकोमनुष्योवानरकेषूत्पद्यमानोयथाक्रमंतिर्यगायुषिमनुष्यायुषिवाक्षीणेनैरयिकायुः संवेद्यमानऋजुसूत्रनयदर्शनेन
विग्रहेपिवर्तमानोनारकएवउच्यते ॥ तस्यचकृष्णादिलेश्याउदयः पूर्वभवायुष्यंतर्मुहूर्तावशेषायुष्केएववर्तमानस्यभवति ॥ तथाचोक्तंअं
तमुहुत्तंमिगएअंतोमुहुत्तंमिसेसएचेवलेसाहिंपरिणयाहिंजीवावच्चंतिपरलोयंएवंदेवेष्वपिभावनीयं ॥ तथालेश्याध्ययनेनैरयिका
दिषुकृष्णादिलेश्यानांजघन्याउत्कृष्टावस्थितिरियमुक्तादशवाससहस्साइंकाउएठिईजहण्णियाहोईउक्कोसातिन्नुदहीपलिपस्सअ
संखभागंचनीलाएजहन्नठिईतिण्णुदहिअसंखभागपलियंच ॥ दशाउदहीउक्कोसापलियस्सअसंखभागंचकण्हाएजहण्णठिईदसउद
हिअसंखभागपलियंचतित्तीससागराइमुहुत्तरहियाहिंउक्कोसाएसानेरइयाणंलेसाणठिईउवव[य?]र्णियासोतेणपरंवोच्छामितिरियाणुमणु
स्सदेवाणंअंतोमुहुत्तमठालेसाणठिईजहिंजहिंजाउ ॥ तिरियाणनराणंवावज्जित्ताकेवलंलेसं अस्याअक्षरगमनिकाअंतर्मुहूर्तंका
लंयावत्लेश्यानास्थितिजघन्याउत्कृष्टावतिकामामित्याह ॥ जंहिंजाउयस्मिन्पृथिवीकायिकादौसंमूर्छिममनुष्यादौचयाकृष्णा
द्यालेश्यास्तासां ॥ एताहिचकचित्काचिद्भवंतिपृथिव्यब्वनस्पतीनांकृष्णनीलकापोततेजोरूपाश्चतस्रोलेश्यास्तेजोवायुद्वित्रिचतुरिं
द्रियसंमूर्छिमतिर्यक्पंचेंद्रियमनुष्याणांकृष्णनीलकापोतरूपास्तिस्रोगर्भजतिर्यक्पंचेंद्रियाणांचगर्भजमनुष्याणांचषडपी

Dr. BHAU DAJI MEMORIAL

तिनत्वेवंशुक्लुलेश्यायाअप्यंतमुहूर्त्तमेवस्थितिःप्राग्नीलायांकायामुक्तंवर्षयित्वाकेवलांशुद्धलेश्यांशुक्लुलेश्यामेतिभावः॥तस्याइयंस्थितिः
स्फुटंतदंनुजहण्णाउक्कोसाहोइपुव्वकोडीऊनवहिंवरिसेहिंवरिसेहिंऊणानायव्वासुक्कलेसाएसातिरियनराणंलेसाणठिईउवण्णियाहो
ई॥तेणपरंवोछामिलेसाणठिईउलेवाणंदसवाससहस्साइंकण्हाइंठिईजहण्णियाहोइ॥पल्लासंखियभागोउक्कोसाहोइनायव्वा॥जा
कण्हाइठिईखलुउक्कोसाचेवसमयमब्भहिया॥नीलाएजहण्णायंपलियअसंखंचउक्कोसा॥जानीलाएठिईखलुउक्कोसाचेवसमय
मब्भहिया॥काऊणजहण्णेयंपलियअसंखंचउक्कोसातेणपरंवोछामितेउलेसंजहासुरगणाणं॥भवणवइवाणमंतरजोइसवेमा
णियाणंचदसवाससहस्साइंतेऊएठिईजहण्णियाहोई॥उक्कोसादोउदहिपलियस्सअसंख्यभागंच॥जातेऊएठिईखलुउक्कोसाचे
वसमयमब्भहिया॥पम्हाएजहन्नेणंदसमुहुत्तअहियाइंउक्कोसा॥दससागरोपमाणि॥अंतर्मुहूर्त्ताभ्यधिकान्युत्कृष्टेतिभावः॥अंतर्मुहू
र्त्तंचाभ्यधिकंयत्प्राग्भवभाविअंतर्मुहूर्त्तंयच्चोत्तरभवभाविततद्द्वयमप्येकंविवक्षित्वोक्तंदेवनैरयिकाणांहिस्वस्वलेश्याप्रागुत्तरभवांत
मुहूर्त्तद्वयनिजायुःकालप्रमाणावस्थानाभवति॥तथाजावम्हाएठिईखलुउक्कोसाचेवसमयमब्भहियासुक्काएजहन्नेणंतेत्तीसउक्को
समुहुत्तमब्भहियाइति॥ततोऽस्माल्लेश्यास्थितिपरिमाणात्प्रागुक्ताद्यत्तृतीयलेश्योद्देशकवक्ष्यमाणसूत्राद्वसीयंतेदेवानांनैरयिका
णांचलेश्याद्रव्यपरिमाणामकृपातसमयादारभ्यभवक्षयाद्वर्तीतिपूर्वोक्तत्रिश्वासुरकुमारैःप्रभूतानितीव्रानुभागानिलेश्याद्रव्या
ण्यनुभूयानुभूयक्षयंनीतानिस्तोकानिमंदानुभावान्यवतिष्ठंतेततस्तेपूर्वोत्पन्नाअविशुद्धलेश्याः॥वेयणाएजहानेरइयाइतिवे
दनायांयथानैरयिकाउक्तास्तथावक्तव्याः॥तथाप्यसंज्ञिनेपिलभ्यमानत्वात्तत्रयथापिवेदनासूत्रंपाठतोनारकाणामिवासुरकु
मारणामपितथापिभावनायांविशेषःसचायं॥येसंज्ञिभूतास्तेसम्यग्दृष्टित्वात्महावेदनाश्चारित्रविराधराजन्यचित्तसंतापात्इत १२९
रेत्वसंज्ञिभूतामिथ्यादृष्टित्वादल्पवेदनायथोक्तचित्तसंतापाभावात्॥अथवासंज्ञिभूताःसंज्ञिपूर्वाभवाःपर्याप्ताश्चशुभवेदनामा

श्रित्यमहावेदनामाइति॥अवसेसंजहानेरइयाणंति॥अवशेषंक्रियासूत्रमायुःसूत्रंचयथानैरयिकाणांतथावक्तव्यं॥तच्चसुगमत्वा
त्स्वयंपरिभावनीयंएवमित्यादिएवमसुरकुमारेक्तेननागकुमारादयोपितावद्वक्तव्यायावत्स्तनितकुमाराः॥पुढविक्काइयाइत्यादि॥पृथ्वी
कायिकाआहारकर्मवर्णलेश्याभिर्यथानैरयिकाउक्तास्तथावाच्याः॥पृथिवीकायिकानामाहारादिविषयाणिचचारिसूत्राणिनैर
यिकसूत्राणीवपृथिवीकायिकाभिलापेनाभिधातव्यानीतिभावः॥केवलमाहारसूत्रेभावनैवंपृथिवीकानामंगुलासंख्येयभागमात्र
शरीरत्वेप्यल्पशरीरत्वंआगमवचनादवसेयंसचायमागमःपुढविक्काइयस्सओगाहणठयाएचउठाणवडिएइत्यादि॥तत्रमहाश
रीरास्तेमाहारतोबहुतरान्पुद्गलानाहारयंतिउच्छ्वसंतिच॥अभीक्ष्णमाहारयंतअभीक्ष्णंचोच्छ्वसंतिमहाशरीरत्वादेवाल्पशरीराणाम
आहारोच्छ्वासत्वमल्पशरीरत्वादेवकादाचित्कंचाहारोच्छ्वासयोः॥पर्याप्तेतरावस्थापेक्षमितिवेदनास्तत्रमाह॥पुढविकाइयाणंभं
तेसव्वेसमवेयणाइत्यादि॥असन्नीइतिमिथ्यादृष्टयोऽमनस्कावाअसन्निभूयंतिअसंज्ञिभूतांअसंज्ञिनांयाजायतेतामित्यर्थः एतदे
वव्यनक्तिअनियंतिअनियतामनिर्द्धारितांवेदयंवेदनामनुभवंतोपिनदूर्वापात्ताशुभकर्मपरिणतिरियमित्यवगच्छंति॥मिथ्यादृष्टित्वा
दमनस्कत्वाद्वामत्तमूर्छितादिवदितिभावः॥क्रियासूत्रेमाइमिच्छदिठित्ति॥मायावंतोहितेषुप्रायेणोत्पद्यंते॥यदाहशिवशर्माचार्यःउम्म
ग्गदेसउसमग्गनासउमूढहियमाइढंगो॥सढासीलोयससल्लोतिरियाउबंधईजीवो॥ततस्तेमायिनउच्यंतेअथवामायेहसमस्ता
नंतानुबंधिकषायोपलक्षणंततोमायिनइतिकिमुक्तंभवति॥अनंतानुबंधिकषायोदयवंतःअतएवमिथ्यादृष्टयः॥ताणंनेरइयाउइति
तेषांपृथिवीकायिकानांनैयतिनियतक्रियानियताःपंचैवनतुत्रिप्रभृतयइत्यर्थः॥सेएएणठेणमित्यादिनिगमनंजावचउरिंदियाइति
इहमहाशरीरत्वेस्वस्वावगाहनानुसारेणावसेयेआरब्धद्वींद्रियादीनांप्रक्षेपलक्षणोपीतिपंचेंद्रियतिरिक्खजोणियाजहानेरइयाइति
प्रतीतंनवरंमिहमहाशरीराःअभीक्ष्णमामाहारयंति॥अभीक्ष्णमुच्छ्वसंतीतियदुच्यतेतत्संख्यातवर्षायुषोऽपेक्ष्यंतत्तथैवदर्शना

त्तानासंख्यातवर्षायुषस्तेषांप्रक्षेपाहारस्यषष्टस्योपरिप्रतिपादितत्वात्॥ अल्पशरीराणांत्वाहारोच्छ्वासयोर्यत्कदाचित्कथां॥ तत्रअपर्याप्ता
वस्थायांलोमहारोच्छ्वासयोरभवनंनपर्याप्तावस्थायांतद्भावेनचावसेयं॥ कर्मसूत्रेयत्पूर्वोत्पन्नानामल्पकर्मत्वमितरेषांतुमहाकर्मत्वंतत्
आयुष्कादितद्भाववेद्यकर्मापेक्षंवर्णलेश्यासूत्रयोरपियत्पूर्वोत्पन्नानांशुभवर्णाद्युक्तंतत्तारुण्यात्पश्चादुत्पन्नानांचाशुद्धवर्णादि
बाल्यादवसेयंलोकेतथादर्शनादिति॥ तथासंज्ञयासंज्ञयाइतिदेशविरताःकृतप्राणातिपाततोनिर्वृत्तादितरस्मादनिवृत्तत्वात्॥ मनुष्यवि
षयंसूत्रमाह॥ ७॥ मणुस्साणंभंतेसव्वेसमाहाराइत्यादिसुगमंनवरंआहच्च आहारेंतिआहच्चउससंति॥ आहच्चनीससंतिइतिमहाशरीरा
हिमनुष्यादेवकुर्वादिमिथुनकास्तेचकदाचिदेवाहारयंति॥ कावलिकाहारेणअष्टमभक्तस्यआहारोइतिवचनातऊच्छ्वासनिश्वासा
वपि तेषांशेषमनुष्यापेक्षयातिमृदित्वात्कादाचित्को॥ अल्पशरीरास्त्वाभीक्ष्णमल्पंचाहारयंतिबालानांतथादर्शनात्संमूर्छिममनुष्याणाम
ल्पशरीराणामनवरतमाहारसंभवाच्चउच्छ्वासावप्यल्पशरीराणामाभीक्ष्णंप्रायोदुःखबहुलत्वात्सेसंजहानेरइयाणमितिशेषंकर्मवर्णादिवि
षयंसूत्रंयथानैरयिकाणांतथावसेयं॥ नवरमिहपूर्वोत्पन्नानांशुद्धवर्णादित्वंतारुण्याद्भावनीयंक्रियासूत्रेविशेषमाह॥ नवरंकिरियाहिमणूसा
तिविहाइत्यादितत्रसरागसंयत्ताअक्षीणानुपशांतकषायाःवीतरागसंयताउपशांतकषायाः॥ अकिरियाइतिवीतरागत्वेनारंभादीनांक्रियाणाम
भावात्॥ एगामायावत्तियाइति अप्रमत्तसंयतानामेकैवमायाप्रत्ययाक्रियाकथ्यइतिक्रियतेभवतिकदाचिदुड्डाहरक्षणप्रवृत्तानांअक्षीणाकषाय
त्वात् आरंभियाइमायावत्तियाइतिप्रमत्तसंयतानांहिसर्वःप्रमत्तयोगआरंभइतिभवत्यारंभिकीक्रिया॥ अक्षीणकषायत्वाच्चमायाप्रत्ययेतिसेसंज
हानेरइयाणमितिशेषमायुर्विषयंसूत्रंयथानैरयिकाणांतथावक्तव्यंतच्चसुगमत्वात्स्वयंभावनीयं॥ वाणमंतराणंजहाअसुरकुमाराणमित्यादि य १३०
थाअसुरकुमारासन्निभूयाय असण्णिभूयायतत्थणंजेसन्निभूयातेमहावेयणाअसण्णिभूयाअप्पवेयणाइत्येवमधीतोःव्यंतराअपितथैवा
ध्येतव्याः॥ यतो असुराणिवव्यंतरातेषुदेवेषुसन्निनउत्पद्यंतेतथाचोक्तं॥ व्याख्याप्रज्ञप्तोप्रथमशतेद्वितीयोद्देशकेसे अञ्जीणंभवणवासीसु

उववोसेणंवाणमंतरेसुइति॥ तेचासुरकुमारप्रकरणोक्तयुक्तेरल्पवेदनाभवंतीत्यवसेयं॥ यत्तुप्राग्व्याख्यातंसंज्ञिनस्थितेरइतितदेवमपिघटतेइ
तिवृद्धव्याख्यानुसरणतःकृतमित्यदोषः॥ एवमित्यादिएवमसुरकुमारोक्तप्रकारेणज्योतिष्कवैमानिकानामपिवक्तव्यंनवरंवेदनायामेवम
ध्येतव्यादुविहाजोइसियापण्णत्तातंजहामायिमिच्छद्दिट्ठिउववण्णगायइत्यादि अथकस्मादेवमधीयंतेयावताअसुरकुमारवत्सन्निभू
यायइति किंनाधीयंते॥ उच्यतेनंतवसन्निनउत्पादाभावात्॥ एतदपिकथमवसेयमितिचेतउच्यते॥ युक्तिवशात्तथाह्यसद्यायुषउत्कृष्टा
स्थितिः पल्योपमासंख्येयभागोज्योतिष्काणांचजघन्यापिस्थितिःपल्योपमासंख्येयभागःवैमानिकानांपल्योपमंततोऽचमीयतेनास्तित
त्रसंज्ञीनदाभावाच्चापदर्शितप्रकारेणैवाध्येतव्यानासुरकुमारोक्तप्रकारेणेतितत्रमायिमिथ्यादृष्टयोऽल्पवेदनाइतरेमहावेदनाःशुभवेद
नाश्रित्येति॥ अथचतुर्विंशतिदंडकमेव॥ सलेश्यापदविशेषितमाहारादिपदैर्निरूपयति॥ ७॥ सलेसाणंभंतेनेरइयाइत्यादियथाअनंत
रमौधिकोविशेषणरहितःप्राकृगतउक्तस्तथासलेश्यगमोपिनिरवशेषोवक्तव्योयावद्वैमानिकावैमानिकविषयंसूत्रंसलेश्यपदरूपविशे
षणमंतरेणान्यस्यविशेषस्यकचिदप्यभावात्॥ अधुनालेश्याभेदकृष्णादिविशेषितान्षट्दंडकान् आहारादिपदैर्विभाणिषुराह॥ ७॥
कण्हलेसाणंभंतेनेरइयाइत्यादियथाऔधिकाविशेषणरहिताः॥ आहारशरीरोच्छ्वासकर्मवर्णलेश्यावेदनाक्रियोपपातारव्यैर्नवभिःपदैः
प्राग्नैरयिकाउक्तास्तथाकृष्णलेश्याविशेषिताअपिवक्तव्यानवरंवेदनापदेनैरयिकाएवंवक्तव्यामाइमिच्छदिट्ठिउववन्नगायअमायिस
म्मद्दिट्ठीउववन्नगायइतितन्नौधिकस्तत्रइवसन्निभूयायइतिकस्मादितिचेदुच्यतेइहासंज्ञिनःप्रथमपृथिव्यामेवोत्पद्यंते॥ असन्नी
खलुपदममितिवचनात्प्रथमायांचपृथिव्यांतकृष्णलेश्यायत्रचपंचम्यादिषुपृथिवीषुकृष्णलेश्यातत्रासंज्ञिनइति॥ तत्रमायिनो
मिथ्यादृष्टयश्चमहावेदनाभवंति॥ यतःप्रकर्षपर्यंतवर्तिनींस्थितिमशुभांतेनिर्वर्तयंतिप्रकृष्टायांचतस्यांमहतीवेदनाइतरेषुविपरीतेति
असुरकुमारादयोयावत्॥ व्यंतरास्तावद्यथाऔधिकाउक्तास्तथावक्तव्यानवरंमनुष्याणांक्रियाभिर्विशेषस्तमेवविशेषंदर्शयति॥ नस्य

णंजंतेइत्यादितत्रतेषुसम्यग्दृष्ट्यादिषुमध्येयेतेसम्यग्दृष्टयस्तेत्रिविधाःप्रज्ञप्तास्तद्यथासंय ताअसंयताःसंयतासंयताश्च॥जहाओहियाणमि
तिएतेषांयथौघिकानामुक्तं॥तथाकृष्णलेश्यापदविशेषितानामपिवक्तव्यंतद्यथासंयतानांद्वेक्रियेआरंभिकीमायाप्रत्ययाचकृष्णलेश्या
हिप्रमत्तसंयतानांभवति॥नाप्रमत्तसंयतानांतेषांतुयथोक्तरूपेएवद्वेक्रियेसंयतासंयतानांतिस्रआरंभिकीपारिग्रहिकीमायाप्रत्ययाचा
संयतानांचतस्रआरंभिकीपारिग्रहिकीमायाप्रत्ययाप्रत्याख्यानक्रियाचेतिज्योतिष्कवैमानिकास्तुआद्यास्तिसृषुलेश्यासुनपृच्छ्यंतेकिमु
क्तंभवतितद्विषयंसूत्रंनवक्तव्यं॥तासांतेष्वभावात्॥यथाचकृष्णलेश्याविषयंसूत्रमुक्तंतथानीललेश्याविषयंसूत्रमुक्तंतथानीललेश्या
विषयमपिवक्तव्यंनानात्वाभावादेतदेवाह॥एवंजहाकिण्हलेसाचारियातहानीललेस्सावित्ताणियव्वा॥नीललेश्याविषयापिसूत्रदंडक
एवकेवलंकृष्णलेश्यापदस्थानेनीललेश्यापदमुच्चारणीयमितिभावः॥काऊलेस्साइत्यादिकापोतलेश्यादिसूत्रंतोनीललेश्यावन्नैर
यिकेभ्यआरभ्ययावद्व्यंतरास्तावद्वक्तव्यानवरंकापोतलेश्यायांनैरयिकावेदनास्त्रयथौघिकास्तथावक्तव्या नेरयियादुविहापण
त्तासंज्ञिभूयाअसन्निभूयायइत्येवंवक्तव्याइतिभावः॥असंज्ञिनामपिप्रथमपृथिव्यामुत्पादानन्तत्रचकापोतलेश्याभावात्तेजोलेश्याविष
यंसूत्रमाह॥तेउलेसाणंभंतेअसुरकुमाराइत्यादि॥इहनारकतेजोवायुविकलेंद्रियाणांतेजोलेश्यानसंभवंतिततःप्रथमतएवासु
रकुमारविषयंसूत्रमुक्तमतएवतेजोवायुविकलेंद्रियसूत्रमपिनवक्तव्यं॥असुरकुमाराअपियथाप्राक् ऊघतउक्तास्तथावक्तव्यान
वरंवेदनापदेयथाज्योतिष्कास्तथावक्तव्याः॥सन्निभूयायअसन्निभूयायअसन्निभूयायइतिनवक्तव्याः॥किंतुमायिमिच्छदिट्ठिउव
वण्णगाअमायिसम्मदिट्ठिउववण्णगाइतिभावः॥असंज्ञिनांतेजोलेश्यावस्तुत्पादाभावात्पृथिव्यप्वनस्पतयःतिर्यक्पंचेंद्रियामनुष्या
श्चयथाप्रागौघिकास्तथावक्तव्यानवरंमनुष्याःक्रियाभिर्येसंयतास्तेप्रमत्ताश्चभणनीयाअप्रमत्तानामपितेजोलेश्यायाःसंभवात्सराग ३३१
वीतरागायनश्चसरागसंजयावीयरागसंजयायइतिनवक्तव्याइत्यर्थः॥वीतरागाणांतेजोलेश्ययोअसंभवेनवीतरागप

दोपन्यासस्यतेजोलेश्यायाःसरागत्वाव्यभिचारःसरागपदोपन्यासस्यचायोगात्वाणमंतरातेउलेस्साएजहाअसुरकुमाराइतिते
पिमायिमिच्छदिट्ठिउववण्णगाअमायिसम्मदिट्ठिउववन्नगायइत्येवंवक्तव्यानतुसन्निभूयायअसन्निभूयायइतितेष्वपितेजोलेश्या
वत्सुअसमध्येअसंज्ञिनामुत्पादाभावात्॥एवंपम्हलेसावित्ताणियथाइतिएवंतेजोलेश्याप्रकारेणपद्मलेश्यापिवक्तव्याकिमवि
शेषेणसर्वेष्वपिनेत्याह॥नवरंपरंजेसिंअत्थिनवरमयंविशेषोयेषांपद्मलेश्यास्तितेष्वेववक्तव्यानशेषेषुतत्रपंचेंद्रियतिर्यग्मनुष्या
णांवैमानिकानांचास्तिनशेषाणामिति॥नहिपयमेवैनस्याःसक्तंशुक्ललेश्यापिनथैववक्तव्यायथापद्मलेश्या॥सापियेषामस्तितें
षांवक्तव्यासर्वमपिचसूत्रंतथैवयथाऔघिकानांगमउक्तःपद्मलेश्याशुक्ललेश्याचयेषामस्तितान्साक्षादुपदर्शयति॥नवरंपद्मलेसा
उइत्यादिसुगमं॥ ६८ ॥इतिश्रीमलयगिरिविरचितायांप्रज्ञापनाटीकायांलेश्यापदस्यप्रथमोद्देशकःसमाप्तः॥ ७ ॥उक्तःषट्द्वा
राद्यर्थाभिधायीप्रथमोद्देशकोऽधुनाद्वितीयोद्देशकउच्यते॥तत्रेदमादिसूत्रं॥कइणंभंतेलेस्साइत्यादिकःपुनरस्यसंबंधइतिचेद्
उच्यते॥उक्तंप्रथमोद्देशकेसलेस्साणंभंतेनेरयियाइत्यादि॥इहतुनाएवलेश्याभिर्संबन्धेकइलेस्साइतितत्रलेश्याःप्राग्निरूपितशब्दार्था
इतिकिंपरिमाणाःप्रज्ञप्ताभगवानाहगौतमषड्लेश्याःप्रज्ञप्तानामतःकथयतिकण्हलेस्साइत्यादिकृष्णद्रव्यात्मिकाकृष्णद्रव्यजनितावालेश्याएवंनी
ललेश्येत्यादिपदेष्वपिभावनीयंभंतेइत्यादिस्तमल्पबहुत्ववक्तव्यतायाःप्राक्सकलमपिसुगमंनवरंवैमानिकसूत्रेयावदेवैमानिकाना
मेकातेजोलेश्याकातत्रेदंकारणंवैमानिकाद्विविधाःसौधर्मैशानयोरेवनत्रचकेवलातेजोलेश्यैवतिसामान्यतःसंग्रहणिगाथात्रेमाः
किण्हानीलाकाऊतेऊलेसाणभवणवंतरिया॥जोइससोहम्मीसाणतेउलेसामुणेयव्वा॥कप्पेसणंकुमारेमाहिंदेचेवबंभलोएयएएसु
पम्हलेसाउप्परंसुक्कलेसाउ॥पुढवीआउवणस्सइबायरपत्तेयलेसचत्तारि॥तेउवाउगब्भयतिरियनरेसुछल्लेसातिण्णिसेसा
णं॥संप्रतिसलेश्यादीनामल्पबहुत्वमाह॥एएसिणंभंतेजीवाणंसलेस्साणमित्यादिअमीषामष्टानांमध्येकनरेभ्योऽल्पाःकतरेक

तरेः सहतुल्याइहप्राकृतत्वात्तृतीयायामपिकर्तरिर्दितोनिर्देशोयंभवतीत्येवंव्याख्यायामदोषः॥ तथाकतरेभ्योविशेषाधिका॥ एवंगौतमेनप्रश्ने
कृतेभगवानाहगौतमसर्वस्तोकाः शुक्ललेश्याशुक्लद्रव्यजनिताशुक्ललेश्यायेषांतेशुक्ललेश्याएवंशेषपदेष्वपिविग्रहभावनाकार्यासर्वस्तोकाः कति
पयेषुपंचेंद्रियेषुतिर्यक्षुमनुष्येषुचलांतकादिदेवेषुचतस्याः सद्भावात्तेभ्यः पद्मलेश्याः संख्येयगुणाः संख्येयगुणेषुतिर्यग्पंचेंद्रितिर्येषुम
नुष्येषुसनत्कुमारमाहेंद्रब्रम्हलोककल्पवासिषुचदेवेषुपद्मलेश्याभावात् अथलांतकादिदेवेभ्यः सनत्कुमारादिकल्पत्रयवासिनोदेवा
असंख्यातगुणास्ततः शुक्ललेश्याभ्यः पद्मलेश्या असंख्येयगुणाः प्राप्नुवंतिकथंसंख्येयगुणा उक्ताः उच्यतेइहजघन्यपदेप्यसंख्यातानांस
नत्कुमारादिकल्पत्रयवासिदेवेभ्योअसंख्येयगुणानांपंचेंद्रियतिरश्चांशुक्ललेश्याततः पद्मलेश्याचिंतायांसनत्कुमारादिदेवप्रक्षेपेप्यसंख्ये
यगुणत्वन॥ वर्तिकिंतुयदेवतिर्यग्पंचेंद्रियापेक्षयैवसंख्येयगुणत्वंतदेवास्तीति संख्येयगुणाः शुक्ललेश्येभ्यः पद्मलेश्याः तेभ्योपिसं
ख्येयगुणास्तेजोलेश्याबादरपृथिव्यप्प्रत्येकवनस्पतिकायिकेषुतिर्यग्पंचेंद्रियमनुष्येषुभवनपतिव्यंतरज्योतिष्कसौधर्मेशानदेव
षुतेजोलेश्याभावात्भावनासंख्येयगुणत्वेप्राग्वदत्रापिकर्तव्या॥ तेभ्योप्यनंतगुणाअलेश्याः सिद्धानामलेश्यात्वांप्राक्तनेभ्योऽनंतगु
णत्वात्लेश्यापिकापोतलेश्या अनंतगुणासिद्धेभ्याप्यनंतगुणानांवनस्पतिकायिकानांकापोतलेश्याविशेषाधिकाः तेभ्योपिविशेषाधि
काः क्लिष्टक्लिष्टतराध्यवसायानांप्रभूततराणांसद्भावात्कृष्णलेश्येभ्योपिसलेश्याविशेषाधिकाः नीललेश्यादीनामपितत्रप्रक्षेपात्
तदेवसामान्यतोल्पबहुत्वंचिंतितंसंप्रतिनैरयिकेषुतच्चिंतयन्नाह॥ एएसिणंभंतेनेरइयाणमित्यादिनैरयिकाणांहितिस्रोलेश्यास्त
द्यथाकृष्णलेश्यानीललेश्याकापोतलेश्याउक्तंच॥ काऊयदोसुतइयाएमीसियानीलियाचउत्थीए॥ पंचमियाएमिस्साकण्हातत्तो
परमकण्हाततस्तत्रयाणामेवपदानांपरस्परमल्पबहुत्वचिंता॥ तत्रसर्वस्तोकाः कृष्णलेश्यानैरयिकाः कतिपयपंचमपृथिवीग १३२
तनरकावासेषुषष्ठ्यांसप्तम्यांचपृथिव्यांनैरयिकाणांकृष्णलेश्यासद्भावात्ततोसंख्येयगुणनीललेश्याः कतिपयेषुतृतीयपृथि

वीगतनरकावासेषुचतुर्थ्यांसमस्तायांपृथिव्यांकतिपयेषुपंचमपृथिवीगतनारकावासेषुनैरयिकाणांपूर्वोक्तेभ्यो असंख्येयगुणानांनील
लेश्याभावात्तेभ्योप्यसंख्येयाः कापोतलेश्याः प्रथमद्वितीयपृथिव्योस्तृतीयपृथिवीगतेषुचकतिपयेषुनरकावासेषुनारकाणामनंतरोक्तेभ्यो
असंख्येयगुणानांकापोतलेश्यासद्भावात्॥ अधुनातिर्यग्पंचेंद्रियेष्वल्पबहुत्वमाह॥ एएसिणंभंतेइत्यादिएवंजहाओहियाइत्यादि॥ एवमु
पदर्शितेनप्रकारेणयथाप्राक्औधिकास्तथावक्तव्यानवरमलेश्यावर्जास्तिरश्चामलेश्यानामसंभवात्तेन्चैवंसर्वस्तोकास्तिर्यग्योनिकाः
शुक्ललेश्याः तेचजघन्यपदेप्यसंख्यातादृष्टव्याः॥ तेभ्याप्यसंख्येयगुणाः पद्मलेश्याः २ तेभ्योपिसंख्येयगुणास्तेजोलेश्याः तेभ्योप्यनंतगुणाः
कापोतलेश्याः तेभ्योपिनीललेश्याविशेषाधिकास्तेभ्योपिकृष्णलेश्याविशेषाधिकाः॥ तेभ्योपिसलेश्याविशेषाधिकाः॥ सांप्रतमेकेंद्रियेष्वल्प
बहुत्वमाह॥ एएसिणंभंतेएगिंदियाणमित्यादि सर्वस्तोकाएकेंद्रियास्तेजोलेश्याः कतिपयेषुबादरपृथिव्यप्प्रत्येकवनस्पतिकायिकेष्वप
र्याप्तावस्थायांतस्याः सद्भावात्तेभ्यः कापोतलेश्या अनंतगुणाअनंतानांसूक्ष्मबादरनिगोदजीवानांकापोतलेश्यासद्भावात्तेभ्योपिनीललेश्या
विशेषाधिकाः तेभ्योपिकृष्णलेश्याविशेषाधिकाः अत्रभावनाप्रागेवोक्ता॥ संप्रतिपृथिवीकायिकादिविषयमल्पबहुत्वंतत्रवक्तव्यंतत्रपृ
थिव्यब्वनस्पतिकायानांचतस्रोलेश्यास्तेजोवायूनांतिस्रइतितथैवसूत्रमाह॥ एएसिणंभंतेपुढविकाइयाणमित्यादि॥ एवंमदित्रिचतुरिंद्रि
यविषयमपिपंचेंद्रियतिर्यग्योनिकसूत्रेकापोतलेश्याअसंख्यातगुणाः पंचेंद्रियतिरश्चांसर्वासंख्ययाप्यसंख्यातत्वात्संमूर्छिमपंचें
द्रियतिरश्चांयथातेजस्कायिकानामुक्तंतथावक्तव्यंतेजस्कायिकानामिवतेषामप्याद्यलेश्यात्रयमात्रसद्भावात्गर्भव्युत्क्रांतिकपंचेंद्रियतिर्यग्यो
निकसूत्रेतेजोलेश्येभ्यः कापोतलेश्याः असंख्येयगुणावक्तव्यास्तावनामेवतेषांकेवलवेदसोपलब्धत्वात्शेषमौधिकसूत्रंवक्तव्यंएवंएवंतिर्यग्यो
निकीनामपिसूत्रंवक्तव्यंएवंतिर्यग्योनिकीनामपिसूत्रंवक्तव्यंतथाचाह॥ एवंतिरिक्खजोणिणीणंति अधुनासंमूर्छिमगर्भव्युत्क्रांतिकतिर्यक्पं
चेंद्रियतिर्यगस्त्रीविषयसूत्रमाह॥ एएसिणंभंतेइत्यादिसूत्रगमं अधुनासंमूर्छिमतिर्यग्पंचेंद्रियतिर्यगस्त्रीविषयंसूत्रमाह॥ एएसिणंभंतेइ

x पंचेंद्रियतिर्यग्योनिकतिर्यक्स्त्रीविषयंनवमंसामान्यत ९

त्यादि॥ एतच्चप्राग्वद्भावनीयं॥ इदंकिलपंचेंद्रियतिर्यग्योनिकाधिकारेषष्टंसूत्रंमनंतरोक्तंचपंचममतऊर्ध्वंतद्भेदचपंचमंनहाइमंछठंभाणियव्वंअधु
नागर्भव्युत्क्रांतिकतिर्यक्पंचेंद्रियतिर्यक्स्त्रीविषयंसप्तमसूत्रमाह॥ एएसिणंभंतेइत्यादिसुगमंनवरंसर्वास्वपिलेश्यासुस्त्रियःप्रचुराःसर्वसं
ख्ययापिचतिर्यक्पुरुषेभ्यस्त्रियस्त्रिगुणात्रिगुणानिरूवअहियाओतिरियाणंइत्थियामुणेयव्वा॥ इतिवचनात्ततःसंख्यातगुणाः॥ नपुंसकास्तु
गर्भव्युत्क्रांतिकाःकतिपयइतिनतेयथोक्तमल्पबहुत्वंव्याघ्नंतिसंप्रतिसंमूर्छिमपंचेंद्रियतिर्यग्योनिकगर्भव्युत्क्रांतिकपंचेंद्रियतिर्यग्योनिकतिर्य
क्स्त्रीविषयमष्टमंसामान्यतस्तिर्यग्योनिकतिर्यक्स्त्रीविषयंदशमंसूत्रमाह॥ एएसिणंभंतेइत्यादिभावनाप्रागुक्तानुसारेणकर्तव्यातिर्यग्यो
निकविषयसूत्रसंकलनामाह॥ ७॥ एवमेएदसअप्पाबहुगाजोतिरिक्खजोणियाणमितिसुगमं॥ नवरमिहइमेपूर्वाचार्यप्रदर्शितसंग्रहणिगा
थे ओहीयपणिंदि १ संमुच्छियाय २ गब्भे ३ तिरिक्खइत्थीउ ४ संमुच्छगब्भतिरिया ५ मुच्छतिरिक्खीय ६ गब्भंमि ७ संमुच्छगब्भइत्थी ८ पणिंदितिरि
गिच्छियाउ ९ ओहित्थी १० दसअप्पबहुगभेयातिरियांहोतिनायव्वा॥ तयथायथातिरश्चामल्पबहुत्वान्युक्तानितथामनुष्याणामपिवक्तव्यानि
नवरंपश्चिमंदशममल्पबहुत्वंनास्तिमनुष्याणामनंतत्वाभावात्तदभावेकापिलेश्यानंतगुणाइतिपदासंभवात्॥ अधुनादेवविषयमल्पब
हुत्वमाह॥ एएसिणंभंतेदेवाणमित्यादिसर्वस्तोकादेवाःशुक्ललेश्याःलांतकादिदेवलोकेष्वेवतेषांसद्भावात्तेभ्यःपद्मलेश्याःअसंख्येयगुणाः सनत्कु
मारमाहेंद्रब्रह्मलोककल्पदेवेषुपद्मलेश्याभावात्तेषांचलांतकादिदेवेभ्योऽसंख्यातगुणत्वात्तेभ्यःकापोतलेश्याः॥ असंख्येयगुणाभवनपतिव्यं
तरदेवेषुसनत्कुमारादिदेवेभ्योऽसंख्येयगुणेषुकापोतलेश्यासद्भावात्तेभ्योपिनीललेश्याविशेषाधिकाःप्रभूततराणांभवनपतिव्यंतराणांतस्याः
संभवात्तेभ्योपिकृष्णलेश्याविशेषाधिकाःप्रभूततमानांतेषांकृष्णलेश्याकत्वात्तेभ्योपितेजोलेश्याःसंख्येयगुणाःकतिपयानांभवनपतिव्यंत
राणांसमस्तानांज्योतिष्कसौधर्मैशानदेवानांतेजोलेश्याभावात्अधुनादेवीविषयंसूत्रमाह॥ एएसिणंभंतेदेवीणमित्यादि॥ देव्यश्चसौधर्मैशानांता
एवनपरतइतितासांचतस्रएवलेश्यास्ततस्तद्विषयमेवाल्पबहुत्वमभिधित्सुनाजावतेउलेसाणयइत्युक्तं॥ सर्वस्तोकादेव्यःकापोतलेश्याः

कतिपयानांभवनपतिव्यंतरदेवीनांकापोतलेश्याभावात्तेभ्योविशेषाधिकानीललेश्याःप्रभूतानांभवनपतिव्यंतरदेवीनांतस्याःसंभवात्॥ तेभ्योपि
कृष्णलेश्याविशेषाधिकाअतिप्रभूतानांतासांकृष्णलेश्याकत्वात्ताभ्यस्तेजोलेश्याःसंख्येयगुणाकापोतलेश्याभावात्तेभ्योविशेषाधि
कानीललेश्याःज्योतिष्कसौधर्मैशानदेवीनामपिसमस्तानांतेजोलेश्याकत्वात्संप्रतिदेवदेवीविषयंसूत्रमाह॥ एएसिणमित्यादिसर्वस्तो
कादेवाःशुक्ललेश्यास्तेभ्योऽसंख्येयगुणाःपद्मलेश्यास्तेभ्योप्यसंख्येयगुणाःकापोतलेश्यास्तेभ्योनीललेश्याविशेषाधिकास्तेभ्योपिकृष्ण
लेश्याविशेषाधिकाएतावत्प्रागेवभावितंतेभ्योपिकापोतलेश्याकादेव्यःसंख्येयगुणाः॥ ताश्चभवनपतिव्यंतरनिकायांतर्गतावेदितव्याः
भवनपतिदेवीनांकापोतलेश्यायाअसंभवात्देव्यश्चदेवेभ्यःसामान्यतःप्रतिनिकायंद्वात्रिंशद्गुणास्ततःकृष्णलेश्येभ्योदेवेभ्यःकापोतलेश्यादेव्याः
संख्येयगुणाअपिघटंतेताभ्योनीललेश्याविशेषाधिकाःअत्रापिप्राग्वद्भावनातेभ्योपितेजोलेश्यादेवाःसंख्येयगुणाः॥ कतिपयानांभवनपति
व्यंतराणांसमस्तानांज्योतिष्कसौधर्मैशानदेवानांतेजोलेश्याकत्वात्तेभ्यस्तेजोलेश्याकादेव्यःसंख्येयगुणाः द्वात्रिंशद्गुणत्वात्संप्रतिभवनवा
सिदेवविषयंसूत्रमाह॥ एएसिणंभंतेइत्यादिसर्वस्तोकास्तेजोलेश्याकाभवंति॥ महर्द्धिकश्चात्सिद्धिरितिसर्वस्तोकास्तेभ्योऽसंख्येयगुणाःकापोत
लेश्याअतिशयेनप्रभूतानांकापोतलेश्यासंभवात्तेभ्योनीललेश्याविशेषाधिकाअतिप्रभूततराणांतस्याःसंभवात्तेभ्योपिकृष्णले
श्याविशेषाधिकाअतिप्रभूततमानांकृष्णकृष्णलेश्याभावात्एवंभवनपतिदेवीविषयमपिसूत्रंभावनीयं॥ अधुनाभवनपतिदेवदेवीविषयंसूत्रमाह
एएसिणमित्यादि॥ सर्वस्तोकाभवनवासिनोदेवास्तेजोलेश्याकायुक्तिरत्रप्रागेवोक्ता॥ तेभ्यस्तेजोलेश्याकाभवनवासिन्योदेव्याःसंख्येयगुणाःदे
वेभ्योहिदेव्यःसामान्यतःप्रतिनिकायंद्वात्रिंशद्गुणास्ततउपपद्यतेसंख्येयगुणत्वमितितेभ्यःकापोतलेश्याभवनवासिनोदेवाःअसंख्येयगुणास्ते
भ्योपिनीललेश्याविशेषाधिकास्तेभ्योपिकृष्णलेश्याविशेषाधिकाः॥ युक्तिरत्रप्रागुक्तानुसरणीयातेभ्यःकापोतलेश्याभवनवासिन्योदेव्यः
संख्येयगुणाःभावनानुसारेणभावनीया॥ ताभ्योनीललेश्याविशेषाधिकास्ताभ्यःकृष्णलेश्याविशेषाधिकाःएवंवानमंतरविषयमपिसूत्र

त्रयं भावनीयं ॥ ज्योतिष्कविषयसेकमेवसूत्रं तन्निकाये तेजोलेश्याव्यतिरेकेणलेश्यांतरासंभवतः पृथग्देवदेवीविषयसूत्रद्वयासंभवाद्देवविषयं
सूत्रमाह ॥ एएसिणंभंते वेमाणियाणमित्यादि सर्वस्तोकाः शुक्लेश्याः लांतकादिदेवानामेव शुक्लेश्यासंभवात ॥ तेषां चोत्कर्षतोपि श्रेण्यसं
ख्येयभागगतप्रदेशराशिमानत्वात्तेभ्यः पद्मलेश्या असंख्येयगुणाः सनत्कुमारमाहेंद्रब्रह्मलोककल्पवासिनां सर्वेषामपि देवानां प
द्मलेश्यासंभवात्तेषां चातिबृहत्तमश्रेण्यसंख्येयभागवर्तिनभः प्रदेशराशिप्रमाणत्वात् लांतकादिदेवपरिमाणहेतुश्रेण्यसंख्येय
भागापेक्षयाह्यमीषां परिमाणहेतुः श्रेण्यसंख्येयभागोऽसंख्येयगुणाः तेभ्योपि तेजोलेश्या असंख्येयगुणा ॥ तेजोलेश्या हि सौधर्मेश
नदेवानामीशानदेवाश्चांगुलमात्रक्षेत्रप्रदेशराशेः संबंधिनि द्वितीयवर्गमूले तृतीयेन वर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति
तावत्प्रमाणासु घनीकृतस्य एकप्रादेशिकीषु यावंतो नभः प्रदेशास्तावत्प्रमाण ईशानकल्पगतो देवदेवीसमुदायस्तद्गतकिंचिदूनद्वात्रिंशत्तम
भागकल्पाईशानदेवास्तेभ्योपि च सौधर्मकल्पदेवाः संख्येयगुणास्ततो भवंति पद्मलेश्येभ्यस्तेजोलेश्या असंख्येयगुणाः देव्यश्च सौधर्मेश
नकल्पयोरेव तत्र च केवलातेजोलेश्या ततो लेश्यांतरासंभवान्न तद्विषयं पृथक्सूत्रमतः संप्रति देवदेवीविषयं सूत्रमाह ॥ एएसिणंभंते वेमाणि
याणं देवाणं देवीण य इत्यादि ॥ एगमंतरं गं ते ऊलेसा उवेमाणिणीउ देवीऊ संख्येयगुणाः देवानां द्वात्रिंशद्गुणत्वात् अधुना भवनपतिव्यंत
रज्योतिष्कवैमानिकविषयं सूत्रमाह ॥ एएसिणंभंते भवणवासीण मित्यादि ॥ तत्र सर्वस्तोका वैमानिका देवाः शुक्लेश्याः पद्मलेश्या असंख्ये
यगुणाः तेजोलेश्या असंख्येयगुणा इत्यत्र भावना नंतरमेव कृता तेभ्योपि भवनवासिनो देवास्तेजोलेश्याका असंख्येयगुणाः कथमिति चेदुच्य
ते अंगुलमात्रक्षेत्रप्रदेशराशेः संबंधिनि प्रथमवर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणासु घनीकृतस्य लोकस्य एकप्रदेशि १३४
कीश्रेणिषु यावान् प्रदेशराशिस्तावत्प्रमाणो भवनपति देवदेवीसमुदायस्तद्गत किंचिदूनद्वात्रिंशत्तमभागकल्पा भवनपतयो देवास्त
त इमे प्रभूता इति घटंते सौधर्मेशानदेवेभ्यस्तेजोलेश्याका असंख्येयगुणाः तेभ्यः कापोतलेश्या भवनवासिन एवासंख्येयगुणाः

अल्पर्द्धिकानामप्यतिभूतानां कापोतलेश्यासंभवात्तेभ्योपि भवनवासिन एव नीललेश्या विशेषाधिकाः युक्तिरत्र प्रागेवोक्ता तेभ्योपि वानमंतरा
स्तेजोलेश्याका असंख्येयगुणाः कथमिति चेदुच्यते ॥ इहासंख्येययोजनकोटीकोटीप्रमाणानि सविरूपाणि खंडानि यावंत्येकस्मिन् प्र
तरे भवंति तावान् व्यंतरदेवीसमुदायस्तद्गतकिंचिदूनद्वात्रिंशत्तमभागकल्पा व्यंतरदेवास्तत इमे भवनपतियोऽतिप्रभूतमाइत्युपपद्यंते कृ
ष्णलेश्येभ्योभवनपतिभ्यो वानमंतरास्तेजोलेश्याका असंख्येयगुणाः तेभ्योपि वानमंतरा एव कापोतलेश्याका असंख्येयगुणा ॥ अल्प
र्द्धिकानामपि कापोतलेश्याभावात्तेभ्योपि कृष्णलेश्या विशेषाधिका अत्रापि युक्तिः प्रागुक्तानुसरणीया तेभ्यः तेजोलेश्या ज्योतिष्का देवाः
संख्येयगुणाः यतः षट्पंचाशदधिकांगुलशतद्वयप्रमाणानि द्विविरूपाणि यावंति खंडानि एकस्मिन् प्रतरे भवंति तावत्प्रमाणो ज्योतिष्कदेवदेवी
समुदायः तद्गतकिंचिदूनद्वात्रिंशत्तमभागकल्पा ज्योतिष्कदेवास्ततः कृष्णलेश्येभ्यो वानमंतरेभ्यः संख्येयगुणा एव घटंते ज्योतिष्कदेवानामसं
ख्येयगुणाः सूचीरूपखंडप्रमाणहेतोः संख्येययोजनकोटीकोट्यपेक्षया षट्पंचाशदधिकांगुलशतद्वयभागमात्रवर्तित्वात् संप्रति भवनपतिवा
न्यादिदेवीविषयं तदनंतरं भवनवास्यादिदेवदेवीसमुदायविषयं सूत्रमाह सूत्रद्वयमपि प्रागुक्त भावनानुसारेण भावनीयं प्रतिलेश्याविशिष्टानामल्प
र्द्धिकत्वमहर्द्धिकत्वप्रतिपिपादयिषुरिदमाह ॥ ७ ॥ एएसिणंभंते जीवाणं कण्हलेसाणमित्यादि सुगमं नवरं लेश्याक्रमेण यथोत्तमहर्द्धिकत्वं यथा
वीकृष्णलेश्याधिकत्वं भावनीयमेवं नैरयिकतिर्यग्योनिमनुष्यवैमानिकविषयाण्यपि सूत्राणि येषां यावत्यो लेश्यास्तेषां तावतीः परिभाव्य भावनीया
नि ॥ ७ ॥ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां लेश्यापदस्य द्वितीयोद्देशकः समाप्तः ॥ ७ ॥ उक्तो द्वितीयोद्देशकः संप्रति तृतीय आ
रभ्यते ॥ तस्य चेदमादिसूत्रं ॥ नेरईएणंभंते नेरईएस उववज्जइ इत्यादि अस्य चायमभिसंबंधो द्वितीयोद्देशके नारकादीनां लेश्या परिसंख्यानं अ
ल्पबहुत्वं महर्द्धिकत्वं चोक्तमिह तु तेषामेव नारकादिजीवानां ताः स्वाल्लेश्याः किमुत्पद्यमानक्षेत्रोपपन्नानामेव भवंति उत विग्रहेपीत्यस्यार्थस्य
प्रतिपादनार्थं प्रकारांतरमाश्रित्य नारकादिव्यपदेशं पृच्छति नेरइएणंभंते नेरइएस उववज्जइ अनेरइए नेरइएस उववज्जइ इति ॥ इदं

चप्रश्नसूत्रंसुगमंभगवानाहगौतमनैरयिकोनैरयिकोषूत्पद्यतेनानैरयिकःकथमितिचेदुच्यतेइहयस्मान्नारकादिभवोपग्राहकमायुस्तेनाभिमुखंतदा
हिनारकायुष्युदयमागतेनारकःभवोभवतिमनुष्यायुषिमानुषभवइत्यादि ततोनारकाद्यायुर्वेदनप्रथमसमयएवनारकादिव्यपदेशंलभतेएतच्चऋजु
सूत्रनयदर्शनंतथाचनयविद्भिर्ऋजुसूत्रनयस्वरूपंकुर्वद्भिरिदमुक्तंपलालंनदह्यतेअग्निर्भिद्यतेनघटःकश्चिन्नास्त्यनिःक्रमोस्तीहनचसन्त्यंप्रवि
शतेनारकव्यतिरिक्तव्यतिरिक्तश्चनरकेनोपपद्यतेनरकान्नारकः श्वास्यनकश्चिद्धिप्रमुच्यते इत्यादिएवंजाववेमाणिय इतिएवंनैरयिकोक्त
प्रकारेणतावद्वक्तव्यं यावद्वैमानिकोवैमानिकविषयंसूत्रंतच्चसुगमत्वात्स्वयंपरिभावनीयंअधुनोद्वर्तनाविषयंनैरयिकेषुसूत्रमाहनेरइएणं
भंतेइत्यादिएतदपिऋजुसूत्रनयदर्शनेनवेदितव्यं तथाहिपरभवायुष्युदयमागतेततउद्वर्त्तनेयद्भवायुश्चउदयमागतं तेनभवेनव्यपदेशोय
थानारकायुष्युदयमागतेनरकभवेनारकइति ततोनैरयिकेभ्यो नैरयिकइतिएवंचतुर्विंशतिदंडकक्रमेणतावत्सूत्रंवक्तव्यंयावद्वैमानिकवि
षयंनवरंज्योतिष्कवैमानिकविषयेचववइत्यभिलापःकर्त्तव्यः तेष्वप्युद्वर्तनस्यच्यवनमितिप्रसिद्धेःतथाचाहएवंजाववेमाणिएनवरमित्यादि
अधुनाकृष्णलेश्याविषयमुत्पत्तेसूत्रमाह ॥ ७॥ सेनूणंभंतेइत्यादि सेशब्दोऽथशब्दार्थः सचेहप्रश्ने नूनंनिश्चितमेतन्भदंतकृष्णलेश्योनैरयि
कःकृष्णलेश्येषुनैरयिकेषुमध्येउत्पद्यतेतेभ्यश्चकृष्णलेश्येभ्योनैरयिकेभ्योउद्वर्त्तमानःकृष्णलेश्यएवोद्वर्त्तेनिएतदेवनिश्चयदार्ढ्यार्थंसादना
र्थंप्रकारांतरेणाह यल्लेश्यउत्पद्यतेतल्लेश्यउद्वर्त्ततेनलेश्यांतरगतइतिभगवाह हंतागोयमेत्यादिहंतेत्यनुमतौअनुमतमेतत् ममगौतम
कण्हलेसेनेरइएइत्यादिअथकथंकृष्णलेश्येषुनैरयिकषूत्पद्यतेनलेश्यांतरोपेतउच्यतेइहतिर्यक्पंचेंद्रियोमनुष्योवाबद्धायुष्कतयानरके
षूत्पत्तुकामोयथाक्रमंतिर्यगायुषिमनुष्यायुषिचसाकल्येनक्षीणेअंतर्मुहूर्त्तशेषेयल्लेश्येषुनरकेषूत्पत्स्यतेतल्लेश्यापरिणामेनपरिणमति १३५
ततस्तेनैवाप्रतिपतितेनपरिणामेननरकायुःप्रतिसंवेदयतेतउच्यतेकृष्णलेश्याःकृष्णलेश्येषुनैरयिकेषूत्पद्यते नविश्यांतरयुक्तः
अथकथंकृष्णलेश्याकएवोद्वर्त्ततेउच्यतेदेवनैरयिकाणांहिलेश्याआभवक्षयाद्भवति एतच्चप्रागेवप्रपंचनउपपादितंएवंनीलले

परिणाम

श्याविषयंकापोतलेश्याविषयंचसूत्रंवस्तुव्यमेवमसुरकुमारादीनामपिस्तनितकुमारपर्यवसानानांवक्तव्यंनवरं तेजोलेश्यासूत्रंतत्राप्यधिक
मभिधेयंतेजोलेश्यायाअपितेषांभावात् अधुनापृथिवीकायिकेषुकृष्णलेश्याविषयंसूत्रमाह सेनूणंभंतेइत्यादिइहतिर्श्चांमनुष्याणांचले
श्यापरिणामआंतमुहूर्तिकस्ततःकदाचित्यल्लेश्यउद्वर्त्ततेकदाचिल्लेश्यांतरपरिणतोप्युद्वर्त्तते एषुपुनर्नियमोयोयल्लेश्येषूत्पद्यतेमनियमत
स्तल्लेश्यएवोत्पद्यते अंतमुहुत्तंमिगए अंतमुहुत्तंमिसेसए आउलेसाहिंपरिणयाहिंजीवाबच्चंतिपरलोयंमितिवचनात ततउक्तंगोयमाकण्हले
सेपुढविकाइएसुउववज्जइसियकण्हलेसेयवट्टइइत्यादि एवंनीललेश्याविषयंकापोतलेश्याविषयंचसूत्रंवक्तव्यंतथायदाभवनपतिव्यंतरज्यो
तिष्कसौधर्मेशानदेवाः तेजोलेश्यावंतःस्वभावात्च्युत्वापृथिवीकायिकेषूत्पद्यंते तदाकियत्कालमपर्याप्तावस्थायांतेषुतेजोलेश्यापिलभ्यते तत
ऊर्ध्वंनुभवति ॥ तथाभवस्वभावतयातेजोलेश्यायोग्यद्रव्यग्रहणशक्यसंभवात्ततस्तेजोलेश्यासूत्रंउक्तंतेउलेसेउववज्जइनोचेवणंतेउलेसेउ
ववट्टइइतियथाचपृथिवीकानांचत्वारिसूत्राण्युक्तानि ॥ तथाऽप्कायिकवनस्पतिकायिकानामपिवक्तव्यानि तेषामप्यपर्याप्तावस्थायांतेजो
लेश्यासंभवात्तेजोवायुद्वित्रिचतुरिंद्रियविषयाणिप्रत्येकंत्रीणिसूत्राणिवक्तव्यानितेषांतेजोलेश्याया असंभवात्पंचेंद्रियतिर्यग्योनिका
मनुष्याश्चयथाआद्यास्तिसृषुलेश्यासुपृथिवीकायिकाउक्तास्तथाषट्स्वपिलेश्यासुवक्तव्याः षण्णामप्यन्यतमस्यांलेश्यायांतेषामुत्पत्तिसं
भवादुत्पत्तिगतैकैकलेश्याविषयंचोद्वर्त्तनायांषण्णांविकल्पानांसंभवात् सूत्रपाठश्चैवंसेनूणंभंतेकण्हलेसेपंचेंद्रियतिरिक्खजोणिएक
ण्हलेसेसुपंचेंद्रियतिरिक्खजोणियेसुउववज्जइकण्हलेसेउवट्टइ यल्लेसेउववज्जइतल्लेसेउवट्टइहंतागोयमाकण्हलेसेपंचेंदियतिरि
क्खजोणिएकण्हलेसेसुपंचेंद्रियतिरिक्खजोणिएसुउववज्जइसियकण्हलेसेउवट्टइसियनीललेसेउवट्टइ ॥ सियकाउलेसेउवट्टइ
सियतेउलेसेउवट्टइसियपम्हलेसेउवट्टइसियासुक्कलेसेउवट्टइसियजल्लेसेउववज्जइतल्लेसेउवट्टइएवंनीलकापोततेजःपद्मशुक्ललेश्या
विषयाण्यपिसूत्राणिवक्तव्यानि वाणमंतरा जहा असुरकुमाराइतिजल्लेसेउववज्जइति वक्तव्याइतिसर्वदेवानांलेश्यापरिणाम
इतल्लेसेउववज्जइ ९

स्य आभवक्षयाद्भावात् एवं लेश्यापरिसंख्यानं परिभाव्य ज्योतिष्कवैमानिकविषयाण्यपि सूत्राणि वक्तव्यानि नवरं तत्र वयं नील्यभिरूपनीयान्
देवमेकैकलेश्याविषयाणि चतुर्विंशतिदंडकसूत्रैर्मेण नैरयिकादीनां सूत्राण्युक्तानि तत्र कश्चिदाशंकेत प्रविरलैकैकनारकादिविषयामे
नत्सूत्रकदंबकं यदा तु बहवो भिन्नलेश्याकास्तस्यां गता बुलद्धं तेतदान्यथापि वस्तुगतिर्भवेदेकैकगतधर्मापेक्षया समुदायधर्मस्य
क्वचिदन्यथापि दर्शनात्ततस्तदाशंकापनोदाय यं यासां यावत्यो लेश्याः संभवंति तेषां युगपत्तावल्लेश्याविषयमेकैकं सूत्रमनंतरो
दितार्थमेव प्रतिपादयति सेषूणं भंते कण्हलेसे नीललेसे काउलेसे नेरइए कण्हलेसेसु नीललेसेसु काउलेसेसु नेरइएसु उववज्जइ
इत्यादि समस्तं सुगमं संप्रति कृष्णलेश्यादिनैरयिकसत्कावधिज्ञानदर्शनविषयक्षेत्रपरिमाणतारतम्यमाह ॥ ध ॥ कण्हलेसे णं भंते
इत्यादि कृष्णलेश्यो भदंत कश्चिन्नैरयिको ऽपरं कृष्णलेश्याकं प्रणिधायापेक्ष्य अवधिज्ञानेन सर्वतः सर्वासु दिक्षु समभिलोकमा
नो निरीक्षमाणः कियद्वा किंपरिमाणं क्षेत्रं जानाति कियद्वा क्षेत्रमवधिदर्शनेन पश्यति भगवानाह गौतम न बहुक्षेत्रं जानाति नापि ब
हुक्षेत्रं पश्यति किमुक्तं भवति अपरं कृष्णलेश्याकं नैरयिकमपेक्ष्य न विवक्षितः कृष्णलेश्याको योग्यतानुसारेणापि नैरयिको अति
प्रभूतं क्षेत्रमवधिना जानाति पश्यति ॥ एतदेवाह ॥ न दूरमपि विप्रकृष्टं क्षेत्रं जानाति नाप्यति विप्रकृष्टं क्षेत्रं पश्यति किंत्वित्वरमेव स्वल्प
मेवाधिकं क्षेत्रं जानाति इत्वरमेवाधिकं क्षेत्रं पश्यति एतच्च सूत्रं समानपृथिवीकं कृष्णलेश्यनैरयिकविषयमवसेयमन्यथा व्यभिचारसं
भवात्तथाहि सप्तमपृथिवीगतः कृष्णलेश्याको नैरयिको जघन्यतो गव्यूतार्द्धं जानाति उत्कर्षतो गव्यूतं षष्ठपृथिवीगतः कृष्णलेश्याको ज
घन्यतो गव्यूतं उत्कर्षतः सार्द्धं पंचमपृथिवीगतः कृष्णलेश्याको जघन्यतः सार्द्धगव्यूतमुत्कर्षतः किंचिदूनं द्विगव्यूतं ततो द्विगुणत्रि
गुणाधिकक्षेत्रसंभवाद्भवत्यधिकृतसूत्रस्य व्यभिचारः यथा समानपृथिवीकमपरं कृष्णलेश्याकं नैरयिकमपेक्ष्यातिविशुद्धोपि कृ ३३६
ष्णलेश्याको नैरयिको मनागधिकं पश्यति नाति प्रभूतं तथा दृष्टांतेनोपपादयिषुराह सेकेणट्ठेणं भंते इत्यादि इयमत्र भावना यथा समभू

भागव्यवस्थित एव कश्चिद्वि स्थितः पुरुषः चक्षुर्निर्मल्यवशात् मनागधिकं पश्यति न प्रभूततरं तथा विवक्षितोपि कश्चित् कृष्णलेश्याको नै
रयिकः स्वभूमिकानुसारेणातिविशुद्धोपि समानपृथिवीसमानपृथिवीकमपरं कृष्णलेश्याकं नैरयिकमपेक्ष्य यदि परमवधिना नागधिकं प
श्यति ॥ ननु प्रभूततरं अत्र समभूभागस्तनीयसमाना पृथिवी समानाधिकृष्णरूपालेश्या चक्षुःस्थानीयमवधिज्ञानमेतावतां चैतदपि ध्वनि
तं यथा समभूभागव्यवस्थितः समंतादभिलोकमानो गर्त्तागतं पुरुषमपेक्ष्याति प्रभूततरं पश्यति तथा पंचमपृथिवीगतः स्वभूमिकानुसारेणा
तिविशुद्धकृष्णलेश्याको विवक्षितो नैरयिकः सप्तमपृथिवीगतं कृष्णलेश्याकमति मंदानुभागावधिं नैरयिकमपेक्ष्याति प्राभृतं पश्यति म
नागधिकं त्रिगुणक्षेत्रसंभवात् संप्रति नीललेश्याकविषयं सूत्रमाह ॥ नीललेसे णं भंते नेरइयं पणिहाए इत्यादि अक्षरगमनिका सुगमा न
वरं वितिमिरतरागं क्षेत्रं जाणइ इति विगतं तिमिरं तिमिरसंपाद्यो भ्रमो यत्र तत् वितिमिरं इदं वितिमिरं इदं वितिमिरमिदमनयोरतिशायेन वि
तिमिरं वितिमिरं वितिमिरतरं द्वयोर्विभज्ये तरवितितर प्रत्ययः तमः प्राकृतलक्षणात् स्वार्थिकप्रत्ययः पूर्वस्य च दीर्घत्वं ॥ अत एव विशुद्ध
तरं निर्मलतरमतीव स्फुटप्रतिभासमिति यावत् भावना त्वियं यथा धरणितलगतं पुरुषमपेक्ष्य पर्वतारूढपुरुषो ऽतिदूरं क्षेत्रं पश्यति तदपि
यस्फुटप्रतिभासं तथा विवक्षितोपि नीललेश्याको नैरयिको योग्यतानुसारेणाविशुद्धावधिकृष्णलेश्याकं नैरयिकमपेक्ष्यातिदूरं विति
मिरतरं स्फुटं प्रतिभासं च क्षेत्रं जानतीति अत्र पर्वतस्थानीया उपरितनी तृतीया पृथिवी अतिविशुद्धा च स्वभूमिकानुसारेण नीललेश्या
धरणितलस्थानीया अधस्तनी कृष्णलेश्या च चक्षुःस्थानीयमवधिज्ञानमिति संप्रति नीललेसे णं नेरइयं पणिहायेत्यादि अक्षरगम
निका सुगमा नवरं दोवि पाए उच्चाचइत्ता इति द्वावपि पादौ उच्चैः कृत्वा द्वावपि पार्ष्णी उत्पाट्येत्यर्थः भावना त्वियं यथा पर्वतस्योपरि वृक्षमा
रूढः सर्वतः समंतादेवालोकमानो बहुतरं पश्यति स्पष्टतरं च तथा कापोतलेश्यो नैरयिको ऽपरं नीललेश्याकमपेक्ष्य प्रभूतं क्षेत्रम
वधिना जानाति पश्यति च तदपि च स्पष्टतरमिति इह वृक्षस्थानीया कापोतलेश्या उपरितनी नीललेश्यात् तृतीया च पृथिवी चक्षुःस्थानी

यमवधेज्ञानमितिसंप्रतिकालेश्याकतिषुज्ञानेषुलभ्यंतेइतिनिरूपयितुकामआह॥८॥ कण्हलेसेणंभंतेजीवेकइसुनाणेसुहोज्जाप्रश्नसूत्रं
सुगमंभगवाहनोगौतमद्वयोस्त्रिषुचतुर्षुचज्ञानेषुभवतितत्रद्वयोराभिनिबोधिकश्रुतज्ञानयोस्त्रिषुआभिनिबोधिकश्रुतावधिज्ञानेषुयतिवाभि
निबोधिकश्रुतमनः॥पर्यायज्ञानेषुइहावधिरहितस्यापिमनःपर्यवज्ञानमुपजायतेसिद्धप्राभृतादावनेकशस्तथाप्रतिपादनादन्यच्चविचित्राप्र
तिज्ञानंयदावरणक्षयोपशमसामग्रीतत्रकस्यापिचारित्रिणोऽप्रमत्तस्यामर्षौषध्याद्यन्यतकतिपयलब्धिसमन्वितस्यमनःपर्यायज्ञाना
वरणक्षयोपशमनिमित्तासामग्रीतथारूपाध्यवसायादिलक्षणोसंपद्यतेनत्ववधिज्ञानावरणक्षयोपशमनिमित्तातततस्यमनःप
र्यवज्ञानमेवभवतिनतुमनःपर्यवज्ञानमतिविशुद्धस्यापजायतेकृष्णलेश्याचसंक्लिष्टाध्यवसायरूपाततःकथंकृष्णलेश्याकस्यम
नःपर्यायज्ञानसंभवः उच्यतेइहलेश्यानांप्रत्येकमसंख्येयलोकाकाशप्रमाणान्यध्यवसायस्थानानिचितुमंदानुभावान्यध्यवसायस्था
नानिप्रमत्तसंयतस्यापिलभ्यंतेअतएवकृष्णानीलकापोतलेश्या अन्यत्रमत्तसंयतानांगीयंतेमनःपर्यवसानंचप्रथमतोऽप्रमत्तसंयत
स्यो त्पद्यतेनतःप्रमत्तसंयतस्यापिलभ्यंतेइतिसंभवतिकृष्णलेश्याकस्यापिमनःपर्यवज्ञानंचतुर्ष्वाभिनिबोधिकश्रुतावधिमनःपर्यव
ज्ञानेषुएवंजावपह्मलेसेइति॥एवंकृष्णलेश्योक्तेनप्रकारेणतावद्वक्तव्यंयावत्पद्मलेश्याःकिमुक्तंभवतिनीललेश्याःकापोतलेश्य
स्तेजोलेश्यःपद्मलेश्यश्चोक्तप्रकारेणद्वयोस्त्रिषुचर्तुषुचज्ञानेषुभणनीयःसचैवंनीललेस्सेणंभंतेजीवेकइसुनाणेसुहोज्जागोय
मादोसुवातिसुवाचउसुवानाणेसुहोज्जागोयमादोसुवाचउसुवानाणेसुहोज्जाइत्यादिशुक्ललेश्यपुविशेषइतितंपृथकृवक्तिशुक्कलेसेणंभं
तेइत्यादिइहशुक्ललेश्यायामेवकेवलज्ञानंनलेश्यांतरेनतःशेषलेश्याकेभ्योअस्यशुक्ललेस्यस्यविशेषः॥८॥ ॥इतिश्रीमलयगि
रिविरचितायांप्रज्ञापनाटीकायांलेश्यापदस्यतृतीयउद्देशकः॥७॥ उक्तस्तृतीयउद्देशकःसंप्रतिचतुर्थआरभ्यते॥तत्रचेयमादाव
धिकारगाथा॥परिणामवर्णेत्यादिप्रथमः॥परिणामावधिकारोद्वितीयोवर्णाधिकारस्तृतीयोरसाधिकारश्चतुर्थोगंधाधिकारः

पंचमःशुद्धाशुद्धाधिकारःषष्ठःप्रशस्ताप्रशस्ताधिकारःसप्तमः॥संक्लिष्टाधिकारःअष्टमउष्णशीताधिकारोनवमोगत्यधिकारःदशमः
परिणामोधिकारः॥एकादशःप्रदेशप्ररूपणाधिकारोद्वादशोचगाहाधिकारस्त्रयोदशोवर्गणाधिकारश्चतुर्दशःस्थानप्ररूपणाधिका
रःपंचदशोऽल्पबहुत्वाधिकारःतत्रप्रथमंपरिणामलक्षणमभिधित्सुर्यासौपरिणामोवक्तव्यस्तामेवलेश्याप्रतिपादयति॥७॥ कइणं
भंतेसाउपण्णत्ताउइत्यादिइदंसूत्रंप्रागप्युक्तंपरंपरिणामाद्यर्थप्रतिपादनार्थभूयउपन्यस्तंसेनूणंभंतेइत्यादि॥अथभदंतकृष्णलेश्या
कृष्णलेश्यायोग्यानिद्रव्याणिप्राप्यान्योन्यावयवसंस्पर्शेनासाधनद्रूपतयानीललेश्यारूपतयारूपशब्दोऽत्रस्वभाववाचीनीलले
श्यास्वभावतयाइत्यर्थः॥भूयोभूयःपरिणमतीतियोगःतत्स्वभावतद्वर्णरूपतयाभवतितत्तआहतद्वर्णतयातद्गंधतया॥तत्स्पर्शत
यासर्वत्रापितच्छब्दोननीललेश्यायोगानिद्रव्याणिपरामृशंतिभूयोभूयोअनेकवारंतिर्यङ्मनुष्याणांतत्तद्भवसंक्रांतौशेषकालेवाप
रिणमते इदंहितिर्यग्मनुष्यानधिकृत्यवेदितव्यं॥एवंगौतमेनप्रश्नेकृतेभगवानाह हंतागोयमाइत्यादिहंतेत्यनुमतौअनुमतमे
तन्नुगौतमकृष्णलेश्यानीललेश्यांप्राप्येत्यादिप्राग्वत्॥इयमत्रभावनायदाकृष्णलेश्यापरिणतोजंतुस्तिर्यग्मनुष्योवाभवांतरसंक्रांतिचि
कीर्षुनीललेश्यायोग्यानिद्रव्याणिगृह्णातितदानीललेश्यायोग्यद्रव्यसंपर्कतस्तानिकृष्णलेश्ययोग्यानिद्रव्याणितथारूपजीवपरिणाम
लक्षणंसहकारिकारणमासाद्यनीललेश्याद्रव्यरूपतयापरिणमंतेपुद्गलानांतथातथापरिणमनस्वभावत्वात्ततःकेवलनीललेश्या
योग्यद्रव्यसाचिव्यान्नीललेश्यापरिणतःसन्कालंकृत्वाभवांतरेसमुत्पद्यतेउक्तंचयल्लेसाइंदव्वाइंपरियाइत्ताकालंकरेइतल्लेसेउ
ववज्जइइति॥तथासएवतिर्यग्मनुष्योवानस्मिन्नेवभवेवर्त्तमानोयदाकृष्णलेश्यापरिणतोभूत्वानीललेश्याभावेनपरिणमतेतदापिकृ
ष्णलेश्यायोगानिद्रव्याणितत्कालेगृहीतनीललेश्यायोग्यद्रव्यसंपर्कतोनीललेश्यायोग्यद्रव्यरूपतयापरिणमंते॥अनुमेवार्थदृष्टांतेन
विभावयिषुःप्रथमंप्रश्नसूत्रमाह॥सेकेणठेणंभंतेइत्यादिसुगमंभगवानाह॥सेजहानामएखीरेइत्यादिततःलोकःप्रसिद्धंयथानामके

गोक्षीरंमजाक्षीरंमजाक्षीरंमहिषीक्षीरमित्यादिनामकंक्षीरंदूसिंइतिदेशीवचनात्ततमथितंतक्रंप्राप्यान्यान्यावयवसंस्पर्शनाद्विभागंगत्वाय
थावाशुद्धंमलरहितंसमलेद्विरागःसंपद्यमानापिनतथारूपालगानितत्तउक्तंशुद्धंवस्त्रंचेलंवस्त्रंतेअनेनेतिरागःकरणेघञ्तंमंजिष्ठादि
कंप्राप्यतद्रूपतयामंजिष्ठादिरागद्रव्यस्वभावतयाएतदेवव्याचष्टेतद्वर्णतयेत्यादिसुगमं॥ तथाकृष्णलेश्यायोग्यानिद्रव्याणिनीलले
श्यायोग्यानिद्रव्याणिप्राप्यतद्रूपतयापरिणमंतेइयमत्रभावनायथाक्षीरलक्षणकारणगतारूपादयस्तत्ररूपादिभावंप्रतिपद्यंतेयथावा
शुद्धवस्तुलक्षणकारणगतारूपादयोमंजिष्ठादिरागद्रव्यरूपादिभावंप्रतिपद्यंतेतथाकृष्णलेश्यायोग्यद्रव्यरूपकारणगतारूपादयो
नीललेश्यायोग्यंद्रव्यरूपादिभावंप्रतिपद्यंतेसेएणट्ठेणमित्याद्युपसंहारवाक्यंसुगमं॥ एवंनीललेश्याकापोतलेश्यांप्राप्येत्यादीन्यपि
चत्वारिसूत्राणिभावनीयानि॥ तदेवंपूर्वस्यालेश्यायाउत्तरामुत्तरांलेश्यांप्रतीत्यतद्रूपतयापरिणमनमुक्तमिदानींमेकैकस्यालेश्या
यायथायोगंक्रमेणशेषसमस्तलेश्यापरिणामनमाहसेन्नूणंभंतेकण्हलेस्सानीललेस्संकाउलेसमित्यादिवाशब्दोऽत्रसर्वत्राप्य
नुक्तोद्रष्टव्यःनीललेश्यांवायावत्शुक्ललेश्यांवाएकस्यालेश्यायाःपरस्परविरुद्धतयायुगपदनेकलेश्यापरिणामासंभवात्॥
शेषाक्षरगमनिकाप्राग्वत्॥ अत्रैवार्थेदृष्टांतमभिधित्सुरिदमाह॥ सेकेणट्ठेणंभंतेइत्यादिसुगमंनवरंयथावैडूर्यमणिरेकएवतत्त
दुपाधिद्रव्यसंपर्कतस्तद्रूपतयापरिणमतेतथैवतान्यपिकृष्णलेश्यायोग्यानिद्रव्याणितत्तन्नीलादिलेश्यायोग्यद्रव्यसंपर्कतस्तत्त
द्रूपतयापरिणमंतेइत्येतावतांशेनदृष्टांतोनपुनर्यथावैडूर्यमणिःस्वस्वरूपमजहानस्तत्तदुपाधिद्रव्यसंबंधतस्तत्तदुपाधिद्र
व्यसंबंधतस्तत्तदाकारमात्रभाजितयातत्तद्रूपतयापरिणमतितथैतान्यपिकृष्णलेश्यायोग्यानिस्वस्वरूपमजहानान्येवद्रव्या १३८
णितत्तन्नीलादिलेश्यायोग्यद्रव्यसंपर्कतस्तत्तदाकारमात्रधारितयातत्तद्रूपतपरिणमंतेइत्यनेनांशेनतिरश्चांमनुष्याणांचले
श्याद्रव्याणांसामस्त्येनतद्रूपतयापरिणामाभ्यापगमात्अन्यथानैरयिकदेवसत्कलेश्याद्रव्याणामिवतिर्यग्मनुष्याणामपिलेश्याद्रव्या

णांसर्वथास्वस्वरूपापरित्यागेनचिरकालमवस्थानसंभवात्यदुत्कर्षतोप्येषामंतर्मुहूर्तलक्षणास्थितिपरिमाणमन्यत्रोक्तंतद्विरुध्येतपल्यो
पमत्रयमपियावत्उत्कर्षतःस्थितिसंभवात्॥ तदेवंतदन्यलेश्यापंचकपरिणाममधिकृष्णलेश्याविषयंसूत्रमुक्तमेवंनीलादिलेश्या
विषयाण्यपिप्रत्येकंतदन्यलेश्यापंचकपरिणाममधिकृत्यपंचसूत्राणिवक्तव्यानि॥ तदेवंतिर्यग्मनुष्याणांभवसंक्रांतिविशेषकालंच
लेश्याद्रव्यपरिणामउक्तोदेवनैरयिकसत्कानितुलेश्याद्रव्याण्याभवक्षयमवस्थितानियत्तदन्यलेश्याद्रव्यसंपर्कतस्त्राकारमात्रंतदत्रैव
वक्ष्यतेततःउक्तःपरिणामलक्षणाधिकारोऽधुनावर्णाधिकारमभिधित्सुराह॥७॥ कण्हलेसाणंभंतेवण्णेणंकेरिसियापन्नत्ताइत्यादिकृष्णद्रव्यात्मिकालेश्याकृष्णलेश्यायोग्यानिद्रव्याणीत्यर्थः॥ तेषामेववर्णादिसंभवात्ननुकृष्णद्रव्यजनिताभावरूपा
कृष्णलेश्यातस्यावर्णाद्ययोग्यात्भदंतकीदृशीवर्णेनप्रज्ञप्ताभगवानाह॥ गोतमसलोकप्रसिद्धोयथानामकोजीमूतइतिषाजीमू
तोबलाहकःसचेहप्रावृट्प्रारंभसमयभावीजलभृतोवेदितव्यः॥ तस्यैवप्रायोऽतिकालिमसंभवात्इतिशब्दउपमानभूतवस्तुनामपरिस
माप्तिद्योतकोवाशब्दउपमानांतरापेक्षयासमुच्चयेएवंसर्वत्रइतिवाशब्दोद्रष्टव्योअंजनंसौवीरांजनंरत्नविशेषोवाखंजनंदीपमल्लिका
मलःस्नेहाभ्यक्तशकटाक्षघर्षणोद्भवमित्यपरेकज्जलंप्रतीतंगवलंमाहिषंशृंगंतदपिचोपरितनत्वग्भागापसारणेद्रष्टव्यं॥ तत्रैवविशि
ष्टस्यकालिम्नःसंभवात् जंबूफलंप्रतीतंअरिष्टकःफलविशेषः परपुष्टःकोकिलः भ्रमरश्चंचरीकःभ्रमरावलीभ्रमरपंक्तिगजकल
भःकरिपोतःकृष्णकेसरःकृष्णबकुलः॥ आकाशथिग्गलंशरदिमेघापांतरालवर्त्याकाशखंडंतदपिह्यतीवकृष्णंप्रतिभातीत्युक्तंकृष्णा
शोककृष्णकणवीरकृष्णबंधुजीवाअशोककणवीरबंधुजीवावृक्षविशेषाःअशोकादयोहिजातिभेदेनपंचवर्णाभवंति॥ ततःशे
षवर्णाव्युदासार्थंकृष्णग्रहणंएतावत्युक्तेगौतमआहभवेएयारूवाभगवन्भवेत्कृष्णलेश्यावर्णनएतद्रूपाभगवानाह॥ नायमर्थःसम
र्थःनायमर्थउपपन्नएतद्रूपाकृष्णलेश्येतिकिंतुसाकृष्णलेश्याइतोजीमूतादेःकृष्णेनअनिष्टतरिकाचैवइयमनिष्टाइयमनयोर्मध्ये

अतिशयेन अनिष्टा ऽनिष्टतरा अनिष्टतरैवानिष्टतरिका अनीप्सिततरिका एवेति भावः॥ इह किंचिदनिष्टमपि स्वरूपतः कांतं भवति ततः
कांततान्युदासार्थमाह॥ अकांततरिकैव किंचित्केषांचिदनिष्टमपि स्वरूपतो ऽकांतमप्यपरेषां प्रियं भवति ततः सर्वथाप्रियतान्युदासार्थमा
ह अप्रियतरिकैव अत एवामनोज्ञतरिकैव वस्तुतः सम्यक्परिज्ञाने सति मनागप्युपादेयतया तत्र मनसः प्रवृत्त्यसंभवात् अमनोज्ञतरम
पि किंचिन्मध्यमं भवतीति प्रकृष्टप्रकर्षविशेषप्रतिपादनार्थमाह॥ अमन आपतरिकैव मनसि आप्नोति आत्मवशतां नयतीति मनआ
पा न मनआपा ततो ऽद्वयोः प्रकर्षे तरप् एवं भूता वर्णेन प्रज्ञप्ता नीललेसा णं भंते इत्यादि अक्षरगमनिका प्राग्वत् नवरं भृंगः पक्षिविशे
षः पक्ष्मलः॥ भृंगपत्रं तस्यैव पक्षिविशेषस्य पक्ष्म चासः पक्षिविशेषः चासपिच्छं चासस्य पतत्रं शुकस्य पतत्रं श्यामा प्रियंगुः व
नराजी प्रतीता उच्चंतगो दंतरागः आह च मूलटीकाकार उच्चंतगो दंतरागो भृङ्गइ पारापतग्रीवा मयूरग्रीवा च सुप्रतीताह लधरो बल
देवस्तस्य वसनं वस्त्रं ह लधरवसनं तद्धि नीलं भवतीत्युपात्तं अतसी कुसुमं बाणवृक्षकुसुमं च प्रतीतं अंजनकेसिका वनस्पतिविशेष
स्तस्याः कुसुमं अंजनकेसिकाकुसुमं नीलोत्पलं कुवलयं नीलाशोकनीलकणवीरनीलबंधुजीवा अशोकादि वृक्षविशेषाः काउलेसा णं
भंते इत्यादि अत्राप्यक्षरगमनिका प्राग्वत् खदिरसारो धमासारश्च लोकप्रतीतः तंचेइ वा तंबकरोडइ वा तंबछिवाडियाइ वेति संप्रदा
यादवसेयं वंतार्का कुसुमं प्रतीतं कोइलच्छदकुसुमेइ वेति कोकिलच्छदस्तैलकंटक इति टीकाकृत् वण्णाहिगारे जोएत्थ कोइलच्छ
दो सो तिलकंटओ भन्नइ इति तस्य कुसुमं प्रतीतं॥ तेउलेसा णं भंते इत्यादि शशकोरल्लवराहमनुष्यरुधिराणि शेषरुधिरेभ्यो लोहित
वर्ण्णोत्कटानि भवंति॥ ततएतेषामुपादानं बालेंद्रगोपकः सद्योजातइंद्रगोपकः स हि प्रवृद्धः सन्नीषत्पांडुरक्तो भवति॥ ततो बाल ग्रह
णं इंद्रगोपकः प्रावृट्प्रथमसमयभावी कीटविशेषः बालदिवाकरः प्रथममुद्गच्छन्सूर्यः गुंजा लोकप्रतीता तस्याः अर्द्धरागो गुंजार्द्ध

रागः गुंजाया ह्यर्द्धमतिरक्तं भवत्यर्द्धं चातिकृष्णमिति अर्द्धग्रहणं॥ जात्यः प्रधानो हिंगुलकः प्रवालं तस्यांकुरः प्रवालांकुरः स हि प्रथम
मुद्गच्छन्नत्यंतरक्तो भवति ततस्तदुपादानं लाक्षारसः प्रतीतः लोहिताक्षमणिर्लोहिताक्षनामा रत्नविशेषः कृमिरागेण रक्तः कं
बलः कृमिरागकंबलः शाकपार्थिवादिदर्शनान्मध्यपदलोपी समासः गजतालुचीनपिष्टराशिपारिजातकुसुमजपाकुसुमकिंसुक पु
ष्पराशिरक्तोत्पलरक्ताशोकरक्तकणवीररक्तबंधुजीवा लोकप्रतीता भावेण्यारूवाइ इति पदयोजना प्राग्वत् भगवानाह॥ गोतम तेऊण
लेसा यतसेंजालेश्याइतः शशकरुधिरादिभ्यो लोहितेन वर्णेन इष्टतरिकैव तत्र किंचिदकांतमपि तेषांचिदिष्टतरं भवति ततः कांततर
ताप्रतिपादनार्थमाह कांततरिकैव केषांचिदिष्टतरमपि स्वरूपतः कांततरमप्यपरेषामप्रियं भवति ततः प्रियतरताप्रतिपत्त्यर्थमाह प्रियत
रिकैव अत एव मनोज्ञतरिका मनोज्ञतरमपि किंचिन्मध्यमं भवेदतः प्रकृष्टतरप्रकर्षविशेषप्रतिपादनार्थमाह मनआपतरिकैव वर्णे
न प्रज्ञप्ता पम्हलेसे णं भंते इत्यादि अक्षरगमनिका प्राग्वत् नवरं चंपकः सामान्यतः सुवर्णचंपको वृक्षः चंपकछल्लीइ वेति
सुवर्णचंपक॥ चंपकभेएइ वाइ इति सुवर्णचंपकस्य भेदो द्विधा भावो भिन्नस्य हि वर्णप्रकर्षो भवति ततो भेदग्रहणं हरिद्रा हपिंड हरि
द्रा हरिद्रागुडिका हरिद्रानिवर्तिता गुटिका हरिद्राभेदो हरिद्राया द्वैधीभवः हरितालो धातुविशेषः हरितालगुटिका हरितालगुटिका
मयी गोलिका हरितालभेदो हरितालखंडः चिकुरः पीतद्रव्यविशेषः चिकुररागस्तन्निष्पादितो वस्त्रादौ रागः सुवर्णसिप्पाइ वाइति
सुवर्णमयी शुक्तिका वरं प्रधानं यत्कनकं तस्य निकषः कषपट्टके रेखारूपः वरकनकनिकषः वरपुरुषो वासुदेवस्तस्य वसनं वस्त्रं वर
पुरुषवसनं तद्धि पीतं भवतीत्युपात्तं॥ अल्लकी कुसुमं लोकतो ऽवसेयं चंपककुसुमं सुवर्णचंपकवृक्षपुष्पं कर्णिकारकुसुमं हि
वाईति कांचनारकुसुमं कूष्मांडिकाकुसुमं पुष्पफलिकापुष्पं सुवर्णयूथिकाकुसुमं प्रतीतं सुहिरण्यका वनस्पतिविशेषस्तस्याः
कुसुमं सुहिरण्यकाकुसुमं कोरंटमाल्यदामं पीताशोकपीतकणवीरपीतबंधुजीवा प्रतीताः॥ सुक्कलेसा णं भंते इत्यादि अत्राप्य

क्षरगमनिकाप्राग्वत्तनवरमंकोरत्नविशेषः शंखचंद्रौप्रतीतौ॥ कुंदकुसुमंदकंउदकंउदकरजः उदककणास्तेह्यतिशुभ्राश्चभवंतीत्युपात्ताः दधि
प्रतीतंदधिघनोपिंडः॥ क्षीरंप्रतीतंक्षीरपूरंक्वथ्यमानमतितापादूर्द्ध्वंगच्छन्क्षीरसकच्छिवडियाइवाइतिविवादिः वल्लादिफलकासावशुष्कासती
किलातीत्युपात्तापेङ्कुणमिंजयाइवेतिपेङ्कुणंमयूरपिच्छंतन्मध्यवर्तिनीमिंजापेङ्कुणमिंजासाचातीवशुक्लेत्यभिहिता॥ धंतधोयरुप्पपट्टेइवाइति ध्मा
तोऽग्निसंपर्केतोनिर्मलीकृतोधौतोभूरिखरंटितहस्तसन्मार्जनेनातिनिशितीकृतोयोरूप्यमयः पट्टः सध्मातधौतरूप्यपट्टः सारइयबलाहगेइ
वाइतिशारदिकः शरत्कालभावीबलाहकः पुंडरीकंशतांबुजंतस्यदलंपत्रंपुंडरीकदलंशालिपिष्टराशिकुटजपुष्पराशिसिंदूरमाल्यदामश्वेता
शोकश्वेतकणवीरश्वेतबंधुजीवाः प्रतीताः इहवर्णाः पंचभवंतितद्यथाकृष्णोनीलोलोहितोहारिद्रःशुक्लश्चतंलेश्याश्चषट्ततउपमानतोव
र्णनिर्देशेकृतेपिसंशयः कालेश्याकस्मिन्वर्णेभवतेततःपृच्छति॥ ५॥ एयाणंभंतेइत्यादि एताअनंतरोदिताभदंतषट्लेश्याः कइस्कवर्णेषु
स्विति प्राकृतत्वात्तृतीयार्थेसप्तमी यथांतिसुअलंकियासुअलंकियापुहवीइत्यत्रोयमर्थः कतिभिर्वर्णैः साहिज्यंतिकथ्यंतेयरूप्यंतेइतियावत्
भगवानाह॥ गोतमपंचसुवण्णेसुइतिपंचभिर्वर्णैःशिष्यंतेतथातद्यथेत्यादिनादर्शयति॥ उक्तोवर्णपरिणामः संप्रतिरसपरिणाममभिधित्सु
राह॥ ५॥ कण्हलेसाणंभंतेइत्यादिप्रश्नसूत्रंसुगमंभगवानाहगोतमसेलोकप्रतीतोयथानामकानिंबोवृक्षविशेषोनिश्चसारोनिंबमध्य
वर्तीअवयवविशेषः निम्बछल्लीनिम्बत्वक्निम्बफाणितंनिम्बक्वाथः कुटजोवृक्षविशेषः तस्यैवफलंकुटजफलंकुटजफलंतस्यैवत्वक्कु
टजछल्लीतस्यैवक्वाथः॥ कडुगतुंबीकटुजत्रंदीप्रसिद्धास्तस्याएवफलंक्षारतउसीतिक्षारशब्दः कटुकवाचीतथागमेत्रनेकधाप्रसि
द्धेस्ततः कटुकात्रपुषीक्षारत्रपुषीतस्याएवफलंक्षारत्रपुषीफलंदेवदालीरोहिणीतस्याएवफलंक्षारत्रपुषीफलंदेवदालीरोहिणीतस्याए
वपुष्पंदेवदालीपुष्पंदेवदालीपुष्पं॥ मृगवालुंकीलोकलौवसीयातस्याएवफलंमृगवालुंकीफलंघोषातकीप्रसिद्धातस्याएवफलं १४०
कृष्णकंदोवज्रकंदोवज्रकंदश्चानंतकायवनस्पतिविशेषौलोकतः प्रत्येतव्योएतावत्युक्तेगोतमः पृच्छतिभगवन्भवेत्रसतःकृष्ण

लेश्याएतद्रूपानिश्चयादिरूपाभगवानाह॥ गोतमनायमर्थःसमर्थः यतः कृष्णलेश्याइनिंबादिरसमधिकृत्यानिष्टतरकेवेत्यादिप्राग्वत्
नीललेश्याएइत्यादिभंगीवनस्पतिविशेषस्तस्याएवरजोभंगीरजः पाठाचित्रमूलेलोकप्रतीपिप्पलीचूर्णमरिचमरिचचूर्णभंगवेरशृंग
वेरचूर्णान्यपिप्रसिद्धानिकाउलेसाएइत्यादि अम्लाणांफलानामेवंसर्वत्रापिभावनीयं॥ अंबाडगाणवाइतिअम्लाटकाफलविशेषाः
मातुलिंगबिल्वकपित्थपनसदाडिमानिप्रतीतानिपारापनाः फलविशेषाः अक्षोडवृक्षफलानि अक्षोडानिचारवृक्षफलानिचाराणि
बदराणितिंदुकानिचप्रतीतानिचप्रतीतानिएतेषांफलानामपक्कानांसर्वथाप्यपक्वफलमुच्यतेतनतआह॥ अपरिपाकानांनवि
द्यतेपरिपाकः परिपूर्णः पाकोयेषांतान्यपरिपाकानितेषामीषत्पक्वानामित्यर्थः॥ एतदेववर्णादिभिः कथयतिवर्णेनातिविशिष्टेन
गंधेनघ्राणेंद्रियनिर्वृत्तिकारेणस्पर्शेनविशिष्टपरिपाकादिनाभाविनाअनुपेतानामसंप्राप्तानांयादृशोरसस्तत्रगोतमःपृच्छति
एतद्रूपाएवंरूपरसोपेनाभवेत्॥ कापोतलेश्याभगवानाह॥ गोतमनायमर्थःसमर्थः किंचितोपरिपक्वाम्रफलादेरनिष्टतरकेवेत्यादिप्राग्वत् तत्र
लेस्साणंभंतेइत्यादितेषामेवाम्रफलादीनांपक्वानांतत्रउपसत्कमपिपक्वंलोकेव्यवह्रियतेतेनतआहपर्यायापन्नानांपरिपूर्णपाकपर्यायप्राप्तानां
एतदेववर्णादिभिर्निरूपयतिवर्णेनप्रशस्तेनएकांततः प्रशस्तेनगंधेनप्रशस्तेनस्पर्शेनोपेतानांयादृग्रसएतावत्युक्तेगोतमआह॥ रसमधिकृत्यएत
तद्रूपापक्वाम्रादिफलरूपातेजोलेश्याभवेत्भगवानाहनायमर्थःसमर्थः किंतुपरिपक्वाम्रफलादरिवेवेत्यादिप्राग्वत्॥ पम्हलेसाएतुछा
सूत्रपाठोऽक्षरगमनिकाचप्राग्वत्॥ सेजहानामएइतिसालोकप्रसिद्धायथायेनप्रकारेणनामयस्याः सायथानामिकापुंस्त्वंसूत्रेप्राकृतलक्ष
णवशात्प्राकृतेहिलिंगमनियतंयदाहपाणिनिःस्वप्राकृतलक्षणेलिंगंव्यभिचार्यपीतिचंद्रप्रभाइतिवेतिचंद्रस्येवप्रभाआकारोयस्याः
साचंद्रप्रभामणिशिलाकोवमणिशिलाकावरंचतत्सीधुचवरसीधुवराचासौचारुणीचवरचारुणीचवैधातकीपत्रेर्निष्पाद्यआसवप
त्रासवः॥ एवंपुष्पासवः फलासवश्चपरिभावनीयः चोउगंधद्रव्यंतन्निष्पाद्यआसवः॥ चोयासवः पत्रादिविशेषैर्यव्यतिरिक्तःआस

डाक्टर भाऊदाजीस्मारकम्
DR BHAU DAJI MEMORIAL

वआसवइतिगीयंतेमधुमेरकःकापिशायनानिमद्यविशेषाःमूलदलखर्जूरसारनिष्पन्नआसवःखर्जूरसारःमृद्वीकाद्राक्षारससारनिष्पन्नोमृद्वी
कासारःसुपक्वेक्षुरसमूलदलनिष्पन्नःसुपक्वेक्षुरसःअष्टभिःशास्त्रप्रसिद्धैःपिष्टैर्निष्ठिताअष्टपिष्टनिष्ठिताजंबूफलवत्कालेवकापि
काजंबूफलकालिकावरावासोप्रसन्नाचवरप्रसन्नाः एतेसर्वेपिमद्यविशेषाःपूर्वकालेलोकप्रसिद्धाइदानींमपिद्धाइदानींमपिशा
स्त्रांतरेतोकतोचायथास्वरूपंवेदितव्यावरप्रसन्नाविशेषणान्याहमांसलाउपचितरसापेसलामनोज्ञामनोज्ञत्वादिवईषत्मनाक्
ततःपरंपरमास्वादतयाकटित्येवाग्रतोगच्छतिकृष्टअवलंबतेलगतोत्येवंशीलाईषदोषावलंबिनीतथाईषतमनाकूपानव्यवच्छेदस
तितलऊर्ध्वकटुकाएलादिद्रव्यसंपर्कतउपलक्ष्यमाणतिक्तवीर्येतिभावः तथाईषत्मनाकृताम्रअक्षिणीक्रियंतेअनयाइतिईषत्
ताम्राक्षिकरणीमद्यस्यप्रायःसर्वस्यापितथास्वभावत्वात् उक्कोसमयपत्ताइतिउत्कर्षतीत्युत्कर्षःसचासौमदश्चउत्कर्षमदस्तं
प्राप्ताउत्कर्षमदप्राप्ताएतदेववर्णादिभिःसमर्थयतेवर्णेनउत्कृष्टमदाविनाभाविनाप्रशस्तेनगंधेनघ्राणेंद्रियनिर्वृत्तिकरेणरस
नपरमसुखासिकाजनकेनस्पर्शेनमदपरिपाकाव्यभिचारिणाअतएवास्वादनीयाविशेषतःस्वादनीयाविस्वादनीयाप्रीणनीया
कृद्धहुलमितिवचनात्कर्तर्यनीयप्रत्ययः एवंदर्प्यतीतिदर्प्पणीयामदनीयासर्वाणिइंद्रियाणिसर्वंचगात्रंप्रल्हादयतीतिसर्वगात्र
प्रल्हादनीयाएतावत्युक्तेभगवान्गौतमआहभवेएयारूवाभगवन्एतद्रूपाएवंरूपरसोपेतापद्मलेस्याभवेत्भगवानाहनोइणठे
इत्यादिप्राग्वत् ७. सुक्कलेसाणंभंतेइत्यादिगुडखंडेप्रसिद्धेशर्कराकाशादिप्रभवामत्संडीखंडशर्करापप्पडमोदयःसंप्रदाया
दवसेयाः शेषंसुगमं तदेवमुक्तोलेश्याद्रव्याणांरसःसंप्रतिगंधमभिधित्सुराह ७. कइणंभंतेइत्यादिसुगमंनवरंकृष्णनीलकापोतले
श्यादुरभिगंधमृतगवादिकडेबरेभ्योप्यनंतगुणदुरभिगंधोपेतत्वात्तेजःपद्मशुक्ललेश्याःसुरभिगंधाःपिष्यमाणगंधवासस्सुरभि ३४१
कुसुमादिभ्योपिअनंतगुणपरमसुरभिगंधोपेतत्वात् उक्तंचोत्तराध्ययनेषुलेश्याध्ययनेजहागोमडस्सगंधोसुणगमडस्सवजहा

हिमडगस्साएत्तोऊअणंतगुणोलेसाणंअप्पसत्थाणंजहसुरभिकुसुमगंधोगंधोवासाणपिस्समाणाणएत्तोऊअणंतगुणोपसत्थ
लेसाणंतिण्हंपि उक्तोगंधपरिणामोऽधुनाशुद्धाशुद्धत्वप्रतिपादनार्थमाह ७. एवंतंतोअविशुद्धातोततोविशुद्धातोइतिएव
मुक्तेनप्रकारेणआद्यास्तिस्रोलेश्याअविशुद्धावक्तव्या अप्रशस्तवर्णगंधरसोपेतत्वात् उत्तरास्तिस्रोलेश्याविशुद्धाःप्रशस्तव
र्णगंधरसोपेतत्वात्ततश्चैवंवक्तव्याकइणंभंतेलेस्साऊअविशुद्धाऊपन्नत्ताऊगोयमातऊलेसाउअविशुद्धाऊपन्नत्ताऊतंजहाक
ण्हालेसानीललेसा कइणंभंतेलेसाउविशुद्धावोपपन्नाऊगोयमातऊलेस्साऊविसुद्धाऊपण्णत्ताऊतंजहातेऊलेस्सासुक्कले
स्साइति उक्तेशुद्धत्वाशुद्धत्वेसंप्रतिप्रशस्ताप्रतिपादयति नउअप्पसत्थाऊ आद्यास्तिस्रोलेश्याअप्रशस्तावक्तव्याः अप्रशस्त
द्रव्यत्वेनाप्रशस्ताध्यवसायहेतुत्वादुत्तरास्तिस्रोलेश्याःप्रशस्तद्रव्यतयाप्रशस्तद्रव्यतयाप्रशस्ताध्यवसायहेकारणत्वात्सूत्रपाठः
प्राग्वदवसेयःकइइणंभंतेलेस्साउअप्पसत्थाउपण्णत्ताऊइत्यादिउक्तेप्रशस्ताप्रशस्तेअधुनासंक्लिष्टासंक्लिष्टत्वेप्रतिपादयति
ततोसंकिलिठाऊइतिआद्यास्तिस्रोलेश्याःसंक्लिष्टाःआर्त्तरौद्रध्यानानुगताध्यवसायस्थानहेतुत्वादुत्तरास्तिस्रोलेश्याःअसंक्लिष्टा
धर्म्मशुक्लध्यानानुगताध्यवसायकारणत्वात् अत्रापिपाठःप्राग्वत्कइणंभंतेलेस्साऊसंकिलिठाऊपण्णत्ताऊइत्यादिअधुनाशी
तोष्णस्पर्शप्रतिपादनार्थमाह ७. ततोशीयलुखाततोणिद्धुन्हाउइति आद्यास्तिस्रोलेश्याःशीतरूक्षाशीतरूक्षस्पर्शोपेताःउत्त
रास्तिस्रोलेश्याःस्निग्धोष्णस्पर्शाः इहान्येपिलेश्याद्रव्याणांकर्कशादयःस्पर्शाःसंतियतःउक्तंलेश्याध्ययनेजहकरकयस्सफासो
गोजिब्भाएवसागपत्ताणं एत्तोविअणंतउणोलेस्साणंअप्पसत्थाणं जहबूरस्सवफासोनवनीयस्सवसिरीसकुसुमाणं एत्तोविअ
णंतगुणोपसत्थलेस्साणंतिण्हंपिइतितथापिशीतरूक्षोस्पर्शौआद्यानांतिसृणांलेश्यानांपरमसंतापोत्पादनेसाधकतमावितिताव
चपृथक्पृथक्साक्षादुक्तावित्यदोषःसूत्रपाठःप्राग्वत् कइणंभंतेलेस्साऊसीयलुखाओपन्नताउइत्यादि संप्रतिगतिद्वारमभिधित्सुरा

ह॥ ७॥ ततोदुग्गइगामिणीओ॥ तओसुगइगामिणीओइति आद्यास्तिस्रोलेश्यादुर्गतिगामिन्यः दुर्गतिंगमयंतीत्येवंशीलादुर्गतिगामिन्यःसंक्लि
ष्टाध्यवसायहेतुत्वादुत्तरास्तिस्रोलेश्याःसुगतिंगमयंतीत्येवंशीलाःसुगतिगामिन्यःशोभनाध्यवसायकारणत्वात् उभयत्रापिगमेर्ण्यंतादि
नप्रत्ययःसूत्रपाठःप्राग्वत् कण्हलेसाणंभंतेलेस्साओदुग्गमिणीउपण्णत्ताइत्यादि॥अधुनापरिणामद्वारमभिधित्सुराहकण्हलेसाणमित्यादि
अत्रकइविहपरिणाममित्यत्रप्राकृतत्वात्तृतीयार्थेद्वितीयाद्रष्टव्यायथाआचारांगेअगणिपुट्ठाइत्यत्रततोयमर्थःकृष्णलेश्याणमितिवा
क्यालंकारेभदंतकतिविधेनपरिणामेनपरिणमतिभगवानाहगोयमातिविहंवाइत्यादि॥इहत्रिविधोजघन्यमध्यमोत्कृष्टभेदेननवविधोय
देषामपिजघन्यादीनांस्वस्थानतारतम्यचिंतायांप्रत्येकंजघन्यादित्रयेणगुणनाएवंपुनःपुनस्त्रिकगुणनयासप्तविंशतिविधत्वमेकाशीतिविध
त्वंत्रिचत्वारिंशदधिकशतद्वयविधत्वंबहुविधत्वंभावनीयंसर्वत्रचतृतीयार्थेद्वितीयातत्स्त्रिधैनवापरिणामेनपरिणमतिनवविधेनवेत्येवंप
दानांयोजनाकर्त्तव्या॥ एवंजावसुक्कलेसाइतिएवंकृष्णलेश्यागतेनप्रकारेणनीलादयोपिलेश्यातावद्वक्तव्या॥यावत्शुक्ललेश्यास्तत्रपा
ठस्सुगमत्वात्स्वयंपरिभावनीयःसंप्रतिप्रदेशद्वाराभिधित्सयाप्राह॥७॥कण्हलेसाणंभंतेकइपएसियाइत्यादि॥सुगमंनवरंमनंतप्रदेश
केतिअनंताअनंतसंख्योपेता॥प्रदेशास्तद्योग्यपरिमाणवोयस्याःकृष्णलेश्यायाःकृष्णलेश्याद्रव्यसंघातस्यसाअनंतप्रदेशका
अन्यथाअनंत प्रदेशव्यतिरेकेणस्कंधस्यजीवग्रहणयोग्यतायाएवाभावात्एवंनीलादयोपिलेश्यावक्तव्यास्तथाचाह॥एवंजावसु
क्कलेसाइतिअवगाहद्वारमाह॥ ७॥ कण्हलेसाणंभंतेइत्यादिइहप्रदेशाःक्षेत्रप्रदेशाःप्रतिपत्तव्यास्तेष्वेवावगाहप्रसिद्धेः॥तेचानं
तानामपिवर्गणानामाधारभूताअसंख्येयाएवंद्रष्टव्याःसकलस्यापिलोकस्यप्रदेशानामसंख्यातत्वात्वर्गणाद्वारमाहकण्ह
लेसाणंभंतेकेवइयाउवग्गणाउइत्यादिइहवर्गणाऔदारिकादिशरीरप्रायोग्यपरमाणुवर्गणावत्कृष्णलेश्यायोग्यद्रव्यपरमाणु १४२.
वर्गणाग्राह्यास्तेनाश्ववर्णादिभेदेनसमानजातीयानेकसद्भावादनंताःप्रत्येतव्याः॥एवंनीललेश्यादीनामपिवर्गणाःप्रत्येकंवक्तव्याः

तव्याचाहएवंजावसुक्कलेस्सादुति अधुनास्थानद्वाराभिधित्सयाप्राह॥ ७॥ केवइयाणंभंतेकण्हलेसाठाणापण्णत्ताकियंतिभदंतकृष्णले
श्यास्थानानिप्रकर्षापकर्षकृताःस्वरूपभेदाःप्रज्ञप्तानिसूत्रेचपुंस्त्वंप्राकृतत्वात्इहयदाभावरूपाःकृष्णादयोलेश्याः॥चिंत्यंतेतदाएकैकस्या
लेश्यायाःप्रकर्षाप्रकर्षकृतस्वरूपाणिस्थानानिकालतोअसंख्येयोत्सर्पिण्यवसर्पिणीसमयप्रमाणानिक्षेत्रतोअसंख्येयलोकाकाशप्र
देशप्रमाणानिउक्तंचअसंखेज्जाणयओसप्पिणीसप्पिणीणजेसमयासंखाइआलोगालेस्साणंहोंतिठाणाइं॥तत्रमशुभानांसंक्लेशरूपा
णिशुभानांचविशुद्धरूपाणिएतेषांचभावलेश्यागतानांस्थानानांयानिकारणभूतानिकृष्णादिद्रव्यवृंदानितान्यपिस्थानान्युच्यंतेतान्ये
वचेहग्राह्यानिकृष्णादिद्रव्याणामेवेहोद्देशकेचिंत्यमानत्वात्तानिचप्रत्येकप्रत्येकमसंख्येयानितथाविधैकपरिणामानिबंधनामपि
द्रव्याणामपिमिकाध्यवसायहेतुत्वेनएकत्वात्तानिचप्रत्येकंद्विविधाजघन्यानिउत्कृष्टानिचजघन्यलेश्यास्थानपरिणामकारणानिजघ
न्यानिउत्कृष्टलेश्यास्थानपरिणामकारणानिउत्कृष्टानियानितुमध्यमानितानिजघन्यप्रत्यासन्नानिजघन्येष्वंतर्भवंति उत्कृष्टप्रत्यासन्नानि
तूत्कृष्टेषु एकैकानिचस्वस्थानेपरिणामगुणभेदतोसंख्येयानिअत्रदृष्टांतोयथास्फटिकमणेरलक्तकवशेनारक्तताएकगुणालक्तकवशे
नएकगुणाधिकाजघन्याएवमेकैकगुणवृद्ध्याजघन्यायामेवरक्ततायामसंख्येयानिस्थानानिभवंतितानिचव्यवहारतास्तोकगुण
त्वात्सर्वाण्यपिजघन्यान्येवोच्यंतेएवमात्मनोपिजघन्यैकगुणाधिकलेश्याद्रव्योपधानवशतोलेश्यापरिणामविशेषाअसंख्येया
भवंति॥तेचसर्वेपिव्यवहारतोल्पगुणत्वात्जघन्यव्यपदेशंलभंतेतत्कारणभूतानिद्रव्याणामपिस्थानानिजघन्यानिएवंउत्कृ
ष्टान्यपिस्थानान्यसंख्येयानिभावनीयानिसंप्रत्यल्पबहुत्वमाह॥ ७॥एएसिणंइत्यादिइहस्थानान्यल्पबहुत्वानितद्यथाजघन्यस्था
नविषयमुत्कृष्टस्थानविषयमुभयविषयंचएकैकमपित्रिविधंतद्यथाद्रव्यार्थतयाप्रदेशार्थतयाउभयार्थतयात्वजघन्यस्थान
विषयेद्रव्यार्थतायांप्रदेशार्थतायांप्रदेशार्थतायां प्रत्येकंकापोतनीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानिक्रमेणयथोत्तरमसंख्य

यगुणानिवक्तव्यानिउभयार्थतायांप्रथमतोद्रव्यार्थतयाकापोतनीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानिक्रमेणयथोत्तरमसंख्येयगुणानिवक्तव्यानि
ततःशुक्ललेश्यास्थानानंतरंप्रदेशार्थतयाकापोतलेश्यास्थानान्यनंतगुणानिवक्तव्यानितदनंतरंनीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानिक्रमेण
प्रदेशार्थतयायथोत्तरमसंख्येयगुणानिएवमुत्कृष्टान्यपिस्थानानिद्रव्यार्थतयाप्रदेशार्थतयाउभयार्थतयाचचिंतयितव्यानि॥ तथाहएवंजहेव
जहन्नगंतहेवउक्कोसगंपिनवरंउक्कोसंतिअभिलावोइतिजघन्योत्कृष्टस्थानेसमुदायविषयेत्वल्पबहुत्वेप्रथमतोजघन्यानिद्रव्यार्थतयाकापोत
नीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानिक्रमेणयथोत्तरमसंख्येयगुणानिवक्तव्यानितदनंतरंजघन्यशुक्ललेश्यास्थानेभ्यउत्कृष्टानिकापो
तनीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानिक्रमेणद्रव्यार्थतयैवयथोत्तरमसंख्येयगुणानिवाच्यानिएवंप्रदेशार्थतयापिजघन्योत्कृ
ष्टस्थानविषयमल्पबहुत्वंभावनीयं॥ तथाचाहएवंजहेवदव्वट्ठयाएपएसट्ठयाएविभाणियव्वं॥ नवरंपएसट्ठयाएत्तिअभिलावविसेसोइति॥ द्रव्या
र्थप्रदेशार्थतायांप्रथमतोद्रव्यार्थतयाजघन्यानिकापोतनीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानिक्रमेणयथोत्तरमसंख्येयगुणानिवक्तव्या
नितताजघन्येभ्यःशुक्ललेश्यास्थानेभ्यःउक्तक्रमेणचोत्कृष्टानिस्थानानिद्रव्यार्थतयायथोत्तरमसंख्येयगुणानिवाच्यानि॥ ततउत्कृष्टेभ्यःशु
क्ललेश्यास्थानेभ्योजघन्यानिकापोतलेश्यास्थानानिप्रदेशार्थतयानंतगुणानिवक्तव्यानिततप्रदेशार्थतायैवजघन्यानिनीलकृष्णतेजःपद्मशु
क्ललेश्यास्थानानियथोत्तरमसंख्येयगुणानिवक्तव्यानीति॥ ७॥ इतिश्रीमलयगिरिविरचितायांप्रज्ञापनाटीकायांलेश्यापदस्यचतुर्थोद्देशकः
र. परिसमाप्तः॥ ७॥ ॥ इत्युक्तश्चतुर्थोद्देशकःसंप्रतिपंचमआरभ्यते॥ तस्येदमादिसूत्रं॥ कइणंभंतेलेस्साओपण्णत्ताओइत्यादिचतुर्थोद्दे
शकवत्तावद्वक्तव्यंयावद्वैडूर्यमणिदृष्टांतोव्याख्यानंचप्राग्वदेवनिरवशेषाकर्त्तव्याःप्रागुपन्यस्तस्याप्यस्यसूत्रस्यपुनरुपन्यासोग्रेतन ३४३
सूत्रसंबंधार्थः॥ तदेवसूत्रमाह॥ ७॥ सेनूणंभंतेइत्यादिइहतिर्यग्मनुष्यविषयंसूत्रमनंतरमुक्तं॥ इदंतुदेवनैरयिकविषयमवसेयंदे
वनैरयिकाहिपूर्वभवगतचरमांतर्मुहूर्त्तादारभ्ययावत्परभवगतमाद्यमंतर्मुहूर्त्तंतावदवस्थितलेश्याकास्ततोऽमीषांकृष्णादि

लेश्याद्रव्याणांपरस्परसंपर्केपिनपरिणाम्यपरिणामकभावोघटतेततःसम्यगधिगमायप्रश्नयतिसेनूणंभंतेइत्यादिसेशब्दोऽथशब्दार्थः॥ स
चप्रश्नेअथनूनंनिश्चितंभदंतकृष्णलेश्यांकृष्णलेश्याद्रव्याणिनीललेश्यांनीललेश्याद्रव्याणिप्राप्यप्रत्यासन्नत्वमागत्यतानिबुपरिणाम्यपरिणा
मकभावेनान्योन्यसंश्लेषः तद्रूपतयातद्वर्णनीललेश्याद्रव्यगतरूपंस्वभावोयस्यकृष्णलेश्यास्वरूपस्यततद्रूपंतद्भावस्तद्रूपतातयाएवंदेव
व्याचष्टेनतद्वर्णतयानतद्गंधतयानतद्रसतयानतत्स्पर्शतयाभूयोभूयःपरिणमतेभगवानाहहंतेत्यादि॥ हंतगोतमकृष्णलेश्येत्यादि॥ तदेवनबु
यदिनपरिणमतेतर्हिकथंसप्तमनरकपृथिव्यामपिव्यामपिसम्यक्त्वलाभः॥ सहितेजोलेश्यादिपरिणामेभवतिसप्तमनरकपृथिव्यांचकृष्णलेश्ये
तिकथंचैतद्भावंघटतेभावपरावत्तीएपुणसुरनेरइयाणंपिछल्लेसाइतिलेश्यांतरद्रव्यसंपर्कतस्तद्रूपतयापरिणामासंभवेनभावपरावृत्ते
रेवायोगादतएवतद्विषयंप्रश्ननिर्वचनसूत्रेआहसेकेणट्ठेणंभंतेइत्यादि॥ तत्रप्रश्नसूत्रंसुगमंनिर्वचनसूत्रेआकारस्तच्छायामात्रःआका
रस्याभावःसत्ताआकारभावःसाएवमात्राआकारभावमात्रातयाआकारभावमात्रयामात्राशब्दःआकारभावातिरिक्तपरिणामांतरप्रतिपत्तिव्युदा
सार्थः॥ सेइतिसाकृष्णलेश्यानीललेश्यारूपतयास्यात्यदिवाप्रतिभागःप्रतिबिंबंआदर्शादाविविशिष्टःप्रतिबिंब्यवस्तुगतःआकारप्रतिभा
गमात्रातयाअत्रापिमात्रातयाअत्रापिमात्राशब्दःप्रतिबिंबातिरिक्तपरिणामांतरव्युदासार्थः स्यात्कृष्णलेश्यारूपतयापरमार्थतःपुनः
कृष्णलेश्यैवनोखलुनीललेश्यासास्वस्वरूपापरित्यागात्नत्वस्वादर्शादयाजपाकुसुमादिसन्निधानतस्तत्प्रतिबिम्बमात्रामादधाना
नादर्शादयइतिपरिभावनीयमेतत्केवलंसाकृष्णलेश्यातत्रस्वस्वरूपेगतावस्थितासतीअवष्वष्कतेतदाकारभावमात्रधारणतप्रतिबिं
बमात्रधारणतोवाउत्सर्प्यतीत्यर्थः॥ कृष्णलेश्यातोहिनीललेश्याविशुद्धाततस्तदाकारभावंतत्प्रतिबिम्बमात्रंवादधानासतीमनागविशु
द्धाभवतीत्युत्सर्प्यतीतिव्यपदिश्यते॥ उपसंहारवाक्यमाहसेएणट्ठेणंइत्यादिसुगमंएवंनीललेश्यायाःकापोतलेश्यायास्तेजोलेश्यायाः
पद्मलेश्यामधिकृत्यपद्मलेश्यायाःशुक्ललेश्यामधिकृत्यसूत्राणिभावनीयानिसंप्रतिपद्मलेश्यामधिकृत्यशुक्ललेश्याएवंतेजःका

पीतनीलकृष्णलेश्याविषयाण्यपिसूत्राणिभावनीयानि॥ पद्मलेश्यामधिकृत्यतेजःकापोतनीलकृष्णलेश्याविषयाणितेजोलेश्यामधिकृत्यका
पोतनीलकृष्णविषयाणिकापोतलेश्यामधिकृत्यनीलकृष्णलेश्याविषयेनीललेश्यामधिकृत्यकृष्णलेश्याविषयमिति॥ अमूनिचसूत्राणिसाक्षा
त्पुस्तकेषुदृश्यंतेविषयसूत्रमाह॥ ७॥ सेनूणंभंतेसुक्कलेस्सापम्हलेसंपप्पेत्यादि॥ एतच्चप्राग्वद्भावनीयंशुक्कलेश्यापेक्षयापद्मलेश्याहीनपरि
णामाततःशुक्कलेश्यापद्मलेश्यायाआकारंभावंतत्प्रतिबिंबमात्रंवाभजंतीमनागविशुद्धाभवतिततोऽवष्वष्कतेइतिव्यपदिश्यतेकेवलमर्थतः
प्रतिपत्तव्यानितथामूलटीकाकारेणव्याख्यातात्तनंदेवंयद्यपिदेवंयद्यपिदेवनैरयिकाणामवस्थितानिलेश्याद्रव्याणितथापितत्तदुपादीयमाना
निलेश्यांतरद्रव्यसंपर्कतस्तान्यपितदाकारभावमात्रंभजंतेइतिभावःपरावृत्तियोगतःषडपिलेश्याघटंतेसप्तमनरकपृथिव्यामपिसम्यक्
त्वलाभइतिनकश्चिद्दोषः॥ ७॥ इतिश्रीमलयगिरिविरचितायांप्रज्ञापनाटीकायांलेश्यापदस्यपंचमोद्देशकः॥ ७॥ तदेवमुक्तःपंचमोद्देशकः
संप्रतिषष्ठःउच्यतेतस्येदमादिसूत्रं॥ ७॥ कइणंभंतेलेस्साउपण्णत्ताउइत्यादिसुगममुद्देशकपरिसमाप्तिंयावत्नवरमुत्पद्यमानोजीवो
जन्मांतरेलेश्याद्रव्याण्यादायोत्पद्यतेतानिचकस्यचित्कानिचिदिति॥ कृष्णलेश्यापरिणतोपिजनकेजन्यस्यविचित्रलेस्यासंभवएवं
शेषलेश्यापरिणतेपिभावनीयं॥ ७॥ इतिश्रीमलयगिरिविरचितायांप्रज्ञापनाटीकायांसप्तदशलेश्यापदंसमाप्तं॥ ७॥ तदेवमुक्तंसप्तदशं
पदमधुनाष्टादशमारभ्यते॥ अस्यचायमभिसंबंधः॥ इहानंतरपदेलेश्यापरिणाममुक्तःसंप्रतिपरिणामसाम्यात्कायस्थितिपरिणाम
उच्यतेतत्रेदमधिकारगाथाद्वयं॥ जीवगईदियकाएइत्यादि॥ प्रथमंजीवपदंकिमुक्तंभवतिप्रथमंजीवपदमधिकृत्यकायस्थितिर्वक्तव्याति
१ ततोगतिपदं २ तदनंतरमिंद्रियपदं ३ ततःकायपदं ४ ततोयोगपदं ५ तदनंतरंवेदपदं ६ ततःकषायपदं ७ ततोलेश्यापदं ८ तदनंतरंसं
म्यक्त्वं ९ ततोज्ञानपदं १० तदनंतरंदर्शनपदं ११ ततःसंयमपदं १२ ततउपयोगपदं १३ तदनंतरमाहारपदं १४ ततोभाषकपदं १५ ३४४
ततःपरीत्तपदं १६ ततःपर्याप्तपदं १७ ततोभवसिद्धिपदं २० तदनंतरमस्तिकायपदं २१ ततश्चरमपदं २२ एतेषांद्वाविंशतिसं

ख्यानांपदानांकायस्थितिर्भवतिज्ञातव्यातथायथोद्देशंनिर्देक्ष्यतेअथकायस्थितिरितिकःशब्दार्थः॥ उच्यतेकायइहपर्यायःपरिगृह्यतेकायइव
कायइत्युपमान्यरूपोविशेषरूपश्चतत्रसामान्यरूपोनिर्विशेषणोजीवत्वलक्षणोविशेषरूपोनैरयिकत्वादिलक्षणःतस्यस्थितिरवस्थानंका
यस्थितिःकिमुक्तंभवति॥ सामान्यरूपेणविशेषरूपेणवापर्यायेणाविशिष्टस्यजीवस्ययदव्यवच्छेदेनभवनंसाकायस्थितिः॥ ततःप्रथमतःसामा
न्यरूपेणपर्यायविशेषेणाविशिष्टस्याव्यवच्छेदेनयद्भवनंतच्चिंतयितुमाह॥ ७॥ जीवेणंभंतेइत्यादि॥ इहजीवनपर्यायविशिष्टोजीवउच्यतेततःप्रश्न
यतिजीवोणमितिवाक्यालंकारेभदंतजीवइति॥ जीवनपर्यायविशिष्टतयेत्यर्थः॥ कालतःकालमधिकृत्यवियच्चिरंकियंतंकालंयाव
द्भवतिभगवानाह॥ गौतमसर्वाद्धांसर्वकालंयावत्कथमितिचेत्॥ उच्यतेप्राणधारणंप्राणाभावप्राणाश्चद्रव्यप्राणा इंद्रिय
पंचकबलत्रिकोच्छ्वासनिश्वासायुःकर्मानुभवलक्षणाभावप्राणाज्ञानादयः॥ तत्रसंसारिणामायुःकर्मानुभवलक्षणप्राणधारणंसदैवा
वस्थितंनहिसकाचिदवस्थासंसारिणामस्तियस्यामायुःकर्मानुभवनंनविद्यतेइतिमुक्तानांतुज्ञानादिरूपप्राणधारणमवस्थितंमुक्तानामपि
हिज्ञानादिरूपाःप्राणाःसंतियैर्मुक्तोपिजीवतीतिव्यपदिश्यते॥ नवज्ञानादयोमुक्तानांशाश्वतिकाःअतःसंसार्यवस्थायांवसर्वत्रजीवनम
स्तीतिसर्वकालभावीजीवनपर्यायंसंप्रतितस्यैवजीवनस्यनैरयिकत्वादिपर्यायैरादिष्टस्यतैरेवपर्यायैरादिष्टस्यतैवपर्यायैरव्यवं
च्छेदेनावस्थानंचिंतयन्नाह॥ नेरइएणंभंतेइत्यादिसुगमंनवरंनैरयिकास्तथाभवस्वाभाव्यात्स्वाभावात्च्युत्वानंतरंनभूयोनैरयिकत्वे
नोत्पद्यंतेनाततोयदेवकायस्थितेरपीत्युपपद्यतेजघन्यतउत्कर्षतश्चयथोक्तपरिमाणकायस्थितिरितितिरिक्खजोणिएणंभंतेइत्यादि॥ त
त्रयदादेवोमनुष्योनैरयिकोवातिर्यक्षूत्पद्यतेतत्रचांतर्मुहूर्तंस्थित्वाभूयःस्वगतौगत्यंतरेवासंक्रामतितदालभ्यतेऽनुमुहूर्तप्रमाणाकाय
स्थितिः॥ उत्कर्षतोअनंतंकालंयावत्तत्तस्यचानंतस्यवानस्यप्ररूपणाद्विविधातद्यथाकालतःक्षेत्रतश्चकालतोऽनंताउत्सर्पिण्यवस
र्पिण्यः उत्सर्पिण्यवसर्पिणीपरिमाणंचनंद्यध्ययनटीकातोवसेयंतत्रसविस्तरमभिहितत्वात्क्षेत्रतोऽनंतलोकाःकिमुक्तंभवति॥ अनं

नेषुलोकाकाशेषुप्रतिसमयमेकैकप्रदेशापहारेणक्रियमाणेयावत्योनंताउत्सर्पिण्यवसर्पिण्योभवंतितावतीर्यावन्नतिर्यक्तेनावतिष्ठतएतदेवकाल
परिमाणंपुद्गलपरावर्त्तसंख्यातोनिरूपयति॥ असंख्येयाःपुद्गलपरावर्त्ताःपुद्गलपरावर्तस्वरूपंचसंग्रहणीटीकायांविस्तरतरकेणाभिहित
मितितत्तोऽवधार्यमिहतुनाभिधीयतेग्रंथगौरवभयात् असंख्याताअपिपुद्गलपरावर्त्ताःकियंतइतिविशेषसंख्यानिरूपणार्थमाह॥ तेसण
मित्यादितेपुद्गलपरावर्ता आवलिकायाअसंख्येयभागःकिमुक्तंभवति आवलिकायाअसंख्येयतमेभागेयावंतःसमयास्तावत्प्रमाणाअसं
ख्येयाःपुद्गलपरावर्त्ताइति॥ एतच्चैवंकायस्थितिपरिमाणंवनस्प सप्रेक्षायाद्रष्टव्यंनशेषतिर्यगपेक्षयावनस्पतिव्यतिरेकेणशेषतिर्यक्ष्वी
मेतावत्कालप्रमाणकाय रस्थितेरसंभवात॥ तिरिक्खजोणिणीभंतेइत्यादिइहउत्तरत्रचजघन्यतोंऽतर्मुहूर्त्तभावनाप्रागुक्ताऽंतर्मुहू
र्त्तभावनानुसारेणस्वयंभावनीयाउत्कर्षतस्त्रीणिपल्योपमानिपूर्वकोटीपृथक्त्वाभ्यधिकानिकथमितिचेत्॥ उच्यतेइहतिर्यङ्मनुष्याणां
संचेंद्रियाणांसंज्ञिपंचेंद्रियाणामुत्कर्षतोप्यष्टौभावाःकायस्थितिः॥ नरतिरियाणसत्तट्ठभवाइतिवचनात्॥ तत्रोत्कर्षस्यचिंत्यमानत्वा
त अष्टावपिभवायथासंभवमुत्कृष्टस्थितिकाःपरिगृह्यंतेअसंख्येयवर्षायुस्तुमृत्वानियमतोदेवलोकेसमुत्पद्यतेनतिर्यक्षुततसप्तभवापू
र्वकोट्यायुषोवेदितव्या अष्टमस्तुपर्यंतवर्तीदेवकुर्वादिषुततस्त्रीणिपल्योपमानिपूर्वकोटीपृथक्त्वाभ्यधिकानिभवंतिएवंमणुस्सेविमणु
साविइतिएवंतिर्यक्स्त्रीगतेनप्रकारेणमनुष्योपिमानुष्यपिचवक्तव्याकिमुक्तंभवतिमनुष्यसूत्रेमानुषीसूत्रेचजघन्यतोंऽतर्मुहूर्त्तमुत्क
र्षतस्त्रीणिपल्योपमानिपूर्वकोटीपूर्वकोटीपूर्वकाभ्यधिकानिवक्तव्यानीतिसूत्रपाठस्त्वेवंमणुस्सेणंभंतेमणुस्सत्तिकालओकेवचिरं
होइगोयमाजहण्णेणंअंतोमुहुत्तंउक्कोसेणंतिन्निपलिओवमाइंपुव्वकोडीपुहुत्तमब्भहियाइंमणुस्सीणंभंतेमणुस्सित्तिकालओइत्यादिदे
वसूत्रेजहेवनेरइएइतियथैवनैरयिकःप्रागुक्तस्तथैवदेवोपिवक्तव्योदेवस्यापिजघन्यतोदशवर्षसहस्राणिउत्कर्षतस्त्रयस्त्रिं १४५.
शत्सागरोपमाणिवक्तव्यानिभावः॥ देवाअपिहिस्वभावाच्च्युत्वानभूयोऽनंतरंदेवत्वेनोत्पद्यंतेनोदेवेदेवेसुउववज्जइइतिवचनात्ततोयदे

वदेवानामपिभवस्थितेः॥ परिमाणंतदेवकायस्थितेरपिदेवीसूत्रेउत्कर्षतःपंचपंचाशत्पल्योपमानीतिदेवदेवीनांभवस्थितेरुत्कर्षतो
प्येतावत्प्रमाणत्वात एतच्चईशानदेव्यपेक्षयाद्रष्टव्यमन्यत्रदेवीनामेतावत्याःस्थितेरसंभवात्सिद्धसूत्रेसाद्यपर्यवसितइतिसिद्धत्वस्यक्ष
यासंभवात्सिद्धत्वादिव्यावर्तयितुमीशारागादयोनचतेभगवतःसिद्धस्यसंभवंति॥ तन्निमित्तकर्मपरमाण्वभावात्तदभावश्चभावात्तद
भावश्चतेषांनिर्मूलकाषंकषितत्वात्संप्रत्येत्यावतोनैरयिकादीन्पर्याप्तापर्याप्तविशेषेणद्वारेणचिंतयन्नाह॥ ७॥ नेरयिएणंभंतेनेरयि
केभदंतअपर्याप्तइति अपर्याप्तत्वपर्यायविशिष्टोविच्छेदेनकालतःकियंतंकालंयावद्भवतिभगवानाह॥ गौतमेत्यादिइहापर्याप्तावस्थाजघ
न्यतउत्कर्षतश्चांतर्मुहूर्तप्रमाणाततऊर्ध्वंनैरयिकाणामवश्यंपर्याप्तावस्थाभावात्ततउक्तंजहन्नेणविअंतोमुहुत्तंउक्कोसेणविअंतोमुहुत्तं॥
एवंजावदेवीअपज्जत्तियाइति॥ एवंनैरयिकोक्तेनप्रकारेणापर्याप्तास्तिर्यगादयस्तावद्वक्तव्यायावद्देव्यपर्याप्तदेवीसूत्रंयावदित्यर्थः॥ तत्रति
र्यंचोमनुष्याश्चयद्यप्यपर्याप्तकाएवमृत्वाभूयोभूयोअपर्याप्तत्वेनोत्पद्यंते॥ तथापितेषामपर्याप्तावस्थानिरंतरंतेर्यगोत्कर्षतोप्यंतर्मुहूर्त्तप्रमाणे
वलभ्यतेनयद्दृश्यति॥ अपज्जत्तएणंभंतेअपज्जत्तएत्तिकालओकेवच्चिरंहोइगोयमाजहन्नेणंउक्कोसेणविअंतोमुहुत्तमितिदेवदेवीसूत्रेऽंतर्मुहू
र्त्तभावनानैरयिकवत्॥ नेरइयपज्जत्तएणंभंतेइत्यादिनैरयिकपर्याप्तइतिपर्याप्तनैरयिकइत्येवमविच्छेदेनकालतःकियच्चिरंभवतिभगवा
नाह॥ गौतमजघन्यतोदशवर्षसहस्राण्यंतर्मुहूर्त्तोनानिअंतर्मुहूर्तस्याद्यस्यापर्याप्तावस्थायांगतत्वात्॥ अतएवोत्कर्षतोपित्रयस्त्रिंशत्सा
गरोपमाण्यंतर्मुहूर्त्तोनानितिर्यक्सूत्रेजघन्यतोऽंतर्मुहूर्त्तभावनाप्रागिवउत्कर्षतस्त्रीणिपल्योपमाण्यंतर्मुहूर्त्तोनानिएतच्चोत्कर्षेदेवकुर्वादि
भाविनस्तिरश्चोधिकृत्यवेदनीयमन्येषामेतावत्कालप्रमाणपर्याप्तावस्थायाअविच्छेदेनाप्राप्यमाणत्वात्अत्राप्यंतर्मुहूर्तोनत्वमंतर्मु
हूर्त्तस्याद्यापर्याप्तावस्थायाग्रस्तत्वात एवंतिर्यक्स्त्रीमनुष्यसूत्रेष्वपिभावनीयं॥ देवदेवीसूत्रयोस्तुजघन्यतउत्कर्षतश्चकायस्थितिः॥ प
रिमाणंप्रागुक्तमेवापर्याप्तावस्थाभाविनांतर्मुहूर्त्तेनहीनंपरिभावनीयंगतंगतिद्वारमिदानीमिंद्रियद्वारमभिधित्सुराह॥ ७॥ सइंदिए

णंभंतेइत्यादिसह॥इंद्रियंयस्यसेनवासंसेंद्रियःइंद्रियंचद्विधालब्धींद्रियंद्रव्येंद्रियंचतत्रेहलब्धींद्रियमवसेयंतद्विग्रहगतावप्यस्तिइंद्रियापर्याप्त
स्यापिचततोनिर्वचनसूत्रमुपपद्यतेअन्यथातदघटमानकमेवस्यात्निर्वचनसूत्रमाहगोयमेत्यादि॥इहयःसंसारीसनियमात्सेंद्रियःसंसार
श्चान्यदित्यनादिःसेंद्रियस्तत्रापियःकदाचिदपिनसेत्स्यतिसोऽनाद्यपर्यवसितःसेंद्रियत्वपर्यायस्यकदाचिदप्यव्यवच्छेदाद्यस्तुसेत्स्यतिसो
ऽनादिपर्यवसितोमुक्त्यवस्थायांसेंद्रियत्वपर्यायस्याभावात्॥एगेंदियसूत्रेयदुक्तमुक्कोसेणंअणंतंकालमितितमेवानंतंकालंसविशेषंनि
रूपयतिवणस्सतिकालोइतियावान्वनस्पतिकालोऽग्रेवक्ष्यतेतावंतंकालंयावदित्यर्थः॥वनस्पतिकायस्यैकेंद्रियपदेनस्यापिपरिग्रहात्
सवनस्पतिकालःएवंप्रमाणःअणंताउउस्सप्पिणिउसप्पिणीतोकालतोखेत्ततोऽणंतालोगाअसंखेज्जापोग्गलपरियट्टातेणंपोग्गलपरियट्टा
आवलियाएअसंखेज्जइभागोइतिद्वींद्रियसूत्रसंखेज्जंकालंतिसंख्येयानिवर्षसहस्राणीत्यर्थः॥विगलिंदियाणयवाससहस्ससंखेज्जाइतिव
चनात्एवंत्रींद्रियाचउरिंद्रियसूत्रेवक्तव्यंतत्रापिजघन्यतोअंतर्मुहूर्त्तमुत्कर्षतःसंख्येयकालमितिवक्तव्यमितिभावः॥संख्येयश्चकालःसंख्ये
यानिवर्षसहस्राणिप्रत्येतव्यानिपंचेंद्रियसूत्रेउत्कर्षतःसातिरेकंसागरोपमसहस्रंतच्चनैरयिकतिर्यक्पंचेंद्रियमनुष्यदेवभवभ्रमणेनद्रष्ट
व्यमधिकंतुनभवत्येतावतएवकालस्यकेवलवेदसोपलब्धत्वात्अनिंद्रियोद्रव्यभावेंद्रियविकलःसचसिद्धएवसिद्धश्चसाद्यपर्यवसि
तस्ततउक्तंसाइएअपज्जवसिएइतिसइंदियअपज्जत्तएणमित्यादिइहापर्याप्तालब्ध्यपेक्षयाचद्रष्टव्याःउभयथापितत्पर्यायस्यजघन्यतउ
त्कर्षतोवांतर्मुहूर्त्तप्रमाणत्वात्एवंतावद्वक्तव्यं॥यावत्संज्ञिपंचेंद्रियापर्याप्तकःपंचेंद्रियापर्याप्तकसूत्रंतच्चसुगमत्वात्स्वयंपरिभावनीयं॥अनिंद्रि
योनवक्तव्यस्तस्यपर्याप्तापर्याप्तविशेषणरहितत्वात्॥सइंद्रियपज्जत्तएणंभंतेइत्यादिइदंपर्याप्तिलब्ध्यपेक्षयावेदितव्यं॥सहिविग्रहग
तावपिसंभवतिकरणैरपर्याप्तस्यापितत्रउत्कर्षतःसातिरेकंसागरोपमशतपृथक्त्वमितियन्निर्वचनंतदुपपद्यतेअन्यथाकरपर्याप्तस्योत्क ३४६
र्षतोप्यंतर्मुहूर्त्तातित्रयस्त्रिंशत्सागरोपमप्रमाणतयालभ्यमानत्वात्यथोक्तनिर्वचनंनोपपद्यते॥एवमुत्तरसूत्रेपिपर्याप्तत्वंलब्ध्य

MEMORIAL

पेक्षयाद्रष्टव्यंएकेंद्रियपर्याप्तसूत्रेऽसंख्येयानिवर्षसहस्राणीतिएकेंद्रियस्यहिपृथिवीकायस्योत्कर्षतोद्वाविंशतिवर्षसहस्राणिभवस्थि
तिरप्कायस्यसप्तवर्षसहस्राणिवातकायस्यत्रीणिवर्षसहस्राणिवनस्पतिकायस्यदशवर्षसहस्राणिततोनिरंतरकतिपयपर्याप्तभवसं
कलनयासंख्येयानिवर्षसहस्राणिघटंतेइतिद्वींद्रियस्यपर्याप्तसूत्रेसंख्येयानिवर्षाणिद्वींद्रियस्यह्युत्कर्षतोभवस्थितिपरिमाणंद्वाद
शसंवत्सराणिनचसर्वेष्वपिसर्वेष्वपिसर्वोत्कृष्टस्थितिसंभवस्ततःकतिपयनिरंतरपर्याप्तभवसंकलनयापिसंख्येयानिवर्षाण्येव
लभ्यंतेनतुवर्षशतानिवर्षशतानिवर्षसहस्राणिवात्रींद्रियपर्याप्तसूत्रेसंख्येयानिरात्रिंदिवानितेषांभवस्थितेरुत्कर्षतोप्येकोनपंचाशद्दिन
मानतयाकतिपयनिरंतरपर्याप्तभवसंकलनायामपिसंख्येयानांरात्रिंदिवानामेवलभ्यमानत्वात्चतुरिंद्रियसूत्रेसंख्येयामासास्तेषांभ
वस्थितेरुत्कर्षतःषण्मासप्रमाणतयाकतिपयनिरंतरपर्याप्तभवकालसंकलनायां॥संख्येयानांमासानांप्राप्यमाणत्वात्पंचेंद्रियसूत्रंसु
गमंगतमिंद्रियद्वारमिदानींकायद्वारमभिधित्सुराह॥सकाइएणंभंतेइत्यादिसहकायोयस्ययेनवाससकायः॥एवंसकायिकत्या
र्थत्वात्स्वार्थेइकप्रत्ययःकायःकायशरीरंतच्चौदारिकवैक्रियहारकतैजसकार्मणभेदात्पंचधातत्रेहकार्मणंतैजसंवाद्रष्टव्यंतस्यैवासं
सारंभावात्॥अन्यथाविग्रहगतौवर्तमानस्यशरीरपर्याप्त्यपर्याप्तस्यचशेषशरीरसंभवादकायिकत्वंस्यात्॥नथाचसतिनिर्वचनसूत्र
माह सकाइएदुविहेपण्णत्तेइत्यादि॥तत्रयःसंसारपारगामीनभविष्यतिसोऽनाद्यपर्यवसितःकदाचिदपितस्यकायव्यवच्छे
मोक्षं
दासंभवात्यस्तुमधिगंतासोनादिसपर्यवसितस्तस्यमुक्तवस्थासंभवेसर्वात्मनाशरीरपरित्यागात्पृथिव्यातेजोवायुवनस्पतिसूत्रा
णिसुगमानिअन्यत्रापितदर्थस्यप्रतीतत्वात्तथाचोक्तं॥असंखोसप्पिणिओसप्पिणीएगिंदियाणयचउण्हंतोचेवयअणंतवणस्स
ईएऊबोधव्वानन्तुयदिवनस्पतिकालप्रमाणंसंख्येयाःपुद्गलपरावर्त्तास्ततोयद्गीयतेसिद्धांतेमरुदेवाद्वीवोयावद्दीवभावं
वनस्पतिरासीदितितत्कथंस्यात्कथंवावनस्पतीनामनादित्वंप्रतिनियतकालप्रमाणतयावनस्पतिभावस्यानादित्वविरोधात्तथा

त्यसंख्येयाः पुद्गलपरावर्त्तास्तेषामवस्थानमानंततएतावति कालेतिक्रांतेनियमात्सर्वेपिकायपरावर्त्तंकुर्वंतेयथास्वस्थितिकालांतेसंसारादयः
उक्तंच ॥ जइपुग्गलपरियट्टासंखाईयावणस्सईकालो ॥ अवणंतवण्णस्सईणमणाइयत्तमतएवहेत्तुजमसंख्येयापुद्गलपरियट्टातअवत्था
णंकालेणंचइएणंतम्हाकुव्वंतिकायपरूटंसंवेवि वणस्सइणोठिइकालेनेजहन्नकाराईकिंचैवंयद्वनस्पतीनांनिर्लेपनमागमेप्रतिषिद्धंतद
पीदानींप्रसक्तंकथमितिचेनुउच्यतेइहप्रतिसमयमसंख्येयावनस्पतिभ्योजीवाउद्वर्त्तंतेवनस्पतीनांचकायस्थितिपरिमाणमसंख्येयाःपु
द्गलपरावर्त्तास्ततोयावंतोऽसंख्येयेषुपुद्गलपरावर्त्तेषुसमयास्तैराभ्यस्तएकसमयोद्वृत्ताजीवायावंतोभवंतितावत्परिमाणमागतंव
नस्पतीनांतनःप्रतिनियतपरिमाणतयासिद्धंनिर्लेपनंप्रतिनियतपरिमाणत्वादेवचगच्छताकालेनसिद्धिरपिसर्वेषांभव्यानांप्रसक्ता
तत्प्रसक्तौचमोक्षपथव्यवच्छेदोपिप्रसक्तः सर्वभव्यसिद्धिगमनानंतरमन्यस्यसिद्धिगमनायोगात् आहचकायठिइकालेणंतेसिमसं
खेज्जयावहारेणं निल्लेवणमावन्नंसिद्धीवियसव्वभव्वाणं ॥ पइसमयमसंखेज्जाजेणुवट्टंतितेतोतदसखा ॥ कायठिईएसमयावणस्स
ईणपरिमाणंनचैतदस्तिवनस्पतीनांमनादित्वस्यनिर्लेपनप्रतिषेधस्यसर्वभव्यासिद्धेर्मोक्षपथाव्यवच्छेदस्यतत्रतत्रप्रदेशेसिद्धांतेभि
धानातुउच्यतेइहद्विधाजीवाः सांव्यवहारिकाअसांव्यवहारिकाश्चतत्रयेनिगोदावस्थातउद्धृत्यपृथिवीकायकादिभवेषुवर्त्तंतेतेलो
केषुपद्यमानताः संतः पृथिवीकायकादिव्यवहारमनुपतंतीतिसांव्यवहारिकाउच्यंते ॥ तेचयद्यपिभूयोपिनिगोदावस्थासंपयांतित
थापि ॥ तेसांव्यवहारिकाएवसंव्यवहारेपतितत्वात्येपुनरनादिकालादारभ्यनिगोदावस्थामुपगताएवावतिष्टंतेतेव्यवहारपथातीत
त्वादसांव्यवहारिकाःकथमेतदवसीयंतेद्विविधाः ॥ जीवासांव्यवहारिकाअसांव्यवहारिकाश्चेतिउच्यतेयुक्तिवशात्दहप्रत्युत्प **१४७**
न्नवनस्पतीनामपिनिर्लेपनसागमेप्रतिषिद्धंकिंपुनःसकलवनस्पतीनांतथाभव्यानामपितच्चयद्यसांव्यवहारिकराशिनिप
तिताअत्यंतवनस्पतियोनस्युस्ततःकथमुपपद्येततस्मादवसीयंते ॥ अस्त्यसांव्यवहारिकराशिरपियद्गतानांवनस्पतीनामनादिता

किंचइयमपिगाथागुरूपदेशादागतासमयेप्रसिद्धा अत्थि अणंताजीवाजेहिंनपत्तोतसाइपरिणामोतेविअणंताणंतानिगोयवासं अणुव
संति ॥ ततइतोप्यसांव्यवहारिकराशिः सिद्धउक्तंचपण्णवण्णस्सईणनिल्लेवणंनभव्वाणंजुत्तंहोइनतंजइ अच्चंतवणस्सईनत्थिएवंचा
णादिवणस्सईण ॥ अत्थित्तमथ्थ उसिद्धंभणइयइमाविगाहागुरूवएसागयासमये ॥ अत्थिअणंताजीवाइत्यादि ॥ तत्रेदंसूत्रंसांव्यवहा
रिकानधिकृत्यावसेयंनासांव्यवहारिकानविशेषविषयत्वात्सूत्रस्यनचैतत्स्वमनीषिकाविजृंभितंयतआहुर्जिनभद्रगणिक्षमाश्र
मणपूज्यपादाः ॥ नहकायठिईकालादयोविसेसेपडुच्चकिरजीवे ॥ णाणाईवणस्सइणोजेसंववहारबाहिरयाअत्रापिशःस्पृष्टमित्या
दियदस्यामेदप्रज्ञापनायांवक्ष्यतेप्रागुक्तंचतत्संग्रहः ततोनकश्चिद्दोषः तसकायसूत्रंसप्रतीतंएवानेबसकायदीनूपर्याप्तापर्याप्त
विशेषणविशिष्टान्चिंतयन्नाहसकाइयअपज्जत्तएणंभंतेइत्यादिसुगमंनवरंतेजस्कायसूत्रेउत्कर्षतःसंख्येयानिरात्रिंदिवानीतितेजस्का
यस्यहिभवस्थितिरुत्कर्षतोपित्रीणिरात्रिंदिवान्येवउभ्यंतेननुवर्षाणिवर्षसहस्राणिवारंप्रतिकायद्वारांतःप्रवेशसंभवात्सूक्ष्म
कायिकादीन्निरूपयितुकामआह ॥ सुहुमेणंभंतेइत्यादिसूक्ष्मः सूक्ष्मकायिकोभदंतसूक्ष्मइतिसूक्ष्मत्वपर्यायविशिष्टःसन्न
व्यवच्छेदेनकालतःकियच्चिरंभवतिभगवानाह ॥ गोनमजहन्नेणमित्यादिएतदपिसूत्रंसांव्यवहारिकजीवविषयमवसातव्य
मन्यथाउत्कर्षतोऽसंख्येयंकालमितियन्निर्वचनमुक्तंतन्नोपपद्यतेसूक्ष्मनिगोदजीवानामसांव्यवहारिकराशिनिपतितानाम
नादितायाःप्रागुपपादितत्वात्खेत्ततोऽसंखेज्जालोगाइतिअसंख्येयेषुलोकाकाशेषुप्रतिसमयमेकैकप्रदेशापहारेयावत्यउत्स
पिण्यवसर्पिण्योभवंतितावत्प्रमाणाअसंख्येयाउत्सर्पिण्यइत्यर्थः ॥ सूक्ष्मवनस्पतिकायसूत्रमपिप्रागुक्तयुक्तिवशात्सां
व्यवहारिकजीवविषयंव्याख्येयंतथासूक्ष्माः सामान्यतःपृथिवीकायिकादिविशिष्टाश्चपर्याप्ताअपर्याप्ताश्चनिरंतरंभवंतोज
घन्यतउत्कर्षतोवांतर्मुहूर्त्तकालंयावत्नपरमपितत्स्तद्विषसूत्रकदंबकेसर्वत्रापिजघन्यतउत्कर्षतोवांतर्मुहूर्त्तमुक्तंबाद

रसामान्यसूत्रेयदुक्तमसंख्येयंकालंतस्यविशेषनिरूपेणार्थमाह असंख्येयाउसर्प्पिण्यवसर्प्पिण्यः इदंकालतःपरिमाणमुक्तंक्षेत्रतआह
अंगुलस्सअसंख्येयइभागः किमुक्तंभवति अंगुलस्यासंख्येयतमेभागेयावंतआकाशप्रदेशास्तेषांप्रतिसमयमेकैकप्रदेशापहारेयाव
त्योऽसंख्येयाउत्सर्प्पिण्यवसर्प्पिण्योभवंतितावत्यइति॥ अथकथमंगुलासंख्येयभागमात्रस्यापिप्रतिसमयमेकैकप्रदेशापहारेअसंख्येयाऊस
र्प्पिण्यवसर्प्पिण्योलगंति॥ ऊच्यते॥ क्षेत्रस्यसूक्ष्मत्वादउक्तंच॥ सुहुमोयहोइकालोतत्तोसुहुमयरयंहवइखेत्तमित्यादिएतच्चबादरवनस्प
तिकापेक्षयाअवसातव्यंअन्यस्यबादरस्यैतावत्कालायस्थितिरसंभवात्शेषसूत्राणिद्वारसमाप्तिंयावत्सुगमानिगतंकायद्वारमिदानींयोग
द्वारमभिधित्सुराह॥ ७॥ सयोगीणंभंतेइत्यादियोगामनोवाक्कायव्यापारायोगाएषांसंतीतियोगिनोमनोवाक्कायाः॥सहयोगिनोयस्य
येनवासयोगीअत्रनि। र्वचनंसयोगीदुविहेपण्णत्तेइत्यादि॥ अनाद्यपर्यवसितोयोनजातुचिदपिमोक्षंगंतोसहिसर्वकालमवश्यमन्यतमे
नयोगेनसयोगीततोअनाद्यपर्यवसितोयस्तुयास्यतिमोक्षंसोऽनादिसपर्यवसितोमुक्तिपर्यायप्रादुर्भावेयोगस्यसर्वथापगमात्मनो
योगिस्तत्रेजघन्यतएकंसमयमितियदाकश्चिदौदारिककाययोगेनप्रथमसमयेयोग्यान्पुद्गलानादायद्वितीयसमयेमनस्त्वेनपरिणाम
य्यमुंचतितृतीयसमयेचोपरमतेम्रियतेवातदाएकंसमयंमनोयोगीलभ्यते॥ उत्कर्षतोऽंतर्मुहूर्त्तंनिरंतरंमनोयोग्यपुद्गलानांग्रहणविस
र्गौकुर्वन्ततऊर्द्धंसोवश्यंजीवस्वाभाव्यादुपरम्यचभूयोपिग्रहणविसर्गौकरोतिपरंकालसौक्ष्मात्कदाचिन्स्वयंवेदनपथमायातिनतउ
त्कर्षेनापिमनोयोगीनमुहूर्त्तमेवएवंवचयोगीचिद्रतिएवंमनोयोगीववाग्योग्यपिवक्तव्यस्तद्यथावइयोगीणंभंतेवइयोगीतिकालउकेवच्चि
रंहोइंगोयमाजहन्नेणंएकंसमयंउक्कोसेणंअंतमुहुत्तमिति॥ तत्रयःप्रथमसमयेकाययोगेनभाषायोग्यानिद्रव्याणिगृह्णाति॥द्विती १४८
यसमयेतानिभाषात्वेनपरिणामय्यमुंचतितृतीयसमयेवापरमतेम्रियतेवासएकंसमयंवाग्योगीलभ्यतेआहचमूलटीकाकारः
पढमसमयेकाययोगेणगहियाणंभासादव्वाणंबिइयसमयेवययोगेणनिसग्गंकाऊणऊवरमंतस्समरंतस्सवाएगसमउलब्भइ

इतिअंतर्मुहूर्त्तंनिरंतरंग्रहणविसर्गौकुर्वन्नतदनंतरमनोनतथाजीवस्वाभाव्यात्काययोगीजघन्यतोऽंतर्मुहूर्त्तमिति॥ इहद्वीयादीनांवाग्योगोपि
लभ्यतेसंज्ञिपंचेंद्रियाणांमनोयोगोपिनतोयदावाग्योगोभवति॥ मनोयोगोवातदानकाययोगप्राधान्यमितिसादिसपर्यवसितत्वभावात्जघन्य
तोऽमुहूर्त्तंकाययोगीलभ्यतेउत्कर्षतोवनस्पतिकालःसचप्रागेवोक्तःवनस्पतिकायिकेषुहिकाययोगएवकेवलोनवाग्योगोमनोयोगोवाततः
शेषयोगासंभवान्तेषाकायस्थितिसततंकाययोगइतिमानंअयोगीचसिद्धःसचसाद्यपर्यवसितइत्ययोगीसाद्यपर्यवसितउक्तः गतंयोगद्वारमिदानींवे
स
दद्वारंप्रतिपिपादयिषुराह॥ ७॥ सवेदएणंभंतेइत्यादिसहवेदोयस्ययेनवासवेदकःशेषाद्वैतिकप्रत्ययःसचत्रिविधास्तद्यथाऽनाद्यपर्यवसि
तोऽनादिसपर्यवसिताःसादिपर्यवसितश्चतत्रयउपशमश्रेणिक्षपकश्रेणिंवानजातुचिदपिप्राप्स्यसितोऽनाद्यपर्यवसितःकदाचिदपितस्य
विदोदयव्यवच्छेदासंभवात्यस्तुप्राप्स्यत्युपशमश्रेणिंक्षपकश्रेणिंवासोनादिसपर्यवसितउपशमश्रेणिंप्रतिपन्नोक्षपकश्रेणिप्रतिपन्नोवा
वेदोदयव्यवच्छेदस्यभावित्वात्यस्तूपशमश्रेणिंप्रतिपद्यतत्रचावेदकोभूत्वउपशमश्रेणितःप्रतिपतन्सवेदकोभवतिससादिसपर्यवसितः
सचजघन्येनांतर्मुहूर्त्तंकथमितिचेत्ऊच्यते॥ इहयदाकोपिउपशमश्रेणिंउपपद्यत्रिविधमपिवेदंकोभूत्वापुनरपिश्रेणीनःप्रतिपतन्सवे
दकत्वंप्राप्यझटित्युपशमश्रेणिंकर्मग्रंथिकाभिप्रायेणक्षयकश्रेणिंवाप्रतिपद्यतेप्रतिपद्यवेदत्रयमुपशमयतिक्षपयतिवाअंतर्मुहूर्त्तेनतदाजघ
न्येनांतर्मुहूर्त्तंसवेदकःऊत्कर्षतोआर्द्धपुद्गलपरावर्त्तदेशोनंअपगमर्द्धंयस्यसोऽपार्द्धःअर्द्धमात्रदेशोनःकिंचिदूनः उपशमश्रेणीतोहि
प्रतिपतितएतावंतंकालंसंसारेपर्यटतितनोपर्धाकमुत्कर्षतःसादिसपर्यवसितस्यसवेदकस्यकालमानंमुपलभ्यते॥ स्त्रीवेदविषयंचपंचा
देशास्तानुक्रमेणनिरूपयति॥ एगेणआदेशेणमित्यादि॥ तत्रसर्वत्रापिजघन्यतःसमयमात्रभावनेयंकाचित्युवतिरुपशमश्रेण्यां
वेदत्रयोपशमेनावेदकत्वमनुभूयततःश्रेणेःप्रतिपतंतीस्त्रीवेदोदयमेकसमयमनुभूयद्वितीयसमयेकालंकृत्वादेवेषूत्पद्यतेत
त्रचतस्याःपुरुत्वमेवनस्त्रीत्वंततएवंजघन्यतःसमयमात्रंस्त्रीवेदःउत्कर्षचिंतायामियंप्रथमादेशभावनाकश्चित्जंतुर्नारीषुतिर

स्त्रीषुवापूर्वकोट्यायुष्कासुमध्ये पंचवारान्भवान् अनुभूय ईशानकल्पे पंचपंचाशत्पल्योपमप्रमाणोत्कृष्टस्थितिष्वपरिगृहीतासु देवीषु मध्ये दे
वीत्वेनोत्पन्नस्ततः स्वायुःक्षयेच्युत्वा भूयोपिनारीषु तिरश्चीषु वापूर्वकोट्यायुष्कासु मध्ये स्त्रीत्वेनोत्पन्नस्ततो भूयोपिद्वितीयं वारं ईशानदेवलोके पंच
पंचाशत्पल्योपमप्रमाणोत्कृष्टायुष्कास्वपरिगृहीतदेवीषु मध्ये देवीत्वेनोत्पन्नस्ततः परमवश्यं वेदांतरमेव गच्छति एवं दशोत्तरं पल्योपमशतं पू
र्वकोटिपृथक्त्वाभ्यधिकं प्राप्यते अत्र परआह ननु यदि देवकुरूत्तरकुर्वादिषु पल्योपमत्रयस्थितिकासु स्त्रीषु मध्ये समुत्पद्यते ततोऽधिकापि
स्त्रीवेदस्य स्थितिरवाप्यते ततः किमित्येतावत्योपादिष्टा तदयुक्तमभिप्रायापरिज्ञानात् तथाहि इह तावद्देवीषु अथवा असंख्येयवर्षायुष्कासु स्त्री
षु मध्ये नोत्पद्यते देवयोनेश्च्युतानामसंख्येयवर्षायुष्केषु मध्ये उत्पादप्रतिषेधात् नाप्यसंख्येयवर्षायुष्कासती योषित् उत्कृष्टायुष्कासु देवी
षु मध्ये जायते यत उक्तं मूलटीकाकृता जाता असंख्येयवासाऊ पाउक्कोसठिईनपावेइ इति ततो यथोक्तप्रमाणैवोत्कृष्टा स्थितिः स्त्रीवेदस्याप्या
प्यते द्वितीयादेशवादिनः पुनरेवमाहुर्नारीषु तिरश्चीषु वा पूर्वकोट्यायुष्कासु मध्ये पंचवारान्भवान् अनुभूय पूर्वप्रकारेण ईशानदेवलोके वारद्वय
मुत्कृष्टस्थितिकासु देवीषु मध्ये उत्पद्यमाना नियमतः परिगृहीतास्वेवोत्पद्यंते नापरिगृहीतासु ततस्तन्मतेनोत्कृष्टमवस्थानं स्त्रीवेदस्याष्टा
दशपल्योपमानि पूर्वकोटिपृथक्त्वं च तृतीयादेशवादिनां तु सौधर्मदेवलोकपरिगृहीतासु सप्तपल्योपमप्रमाणोत्कृष्टायुर्वारद्वयं समु
त्पद्यते तन्मतेन चतुर्दशपल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि स्त्रीवेदस्य स्थितिः चतुर्थादेशवादिनां तु मतेन सौधर्मदेवलोके पंचा
शत्पल्योपमाणोत्कृष्टायुष्कास्वपरिगृहीतदेवीष्वपि पूर्वप्रकारेण वारद्वयं देवीत्वेनोत्पद्यते ततस्तन्मतेन पल्योपमशतं पूर्वकोटिपृथ
क्त्वाभ्यधिकमवाप्यते पंचमादेशवादिना पुनरिदमाहुर्नानाभवभ्रमणद्वारेण यदि स्त्रीवेदस्योत्कृष्टमवस्थानं चिंत्यते तर्हि पल्योपमपृथक्त्वमे
व पूर्वकोटिपृथक्त्वाभ्यधिकं प्राप्यते न ततोऽधिकं कथमेवमिति चेत् उच्यते नारीषु वा पूर्वकोट्यायुष्कासु मध्ये सप्तभवाननुभूयाष्टमभवे देवकु
र्वादिषु त्रिपल्योपमस्थितिषु मध्ये स्त्रीत्वेन समुत्पद्यते ततो मृत्वा सौधर्मदेवलोके जघन्यस्थितिकासु देवीषु मध्ये देवीत्वेनोपजायते॥ तदनं

तरं चावश्यं वेदांतरमधिगच्छतीति अमीषां च पंचानामादेशानामन्यतमादेशसमीचीनता निर्णयो निरतिशयज्ञानिभिः सर्वोत्कृष्टश्रुतलब्धिसं
पन्नैर्वा कर्तुं शक्यते तेन च भगवदार्यश्यामप्रतिपत्तौ नासीदेव केवलं तत्कालापेक्षया ये पूर्वपूर्वतमाः स्तारयस्तत्कालभावि ग्रंथपौर्वापर्यालो
चनया यथा स्वमति स्त्रीवेदस्य स्थितिं प्ररूपितवंतस्तेषां सर्वेषामपि प्रावचनिकसूरीणां मतानि भगवानार्यश्यामोऽपदिष्टवान् तेपि च प्रावचनि
कसूरयः स्वमतेन सूत्रं पठंतो गौतमप्रश्न भगवन्निर्वचनरूपतया पठंति ततस्तदवस्थान्येव सूत्राणि लिखितानि गोयमा इत्युक्तमन्यथा भगवति गौ
तमाय निर्दिष्टानि संशयं कथनरूपपद्यते भगवतः सकलसंशयकथनमुपपद्यते भगवतः सकलसंशयातीतत्वात् पुरुषवेदसूत्रे जघन्यतोंऽ
तर्मुहूर्त्तमिति यदा कश्चिदन्यवेदेभ्यो जीवेभ्य उद्धृत्य पुरुषवेदे समुत्पद्यते तत्र चांतर्मुहूर्त्तं सर्वायुर्जीवित्वा गत्यंतरे अन्यवेदेषु मध्ये समुत्पद्यते तदा पु
रुषवेदस्य जघन्यतोऽकृष्टमानकत्वं नपुंसकवेदसूत्रे जघन्यतएकः समयः स्त्रीवेदस्येव भावनीय उत्कर्षतो वनस्पतिकालः स च प्रागेवो
क्तस्तत्र सांव्यवहारिकजीवानधिकृत्य पदात्वसांव्यवहारिकजीवानधिकृत्य चिंता क्रियते तदा द्विविधा नपुंसकवेदा कश्चिदधिकृत्या
नाद्यपर्यवसाना ये न जातुचिदपि असांव्यवहारिकराशेर्निपतिष्यंति केचिच्च कृत्य पुनरनादिसपर्यवसाना ये असांव्यवहारिकराशे
रुद्धृत्य सांव्यवहारिकराशावागमिष्यंति अथ किमसांव्यवहारिकराशेरपि विनिर्गत्य सांव्यवहारिकराशावागच्छंति येन एवं प्ररूपणा क्रियते उच्यते
आगच्छंति कथमेतदवसेयमिति चेत् उच्यते पूर्वाचार्योपदेशात् तथा चाह दुःषमांधकारनिमग्नजिनप्रवचनप्रदीपो भगवान् जिनभद्रगणिक्षमाश्र
मणः सिझंति जत्तिया किर इह सांव्यवहारकजीवरासीउ इंति अणाइवणस्सइरासीउ तत्तिया तंमि अवेदको द्विधा साद्यपर्यवसितः साद्यपर्यव
सितश्च तत्र यः क्षपकश्रेणिं प्रतिपद्यावेदको भवति स साद्यपर्यवसितः क्षपकश्रेणेः प्रतिपातासंभवात् यस्तूपशमश्रेणिं प्रतिपद्यावेदको
जायते स सादिः पर्यवसितः॥ स च जघन्येनैकं समयं कथमेकसमयतेति उच्यते यदा एकं समयमवेदको भूत्वा द्वितीयसमये पंचत्वमुपा
गच्छति॥ तदा तस्मिन्नेव पंचत्वसमये देवेषूत्पन्नः पुरुषवेदोदयेन सवेदको भवति तत एवं जघन्यत एकं समयमवेदकः उत्कर्षतोंऽत

मुहूर्त्तपरतोऽवश्यंश्रेणीतः प्रतिपतनेवेदोदयसद्भावात्गतंवेदद्वारमिदानींकषायद्वारंतत्रेदमादिसूत्रंसकसाइणंभंतेइत्यादि॥ सहकषायेयेषांयेर्वा
तेसहाकषायाजीवपरिणामविशेषास्तेविद्यंतेयस्यससकषायीइदंसकलमपिसूत्रंसवेदसूत्रंसवेदसूत्रवदविशेषेणभावनीयंसमानभावना
कत्वात्कोहकसाइणंभंतेइत्यादिजघन्यतोप्यंतर्मुहूर्त्तमुत्कर्षतोप्यंतर्मुहूर्त्तमिति॥ क्रोधकषायोपयोगस्यजघन्यतउत्कर्षतोऽन्तर्मुहूर्त्तप्रमाणत्वात्।
तथाजीवस्वाभाव्यात्इदंचसूत्रचतुष्टयमपिविशिष्टोपयोगापेक्षमितिलोभकषायीजघन्येनैकंसमयमितियदाकश्चिदुपशमकउपशमश्रेणि
पर्यवसानेउपशांतवीतरागोभूत्वाश्रेणीतः प्रतिपतन्लोभाणुप्रथमसमयसंवेदनएवकालंकरोतिदेवलोकेषूत्पद्यतेतत्रचोत्पन्नः सन्क्रोध
कषायीमानकषायीमायाकषायीवाभवति। तदाएवंसमयंलोभकषायीलभ्यतेअथैवंक्रोधादिष्वप्येकसमयताकस्मान्नलभ्यतेउच्यते
तथास्वाभाव्यात्तथाहिश्रेणीतः प्रतिपतन्मायाणुवेदनप्रथमसमयेक्रोधाणुवेदनप्रथमसमयेवायदिकालंकरोतिकालंचकृत्वादेवलोके
षूत्पद्यतेतदापितथास्वाभाव्यात्येनकषायोदयेनकालंकृतवान्तमेवकषायोदयंतत्रापिगतः सन्नंतर्मुहूर्त्तमनुवर्त्तयतिएवञ्चावसीयतेअ
धिकृतवान्तमेवकषायोदयंतत्रापिगतःसन्नंतर्मुहूर्त्तमनुवर्त्तयतिएवञ्चावसीयतेअधिकृतसूत्रप्रमाण्यात्ततोनेकसमयताक्रोधादिष्वि
तिअकषायसूत्रंसवेदसूत्रमवेदसूत्रमिवभावनीयंगतंकषायद्वारमधुनालेश्याद्वारंतत्रेदमादिसूत्रं॥७॥सलेसेणंभंतेइत्यादिसहलेश्याय
स्ययेनवाससलेश्यसद्विविधप्रज्ञप्तस्तथाद्ये अनादिरपर्यवसितोयोनजातुचिदपिसंसारव्यवच्छेदंकर्त्ताअनादिसपर्यवसितोयः संसार
पारगामीकण्हलेसेणंभंतेइत्यादिइहतिरश्चांमनुष्याणांचलेश्याद्रव्याण्यंतर्मुहूर्त्तिकानिततःपरमवश्यंलेश्यांतरपरिणामंभजंतेदेवनै
रयिकाणांतुपूर्वभवचरमांतर्मुहूर्त्तादारभ्यपरभवगतमाद्यमंतर्मुहूर्त्तंयावत्अवस्थितानिततःसर्वत्रजघन्यमंतर्मुहूर्त्ततिर्यग्मनुष्या
पेक्षयाद्रष्टव्यमुत्कृष्टंदेवनैरयिकापेक्षयातच्चविचित्रमितिभाव्यते। तत्रयदुक्तंत्रयस्त्रिंशत्सागरोपमाण्यंतर्मुहूर्त्ताभ्यधिकाभ्यधिका
नीतितत्सप्तमनरकपृथिव्यापेक्षयाद्रष्टव्यं। तत्रत्यानैरयिकाः कृष्णलेश्याकास्तेषांचस्थितिरुत्कर्षात् त्रयस्त्रिंशत्सागरोपमाणिय

स्तुपूर्वोत्तरभवगतेयथाक्रमंचरमाद्येअंतर्मुहूर्त्तेतेद्वेअप्येकमंतर्मुहूर्त्तमंतर्मुहूर्त्तस्यासंख्यातभेदभिन्नत्वात्तथाचान्यत्राप्युक्तं मुहुत्तद्धंतुजहन्नातित्ती
संसागरामुहुत्तहिया। उक्कोसाहोइठीईनायव्वाकण्हलेसाए।अत्रमुहुत्तहियाचूर्णिकृताव्याख्यातमंतर्मुहूर्त्ताधिकेतिनीललेश्यास्त्रयाणि
दशसागरोपमाणिपल्योपमासंख्येयभागाभ्यधिकान्युक्तानितानिपंचमपृथिव्यपेक्षयावेदितव्यानितत्रहिप्रथमप्रस्तटेनीललेश्यापंचमिया
एमीसाइतिवचनात्तस्मिंश्चप्रथमप्रस्तटेस्थितिरुत्कर्षतएतावती। येतुपूर्वोत्तरभवगतेअंतर्मुहूर्त्तेतेपल्योपमासंख्येयभागएवांतर्गते
इतिनपृथग्विवक्षितेएवमुत्तरत्रापिद्रष्टव्यंकापोतलेश्यासूत्रेत्रीणिसागरोपमाणिपल्योपमासंख्येयभागाभ्यधिकानितृतीयनरकपृथिव्यपेक्ष
याचसातव्यानितृतीयपृथिव्यामपिप्रथमप्रस्तटेकापोतलेश्यायाभावात्तइयाएमीसियाइतिवचनात्तत्रचोत्कृष्टस्थितिरेतावत्याःसंभवा
त्तेजोलेश्यासूत्रेद्वेसागरोपमेपल्योपमासंख्येयभागाभ्यधिकेईशानेदेवलोकेदेवापेक्षयावेदितव्येतेहितेजोलेश्याकाउत्कर्षतएतावत्स्थिति
काश्चपद्मलेश्यासूत्रेदशसागरोपमाणिअंतर्मुहूर्त्ताभ्यधिकानिब्रह्मलोकापेक्षयाभावनीयानितत्रदेवानांहिस्थितिरुत्कर्षतोदशसागरोपमा
णिलेश्याचपद्मलेश्यायेचपूर्वोत्तरभवगतेअंतर्मुहूर्त्तेतेकिलैकमंतर्मुहूर्त्तमिति अंतमुहुत्तमब्भहियाइंतीत्युक्तंशुक्ललेश्यासूत्रेत्रयस्त्रिं
शत्सागरोपमाणिअन्तर्मुहूर्त्ताभ्यधिकानिअनुत्तरसुरापेक्षयातेषामुत्कर्षतःस्थितेस्त्रयस्त्रिंशत्सागरोपमप्रमाणत्वात्अंतर्मुहूर्त्ताभ्यधिक
त्वभावनाचप्राग्वत् अलेश्योअयोगिकेवलीसिद्धश्चनचैतयोरन्यतरस्यापगमोलेश्यत्वव्याघातादितिसाद्यपर्यवसितः गतंलेश्याद्वारमि
दानींसम्यक्त्वद्वारंतत्रेदमादिसूत्रं॥७॥सम्मदिट्ठीणंभंतेइत्यादिसम्यगविपर्यस्ताहृष्टिर्वाजिनप्रणीतवस्तुतत्त्वप्रतिपत्तिर्यस्यसम्यग्दृष्टिः सचां
तरकरणकालभाविनाऔपशमिकसम्यक्त्वेनसासादनसम्यक्त्वेनशुद्धदर्शनमोहपुंजोदयसंभविक्षायोपशमिकसम्यक्त्वेनसकलद
र्शननमोहनीयक्षयसमुत्थक्षायिकसम्यक्त्वेनवाद्रष्टव्येः निर्वचनंसम्यग्दृष्टिर्द्विविधः प्रज्ञप्तः तद्यथासाद्यपर्यवसितएषक्षायिकेस
म्यक्त्वेउत्पादितेसत्तिवेदितव्याः। तस्यप्रतिपाताभावात्सादिसपर्यवसितएषक्षायोपशमिकादिसम्यक्त्वापेक्षयातत्रयोसौसादिपर्य

वसितसम्यग्दृष्टिः सजघन्येनांतर्मुहूर्त्तपरतोमिथ्यात्वगमनात्उत्कर्षतः षट्षष्टिसागरोपमाणिसातिरेकाणितत्रयदिवारद्वयंविज
यादिषुचतुर्थप्रतिपतितसम्यक्त्वउत्कृष्टस्थितिकोदेवरूपद्यतेवेलात्रयंवाच्युतदेवलोकेततोदेवभवैरेवषट्षष्टिसागरोपमानि
परिपूर्णानिभवंति॥ येतुमनुष्यभावाःसम्यक्त्वसहितास्तेऽधिकाइतितैःसातिरेकाणीत्युक्तंच॥ दोवारेविजयाइसुगयस्सतिन्निअच्चुए
अहवताइंअइरेगंनरभवियमितिमिच्छादिट्ठीणंभंतेइत्यादिमिथ्याविपर्यस्तादृष्टिर्जीवाजीवादिवस्तुतत्वप्रतिपत्तिर्यस्यभक्षितदूस्तूर
पुरुषस्यसितेपीतप्रतिपत्तिवत्सममिथ्यादृष्टिः॥ ननुमिथ्यादृष्टिरपिकश्चित्भक्ष्यमभक्ष्यंतयाजानातिपेयंपेयतयामनुष्यंमनुष्यतयापशुंपशु
तयाततःसकथंमिथ्यादृष्टिरुच्यतेभगवतिसर्वज्ञेतस्यप्रत्ययाभावात्इहहिभगवदर्हत्प्रणीतंसकलमपिप्रवचनार्थमभिरोचयमा
नोपियदितद्गतमेकमप्यक्षरंनरोचयतितदानामप्येषमिथ्यादृष्टिरेवोच्यतेतस्यभगवतिसर्वज्ञेप्रत्ययनाशतउक्तंच॥ सूत्रोक्तस्यैकस्या
प्यरोच नादक्षरस्यभवतिनरःमिथ्यादृष्टिःसूत्रंहिनप्रमाणंजिनाभिहितंकिंपुनःशेषोभगवदर्हदभिहितयथाचजीवाजीवादिवस्तु
तत्वप्रतिपत्तिविकलःननुसकलप्रवचनार्थाभिरोचनार्थाभिरोचनात्तद्गतकतिपयार्थानांवारोचनतोदेषन्यायतःसम्यग्मिथ्यादृष्टि
रेवभवितुमर्हतिकथंमिथ्यादृष्टिस्तदसत्वस्तुतत्वापरिज्ञानात्इहयदासकलवस्तुजिनप्रणीततयासम्यक्श्रद्धत्तेतदानीमसौसम्यग्दृष्टिः
यदात्वेकस्मिन्नपिवस्तुनिपर्यायेवामतिदौर्बल्यादिनाएकांतेनसम्यक्परिज्ञानमिथ्यापरिज्ञानाभावेनोनसम्यक्श्रद्धानंनाप्येकांततोविप्र
तिपत्तितदासम्यग्मिथ्यादृष्टिरुक्तंच॥ शतकवृहच्चूर्णौजहानालिकेरदीववासिस्सखुहाइयस्सविइथसमागयस्सपुरिसस्सइयणाइए
अणेगविहेढोइएतस्सआहारस्सउवरिंनरुईनयनिंदाजेणतेणसोउयणाइउआहारोनकयाइदिट्ठोनाविसुउएवंसम्मामिच्छदिट्ठिस्स
विजीवाइपयथाणंमुवरिनयरुईनाविनिंदत्तियदापुनरेकस्मिन्नपिवस्तुनिपर्यायेवाएकांततोविप्रतिपद्यतेतदामिथ्यादृष्टिरेवास्य १५१
दोषःसचत्रिविधस्तद्यथाअनाद्यपर्यवसितोऽनादिपर्यवसितश्चतत्रयःकदाचनापिसम्यक्त्वनावाप्स्यतिसोऽनाद्यपर्यवसितःय

स्त्ववाप्स्यतिसोनादिसपर्यवसितःयस्तुसम्यक्त्वमासाद्यभूयोपिमिथ्यात्वंयातिससादिसपर्यवसितःसचजघन्येनांतर्मुहूर्त्तंतदनंतरंत
स्यापिभूयःसम्यक्त्वावाप्तेःउत्कर्षतोऽनंतंकालंतमेवानंतंकालंद्विधाप्ररूपयतिकालतःक्षेत्रतश्च॥तत्रकालतोऽनंताउत्सर्पिण्यवसर्पिण्यो
वतक्षेत्रतोऽपार्द्धपुद्गलपरावर्त्तदेशोनंअत्रक्षेत्रतइतिनिर्देशान्क्षेत्रपुद्गलपरावर्त्तःपरिग्राह्योनतुद्रव्यपुद्गलपरावर्त्तादयःएवंपूर्वोत्तरत्रापि
चभावनीयं॥सम्मामिच्छद्दिट्ठीणमित्यादिसम्यक्त्वमिथ्याचदृष्टिर्यस्यासौसम्यग्मिथ्यादृष्टिःसजघन्यतोउत्कर्षतोवाअंतर्मुहूर्त्तपरतोऽवश्यं
तत्परिणामविध्वंसात्तथाजीवस्वाभाव्यानुगतंसम्यक्त्वद्वारमिदानींज्ञानद्वारंतच्चेदमादिसूत्रं॥६७॥ नाणीणंभंतेइत्याज्ञानमस्यास्तीतिज्ञानी
ऽनेकस्वरादीतीन्सद्विधासाद्यपर्यवसितःसादिपर्यवसितश्चतत्रकेवलज्ञानापेक्षयासाद्यपर्यवसितःप्रतिपाताभावात्शेषज्ञानापेक्षया
सादिसपर्यवसितःशेषज्ञानानांप्रतिनियतकालभावित्वात्सजघन्येनांतर्मुहूर्त्तपरतोमिथ्यात्वगमनेनज्ञानपरिणामापगमात्उत्कर्षतःषट्
षष्टिसागरोपमाणिसातिरेकाणियावत्तानिसम्यग्दृष्टेरिवभावनीयानिसम्यग्दृष्टेरेवज्ञानित्वात्॥आभिनिबोधिकज्ञानिसूत्रेएवंचैवतियथासामान्य
तोज्ञानीसादिसपर्यवसितोजघन्यतउत्कर्षतश्चोक्तस्तथाभिनिबोधिकज्ञान्यपिवक्तव्यःसचैवंजहन्नेणंअंतोमुहुत्तंउक्कोसेणंछावट्ठीसागरोव
माइंसातिरेगाइं॥एवंश्रुतज्ञान्यपिअवधिअवधिज्ञान्येवंनवरंसजघन्यतएकंसमयंवक्तव्यःकथमेकसमयतावधिज्ञानस्येतिचेद्उच्यतेतिर्यक्पं
चेंद्रियोमनुष्योदेवोविभंगज्ञानीसन्सम्यक्त्वंप्रतिपद्यतेतस्यचसम्यक्त्वप्रतिपत्तिसमयएवसम्यक्त्वप्रभावतोविभंगज्ञानमवधिज्ञानंजातंतच्चयदादेवस्य
च्यवनेनमरणेनान्यस्यान्यथावाऽनंतरसमयेप्रतिपततितदाभवत्यवधिज्ञानस्यैकसमयताउत्कर्षतःसातिरेकाणिषट्षष्टिसागरोपमाणियावत्तानिचा
प्रतिपतितावधिज्ञानस्यच्यारद्वयंविजयादिषुगमनेनवारत्रयमच्युतदेवलोकगमनेनवावेदितव्यानिमनःपर्यवज्ञानिनएकसमयतासंय
तस्याप्रमत्ताद्धायांवर्त्तमानस्यमनःपर्यायज्ञानमुत्पद्यानंतरसमयेकालंकुर्वतोभावनीयाउत्कर्षतोदेशोनापूर्वकोटीतनउर्द्धंसंयमाभाव
तोमनःपर्यवज्ञानस्याप्यभावात्केवलज्ञानीसाद्यपर्यवसितःप्रतिपाताभावात्अज्ञानीत्रिविधस्तद्यथाअनाद्यपर्यवसितः॥अनादिसप

र्यवसितः॥ सादिसपर्यवसितश्चनत्रयस्यनकदाचनापिज्ञानलोभोभावीसोऽनाद्यपर्यवसितोयस्तुज्ञानमासादयिष्यतिसोऽनादिपर्यवसि
तःयपुनःज्ञानमासाद्यभूयोमिथ्यात्वगमनेनाज्ञानित्वमधिगच्छतिससादिसपर्यवसितः॥ सचजघन्येनांतर्मुहूर्त्तंपरतःसम्यक्त्वासादनेनाज्ञा
नित्वपरिणामापगमसंभवात्॥ उत्कर्षतोऽनंतंकालमित्यादिप्राग्वत्ततउर्द्धमवश्यंसम्यक्त्वावाप्तेज्ञानित्वापगमात्॥एवंमत्यज्ञानीश्रुताज्ञा
नीचत्रिविधोभावनीयः॥ विभंगज्ञानीयः विभंगज्ञानीजघन्यतएकंसमयंकथमितिचेत् उच्यतेकश्चित्तिर्यग्पंचेंद्रियोमनुष्योदेवोवा
सम्यग्दृष्टित्वादवधिज्ञानीसन्मिथ्यात्वंगतस्तस्मिंश्चमिथ्यात्वप्रतिपत्तिसमयेमिथ्यात्वप्रभावतोवधिज्ञानंविभंगज्ञानीभूतंआद्यत्रयमज्ञा
नमपिभवतिमिथ्यात्वसंयुक्तमितिवचनात्ततोऽनंतरसमयेदेवस्यमरणेनान्यथावातद्विभंगज्ञानंपरिपततीतितएवमेकसमयताविभंगज्ञान
स्यउत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणिदेशोनपूर्वकोट्यभ्यधिकानितथाहियादिकश्चिन्मिथ्यादृष्टिस्तिर्यग्पंचेंद्रियोमनुष्योवापूर्वकोट्या
युःकतिपयवर्षातिक्रमेविभंगज्ञानीजायतेजातश्चसन्प्रतिपतितविभंगज्ञानएवाविग्रहगत्यासप्तमनरकपृथिव्यांत्रयस्त्रिंशत्सागरोपमस्थि
तिकोनैरयिकोजायतेतदाभवतियथोक्तमुत्कृष्टमानंततऊर्द्धंतुसम्यक्त्वप्रतिपत्तेरवधिज्ञानभावतःसर्वथापगमाद्वातद्विभंगज्ञानमपगच्छ
तिगतंज्ञानद्वारमिदानींदर्शनद्वारंतत्रेदमादिसूत्रंचक्खुदंसणीणंभंतेइत्यादिइहयदात्रींद्रियादिश्चतुरिंद्रियादिश्चतुरिंद्रियादिषूत्पद्यतेतदा
तर्मुहूर्त्तंस्थित्वाभूयोपित्रींद्रियादिषुमध्येसमुत्पद्यतेतदाचक्षुर्दर्शनीअनुर्मुहूर्त्तंलभ्यतेउत्कर्षतः॥सातिरेकंसागरोपमसहस्रंतच्चतुरिंद्रिय
तिर्यग्पंचेंद्रियनैरयिकादिभवभ्रमणेनावसातव्यं॥अचक्षुर्दर्शनीअनाद्यपर्यवसितोयोनकदाचिदपिसिद्धभावमधिगमिष्यतियस्त्वधि
गंतासोनादिसपर्यवसितः॥ तथातिर्यक्पंचेंद्रियोमनुष्योवातथाविधाध्यवसायावधिनावधिदर्शनंउत्पाद्यानंतरसमयेयदिकालंकरो
ति॥तदावधिदर्शनंप्रतिपततितदाऽवधिदर्शनितएकसमयताउत्कर्षतोऽवधिदर्शनीद्विषट्षष्टिसागरोपमाणांसातिरेकेकथंइतिचेत् १५२
॥ उच्यते॥ इहकश्चिद्विभंगज्ञानीतिर्यग्पंचेंद्रियोमनुष्योवाअप्रतिपतितविभंगज्ञानएवाविग्रहगत्याऽधःसप्तमनरकपृथिव्यांत्रयस्त्रिंशत्साग

MEMORIAL

रोपमस्थितिकोनैरयिकोजातस्तत्रचोद्वर्त्तनाप्रत्यासन्नेकालेसम्यक्त्वमुपाद्यततःपरिभ्रष्टस्ततोऽप्रतिपतितेनविभंगज्ञानेनपूर्वकोट्यायुष्केषुतिर्य
ग्पंचेंद्रियेषुसमुत्पन्नस्तत्रचपरिपूर्णस्वायुःपरिपाल्यपुनरप्रतिपतितविभंगएवाधःसप्तमपृथिव्यांत्रयस्त्रिंशत्सागरोपमस्थितिकोनैरयिकोजा
तस्तत्रापिचोद्वर्त्यप्रत्यासन्नेसम्यक्त्वमासाद्यपरित्यजतिततोभूयोप्यप्रतिपतितविभंगएवपूर्वकोट्यायुष्केषुतिर्यग्पंचेंद्रियेषुजातस्तदेवमेषाष
ट्षष्टिःसागरोपमाणामभूत्॥ सर्वत्रचतिर्यक्षूत्पद्यमानोऽविग्रहेणोत्पद्यतेविग्रहेविभंगस्यतिर्यक्षुमनुष्येषुवनिषेधात्यद्वक्ष्यतिविभंगनाणीपं
चेंद्रियतिरिक्खजोणियामणूसाआहारगाणोअणाहारगाइतिआहकिंसम्यक्त्वमेषोऽपांतरालेप्रतिपद्यतेउच्यतेइहविभंगस्यस्थिति
रुत्कर्षतोपित्रयस्त्रिंशत्सागरोपमाणिदेशोनपूर्वकोट्यधिकानितथाचोक्तं॥प्राक्विभंगनाणीजहन्नेणएकंसमयंउक्कोसेणंतेत्तीसंसाग
रोवमाइंदेसूणाएपुव्वकोडीएअब्भहियाइइतिततएतावंतंकालमविछेदेनविभंगस्याप्राप्यमाणत्वात्अपांतरालेसम्यक्त्वंप्रतिपाद्यतेतो
ऽप्रतिपतितविभंगएवमनुष्यत्वमवाप्यसंयमंपालयित्वाद्वौवारौविजयादिषूत्पद्यमानस्यद्वितीयाषट्षष्टिःसागरोपमाणामवधिदर्श
नस्यअथविभंगावरुद्धायामवधिदर्शनंकर्मप्रकृत्यादिषुप्रतिषिद्धंततःकथमिहविभंगेतद्व्याख्येनेनैषदोषःसूत्रेविभंगेप्यवधिदर्शन
स्यप्रतिपादितत्वात्तथाह्ययंसूत्राभिप्रायोविशेषविषयंविभंगज्ञानंसामान्यविषयमवधिदर्शनंयथासम्यग्दृष्टेःविशेषविधिज्ञानंसा
मान्यविषयमवधिदर्शनंकेवलंविभंगज्ञानिनोप्यवधिदर्शनमनाकारमात्रत्वेनाविशिष्टत्वात्॥अवधिज्ञानिनोप्यवधिदर्शनमनाकार
मात्रत्वेनाविशिष्टत्वादवधिदर्शनतुल्यमितितदर्शनमुच्यतेनविभंगदर्शनमित्याहचमूलटीकाकारोप्येतद्भावनायांदंसणंचविभं
गोहीणजातोतुल्लमेवअतोचवछावकोऊसातिरेगाऊइति॥सतोस्माभिरपिविभंगेऽवधिदर्शनंभावितंकार्म्मग्रंथिकाःपुनराहुर्यद्यपि
साकारेतरविशेषभावेनविभंगज्ञानमवधिदर्शनंचपृथगस्तितथापिनसम्यग्निश्चयोभंगज्ञानेनमिथ्यारूपत्वात्नाप्यवधिदर्शनेनतस्या
नाकारमात्रत्वादतःकिंतेनपृथग्विवक्षितेनापीतितदभिप्रायेणनविभंगावरुद्धायामवधिदर्शनं॥नचैतत्स्वमनीषिकाकल्पितंपूर्वस

रिभिरप्येवंमनविभागस्यव्यवस्थापितत्वात्॥ उक्तंच॥ विशेषणवत्यांजिनभद्रगणिक्षमाश्रमणपूज्यपादैः सुत्तेविभंगस्सविपरूवियंउहिदं
सणंबहुसोकीसपुणोपडिसिध्दंकम्मपगरणंमिविभंगेविदरिसणंसामन्नविसेसविसयऊमत्तेतंचविसिठमणगारमेत्तनोविहिविभंगाणं
कम्मपगडिमयंपुणसागारेयरविसेसभावेवि॥ नविभंगनाणदंसणविसेसणमणिच्छियत्तणऊइत्ति॥ अन्येतुव्याचक्ष्यतेकिंसप्तमनर
कपृथिवीनिवासिनारककल्पनयासामान्येनेवनारकतिर्यङ्नरामरभवेषुपर्यवतः खल्वविधिविभंगावेतावंतंकालंभवतस्ततऊर्द्ध्वम
पवर्गाद्इतिकेवलदर्शनद्इतिस्तेवकेवलज्ञानिसूत्रवद्भावनीयंगतंदर्शनद्वारमिदानींसंयतद्वारंतत्रेदमादिसूत्रं॥ ७७॥ संजएणंभंतेइत्या
दि॥ जघन्यतएकसमयतासंयतस्यचारित्रपरिणामसमयएवकस्यापिकालकरणात्असंयतस्त्रिधाअनाद्यपर्यवसितःअनादि
सपर्यवसितः सादिपर्यवसितश्चतत्रयः संयमंकदाचनापिनप्राप्स्यतिसोऽनाद्यपर्यवसितोयस्तुप्राप्स्यतिसोऽनादिपर्यवसितःयस्तुसं
यमंप्राप्यततः परिभ्रष्टः समादिसपर्यवसितः सचजघन्येनांतर्मुहूर्त्तंततः परंकस्यचित्पुनरपिसंयमप्रतिपत्तिभावात्उत्कर्षतोऽनंतका
लमित्यादिप्राग्वत्ततः ऊर्द्ध्वमवश्यंसंयमप्राप्तिः संयतासंयतोदेशविरतः सचज[घ]न्यतोप्यंतमुहूर्त्तंदेशविरतिप्रतिपत्युपयोगस्यज
घन्यतोप्यांतर्मौहूर्तिकत्वात्देशविरतिर्हिद्विविधत्रिविधादिभंगबहुलाततस्तत्प्रतिपत्तोजघन्यतोप्यंतर्मुहूर्त्तंलगतिसर्वविरतिसर्ववि
रतिस्तुसर्वसावद्यमहंनकरोमीत्येवंरूपाततस्तत्प्रतिपत्युपयोगपेक्षसामायिकोपिभवतीतिप्राक्संयतस्यएकसमयतोक्ता॥ यस्तुनसं
यतोनाप्यसंयतोनापिसंयतासंयतः समिध्दइतिगतंसंयतद्वारमिदानीमुपयोगद्वारंतत्रेदमादिसूत्रंसागारोवउत्तेणंभंतेइत्यादि॥
इहसंसारिणानुपयोगंसाकारोनाकारोवाजघन्यतोप्यांतर्मौहूर्तिकउत्कर्षतोपिततः सूत्रद्वयेपिजघन्यतउत्कर्षतश्चांतर्मुहूर्त्तमुक्तं
यस्तुकेवलिनामुक्तमेकउपयोगः सइहनविवक्षितइति॥ गतमुपयोगद्वारमिदानीमाहारद्वारंतत्रेदंसूत्रं॥ आहारगेणंभंतेइत्यादिस १९३
गमंतवरंजहन्नेणंखुड्डागभवग्गहणंदुसमऊणमिति॥ इहयद्यपिचतुःसामायिकीपंचसामायिकीचविग्रहगतिर्भवति॥ आहच॥

उज्जयायए क्वंकागतीविणिद्दिठाउद्दइति॥ चउथ्थंकाविनामचऊपंचसमयाऊइतितथापिबाहुल्येनद्विसामायिकीत्रिसामायिकीवा
प्रवर्त्ततेनचतुःसामायिकीपंचसामायिकीवाततोनतेविवक्षितेतत्रोत्कर्षतस्त्रिसामायिक्यांविग्रहगतोद्वावाद्यौसमयावनाहारकाइत्या
हारकत्वाचिंतायांक्षुल्लकभवग्रहणंताभ्यांन्यूनमुक्तंऋजुगतिरेकचक्रगतिश्चनविवक्षितासर्वजघन्यस्यपरिचिंत्यमानत्वात्उत्कर्षतो
ऽसंख्येयंकालमित्यादि॥ सगमंएतावतः कालादूर्द्ध्वमवश्यंविग्रहगतिर्भवति॥ तत्राचानाहारकत्वमित्यनंतंकालमितिनोक्तंकेवलिसूत्रं
सुगमं॥ छद्मस्थानाहारकसूत्रेऊक्कोसेणदोसमयाइति॥ त्रिसामायिकींविग्रहगतिमधिकृत्यचतुःसामायिकींविग्रहगतिमधिकृत्यचतुः
सामायिकीपंचसामायिकीचविग्रहगतिर्नविवक्षितेत्यभिहितमतंतरंसमयोगिभवस्थकेवलअनाहारसूत्रेत्रयः समयाअष्टसामायिकस्यकेव
लिसमुद्घातस्यतृतीयचतुर्थपंचमरूपाः॥ उक्तंच॥ दंडंप्रथमेसमयेकपाटमथचोत्तरेस्तथासमयेमंथानमथतृतीयेलोकव्यापीचतुर्थेतुसं
हरति॥ पंचमेत्वंतराणिमंथानमथपुनःषष्टसप्तमकेतुपाटंसंहरति ऽष्टमेदंडं औदारिकप्रयोक्ताप्रथमाष्टमासमययोरसाविष्टः मिश्रौदारिकप्रयो
क्ता सप्तमषष्टद्वितीयेतुकार्मणशरीरयोगीचतुर्थकेपंचमेतृतीयेचसमयत्रयेपितस्मिन्भवत्यनाहारकोनियमादितिगतमाहारद्वारमधुना
भाषाद्वारमाह॥ भासएणंभंतेइत्यादि॥ इहजघन्यतएकसमयताउत्कर्षतआंतर्मुहूर्त्तिकताचवाग्योगिनइवावसातव्याअभाषकस्त्रिविधस्त
द्यथाअनाद्यपर्यवसितःअनादिपर्यवसितः सादिपर्यवसितश्चतत्रयोनजातुचिदपिभाषकत्वंलप्स्यतेसोनाद्यपर्यवसितोयस्तुप्राप्स्यतिसोऽना
दिपर्यवसितः यस्तुभाषकोभूत्वाभूयोप्यभाषकोभवतिससादिसपर्यवसितसचजघन्येनांतर्मुहूर्त्तंभाषित्वाकिंचित्कालमवस्थायपु
नर्भाषकत्वोपलब्धेः॥ अथवाद्वींद्रियादिर्भाषकएकेंद्रियादिष्वभाषकेषूत्पद्यतत्रचांतर्मुहूर्त्तंजीवित्वापुनरपियदीद्वींद्रियादिरेवोत्पद्य
तेतदाजघन्यतोऽतर्मुहूर्त्तमभाषकः उत्कर्षतोवनस्पतिकालंसचप्रागेवोक्तइतिनोपदर्श्यतगतंभाषकद्वारमिदानींपरीत्तद्वारंप
रीत्तोद्विविधः कायपरीत्तः संसारपरीत्तश्चतत्रयः प्रत्येकशरीरीसकायपरीत्तोयस्तुसम्यक्त्वादिनाकृतपरिमितसंसारः ससंसारपरीत्तः

कायपरीत्तोजघन्यतोन्तंर्मुहूर्त्तंसचयदाकश्चिन्निगोदादुद्धृत्यप्रत्येकशरीरेषुसमुत्पद्यचतत्रचांतर्मुहूर्त्तंस्थित्वाभूयोपिनिगोदेषूत्पद्यतेतदालभ्य
तेउत्कर्षतोऽसंख्येयंकालंसचासंख्येयःकालःपृथ्वीकालोयावान्पृथिवीकायस्थितिकालस्तावान्वेदितव्यइत्यर्थः॥ तमेवकालतोनिरूपय
तिअसंख्येयाउत्सर्प्पिण्यवसर्प्पिण्यःसंसारपरीत्तोजघन्यतोऽन्तर्मुहूर्त्तंततऊर्द्धमंतकृत्केवलित्वयोगेनमुक्तिभावात्उत्कर्षतोनंतकालंतमे
वनिरूपयति॥अणंताउइत्यादिप्राग्वत्ततऊर्द्धमवश्यंमुक्तिगमनात्कायापरीत्तःसम्यक्त्वादिनाअकृतपरिमितसंसारःकायापरीत्तोजघ
न्येनांतर्मुहूर्त्तंसचयदाकश्चित्प्रत्येकशरीरिभ्यउद्धृत्यनिगोदेषुसमुत्पद्यतेतत्रचांतर्मुहूर्त्तंस्थित्वाभूयोपिप्रत्येकशरीरिषूत्पद्यतेतदावस्थानंच
उत्कर्षतोवनस्पतिकालोवाच्यःसचप्रागेवोपदर्शितःततऊर्द्धंनियमात्ततउद्धृतेःसंसारापरीत्तोद्विधाअनाद्यपर्यवसितोयोनकदाचनापि
संसारव्यवच्छेदंकरिष्यतियस्तुकरिष्यतिसोऽनादिसपर्यवसितःनोपरीत्तोनोअपरीतश्चसिद्धःसचसाद्यपर्यवसितएवपर्याप्तोजघन्येनां
तर्मुहूर्त्तंततऊर्द्धमपर्याप्तत्वप्रसक्तेःउत्कर्षतःसातिरेकंसागरोपमशतपृथक्त्वमेतावंतंकालंपर्याप्तलब्ध्यवस्थानसंभवात्अपर्याप्तोजघन्यत
उत्कर्षतश्चांतर्मुहूर्त्तंततऊर्द्धमवश्यपर्याप्तत्वेस्तेरलब्धिच्युतेःनोपर्याप्तोनोऽपर्याप्तश्चसिद्धःसचसाद्यपर्यवःसिद्धत्वस्याप्रच्युतेःसूक्ष्मद्वारे
सूक्ष्मस्तत्रेउत्कर्षतःपृथ्वीकालइतियावान्पृथिवीकायिककायस्थितिकालस्तावान्वक्तव्यःबादरसूत्रंस्कगमंअनयोश्चभावनाप्रागेवकृ
ता॥नोसूक्ष्मोनोबादरश्चसिद्धस्ततःसाद्यपर्यवसितसंज्ञिद्वारेसंज्ञिसूत्रेजघन्यतोऽन्तर्मुहूर्त्तमिति॥यदाकश्चित्जंतुरसंज्ञिभ्यउद्धृत्य
संज्ञिषुसमुत्पद्यते॥तत्रचांतर्मुहूर्त्तंजीवित्वाभूयोपिअसंज्ञिषूत्पतेतदालभ्यतेउत्कर्षंसगमंसअसंज्ञीजघन्यतोऽन्तर्मुहूर्त्तंसचैवंक
श्चित्संज्ञिभ्यउद्धृत्यासंज्ञिषूत्पद्यतेतत्रचांतर्मुहूर्त्तंस्थित्वाभूयोपिसंज्ञिषुमध्येसमागच्छतिउत्कर्षतोवनस्पतिकायस्याप्यसंग्रहणेनग्रहणा १५४
नोसंज्ञीनोअसंज्ञीचसिद्धःसचसाद्यपर्यवसितःभवसिद्धिएणमित्यादिभवेसिद्धिर्यस्यासौभवसिद्धिकोभव्यइत्यर्थः॥सचानादि
पर्यवसितोअन्यथाभव्यत्वायोगात्अभवसिद्धिकोऽभव्यः॥सचानाद्यपर्यवसितोअन्यथाभव्यत्वायोगात्नोभव्योनोअभव्यश्चसि

द्धस्ततःअस्तिकायाःपंचापिसर्वकालभाविनःअद्धासमयोपिप्रवाहापेक्षयाततकृत्तमेवंजावअद्धासमयेचरमोभविष्यति॥यस्यसोऽ
भेदाच्चरमस्तद्विपरीतोऽचरमःसचाभव्यस्तस्यचरमभवाभावात्सिद्धश्चतस्यापिचरमत्वाये॥तत्रचरमोऽनादिसपर्यवसितोऽन्यथाच
मत्वायोगात्अचरमोद्विधाऽनाद्यपर्यवसितःसाद्यपर्यवसितोऽभव्यःसाद्यपर्यवसिद्धः॥ ॥इतिश्रीमलयगिरिविरचितायांप्रज्ञाप
नाटीकायांमष्टादशंपदंसमर्थितं॥ ॥एतदेवंव्याख्यातमष्टादशंपदंसांप्रतमेकोनविंशतितममारभ्यते॥अस्यचायमभिसंबंधः॥इहा
नंतरपदेकायस्थितिरुक्ता॥अत्रतुकास्यांकायस्थितोकतिविधासम्यग्दृष्ट्यादिभेदेनजीवाभवंतीतिचिंत्यतेतत्रेदंसूत्रं॥५॥जीवाणंभंतेकिं
सम्मद्दिठीइत्यादिस्कगममापदपरिसमाप्तेःनवरं॥ससादनसम्यक्त्वयुक्तोपिसूत्रापिप्रायेणपृथिव्यादिषुनोत्पद्यतेउभयाभावोपुढवी
इएसऽइसासादनसम्यक्त्वयुक्तऊत्पद्यंतेततःपृथिव्यादयःसम्यग्दृष्टयःप्रतिषिद्धाद्वींद्रियादयोभिहिताःसम्यग्मिथ्यादृष्टिपरिणामःपुनःसं
ज्ञिपंचेंद्रियाणांभवतिनशेषाणांतथास्वाभाव्यात्अतउभयेपिसम्यग्मिथ्यादृष्टयःप्रतिषिद्धाः॥ ॥इतिश्रीमलयगिरिविरचिता
यांप्रज्ञापनाटीकायामेकोनविंशतितमंपदंसमाप्तं॥ ॥व्याख्यातमेकोनविंशतितमंपदमधुनाविंशतितममारभ्यते॥अस्यचा
यमभिसंबंधः॥इहानंतरपदेसम्यक्त्वपरिणामउक्तोअत्रतुपरिणामसाम्यात्गतिपरिणामविशेषोऽन्तक्रियाभिधीयतेतत्रेयमादाव
धिकारद्वारगाथानेरइयअंतकिरियाइत्यादिप्रथमतोनैरयिकोपलक्षितेषुचतुर्विंशतोस्थानेष्वंतक्रिया॥ततोनंतरागताः किमन्तक्रियांकुर्वंतिपरंपरा
गताःवेत्येवमंतरंचिंतनीयंततोनैरयिकादिभ्योनंतरमागताःकियंतएकसमयेअंतक्रियांकुर्वंतीतिचिंत्यंततऊद्वर्त्ताइतिउद्धृताःसंतःकस्यांयोना
वुत्पद्यंतेइतिवक्तव्यं॥तथायतउद्धृतास्तीर्थकराश्चक्रवर्तिनोबलदेवावासुदेवामांडलिकाश्चक्रवर्तिनांरत्नानिचसेनापतिप्रमुखाणिभवंति॥
ततस्तानिक्रमेणवक्तव्यानीतिद्वारगाथासंक्षेपार्थःविस्तरार्थंतुसूत्रकृदेववक्ष्यति॥तत्रप्रथमतोन्तक्रियामभिधित्सुराह॥जीवेणंभंतेइत्यादिजी
वोणमितिवाक्यालंकृतौभदंतअंतक्रियामितिअंतोऽवसानंतच्चप्रस्तावादिहकर्मणामवसातव्यं॥अन्यचागमेअन्तक्रियाशब्दस्यारूढ

त्वात्तस्यक्रियाकारणंमंतक्रियाकर्म्माकरणंमोक्षइतिभावार्थः कृत्स्नकर्मक्षयान्मोक्षइतिवचनात्तांकुर्याद्भगवाहेनो॥ गौतमअस्त्येककोयःकुर्यात्
अस्त्येककोयोनकुर्यादियमत्रभावनायस्तथाविधभव्यत्वपरिपाकवशतोमनुष्यत्वादिकामविकलांसामग्रीमवाप्यतत्सामर्थ्यसमुद्भूतातिप्रबलवी
र्योल्लासवशतःक्षपकश्रेणिसमारोहणेनकेवलज्ञानमासाद्याघातीन्यपिकर्म्माणि क्षपयेत्सकुर्यात्अन्यस्तुनकुर्यात्तद्विपर्ययादिति॥ एवंनैर
यिकादिचतुर्विंचतुर्विंशतिर्दंडकक्रमेणतावद्भावनीयायावद्वैमानिकाःसूत्रपाठस्त्वेवंनेरइयाणंभंते अंतकिरियंकरेज्जागोयमा॥अत्थेगइएकरेज्जा
इत्यादि॥ इदानींनैरयिकोनैरयिकेषुमध्येवर्त्तमानःकिमन्तक्रियांकरोतिकिंवानकरोतीतिपिपृच्छिषुरिदमाह॥ ७॥ नेरइएणंभंतेइत्यादिभगवा
नाह॥ गौतमनायम र्थःसमर्थोनायमर्थोनायमर्थोयुक्त्युपपन्नइत्यर्थः कथमितिचेदुच्यतेइहकृत्स्नकर्मक्षयःप्रकर्षप्राप्तात्सम्यग्दर्शनज्ञानचा
रित्रसमुदायाद्भवति॥नचनैरयिकावस्थायांचारित्रपरिणामस्तथाभवस्वाभाव्यादिति॥ एवमसुरकुमारादिषुवैमानिकपर्यवसानेषुप्रतिषेधो
सवक्तव्यः॥ मनुष्येषुतुमध्येसमागतःसन्कश्चिदंतक्रियांकुर्यादयसपरिपूर्णाचारित्रादिसामग्रीकश्चिन्नकुर्यादयस्तद्विकलइतिएवमसुरकु
मारादयोपिवैमानिकपर्यवसानाःप्रत्येकंनैरयिकादिचतुर्विंशतिदंडकक्रमेणवक्तव्यास्ततःएवमेतेचतुर्विंशतिदंडकाश्चतुर्विंशनयोभवंति
अथैतेनैरयिकादयःस्वस्वनैरयिकादिभवेभ्योऽनंतरंमनुष्यभवेसमागताःसंतःक्रियांकुर्वंतिकिंवातिर्यगादिभवव्यवधानेनपरंपरागताइतिनि
रूपयितुकामआहनेरइयस्यादि॥ प्रश्नसूत्रंसुगमं॥भगवानाहगौतमअनंतरागताअपि अंतक्रियांकुर्वंतिपरंपरागताअपितत्ररत्नश
र्कराबालुकापंकप्रभाभ्योऽनंतरागताअपिपरंपरागताअपिधूमप्रभापृथिव्यादिभ्यःपुनःपरंपरागताएवतथास्वाभाव्यादेनामवविशेषंप्रतिपि
पादयिषुःसूत्रसकमाह॥ एवंरयणप्पभापुढविनेरइयाविइत्यादिअसुरकुमारादयःस्तनितकुमारपर्यवसानाःपृथिव्यब्वनस्पतयश्चा
नंतरागताअपिअंतक्रियांकुर्वंतिपरंपरागताअपिउभयथाप्यागतानांतेषामंतक्रियाकरणाविरोधात्तथाकेवलचक्षुषोपलब्धे॥
तेजोवायुद्वित्रिचतुरिंद्रियाःपरंपरागताएवनत्वनंतरागतास्तत्रतेजोवायूनामानंतर्येणमनुष्यत्वस्यैवाप्राप्तेःद्वींद्रियादीनांतुतथाभव

स्वाभाव्यादितिशेषास्तुतिर्यग्पंचेंद्रियोवैमानिकपर्यवसानाअनंतरागताअपिपरंपरागताअपिसंप्रतिनैरयिकादिभवेभ्योऽनंतरमागताः
कियंतएकसमयेअन्तक्रियांकुर्वंतीत्येवंरूपंतृतीयंद्वारमभिधित्सुराह॥ ७॥ अणंतरागयाणंभंतेइत्यादि॥ नैरयिकभवादनंतरमव्यव
धानेनमनुष्यभवमागताअनंतरागताःनैरयिकाइतिप्राग्भवपर्यायेणव्यपदेशःसुरादिप्राग्भवपर्यायप्रतिपत्तिव्युदासार्थः॥ एवमुत्त
रत्रापितत्रतत्रापितत्तत्प्राग्भवपर्यायेणाव्यपर्यायेणव्यपदेशोप्रयोजनंचिंतनीयं॥ शेषंकण्ठ्यंसंप्रतितऽद्धृताःकस्यांयोनावुत्पद्यंते
इतिचतुर्थंद्वारमभिधित्सुराह॥ ७॥ नैरयियाणंभंतेइत्यादिसुगमंनवरंकेवलिपन्नत्तंधम्मंलभेज्जसवणयाएइतिकेवलिनासर्वज्ञेनप्र
ज्ञप्तोदिशितःकेवलिप्रज्ञप्तोधर्मःश्रुतधर्मश्चारित्रधर्मश्चतंलभेतश्रुवणतयाश्रूयतेइतिश्रवणंभावेअनट्प्रत्ययः॥ श्रवणस्यश्रुवणशब्दस्य
भावः॥प्रवृत्तिनिमित्तंश्रुतिरेवश्रवणताश्रवणमेवेत्यर्थः॥भावेत्वतलावित्यत्रहितस्येतिशब्दरूपस्यभावःप्रवृत्तिनिमित्तमित्यपिव्याख्यान
मस्तितयाश्रवणतयाभगवानाह॥अत्थेगइएइत्यादिपुनरपिप्रश्नयतियस्तुभदंतकेवलिप्रज्ञप्तंधर्म्मंलभेतश्रवणतयासेणंकेवलंबोहिंबुज्झे
ज्जाइति॥ इहबोधिर्धर्म्मावाप्तिरुच्यतेतस्यानिमित्तभूतोयःशब्दसंदर्भःसोपिकारणेकार्योपचाराद्बोधिःसचकेवलिनासाक्षात्परंपरया
वाउपदिष्टइतिकेवलिकःसकेवलिप्रज्ञप्तस्यधर्मस्यश्रोतारमितिपूर्ववत्केवलिकिंबोधिंयथोक्तरू पांबुध्येततदर्थजानीयाइत्यर्थः
॥भगवानाह॥अत्थेगईएइत्यादिपुनरपिप्रश्नयतियोभदंतकेवलिकींबोधिमर्थतोवगच्छतिसोऽर्थतस्तांश्रद्धाविषयांकुर्यात्तथाप्रत्यये
तप्रतीतिविषयांकुर्यात्रोचयेत्चिकीर्षामीत्येवमध्यवस्येत्भगवानाह॥अत्थेगइएइत्यादिपुनःप्रश्नयति॥यस्तुभदंतश्रद्धीतप्रती
यत्तरोचयेत [illegible] भगवानाह॥अत्थे[illegible] पुनः प्रश्नयति यस्तु भदंत श्रद्धीतप्रतीयतरोचये [illegible] स्तआभिनि
बोधिकश्रुतज्ञानेउत्पादयेत्भगवानाहहंतागौतमउत्पादयेत्केवलिप्रज्ञप्तधर्मश्रवणेश्रद्धानादावश्यंतयोर्भावात्भूयःप्रश्नय
तियोभदंताभिनिबोधिकश्रुतज्ञानेउत्पादयतिसेसंचायेज्जाशक्नुयात्शीलंब्रह्मचर्यव्रतंविचित्रंद्रव्यादिविषयंनियमरूपंगुणमुत्त

रंगुणंभावनादिरूपंविरमणंविरतिमतीतस्थूलप्राणातिपातादेः प्रत्याख्यानमनागतस्यस्थूलप्राणातिपातादेरेवपोषंधर्मपोषंदधातिकरोती
तिपोषधमष्टम्यादिपर्वतस्मिनुपवासः पोषधोपवासः॥तंप्रतिपत्तुंशक्नुयान्भगवानाह॥अत्थेगइएइत्यादि॥इहतिरश्चांमनुष्याणांचभ
वप्रत्ययतोऽवधिर्नोपजायतेकिंतुगुणतोगुणाश्चशीलव्रतादयोऽस्यापिविद्यंतेतत्तःकिमस्यावधिज्ञानमुत्पद्यतेकिंवानेतिप्रश्नयति॥जे
णंभंतेइत्यादियस्यशीलव्रतादिविषयप्रकृष्टपरिणामभावात्अवधिज्ञानावरणकर्मणःक्षयोपशमउपजायतेसउत्पादयेत्शेषस्तुने
त्यर्थः॥अवधिज्ञानानंतरंचमनःपर्यवज्ञानंमनःपर्यवज्ञानंचानगारस्यभवतितंसंजयस्ससव्वपमायरहियस्सविविहरिद्धिमतोइतिवच
नात्ततोऽनगारतामेवप्रश्नयतिजेणंभंतेइत्यादिमुंडोद्विधाद्रव्यतोभावतः केशाद्युपनयमेनभावतःसर्वसंगपरित्यागेनतत्रेहद्रव्यमुंडत्वा
संभवात्भावमुंडःपरिगृह्यतेमुंडोभूत्वाऽगारात्स्वाश्रयरूपात्विनिर्गत्यनविद्यतेनविद्यतेअगारंगृहंद्रव्यतोभावतश्चयस्याऽसावनगा
रस्तद्भावतोऽनारतातांप्रव्रजितुंशक्नुयान्भगवानाहगायमर्थःतिरश्चांभवतस्तथारूपपरिणामासंभावात्अनगारतायाअभावेमनःपर्यव
ज्ञानस्यचाभावः सिद्धएवयथाचतिर्यक्पंचेंद्रियविषयंसूत्रकदंबकमुक्तंतथामनुष्यविषयमपिवक्तव्यंनवरंमनुष्येषुसर्वभावसंभवात्म
नःपर्यवज्ञानकेवलज्ञानसूत्रेअधिकेप्रतिपादयतिजेणंभंतेसंचाएज्जामुंडेभवित्ताइत्यादिरूगमंनवरंसिज्झेज्जाइत्यादिसिध्येत्समस्ताणि
मैश्वर्यादिसिद्धिभाक्भवेत्बुध्येतलोकालोकस्वरूपमशेषमवगच्छेत्तमुच्येतभवोपग्राहिकर्मभिरपिकिमुक्तंभवतिसर्वदुःखानामंतंकुर्या
त्॥७१॥वानमंतरज्योतिष्कवैमानिकेषुप्रतिषेधोवक्तव्यः॥नैरयिकस्यभवस्वभावान्नैरयिकदेवभवयोग्यायुर्बंधासंभवात्॥तदेवंनैरयिका
नैरयिकादिचतुर्विंशतिदंडकक्रमेणचिंतिताःसांप्रतमसुरकुमारान्॥नैरयिकादिचतुर्विंशतिदंडकक्रमेणचिंतयति॥७२॥असुरकुमारा १४६.
णांभंतेइत्यादिप्राग्वत्॥नवरमेतेपृथिव्यब्वनस्पतिषूत्पद्यंते॥ईशानांतदेवानांतेषूत्पादाविरोधात्तेषुचोत्पन्नानकेवलिप्रज्ञप्तंधर्मंलभंते
श्रवणतयाश्रवणेंद्रियस्याभावात्शेषंसर्वंनैरयिकवत्॥एवंजावथणियकुमाराइति॥एवमसुरकुमारोक्तेनप्रकारेणतावद्वक्तव्यंयावत्स्तनित

कुमाराःपृथिवीकायिकानैरयिकेषुदेवेषुचप्रतिषिध्यंतेतेषांविशिष्टतोद्रव्यासंभवात्स्तीव्रसंक्लेशविशुद्ध्याचसाभावात्शेषेषुतुसर्वेष्वपिस्थानेषू
त्पद्यंतेतद्योग्याध्यवसायस्थानसंभवात्॥तत्राप्चतिर्यक्पंचेंद्रियेषुमनुष्येषुचनैरयिकवद्वक्तव्यमेवमथायकावनस्पतिकायिकाश्चवक्त
व्यास्तेजस्कायिकाश्चमनुष्येष्वपिप्रतिषेधनीयाः॥तेषामानंतर्येणमनुष्येषूत्पादासंभवात्असंभवश्चक्लिष्टपरिणामतयामनुष्यानुपूर्वीमनुष्या
युर्बंधासंभवात्॥तिर्यक्पंचेंद्रियेषूत्पन्नाकेवलिप्रज्ञप्तंधर्मंश्रवणतयालोरन्श्रवणेंद्रियस्याभावात्पुनस्तांकेवलिकांबोधिंनावबुध्येरन्॥संक्लि
ष्टपरिणामत्वात्द्वित्रिचतुरिंद्रियाःपृथिवीकायिकवत्॥देवनैरयिकवर्जेषुसर्वेष्वपिस्थानेनवरंपृथिवीकायिकामनुष्येष्वागताअन्तक्रियांने
कुर्वंतितथास्वभावत्वात्मनःपर्यवज्ञानंपुनरुत्पादयेयुस्तिर्यक्पंचेंद्रियामनुष्याश्चसर्वेष्वपिस्थानेषूत्पद्यंतेनद्वक्तव्यताचपाठसिद्धावानमंतरज्योति
ष्कवैमानिकाअसुरकुमारवद्भावनीयागतंचतुर्थद्वारमिदानींपंचमंतीर्थकरत्ववक्तव्यतालक्षणंद्वारमभिधित्सुराह॥७३॥रयणप्पभापुढविनेरइ
याणांभंतेइत्यादिसूगमंनवरंबद्धानिसूत्रेणकलापइवसूत्रेणप्रथमतोबद्धमात्राणितदनंतरमग्निसंपर्कानंतरंसत्सद्घनकुट्टितस्वर्णकलाप
वत्स्पृष्टानिनिधत्तानिउद्वर्तनापवर्तनावर्जशेषकरणायोग्यत्वेनव्यवस्थापितानीतिभावार्थःनिकाचितानिसकलकरणायोग्यत्वेनस्थापितानी
त्यर्थः प्रस्थापितानिमनुष्यगतिपंचेंद्रियजातित्रसबादरपर्याप्तसुभगादेयसःकीर्तिनामसहोदयत्वेनव्यवस्थापितानीतिभावः॥निविष्टानितीव्रानु
भावजनकतयास्थितानिअभिनिविष्टानिविशिष्टविशिष्टतराध्यवसायभावतोतितीव्रतमानुभावजनकतयाव्यवस्थितानिअभिसमन्वागतानिउद
याभिमुखीभूतानिउदीर्णानिविपाकोदयमागतानिनोपशान्तानिनसर्वथाअभावमापन्नानितिकाचितान्यत्रत्वच्छिद्रेकरहितानियानभवंतिशेषंसम
मपिकंव्यं॥एवंशर्कराप्रभावालुकाप्रभाविषयेऽपिवक्तव्यंपंकप्रभापृथिवीनैरयिकस्ततोऽनंतरमुद्धृतःसंस्तीर्थकरत्वंनलभंतेअन्तक्रियां
पुनःकुर्यात्॥धूमप्रभापृथिवीनैरयिकोऽन्तक्रियामपिनकरोतितिविरतींपुनर्लभंतेतमःप्रभापृथिवीनैरयिकोविरतिमपिनलभंतेविरत्य
विरतिंदेशविरतिंपुनर्लभंते॥अधःसप्तमपृथिवीनैरयिकःपुनस्तामपिदेशविरतिंनलभंतेयदिपरंसम्यक्त्वमात्रंलभंतेअसुरयोया

वद्वनस्पतिकाया अनंतरमुद्धृत्यास्तीर्थकरत्वंनलभंते ऽभ्रक्रियांपुनःकुर्युः वसुदेवचरितेपुनर्नागकुमारेभ्योप्युद्धृत्तो ऽनंतरमैरावतेक्षेत्रेअस्यामेवावस
र्प्पिण्यांचतुर्विंशतितमस्तीर्थकरउपदर्शितस्तदत्रतत्त्वंकेवलिनोविदंति॥तेजोवायवो ऽनंतरमुद्धृत्याअनंतक्रियामपिनकुर्वंति॥मनुष्येषुतेषामानंतर्येणोत्पा
दाभावादपिचतेतिर्यक्षूत्पन्नाः केवलिप्रज्ञप्तंधर्मंश्रवणतयालभेरन्ननतुबोधनइत्युक्तंप्राक्वनस्पतिकायिकाद्यनंतरमुद्धृत्यास्तीर्थकरत्वंनलभंते
अभ्रक्रियांपुनःकुर्युः द्वित्रिचतुरिंद्रियाअनंतरमुद्धृत्यास्तामपिनकुर्वंतिमनःपर्यवज्ञानंपुनरुत्पादयेयुःतिर्यक्पंचेंद्रियमनुष्यव्यंतरज्योतिष्काअ
नंतरमुद्धृत्यास्तीर्थकरत्वंनलभंतेअंतक्रियांपुनःकुर्युःसौधर्मादयःसर्वार्थसिद्धपर्यवमानानैरयिकवद्वक्तव्याःगततीर्थकरद्वारंसंप्रतिचक्रवर्ति
त्वादीनिद्वाराण्युच्यंते॥तत्रचक्रवर्तित्वंरत्नप्रभानैरयिकभवनपतिव्यंतरज्योतिष्कवैमानिकेभ्योनशेषेभ्योबलदेववासुदेवत्वेशर्करातोपिनवरं
वासुदेवत्वंवैमानिकेभ्यो ऽनुत्तरोपपातवर्जेभ्यःमंडलिकत्वमधःसप्तमतेजोवायुवर्जेभ्यःशेषेभ्यःसर्वेभ्योपिस्थानेभ्यःसेनापतिरत्नत्वंवर्द्धकिर
त्नत्वंवर्द्धकिरत्नत्वंपुरोहितरत्नत्वंमधःसप्तमपृथिवीतेजोवाय्वनुत्तरोपपन्नदेववर्जेभ्यःशेषेभ्यःस्थानेभ्यःअश्वरत्नत्वहस्तिरत्नत्वेरत्नप्रभातआ
रभ्यनिरंतरंयावदासहस्रारात्चक्ररत्नत्वंछत्ररत्नत्वंचर्मरत्नत्वंदंडरत्नत्वंमणिरत्नत्वंकागिणिरत्नत्वंचासुरकुमारादारभ्यनिरंतरंयावदीशा
नात्सर्वत्रचविधिवाक्येअत्थेगइएलभेज्जाअत्थेगइएनोलभेज्जाइतिवक्तव्यंप्रतिषेधेनोइणट्ठेसमट्ठेइतितदेवमुक्तानिद्वाराणिसंप्रत्युपपातगतंकिं
चिद्वक्तव्यमस्तीतितदभिधित्सुराह॥ ७॥ अहभंतेइत्यादिअथेतिपरप्रश्नेअसंजयभवियदव्वदेवाणमिति॥असंयताश्चरणपरिणामशून्याःभ
व्यादेवत्वयोग्याअतएवद्रव्यदेवाःसमासश्चैवंअसंयताश्चतेभव्यद्रव्यदेवाश्चासंयतद्रव्यभव्यदेवाःतत्रकेप्राहुःरेतेकिलासंयतसम्यग्दृष्टयोदेवेषू
त्पादात्॥उक्तंचकिलैवमागमेअणुव्वयमहव्वएहिंबालतवाकामनिज्जराएयदेवाउयंनिबंधइ सम्मद्दिट्ठियजोजीवो॥ ८॥ तदयुक्तंततोअमीषामु
त्कृष्टतउपरितनग्रैवेयकेषूपपातोवक्ष्यतेसम्यग्दृष्टीनांतुदेशविरतानामपिनतत्रोपपातोस्तिदेशविरतश्रावकाणामप्युत्कृष्टादूर्द्ध्वंगमनाननाप्येतेनि
ह्नवास्तेषामिहैवभेदेनाभिधानात्तस्मान्मिथ्यादृष्टयएवाभव्याभव्यावाश्रमणगुणधारिणोनिखिलसामाचार्यनुष्ठानयुक्ताद्रव्यलिंगधारिणो

956

ऽसंयतद्रव्यदेवाःप्रतिपत्तव्याः॥तेपीहाखिलकेवलक्रियाप्रभावतउपरितनग्रैवेयकेषूत्पद्यंतएवेतिअसंयताश्चतेसत्यप्यनुष्ठानेचारित्रपरिणा
मशून्यत्वात्अविराहियसंयमाणमितिप्रव्रज्याकालादारभ्याभग्नचारित्रपरिणामानांसंज्वलनकषायसामर्थ्यात्प्रमत्तगुणस्थानकवशात्वास्व
ल्पमायादिदोषसंभवेपानाचारितसर्वथाचरणोपघातानामित्यर्थः॥तथाविराहियसंयमाणंतिविरोधिनःसर्वात्मनाखंडिनोनपुनप्रायश्चि
त्तप्रतिपत्याभूयःसंधिनःसंयमोयैस्तिविराधितसंयमास्तेषांअविराहियसंजमासंजमाणंतिप्रतिपत्तिकालादारभ्याखंडितदेशविरतिपरि
णामानांश्रावकाणांविराहियसंजमासंजमाणमितिविराधिनःसर्वात्मनाखंडिनोनपुनःप्रायश्चित्तप्रतिपत्यापुनर्नवीकृतःसंयमासंयमो
यैस्तेविराधितसंयमासंयमास्तेषांअसंज्ञिनांमनोलब्धिरहितामामकामनिर्जरावतांतथातावसाणंतिपरित्रादितपत्राद्युपभोगवतांबाल
तपस्विनांतथाकंदप्पियाणंतिकंदर्प्पःपरिहासःसएषामस्तितेनवायेवरंतिकंदर्प्पिकाःकंदर्प्पिकावाव्यवहारणवंतएवकंदप्पकौकुच्यादि
कारकाःउक्तंच॥कंदप्पेकुकुइएदवसीलेयाविहासणकरेयविम्हावितोयपरंकंदप्पंभावणंकुणइ॥कहकहकहस्सहसणंकंदप्पोअणिहु
हुयायउल्लावाकंदप्पकहाकहणंकंदप्पुवएससंसायभुमनयणवयणदंसणछदेहिंकरपायकण्णमाईहिं॥ततंकरेइजहजहहसइपरोअ
त्तणाअहसंवायाकुकुइउंपुणतंजंपइजेणहस्सएलोऊण्णाविहज्जीवस्तेकुवइमुहतरएचेवभासइदुयंगच्छएयदरिऊगोविसोसरएस
घदवदव्वकारी॥कुदइयदिऊयदप्पेणंवेसवयणेहिहासंजणयंतो॥ अप्पणोपरेसिंच॥अहहासणोत्तिभण्णइघयणोव्वछलेनियछंतोस
रजात्माइएहिंतुविम्हयंकुणइतव्विहजणस्स॥तेसुयविम्हइयसयंआहट्टकाहेडएसुंचजोसंजउविएयासुअप्पसथासुभावणंकुणइसोतव्वि
हेसुगच्छइसुरेसुभइउचरणहीणातेषांकांदर्प्पिकाणांचरगपरिव्वायागाणंतिचरकपरिव्राजकाःधाटिभैक्षोपजीविनःत्रिदंडिनंअथवाच
रकारकछुटकादयःपरिव्राजकाःकपिलमुनिस्तनवःचरकाश्चपरिव्राजकाश्चतेषांतथाकिब्बिसियाणंतिकिल्बिषिकाःतेव्यव
हारश्चरणवंतएवज्ञानाद्यवर्णवादिनःउक्तंच॥ नाणस्सकेवलीणंधम्मायरियाणसव्वसाहूणं॥माईअवण्णवाईकिब्बिसियंभावणंकुण

इकायाइनेद्वियनेच्चेवपमायअप्पमायाय॥मोरकाहिगारियाणंजोइसमज्जोणीहिंकिंवध्यंएमंनरगुप्पाएअप्पोप्पाचरणयादुवेण्हंपिके
वलंदंसनाणएणमेगकालेन्चएगत्तं॥जद्याईहिंअवण्णंविहसइवट्टइनयाविऊवबाए॥अहिउछिहइत्येहीपगासवाईअणणुक्तलोअ
विसहणांहरियगयंअणाणुवत्तीएअविगुरूणंपिखणमित्तपीइरोसागिहिवछलगायसंचइया॥गूहइआयसहावंघायइगुणेपरस्ससंते
वि॥चोरोव्वसव्वसंकीगूढायारोवितहभासीतेषांनेरछियाणंतितिरश्चांगवादीनांदेशविरतिभाजांआजीवियाणंति॥आजीविकाःपाखं
डविशेषाष्णवालमनानुसारिणःअथवाआजीवंतियेअविवेकतोलब्धिपूजाख्यात्यादिभिश्चरणादीन्याजीविकाः॥तेषांआभिऊगियाणंति
अभियोजनंविद्यामंत्रादिभिःपरेषांवशीकरणादिअभियोगःसचद्विधायदाहदुविहोखलुअभिऊगोदव्वेभावेयहोइनायव्वोदव्वंमिहोतिजो
गाविद्यामंतायभावंमिमोत्तियेषांतेनवावर्तंतियेनेअभियोगिकाआभियोगिकावातेन्चव्यवहारतोरश्चरणवंतएवमंत्रादिप्रायोक्तारःउक्तं
च॥कोऊयभूईकम्मेपसिणापसिणेनिमित्तमाजीवी॥इड्डिरससायगुरूइअभिउगंभावणंकुणइकौतुकंसाभाग्याद्यर्थंस्नानकंभूतिकर्म
ज्वरितादिभूतिवानंप्रश्नाप्रश्नंस्वप्नविद्यादिसलिंगीणमितिरजोहरणादिसाधुलिंगवतांकिंचिधानामित्याह॥दंसणवावन्नगाणंतिदर्शनं
सम्यक्त्वंव्यापन्नंभ्रष्टंयेषांतेतथातेषांनिन्हवानामित्यर्थः॥देवलोगेसुऊववद्यमाणाणंतिअनेनदेवत्वादन्यत्रापियथाध्यवसायमुत्पादोभवती
तिप्रतिपादितंविराहियसंजमाणंजहण्णेणंभवणवासीसु॥ऊक्कोसेणंसोहम्मेइतिअत्रकश्चिदाहविराधितसंयमानामुत्कर्षेणसौधर्मे
कल्पेइतियदुक्तंतत्कथंघटतेद्रौपद्याःसुकुमालिकाभवेविराधितसंयमायाअपिइशानकल्पेउत्पादश्रवणान्नैषदोषस्तस्याहिसं
यमविराधनाउत्तरगुणविषयावकुशत्वमात्रकारिणीनमूलगुणविराधनासौधर्मोत्पादश्चप्रभूततरसंयमविराधनायांभवतियदि
पुनर्विराधनामात्रमपिसौधर्मोत्पत्तिकारणंस्यात्तदावकुशादिनामुत्तरगुणादिप्रतिसेवावतांकथमच्युतादिषूत्पत्तिसपपद्येतकथंचि १४८
द्विराधकत्वात्तेषामितिअसंज्ञीदेवेषूत्पद्यतेइत्युक्तंसचायुषाइतितदायुर्निरूपयति॥७॥कइविहेणमित्यादिव्यक्तंनवरमसण्णिआ

ऊएत्तिअसंज्ञीसन्नृयत्परभवयोग्यमायुर्बध्नातितदसंज्ञायुःनेरइयअसन्नियाऊइतिनैरयिकप्रायोग्यमसंज्ञायुर्नैरयिकासंज्ञायुरेवमन्यान्य
पिइहासंज्ञायुरसंज्ञवस्थानुभूयमानुमप्युच्यते॥नचेदमत्रप्रकृतवलक्षणसंबंधविशेषनिरूपणार्थमाह॥असण्णीइत्यादि॥व्यक्तंनवरंपकरेइइ
तिबध्नाति॥दसवाससहस्साइंतिरत्नप्रथमप्रस्तटमधिकृत्यऊक्कोसेणंपलिऊवमस्सअसंखेज्जइभागंइतिएतत्रत्नप्रभाचतुर्थप्रतरमध्य
मस्थितिकंनारकमाश्रित्यप्रथमप्रस्तटेहिजघन्यास्थितिर्दशवर्षसहस्राणिउत्कृष्टानवतिःसहस्राणिद्वितीयेदशलक्षाणिजघन्याऊत्कृष्टा
नवतिर्लक्षाणिएषैवतृतीयेजघन्याऊत्कृष्टापूर्वकोटीएषैवचतुर्थेजघन्याऊत्कृष्टासागरोपमस्यदशभागःततोऽत्रपल्योपमासंख्येयभागो
मध्यमास्थितिर्भवतितिर्यक्सूत्रेपमासंख्येयभागोमिथुनकतिरश्चोधिकृत्यएवंमणुयाऊयंपिइति॥जघन्यांतर्मुहूर्त्तमुत्कर्षतःपल्योपमा
संख्येयभागमित्यर्थः॥अत्रापिपल्योपमासंख्येयभागोमिथुनकनरानाश्रित्यप्रतिपत्तव्याः॥देवाऊयंजहनेरइयाऊमितिदेवासंज्ञायुस्तथा
वक्तव्यंयथानैरयिकासंज्ञायुर्जघन्यतोदशवर्षसहस्राणिउत्कर्षतःपल्योपमासंख्येयभागप्रमाणंवक्तव्यमितिभावः ७, एयस्सणंभंतेइत्यादि
नायदसंज्ञायुषोऽल्पबहुत्वंतदस्यह्रस्वदीर्घत्वेप्रतीत्य॥७॥इतिश्रीमलयगिरिविरचितायांप्रज्ञापनाटीकायांविंशतितमंपदंसमाप्तं॥ ५,॥ ७॥
व्याख्यातंविंशतितमपदंमिदानींमेकविंशतितममारभ्यते॥अस्यचायमभिसंबंधःइहानंतरपदेगतिपरिणामविशेषोऽतत्क्रियारूपःपरिणाम
उक्तःइहापिगतिपरिणामविशेषएवशरीरस्यसंस्थानादिनरकादिगतिषूत्पन्नानांप्रतिपाद्यतेइतितत्रचेयमधिकारगाथाविहिसंठाणपमाणेइत्या
दिप्रथमंविधयोभेदाःशरीराणांवक्तव्यास्तदनंतरंस्थानानिततःप्रमाणानितदनंतरंकतिभ्योदिग्भ्यःशरीराणांपुद्गलोपचयोभवतीत्येवंपुद्ग
लचयनंवक्तव्यंततःकस्मिन्शरीरेसतिकिंशरीरेमवश्यंभावीत्येवंरूपःपरस्परंसंयोगोवाच्यः॥ततोद्रव्याणिचप्रदेशाश्चद्रव्यप्रदेशास्ते
चद्रव्याणिचप्रदेशाश्चद्रव्यप्रदेशाश्चसमानामेकःशेषकइत्येकशेषस्तेरल्पबहुत्वंवक्तव्यंकिमुक्तंभवतिद्रव्यार्थतयाप्रदेशार्थतया
द्रव्यार्थप्रदेशार्थतयाचपंचानामपिशरीराणामल्पबहुत्वमभिधातव्यमितिततःपंचानामपिशरीराणामवगाहनाविषयमल्पबहुत्वं

च्यंइतिगाथासंक्षेपार्थः॥ तत्रयथोद्देशंनिर्देशइतिप्रथमतोविधिद्वारमभिधित्सुराह॥ दौशरीरमूलभेदान्प्रतिपादयति॥ ७॥ कइणंभंतेइत्या
दिकतिकिंपरिमाणानिनमितिवाक्यालंकारेभदंतेशीर्यंतेप्रतिक्षणंविसरा रूभावंबिभ्रतीतिशरीराणिशरीराण्येवशरीराकाणिस्वार्थेकप्रत्य
यःभगवानाहगौतमपंचशरीराणिप्रज्ञप्तानिमयाअन्यैश्चशेषतीर्थकृद्भिस्तान्येवनामतआहऊरालिऊदारंप्रधानंप्राधान्यंचास्यतीर्थकर
गणधरशरीराण्यधिकृत्यततोन्यस्यानुत्तरशरीरस्याप्यनंतगुणहीनत्वात्यद्वाऊदारंसातिरेकयोजनसहस्रमानत्वात्॥ शेषशरीरापेक्षया
वृहत्प्रमाणंवृहत्ताचास्यवैक्रियंप्रतिभवधारणीयसहजशरीरापेक्षयाद्रष्टव्याअन्यथाउत्तरवैक्रियंजोजनलक्षमानमपिलभ्यतेउदारमेवऔ
दारिकंविनयादिपाठादिकण्तथाविधाविशिष्टावाक्रियातस्यांभवंवैक्रियंतथाहितदेकंभूत्वाअनेकंभवतिअनेकंभूत्वाएकंतथाअणुभूत्वा
महद्भवतिमहद्वाभूत्वाऽणुतथाखचरंभूत्वाभूमिचरंभवतिभूमिचरंभूत्वाखचरंतथादृश्यंभूत्वाअदृश्यंभवति॥ अदृश्यंभूत्वादृश्यमित्यादित
च्चद्विविधमौपपातिकंलब्धिप्रत्ययंचतत्रौपपातिकमुपपातजन्मनिमित्तंतच्चदेवनारकाणांलब्धिप्रत्ययंतिर्यग्मनुष्याणांतथाआहारए
इतिआहारकंचतुर्दशपूर्वविदातीर्थकरस्फातिदर्शनादिकतथाविधप्रयोजनोत्पत्तौसत्यांविशिष्टलब्धिवशादाह्रियतेनिर्वर्त्यतेइत्याहा
रकंकृतबहुलमितिवचनात्कर्मणिणुत्र्यथापादहारकइत्यत्रउक्तंच॥ कथंमिसमुत्पन्नेसपकेयलिणाविसिठलद्धीएजंएत्थआह
रिज्यइभणितंआहारगंतंतुकार्यवेदंपाणिदयरूद्धिदंसणमुहुमपयत्थावगहणहेउंवा॥ संसयवोछेयत्थंगमणजिणपायमूलंमितत्र
वैक्रियशरीरापेक्षयाअत्यंतशुभंस्वच्छस्फटिकशीतिवशुभ्रपुद्गलस्वेसहघटनात्मकंतेअ्णइतितैजसंतेजसस्तेजःपुद्गलानांविकारस्ते
जसंविकारइत्यण्तत्तऊष्मलिंगंभुक्ताहारपरिणमनकारणंतद्वशाच्चविशिष्टतपसमुत्थलब्धिविशेषस्यपुंसस्तेजोलेश्याविनिर्गमः॥
उक्तंच॥ सव्वसउम्हसिद्धंरसाइआहारपाकजणगंच॥ तेयगलद्धिनिमित्तंचतेयगंहोइनायव्वं॥ कम्मएइतिकर्मणोजातंकर्मजंकिमु १४९
क्तंभवतिकर्मपरिमाणच्चएयात्मप्रदेशैःसहयेक्षीरनीरवत्अन्योन्यानुगताःसंतःशरीररूपतयापरिणतास्तेकर्मजंशरीरमिति॥ अत्रएवे १५९

तदन्यत्रकर्मणमित्युक्तंकर्मणोविकारःकार्मणमितितथाचोक्तंकम्मविगारोकम्मणमठविहविचित्तकम्मनिष्पन्नं॥ सव्वेसिंशरीराणंकारणभू
तंमुणेयव्वं अत्रसव्वेसिमिति॥ सर्वेषामौदारिकादीनांशरीराणांकारणभूतंबीजभूतंकार्मणंशरीरंनखल्वआमूलछिन्नेभवप्रपंचप्ररोहबीजभू
तेकार्मणवपुषिशेषशरीरप्रादुर्भावः इदंचकर्मजंशरीरंजंतोर्गत्यंतरसंक्रांतौसाधकतमंकरणंतथाहिकर्मजेनैववपुषातैजससहितेनप
रिकरितोजंतुर्मरणदेशमपहायोत्पत्तिदेशमभिसर्प्पतिननुयदितैजससहितकार्मणवपुःपरिकरितोगत्यंतरंसंक्रामतितर्हिसगच्छन्नाकस्मा
न्नदृष्टःपथमवतरनिऊच्यतेनकर्मपुद्गलानांचातिसूक्ष्मतयाचक्षुरादींद्रियागोचरत्वात्॥ तथाचपरतीर्थिकैरप्युक्तंअंतराभवदेहोपिसू
क्ष्मत्वान्नोपलभ्यतेनिःक्रामन्प्रविशत्वानाभावोनीक्षणादपीतिसंप्रत्यौदारिकशरीरस्यजीवजातिभिदतोऽवरूभेदतश्चभेदानभिधित्सु
राह॥ उरालियसरीरेणंभंतेइत्यादिऔदारिकशरीरमेकद्वित्रिचतुःपंचेंद्रियभेदात्पंचधाएकेंद्रियौदारिकशरीराणिपृथिव्यप्तेजोवायुवन
स्पतेकेंद्रियभेदात्पंचविधंपृथिवीकायिकैकेंद्रियौदारिकशरीरमपिसूक्ष्मेतरभेदात्द्विधापर्याप्तापर्याप्तभेदात्एवमप्तेजोवायुवनस्प
त्यकेंद्रियौदारिकशरीराण्यपिप्रत्येकंचतुर्विधानीतिसर्वसंख्ययैकेंद्रियौदारिकशरीराणिविंशतिधाद्वित्रिचतुरिंद्रियौदारिकशरीराणिप्र
त्येकंपर्याप्तापर्याप्तभेदात्॥ द्विभेदानिपंचेंद्रियौदारिकशरीरंद्विविधंतिर्यग्मनुष्यभेदात्॥ तिर्यग्पंचेंद्रियौदारिकशरीरंत्रिधाजलचरस्थ
लचरखचरभेदात्॥ जलचरतिर्यग्पंचेंद्रियौदारिकशरीरंद्विविधंसंमूर्छिमगर्भव्युत्क्रांतिकभेदात्एकैकमपिपुनर्द्विभेदंपर्याप्तापर्या
प्तभेदात्स्थलचरतिर्यग्पंचेंद्रियौदारिकशरीरमपिद्विधाचतुष्पदपरिसर्प्पभेदात्चतुष्पदस्थलचरतिर्यग्पंचेंद्रियौदारिकशरीरमपि
द्विधाचतुष्पदपरिसर्प्पभेदात्चतुष्पदस्थलचरतिर्यग्पंचेंद्रियौदारिकशरीरमपिद्विधा॥ संमूर्छिमगर्भव्युत्क्रांतिकभेदात्पुनरेकैकं
द्विधापर्याप्तापर्याप्तभेदात्परिसर्प्पस्थलचरतिर्यग्पंचेंद्रियौदारिकशरीरमपिउरःपरिसर्पभुजपरिसर्प्पभेदतोद्विभेदंपुनरेकैकंद्विधा
संमूर्छिमगर्भव्युत्क्रांतिकभेदात्तत्रापिपुनःप्रत्येकंद्वैविध्यंपर्याप्तभेदादितिसर्वसंख्याऽष्टभेदंपरिसर्प्पस्थलचरतिर्यग्पंचेंद्रियौ

दारिकशरीरखचरतिर्यग्पंचेंद्रियौदारिकशरीरंसंमूर्छिमव्युत्क्रांतिकभेदाद्विभेदंपुनरेकैकंद्विधापर्याप्ताऽपर्याप्तभेदादितिसर्वसंख्ययाति
र्यग्पंचेंद्रियौदारिकशरीरंविंशतिभेदं॥ मनुष्यपंचेंद्रियौदारिकशरीरंसंमूर्छिमगर्भव्युत्क्रांतिकभेदात्द्विभेदंपुनरेकैकंद्विधापर्याप्तापर्या
प्तभेदादेवमौदारिकस्यभेदाउक्ताः संप्रत्येतेषामेवयथाक्रमंसंस्थानान्याह॥ ऊरालियसरीरेणंभंतेइत्यादिनानासंस्थानसंस्थितंजीवजा
तिभेदतःसंस्थानभेदभावात्एकेंद्रियौदारिकशरीरंनानासंस्थानसंस्थितंतानापृथिव्यादिषुप्रत्येकंसंस्थानभेदात्तत्रपृथिवीकायिकानां
सूक्ष्माणांबादराणांपर्याप्तानामपर्याप्तानांचौदारिकशरीराणिमसूरचंद्रसंस्थानसंस्थितानि॥मसूरोधान्यविशेषस्तस्यचंद्रश्चंद्राकारम
र्धदलंतस्येवयत्संस्थानंतेनसंस्थानिअप्कायिकानांसूक्ष्मादिभेदतश्चतुर्भेदानामौदारिकशरीराणिस्तिबुकबिंदुसंस्थानसंस्थितानिस्तिबु
काकारोयाबिंदुर्नपुनरितस्ततोवातादिनाविक्षिप्तःस्तिबुकबिंदुस्तस्येवयत्संस्थानंतेनसंस्थितानितेजसकायिकानांसूक्ष्मादिभेदतश्च
तुर्भेदानामौदारिकशरीराणिसूचीकलापसंस्थानसंस्थितानिवायुवायिकानांसूक्ष्मादिभेदतश्चतुर्भेदानामौदारिकशरीराणिपताकासंस्थान
संस्थितानिवनस्पतिकायिकानांसूक्ष्माणांबादराणांपर्याप्तानामपर्याप्तानांचप्रत्येकमौदारिकशरीराणिनानासंस्थानसंस्थितानिदेश
कालजातिभेदतस्तेषांसंस्थानानामनेकभेदभिन्नत्वात् द्वित्रिचतुरिंद्रियाणांप्रत्येकंपर्याप्तानामपर्याप्तानामौदारिकशरीराणिहुंडसंस्था
नसंस्थितानितिर्यग्पंचेंद्रियौदारिकशरीरंसामान्यतःषड्विधसंस्थानसंस्थितंतदेवोपदर्शयतिसमचउरंससंठाणसंठिएइत्यादियावत्कर
णान्नग्गोहपरिमंडलसंठाणसंठिएसाइसंठिएखुज्जसंठाणसंठिएवामणसंठाणसंठिएइतिपाठग्रहः तत्रसमाः सामुद्रिकशास्त्रोक्तप्रमाणल
क्षणाविसंवादिन्यश्चतस्रोऽस्रयश्चतुर्दिग्विभागोपलक्षिताःशरीरावयवस्यतत्समचतुरस्रंचतत्संस्थानंचसमचतुरस्रसंस्थानंतेनसंस्थि १५० १६०
तंसमचतुरस्रसंस्थानसंस्थितंतथान्यग्रोधवत्परिमंडलंयथान्यग्रोधपरिमंडलंयथान्यग्रोधऊपरिसंपूर्णप्रमाणोऽधस्तुहीन
स्तथायत्संस्थानंनाभेरुपरिसंपूर्णःप्रमाणमधस्तुनतथातत्न्यग्रोधपरिमंडलं॥ तथाआदिरिहोत्सेधाख्यानाभेरधस्तनोदेहभागोगृह्य

तेनतःसहआदिनानाभेरधस्तनभागेनयथोक्तप्रमाणलक्षणेनवर्त्ततेइतिसादियद्यपिचसर्वंशरीरमादिनासहवर्त्ततेतथापिसादित्वविशेषणान्य
थान्युपपत्याद्विविशिष्टएवप्रमाणलक्षणोपपन्नआदिरिहलभ्यतेततउक्तंयथोक्तप्रमाणलक्षणेनेतिइदमुक्तंभवतियत्संस्थानंनाभेरधःप्रमा
णोपपन्नमुपरिविहीनंतत्साहीतिअपरेतुसाचीतिपठंतितत्रशाचीतिप्रवचनवेदिनशाल्मलीतरुमाचक्ष्यतेततःसाचीवयत्संस्थानंतत्साची
संस्थानंयथाशाल्मलीतरोःस्कंधकांडमतिपुष्टमुपरिचनतदनुरूपामहाविशालतातद्वदस्यापिसंस्थानस्याधोभागःपरिपूर्णोभवत्युपरितनभाग
स्तुनेतितथायत्रशिरोग्रीवंहस्तपादादिकंचयथोक्तप्रमाणलक्षणोपेतंउरउदरादिचमंडलंतत्कुब्जंसंस्थानंयत्रपुनरउरउदरादिप्रमाणलक्ष
णोपेतंहस्तपादादिकंहीनंतद्वामनसंस्थानंयत्रतुसर्वेप्यवयवाःप्रमाणलक्षणपरिभ्रष्टास्तद्हुंडसंस्थानंसमासःसर्वत्रापिपूर्ववत्॥एवंपद्यत्ताप
द्यत्ताणविइतिएवमुक्तेनप्रकारेणसामान्यतस्तिर्यग्पंचेंद्रियाणामिवपर्याप्तानांचप्रत्येकंसूत्रंवक्तव्यंतदेवमेतानिसूत्राणिएवमेवचसामान्यतःसंमू
र्छिमतिर्यग्पंचेंद्रियाणामपित्रीणिसूत्राणिवक्तव्यानिनवरंतेषुत्रिष्वपिसूत्रेषुहुंडसंस्थानसंस्थितमितिवक्तव्यं॥संमूर्छिमाणामविशेषेणसर्वेषामपि
हुंडसंस्थानभावात्त्रीणिसामान्यतोगर्भजतिर्यग्पंचेंद्रियाणामपिनवरंतेषुत्रिष्वपिसूत्रेषुछव्विहसंठाणसंठिएपण्णत्तेइत्यादिवक्तव्यंगर्भजेषुसमच
तुरस्रादिसंस्थानानामपिसंभवात्तदेवमेतेसामान्यतस्तिर्यग्पंचेंद्रियविषयानवआलापकाअनेनैवक्रमेणजलचरतिर्यग्पंचेंद्रियाणांसामान्यतःस्थ
लचराणांचतुष्पदस्थलचराणांउरःपरिसर्पिस्थलचराणांभुजपरिसर्पस्थलचराणांखचरतिर्यग्पंचेंद्रियाणांचप्रत्येकंनवनवसूत्राणिवक्तव्या
नि॥सर्वसंख्ययातिर्यग्पंचेंद्रियाणांत्रियाणांत्रिषष्टिसूत्राणि ६३ मनुष्याणांनवसर्वत्रसंमूर्छिमेषुहुंडसंस्थानंचवक्तव्यमितरत्रषडपिसंस्थाना
नितदेवमुक्तान्यौदारिकभेदानांसंस्थानानिसांप्रतमवगाहनामानमाह॥ ७॥ ऊरालियस्सणंभंतेइत्यादिऔदारिकस्यजघन्यतोवगाहनाऽंगुलासं
ख्येयभागःसाचोत्पत्तिप्रथमसमयेपृथिवीकायिकादीनांवावसातव्या॥उत्कर्षतःसातिरेकंयोजनसहस्रमेषालवणसमुद्रगोतीर्थादिषुपद्मना
लाद्यधिकृत्यावसातव्या॥अन्यत्रैतावतऔदारिकस्यासंभवात्॥एवमेकेंद्रियसूत्रेपितथाचाहएकेंद्रियऊरालियस्सएवंचेवजहाऊहियस्सइ

त्ति॥पृथिव्यप्तेजोवायूनांसूक्ष्माणांप्रत्येकंपर्याप्तानामपर्याप्तानांचौदारिकशरीरस्यजघन्यतउत्कर्षतश्चावगाहनाअंगुलासंख्येयभागःप्रत्येकंचन
वंसूत्राणितद्यथाऔधिकसूत्रमौधिकापर्याप्तसूत्रमौधिकापर्याप्तसूत्रंतथासूक्ष्मसूत्रंसूक्ष्मापर्याप्तसूत्रंसूक्ष्मपर्याप्तकसूत्रमेवंबादरेपिसूत्रिकमितिएवंव
नस्पतिकायिकानामपिनवसूत्राणिनवरमौधिकवनस्पतिसूत्रेऔधिकवनस्पतिपर्याप्तकसूत्रेतथाबादरसूत्रेबादरपर्याप्तकसूत्रेतथाबादरपर्या
प्तसूत्रेजघन्यतोअंगुलासंख्येयभागउत्कर्षतःसातिरेकयोजनसहस्रंतच्चपद्मनालाद्यधिकृत्यवेदितव्यंशेषेतुपंचसुसूत्रेषुजघन्यतउत्कर्षतोवां
गुलासंख्येयभागःद्वित्रिचतुरिंद्रियाणांप्रत्येकंत्रीणित्रीणिसूत्राणितद्यथाऔधिकसूत्रमपर्याप्तसूत्रंचतऔधिकसूत्रेपर्याप्तसूत्रेचद्वींद्रियाणामु
त्कर्षतोद्वादशयोजनानित्रींद्रियाणांत्रीणिगव्यूतानिचतुरिंद्रियाणांचत्वारिगव्यूतानिमेत्रअपर्याप्तसूत्रेतुजघन्यतउत्कर्षतश्चांगुलासंख्येयभागः
तथासामान्यतस्तिर्यग्पंचेंद्रियाणांजलचराणांसामान्यतःस्थलचराणांचतुष्पदानांउरःपरिसर्प्पाणांभुजपरिसर्प्पाणांखचरपंचेंद्रियतिर
श्चांचप्रत्येकंनवनवसूत्राणितद्यथात्रीणिऔधिकानित्रीणिसंमूर्छिमविषयाणित्रीणिगर्भव्युत्क्रांतिकविषयाणितत्रापर्याप्तेषुस्थानेषुसर्वेषु
पिजघन्यतउत्कर्षतोवाअंगुलासंख्येयभागःशेषेषुतुस्थानेषुजघन्यतोंगुलासंख्येयभागउत्कर्षतसामान्यतस्तिर्यग्पंचेंद्रियेषुजलचरेषुचोत्कर्ष
तोयोजनसहस्रंसामान्यतःस्थलचरेषुचतुष्पदस्थलचरेषुचौधिकेषुगर्भव्युत्क्रांतेषुचषट्गव्यूतानिसंमूर्छिमेषुगव्यूतपृथक्त्वं॥उरःपरिसर्प्पेष्वौ
धिकेषुगर्भव्युत्क्रांतेषुचयोजनसहस्रंसंमूर्छिमेषुयोजनपृथक्त्वं॥भुजपरिसर्प्पेष्वौधिकेषुगर्भव्युत्क्रांतेषुचगव्यूतपृथक्त्वंसंमूर्छिमेषुध
नुःपृथक्त्वंखचरेष्वौधिकेषुगर्भव्युत्क्रांतेषुसंमूर्छिमेषुचसर्वेषुस्थानेषुधनुःपृथक्त्वंअत्रेमेसंग्रहगाथेजोयणसहस्समित्यादिगर्भव्युत्क्रां
तानांजलचराणांमुत्कर्षतःशरीरावगाहनायामानंयोजनसहस्रंचतुष्पदस्थलचराणांषट्गव्यूतानिउरःपरिसर्प्पस्थलचराणांयोजनसह १९१
स्रंभुजपरिसर्प्पस्थलचराणांगव्यूतपृथक्त्वंपक्षिणांधनुःपृथक्त्वंतथासंमूर्छिमाणांजलचराणामुत्कर्षतःशरीरावगाहनायाःप्रमाणंयोज
नसहस्रंचतुष्पदस्थलचराणांगव्यूतपृथक्त्वंपक्षिणांधनुःपृथक्त्वंउरःपरिसर्प्पस्थलचराणांयोजनपृथक्त्वंभुजपरिसर्प्पस्थलचराणांपक्षिणां

चधनुपृथक्त्वंमिति उक्तंमितिर्यग्पंचेंद्रियौदारिकशरीरावगाहनामानमिदानींमनुष्यपंचेंद्रियौदारिकशरीरावगाहनमाह॥७॥मणूसोरालियसरी
रसणमित्यादिकेष्यंनवरंत्रीणिगव्यूतानिदेवकुर्वाद्यपेक्षयात्तदेवमौदारिकशरीरस्यविधयःसंस्थानानिप्रमाणानिचोक्तानिसंप्रतितानिक्रमेणवैक्रियस्या
तिधित्सुराह॥वेउव्वियशरीरेणंभंतेइत्यादिवैक्रियशरीरंमूलभेदतोद्विभेदंएकेंद्रियपंचेंद्रियभेदात्तत्रैकेंद्रियस्यवातकायस्यतत्रापिबादरस्यतत्रा
पिपर्याप्तस्यशेषस्यवैक्रियलब्ध्यसंभवात्उक्तंचतिण्हंताबराण्णीणंवेऊव्वियलद्धीचेवनत्थिवायरपद्यत्ताणांपिसंख्येद्यइभागमेत्ताणंअत्रतिण्हंपित्रया
णांपर्याप्तापर्याप्तसूक्ष्मापर्याप्तबादरस्थाणांपंचेंद्रियचिंतायामपिजलचरचतुःष्पदोरःपरिसर्प्पभुजपरिसर्प्पखचरान्मनुष्यांश्चगर्भव्युत्क्रांतिका
न्संख्येयवर्षायुषोमुत्काशेषाणांप्रतिषेधोभवस्वभावतयातेषांवैक्रियलब्ध्यसंभवात्उक्ताभेदाःसंस्थानान्यभिधित्सुराह॥वेऊव्वियशरीरेणंभंतेइ
त्यादिसुगमंनवरंनैरयिकाणांभवधारणीयमुत्तरवैक्रियंहुंडसंस्थानमत्यंतक्लिष्टकर्मोदयवशात् तथाहितेषांभवधारणीयंशरीरंभवस्वभाव
तएवनिर्मूलविलुप्तपक्षोत्पादितसकलग्रीवादिरोमपक्षिसंस्थानवदतीवबीभत्संहुंडसंस्थानंदयत्युत्तरवैक्रियंतदपिशुभंवयंकरिष्यामइत्यभि
संधिनाकर्तुमार ब्धमपितथाविधात्यंताशुभनामकर्मोदयवशादतीवाशुभतरंमुभत्तरंमुपजायंतेइतिहुंडंसु स्थानंतिर्यग्पंचेंद्रियाणांमनुष्याणां
चवैक्रियंनानासंस्थानसंस्थितमिच्छावशातःप्रवृत्तेर्दशविधभवनपतिव्यंतरज्योतिष्कसौधर्माद्यच्युतपर्यवसानवैमानिकानांभवधारणीयंभवस्व
भावस्वाभावतयातथाविधशुभात्प्रत्येकंसर्वेषांसमचतुरस्रसंस्थानंउत्तरवैक्रियंथिच्छानुरोधतःप्रवृत्तेर्नानासंस्थानसंस्थितंग्रैवेयकानांचोत्तर
वैक्रियंनभवति॥प्रयोजनाभावादुत्तरवैक्रियंह्यत्रगमनागमननिमित्तंपरिचारणानिमित्तंचाक्रियतेनचैतेषामेतदस्तियतुभवधारणीयमेतेषां
तत्समचतुरस्रसंस्थानसंस्थितमिति॥उक्तानिसंस्थानानिसंप्रत्यवगाहनामानमाह॥७॥वेउव्वियशरीरस्सणमित्यादि॥जघन्यतोंगुलासंख्ये
यभागंनैरयिकादीनांभवधारणीयस्यापर्याप्तावस्थायांवातकायस्यवाउत्कर्षतःसातिरेकंयोजनशतसहस्रंदेवानांमुत्तरवैक्रियस्यमनुष्या
णांवाणमिंदियवेऊव्वियशरीरस्सणमित्यादि॥अत्रैकेंद्रियोवातकायोऽन्यस्यवैक्रियलब्ध्यसंभवात्तस्यजघन्यतउत्कर्षतोवावगाहनामानमंगुला

संख्येयभागप्रमाणमेतावत्प्रमाणविकुर्वणायामेवतस्यशक्तिसंभवात्सामान्यनैरयिकसूत्रेभवधारणीयाभवोधार्यतेययासाभवधारणीयात्कृदकुल
मितिवचनात्करणेऽनीयप्रत्ययःउत्कर्षतःपंचधनुःशतानिऊत्तरवैक्रियाधनुःधनुःसहस्रंसप्तमनरकपृथिव्यपेक्षयाअन्यत्रैतावत्याभवधारणीया
याऊत्तरवैक्रियायावाशरीरावगाहनायाअप्राप्यमाणत्वात्अधुनाप्रतिपृथिव्यवगाह॥छ॥रयणप्पभेत्यादिअंगुलासंख्येयभागप्रमाणताप्रथमोत्पत्तिका
लेवेदितव्याऊत्कर्षतःसप्तधनूंषित्रयोहस्ताःषडंगुलानिपर्याप्तावस्थायांइदंचोत्कर्षतःशरीरावगाहनामानंत्रयोदशेप्रस्तटेद्रष्टव्यं॥शेषेषुत्वक्तिने
षुप्रस्तटेषुस्तोकंस्तोकंतरंतत्रैवंरत्नप्रभायाःप्रथमेप्रस्तटेत्रयोहस्ताऊत्कर्षतःशरीरप्रमाणंद्वितीयेप्रस्तटेधनुरेकमेकोहस्तः॥सार्द्धनिचाष्टावंगुला
नितृतीयेप्रस्तटेधनुरेकंत्रयोहस्ताःसप्तदशांगुलानिचतुर्थेद्वेधनुषीद्वौहस्तौसार्द्धमेकमंगुलंपंचमेत्रीणिधनूंषिदशांगुलानिषष्टेत्रीणिधनुं
द्वौहस्तौसार्द्धान्यष्टादशांगुलानिसप्तमेचत्वारिसप्तमेचत्वारिधनूंषिएकोहस्तस्त्रीणिचांगुलानिअष्टमेचत्वारिधनूंषित्रयोहस्ताःसार्द्धान्ये
कादशांगुलानिनवमेपंचधनूंषिएकोहस्तोविंशतिरंगुलानि॥दशमेषट्धनूंषिसार्द्धानिचत्वारिअंगुलानिएकादशेषट्धनूंषिद्वौहस्तौत्र
योदशअंगुलानिद्वादशेसप्तधनूंषिसार्द्धान्येकविंशतिरंगुलानित्रयोदशेसप्तधनूंषित्रयोहस्ताःषट्परिपूर्णान्यंगुलानिएषचायंतात्पर्यार्थः
प्रथमेप्रस्तटेयच्छरीरावगाहनापरिमाणंत्रयोहस्ताइतितस्योपरिप्रतिप्रस्तटंक्रमेणसार्द्धानिषट्पंचाशदंगुलानिप्रक्षिप्यंतेततोयथोक्तंप्रस्त
टेषुशरीरावगाहपरिमाणंभवंति॥उक्तंचरयणाएपढमपयरेहत्थतियंदेहऊस्सेऊभणिउछप्पण्णंगुलसड्ढापयरेपयरेहवइवुड्ढीतक्षणंजामाऊ
त्तरवेऊव्वियाइत्यादिजघन्यतोंऽगुलसंख्येयभागंप्रथमसमयेपितस्याअंगुलसंख्येयभागप्रमाणायाएवभावात्नत्वसंख्येयभागप्रमाणा
या आहचसंग्रहणिमूलटीकाकाराहरिभद्रसूरिःउत्तरवैक्रियानुतथाविधप्रयत्नभावादाद्यसमयेप्यंगुलसंख्येयभागमात्रैवऊत्कर्षतःपंच
धनूंषिअर्द्धतृतीयाहस्ताइदंचउत्तरवैक्रियंशरीरावगाहनापरिमाणंत्रयोदशेप्रस्तटेअवसातव्यंशेषेषुप्रस्तटेषुप्रागुक्तभवधारणीयमा १५२
नापेक्षयापिगुणंप्रत्येतव्यंशर्कराप्रभायांभवधारणीयाऊत्कर्षतःपंचदशधनूंषिअर्द्धतृतीयाहस्ताइदंचोत्कर्षतोभवधारणीयावगाहनापरिमा

णमेकादशेप्रस्तटेऽवसातव्यंशेषेषुतुप्रस्तटेष्विदंशर्करायाःप्रथमेप्रस्तटेसप्तधनूंषित्रयोहस्ताःषडंगुलानिद्वितीयेप्रस्तटेअष्टौधनूंषिद्वौहस्तौनवचांगु
लानितृतीयेनवधनूंषिएकोहस्तोद्वादशचांगुलानिचतुर्थेदशधनूंषिपंचदशचांगुलानिपंचमेदशधनूंषित्रयोहस्ताअष्टादशअंगुलानिषष्ठेएका
दशधनूंषिद्वौहस्तावेकविंशतिरंगुलानिसप्तमेद्वादशधनूंषिद्वौहस्तौअष्टमेत्रयोदशधनूंषिएकोहस्तस्त्रीणिअंगुलानिनवमेचतुर्दशधनूंषिषडंगु
लानिषडंगुलानिदशधनूंषित्रयोहस्तानवचांगुलानिएकादशेसूत्रोक्तमेवपरिमाणंअत्रापीदंतात्पर्यंप्रथमेप्रस्तटेयत्परिमाणमुक्तंतस्योपरिप्रस्तटेक्र
मेणत्रयोहस्तास्त्रीणिचांगुलानिप्रक्षेप्तव्यानिततोयथोक्तंप्रस्तटेषुपरिमाणंभवतिउक्तंच॥सोचेवयबीयाएपढमेपयरंमिहोइऊस्सेहो॥हत्थतियतिन्नि
अंगुलपयरेयवुड्ढीऊ॥एक्कारसमेपयरेपण्णरसधणूणिदोण्णिरयणीसुवारसयअंगुलाइंदेहपमाणंतुविन्नेयंगाथाहयस्यापीयमक्षरगमनिकायएव
प्रथमपृथिव्यात्रयोदयोदशेप्रस्तटेऊत्कर्षतऊत्सेधोभणितःसप्तधनूंषित्रयोहस्ताःषडंगुलानीतिसएवद्वितीयस्यांशर्कराप्रभायांपृथिव्यांप्रथमेप्रस्त
टेत्स्येधोभवतिज्ञातव्यःततःप्रतरेप्रतरेवृद्धिरवसेयात्रयोहस्तास्त्रीणिचांगुलानितथावसत्येकादशेप्रस्तटेऊत्कर्षतोभवधारणीयशरीरपरिमाण
मायातिपंचदशधनूंषिद्वौहस्तौद्वादशचांगुलानीतिऊत्तरवैक्रियोत्कर्षपरिमाणमाह॥एकत्रिंशत्धनूंषिएकोहस्तः॥इदंचएकादशेप्रस्तटेवेदितव्यं॥शेषेषु
प्रस्तटेषुस्वस्वभवधारणीयापेक्षयाद्विगुणमेवसेयंतथातृतीयस्यांवालुकाप्रभायांपृथिव्यामुत्कर्षतोभवधारणीयाएकत्रिंशद्धनूंषिएकोहस्तएतच्चनवमं
प्रस्तटमधिकृत्योत्कमवसेयंशेषेषुतुप्रस्तटेष्वेवंतत्रप्रथमप्रस्तटेभवधारणीयापंचदशधनूंषिद्वौहस्तौद्वादशचांगुलानिद्वितीयेप्रस्तटेसप्तदशधनूंषि
द्वौहस्तौसार्द्धानिसप्तांगुलानितृतीयेएकोनविंशतिधनूंषिद्वौहस्तौत्रीण्यंगुलानिचतुर्थेएकविंशतिधनूंषिएकोहस्तःसार्द्धानिद्वाविंशतिरंगुलानिपं
चमेत्रयोविंशतिर्धनूंषिएकोहस्तोष्टादशचांगुलानिषष्ठेपंचविंशतिर्धनूंषिएकोहस्तःसार्द्धानित्रयोदशांगुलासप्तमेसप्तविंशतिर्धनूंषिएकोहस्तोनवचां
गुलानिअष्टमेएकोनत्रिंशद्धनूंषिएकोहस्तःसार्द्धानिचत्वार्यंगुलानिनवमेयथोक्तरूपंपरिमाणंअत्रापिचायंभावार्थःप्रथमेप्रस्तटेयत्परिमाणमुक्तं
तस्योपरिप्रस्तटेप्रस्तटेसप्तहस्ताःसार्द्धानिचएकोनविंशतिरंगुलानिक्रमेणप्रक्षेप्तव्यानिततोयथोक्तंप्रस्तटेषुपरिमाणंभवति।उक्तंच॥सोचेवयत

इ

इयाएपढमेपयरंमिहोइउस्सेहो।सत्तरयणीउअंगुलऊणवीसंसचुवुड्ढीयपयरेपनहानवमेण्यरम्मिहोउस्सेहो॥धणुयाणिएगतीसंएक्कारयणीयनायव्वा॥
अस्यापिगाथाद्वयस्येयमक्षरगमनिकायत्रवर्द्धितीयस्याःशर्कराप्रभायाएकादशेप्रस्तटेभवधारणीयायाउत्कर्षतउस्सेधउक्तःपंचदशधनूंषिद्वौहस्तौ
द्वादशचांगुलानिसएवतृतीयस्यावालुकाप्रभायाःपृथिव्याःप्रथमेप्रस्तटेउत्सेधोभवतिततःप्रतरेप्रतरेवृद्धिरवसेयासप्तहस्ताःसार्द्धानिचैकान
विंशतिरंगुलानितथावसतिनवमेप्रस्तटेयथोक्तंभवधारणीयावगाहनामानंभवतिएकत्रिंशद्धनूंषिएकोहस्तइतिउत्तरवैक्रियोत्कृष्टपरिमाण
माह॥द्वाषष्टिर्द्धनूंषिद्वौहस्तौएतच्चनवमप्रस्तटापेक्षमवसेयंशेषेषुप्रस्तटेषुनिजनिजभवधारणीयप्रमाणापेक्षयाद्विगुणद्विगुणमिति चतुर्थ्यांपं
कप्रभायांपृथिव्यामुत्कर्षतोभवधारणीयाद्वाषष्टिधनूंषिद्वौहस्तौइदंचसप्तमेप्रस्तटेप्रत्येयंशेषुप्रस्तटेष्वेवंपंकप्रभायाःप्रथमेप्रस्तटेएकत्रिंशद्धनूंषि
एकोहस्तःद्वितीयेषट्त्रिंशद्धनूंषिएकोहस्तोविंशतिरंगुलानितृतीयेएकचत्वारिंशद्धनूंषिद्वौहस्तौषोडशअंगुलानिचतुर्थेषट्चत्वारिंशद्धनूंषित्रयोहस्ता
द्वादशांगुलानिपंचमेद्विपंचाशद्धनूंषिअष्टावंगुलानिषष्ठेसप्तपंचाशद्धनूंषिएकोहस्तःचत्वार्यंगुलानिसप्तमेयथोक्तरूपंपरिमाणंअत्रापिचैषभावा
र्थः प्रथमेप्रस्तटेयत्परिमाणमुक्तंतस्योपरिप्रस्तटे२क्रमेणपंचधनूंषिविंशतिरंगुलानीत्येवंरूपावृद्धिरवगंतव्याः॥ततःसप्तमेप्रस्तटेसूत्रोक्तपरिमाणंभ
वति॥उक्तंच॥सोचेवयचउत्थीएपढमेपयरंमिहोइउस्सेहोपंचधणुवीसअंगुलपयरेपयरेयवुड्ढीय॥जोसत्तमएपयरेनेरइयाणंतुहोइवस्सेहो॥बाव
ट्ठीधणुयाइंदोण्णियरयणीयबोधव्वा॥अस्यापिगाथाद्वयस्याक्षरगमनिकाप्राग्वद्भावनीया॥उत्तरवैक्रियोत्कर्षपरिमाणंपंचविंशंधनुःशतंतच्चसप्तमेप्रस्त
टेशेषेषुस्वस्वभवधारणीयापेक्षयाद्विगुणमितिपंचम्यांपृथिव्यांभवधारणीयोत्कर्षतःपंचविंशंधनुःशतंतच्चपंचमंप्रस्तटमधिकृत्योक्तमवसेयंशेषेषुप्र
स्तटेष्विदंप्रथमेप्रस्तटेद्वाषष्टिर्धनूंषिद्वौहस्तौद्वितीयेअष्टसप्ततिर्धनूंषिएकाचवितस्तिःतृतीयेत्रिनवतिर्धनूंषित्रयोहस्ताश्चतुर्थेनवोत्तरंधनुःशतंएकोहस्त १५३
एकाचवितस्तिःपंचमेसूत्रोक्तंपरिमाणंअत्रापिचायंतात्पर्यार्थः॥यत्प्रथमेप्रस्तटेपरिमाणमुक्तंतदुपरिप्रस्तटे२क्रमेणपंचधनूंषिसार्द्धहस्तद्वयाधिकानिप्र
क्षेप्तव्यानि॥तथाचसतियथोक्तंपंचमेप्रस्तटेपरिमाणंभवति॥उक्तंच॥सोचेवपंचमीएपढमेपयरंमिहोइउस्सेहोपनरसधणूणिदोहत्थसड्ढपयरेसु १६३

वुड्ढीय॥तहपंचमएपयरेउस्सेहोधणुसयंतुपणुवीसं॥ अस्यासार्द्धगाथायाअक्षरगमनिकाप्राग्वत्कर्त्तव्याउत्तरवैक्रियोत्कर्षपरिमाणं॥अर्द्धतृतीयानि
धनुःशतानिएतानिचपंचमेप्रस्तटेवेदितव्यानिशेषेषुप्रस्तटेषुस्वस्वभवधारणीयापेक्षयाद्विगुणद्विगुणमितिषष्ठ्यांतमःप्रभायांपृथिगुणमितिषष्ठ्यां
तमःप्रभायांपृथिव्यामुत्कर्षतोभवधारणीयाअर्धतृतीयानिधनुःशतानितानिचतृतीयेप्रस्तटेप्रत्येतव्यानिप्रथमितुप्रस्तटेप्रत्येतव्यानिप्रथमंतुप्रमेतुप्र
स्तटेपंचविंशंधनुःशतंद्वितीयेसार्द्धसप्ताशीत्यधिकंधनुःशतंतृतीयेतुसूत्रोक्तमेवपरिमाणंअत्राप्ययंतात्पर्यार्थः॥प्रथमेप्रस्तटेयत्परिमाणमुक्तंतस्योपरि
प्रस्तटेसार्द्धानिद्वाषष्टिर्धनूंषिप्रक्षेप्तव्यानितथाचसतितृतीयेप्रस्तटेयथोक्तंपरिमाणंभवति॥उक्तंच॥सोचेवयछट्ठीएपढमेपयरंमिहोइउस्सेहो॥बावं
द्विधणुयसड्ढापयरेयहोइवुड्ढीउछट्ठीएतइयपयरेदोसयपण्णासयाहोंतिअस्यापुनरर्द्धपूर्विकायागाथायाअक्षरगमनिकाप्राग्वत्कर्त्तव्याउत्तरवै
परि
क्रियोत्कर्षमाणंपंचधनुःशतानितानिचतृतीयप्रस्तटेवेदितव्यानिआद्ययोस्तुद्वयोःस्वस्वभवधारणीयापेक्षयाद्विगुणंद्विगुणमवबोद्धव्यं॥अथसप्तम्यां
तुपृथिव्यांभवधारणीयाउत्कर्षतःपंचधनुःशतानिउत्तरवैक्रियाधनुःसहस्रंसर्वत्रभवधारणीयाजघन्यतोंगुलासंख्येयभागप्रमाणाउत्तरवैक्रिया
अंगुलसंख्येयभागप्रमाणेतितिर्यक्पंचेंद्रियस्यवैक्रियस्यवैक्रियशरीरावगाहनाउत्कर्षतोयोजनशतपृथक्त्वंततऊर्द्धंकरणशक्तेरभावात्मनुष्याणां
सातिरेकंयोजनशतसहस्रंविष्णुकुमारप्रभृतीनांतथाश्रवणात्जघन्यानुभयेसामप्यंगुलसंख्येयाभागप्रमाणानत्वसंख्येयभागमानातथारूप
प्रयत्नासंभवात्असुरकुमारादीनांस्तनितकुमारपर्यंचसानानांव्यंतराणांज्योतिष्काणांसौधर्मेशानदेवानांप्रत्येकंजघन्याभवधारणीयावैक्रियश
रीरावगाहनाअंगुलासंख्येयभागप्रमाणासाचोत्पत्तिसमयेद्रष्टव्याउत्कृष्टाःसप्तरत्नयःउत्तरवैक्रियाजघन्याअंगुलसंख्येयभागमात्राउत्कृष्टायोज
नशतसहस्रंउत्तरवेउव्विएजावअच्चुओकप्पोत्तिउत्तरवैक्रियंतावद्वक्तव्यंयावदच्युतंकल्पःपरतउत्तरवैक्रियसंभवात्एतच्चप्रागेवोक्तंसर्वत्रजघ
न्यतोंगुलसंख्येयभागउत्कर्षतोयोजनलक्षंभवधारणीयातुविचित्राततस्तांपृथगाहनवरम्मित्यादिनवरमयंभवधारणीयांप्रतिविशेषःसनत्कु
मारकल्पेजघन्यतोंगुलासंख्येयभागउत्कर्षतःषट्रत्नयएवंमाहेंद्रेविइतिएवमुक्तेनप्रकारेणजघन्याउत्कृष्टाचभवधारणीयामाहेंद्रकल्पे

पिवक्तव्या॥ तद्यसमसागरोपमस्थितिकान्देवानधिकृत्योक्तमवसेयंद्व्यादिसागरोपमस्थितिष्वेवंयेषांसनत्कुमारमाहेंद्रकल्पयोर्द्वेसागरोपमेस्थिति
स्तेषामुत्कर्षतोभवधारणीयापरिपूर्णासप्तहस्तप्रमाणायेषांत्रीणिसागरोपमाणितेषांषट्हस्ताश्चत्वारश्चहस्तस्यैकादशभागायेषांचत्वारिसागरोप
माणितेषांषट्हस्तास्त्रयोहस्तस्यैकादशभागायेषांपंचसागरोपमाणितेषांषट्हस्ताद्वौचहस्तस्यैकादशभागौयेषांषट्सागरोपमाणितेषांषट्हस्ता
एकश्चहस्तस्यैकादशभागः॥येषांतुपरिपूर्णानिसप्तसागरोपमाणिस्थितिस्तेषांपरिपूर्णाषट्हस्ताभवधारणीया॥ उक्तंच॥ अइरत्तिगंठिइजेसिंस
णंकुमारेतहेवमाहिंदे॥रयणीछक्कंतेसिंभागचउक्काहियंदोहा॥ततोअयरेअयरेभागोएक्केक्कउपडइजावसागरसत्तठिईणंरयणीछक्कंतणुप
माणंइहजघन्याभवधारणीयासर्वत्राप्यंगुलासंख्येयभागप्रमाणासाचप्रतीतेतितामवधीर्योत्कृष्टांप्रतिपादयति॥बंभलोगलंतगेसुपंचरयणी
उइहयद्यपिब्रह्मलोकस्योपरिलांतकोनसमश्रेण्यातथापीहशरीरप्रमाणचिंतायामिदंद्विकंविवक्षितेद्विकंपर्यंतएवहस्तस्यत्रुटितत्वालभ्यमान
त्वात्एवमुत्तरत्रापिद्विकचतुष्कादिपरिग्रहेकारणंवाच्यंतत्रब्रह्मलोकलांतकयोरुत्कर्षतयाभवधारणीयापंचरत्नकःएतच्चलांतकेचतुर्दशसागरोपम
स्थितिकान्देवानधिकृत्यप्रतिपादितमवसेयंतोषसागरोपमस्थितिष्वेवंयेषांब्रह्मलोकेसप्तसागरोपमाणिस्थितिस्तेषांषट्रत्नयःपरिपूर्णाभव
धारणीयायेषामष्टौसागरोपमाणितेषांपंचहस्ताः॥षड्हस्तस्यैकादशभापमाणितेषांपंचहस्ताःपंचहस्तस्यैकादशसागरोपमाणितेषांपंचहस्ता
श्चत्वारश्चैकादशभागाहस्तस्यलांतकेपियेषांदशसागरोपमाणिस्थितिस्तेषामेतावतीभवधारणीयोत्कर्षतोयेषामेकादशसागरोपमाणिलांतकेस्थि
तिस्तेषांपंचहस्तास्त्रयश्चहस्तस्यैकादशभागायेषांद्वादशसागरोपमाणितेषांपंचहस्ताद्वौचहस्तस्यैकादशभागौयेषांत्रयोदशसागरोपमाणितेषां
पंचहस्ताएकोहस्तस्यैकादशभागः॥येषांचतुर्दशसागरोपमाणिस्थितिस्तेषांपरिपूर्णाःपंचहस्ताभवधारणीयामहासुक्कसहस्सारेसुचत्तारिरयणी १९४
उ॥महाशुक्रसहस्रारयोश्चतस्रोरत्नयऊत्कर्षतोभवधारणीयापरिपूर्णाःपंचसहस्रायेषांपंचदशसागरोपमाणितेषांचत्वारोहस्तास्त्रयश्चहस्त
स्यैकादशभागाःयेषांषोडशसागरोपमाणितेषांचत्वारोहस्ताद्वौचहस्तस्यैकादशभागौयेषांसप्तदशसागरोपमाणितेषांचत्वारोहस्ताएकोहस्तस्यै

DR BHAU DAJI MEMORIAL

कादशभागःसहस्रारेपियेषांसप्तदशसागरोपमाणितेषामेतावतीभवधारणीयायेषांपुनःसहस्रारेपरिपूर्णान्यष्टादशसागरोपमाणिस्थितिःतेषांपरिपूर्णाश्चत्वारो
हस्ताभवधारणीया॥आणयपाणयआरणअच्चुएसुतिन्निरयणीउइति॥आनतप्राणतारणाच्युतेषुतिस्रोरत्नयउत्कृष्टाभवधारणीया॥एतच्चाच्युतेकल्पेद्वाविंश
तिसागरोपमस्थितिकान्देवानधिकृत्योक्तंद्रष्टव्यं॥शेषसागरोपमस्थितिष्वेवंयेषामानतेपिकल्पेपरिपूर्णानिकिंचित्समधिकानिचाष्टादशसागरोपमाणिस्थि
तिस्तेषांपरिपूर्णाश्चत्वारोहस्ताउत्कृष्टाभवधारणीयायेषांपुनरेकोनविंशतिःसागरोपमाणितेषांत्रयोहस्तास्त्रयश्चहस्तस्यैकादशभागाःप्राणतेपिकल्पे
येषामेकोनविंशतिसागरोपमाणिस्थितिस्तेषामेतावतीभवधारणीयायेषांपुनःप्राणतेकल्पेविंशतिसागरोपमाणिस्थितिस्तेषांत्रयोहस्ताद्वौचहस्तस्यैका
दशभागौयेषामारणेपिकल्पेविंशतिःसागरोपमाणिस्थितिस्तेषामेतावतीभवधारणीयायेषांपुनरारणेपिकल्पेएकविंशतिसागरोपमाणिस्थितिस्ते
षांत्रयोहस्ताएकश्चहस्तस्यैकादशभागोभवधारणीया॥अच्युतेपिकल्पेयेषामेकविंशतिसागरोपमाणिस्थितिस्तेषामेतावत्येवभवधारणीयायेषांपुन
रच्युतेकल्पेद्वाविंशतिःसागरोपमाणिस्थितिस्तेषामुत्कर्षतोभवधारणीयापरिपूर्णात्रयोहस्ताः॥गेवेज्जकप्पातीत्यादिभावितं॥नवरमुक्कोसेणंदोरयणीउत्तिएतच्च
चरमेग्रैवेयकेएकत्रिंशत्सागरोपमस्थितिकान्देवान्प्रतिद्रष्टव्यं॥शेषसागरोपमस्थितिष्वेवंप्रथमेग्रैवेयकेयेषांद्वाविंशतिसागरोपमाणिस्थितिस्तेषांत्रयोहस्ताभ
वधारणीयायेषांपुनस्तत्रैवत्रयोविंशतिसागरोपमाणिस्थितिस्तेषांद्वौहस्तावष्टौहस्तस्यैकादशभागाःद्वितीयेपिग्रैवेयकयेषांत्रयोविंशतिसागरोपमाणि
स्थितिस्तेषामेवतीभवधारणीयायेषांपुनस्तत्रचतुर्विंशतिपमाणिस्थितिस्तेषांद्वौहस्तौसप्तचहस्तस्यैकादशभागाभवधारणीयातृतीयेपिग्रैवेय
केयेषांचतुर्विंशतिसागरोपमाणिस्थितिस्तेषामस्येतावत्येवभवधारणीयायेषांपुनःपंचविंशतिसागरोपमाणितत्रस्थितिःतेषांद्वौहस्तौषड्हस
स्तस्यैकादशभागाभवधारणीयाचतुर्थेपिग्रैवेयकेयेषांपंचविंशतिसागरोपमाणिस्थितिस्तेषामेतावतीभवधारणीयायेषांपुनस्तत्रषड्विंशतिसा
गरोपमाणिस्थितिस्तेषांद्वौहस्तौपंचहस्तस्यैपंचहस्तस्यैकादशभागाःपंचमेपिग्रैवेयकेयेषांषड्विंशतिसागरोपमाणितेषामेतावतीयेषांतुतत्रसप्तविंश
तिसागरोपमाणितेषांद्वौहस्तौचत्वारोहस्तस्यैकादशभागाभवधारणीयाषष्ठेपिग्रैवेयकेयेषांसप्तविंशतिसागरोपमाणितेषामेतावत्येवभवधारणी

यायेषांपुनस्तत्राष्टाविंशतिसागरोपमाणिस्थितिस्तेषांद्वौहस्तौत्रयोहस्तस्यैकादशभागाभवधारणीयासप्तमेपिग्रैवेयेषामष्टाविंशतिसागरोपमाणितेषामेता
वतीयेषांपुनस्तत्रएकोनत्रिंशतिसागरोपमाणितेषांभवधारणीया॥द्वौहस्तौद्वौहस्तस्यैकादशभागोअष्टमेपिग्रैवेयकेषांस्थितिरेकोनत्रिंशत्सागरोपमाणि॥तेषा
मेतावत्प्रमाणायेषांपुनस्तत्रत्रिंशत्सागरोपमाणिस्थितिस्तेषांद्वौहस्तौवेकश्चहस्तस्यैकादशभागोभवधारणीयानवमेपिग्रैवेयकेयेषास्थितिस्त्रिंशत्सागरोपमाणि
तेषांभवधारणीयाएतावत्प्रमाणायेषांपुनरेकत्रिंशत्सागरोपमाणितत्रस्थितिस्तेषांपरिपूर्णौद्वौहस्तौभवधारणीयाएवंअणुत्तरइत्यादि॥एवंग्रैवेयकोक्तेनप्र
कारेणअणुत्तरोपपातिकदेवात्रिंशत्सागरोपमाणितत्रस्थितिस्तेषांपरिपूर्णौद्वौहस्तौभवधारणीयाएवंअणुत्तरेइत्यादि॥एवंग्रैवेयकोक्तेनप्रकारेणअणुत्त
रोपपातिकदेवानामपिसूत्रंवक्तव्यंनवरमुत्कर्षतोभवधारणीयाएकोरत्निर्हिस्तौवक्तव्यः॥एतच्चत्रयस्त्रिंशत्सागरोपमस्थितिकान्प्रतिज्ञातव्यंयेषांपुनर्विजया
दिषुचतुर्षुविमानेष्वेकत्रिंशत्सागरोपमाणिस्थितिस्तेषांपरिपूर्णौद्वौहस्तौभवधारणीयायेषांपुनस्तत्रैवमध्यमाद्वात्रिंशत्सागरोपमाणिस्थितिस्तेषामेकोहस्तएए
कश्चहस्तस्यैकादशभागोभवधारणीयायेषांपुनस्तत्रसर्वार्थसिद्धेचमहाविमानेत्रयस्त्रिंशत्सागरोपमाणितेषामेकोहस्तौभवधारणीयाजघन्यासर्वत्रांगुला
संख्येयभागमात्रातदेवमुक्तानिवैक्रियशरीरस्यापिविधिसंस्थानवगाहनाप्रमाणानिसंप्रत्याहारकस्यप्रतिपिपादयिषुराह॥७॥आहारशरीरेणंभंतेकइवि
हेपण्णत्तेइत्यादिसूगमंनवरंसंजयतियमोपरिमेसंयच्छंतिस्मसर्वसावद्ययोगेभ्यःसम्यगुपरिमंतिस्मेतिसंयताःगत्यर्थनित्याकर्मकावितिकर्त्तरिक्तप्रत्ययः॥सक
लचारित्रिणःअसंयताअविरतसम्यग्दृष्टयःसंयतासंयतादेशविरतिमंतः॥तथापमत्तान्निप्रथमाद्यंतेस्ममोहनीयादिकर्मोदयप्राभावतःसंज्वलनकषायनिद्रा
द्यन्यतमाप्रमादयोगतःसंयमयोगेषुसीदंतिस्मप्रमत्ताःपूर्ववत्कर्त्तरिक्तप्रत्ययः॥तेचप्रायोगच्छवासिनः तेषांक्वचिदनुपयोगसंभवात्तद्विपरीताअप्रमत्तास्ते
चप्रायोजिनकल्पिकपरिहारविशुद्धिकयथालंदकल्पिकप्रतिमाप्रतिपन्नास्तेषांसततोपयोगसंभवास्तत्रइहजिनकल्पिकादयोलब्धिंनोपजीवंतितेषांतथाक
ल्पत्वात्येपिचगच्छवासिनआहारकशरीरंकुर्वंतितेपितदानींलब्ध्युपजीवनेनौत्सुक्यभावतःप्रमादवंतोमोत्तनेपित्वप्रमादवंतआत्मप्रदेशानामौदारि ३९९
कशरीरसर्वात्मनोपसंहरणेनव्याकुलीभावात्आहारकशरीरेचांतर्मुहूर्त्तावस्थानंततोमध्यपिमध्यभागेकियत्कालंमनाक्विशुद्धिभावतःकार्मग्रंथिकैरप्रम ७६५

त्तोपवर्ण्यतेतथापिसलब्ध्युपजीवनेनप्रमत्तएवेत्यप्रमत्तध्यनोअप्रमत्तसंजयेत्यादिनाप्रतिषेधकृतःइड्ढिपत्तिरुड्ढिरामर्षोषध्यादिलक्षणाःप्राप्त
ऋद्धिप्राप्तस्तद्विपरीतोऽऋद्धिप्राप्तःऋद्धिश्चप्राप्नोतिप्रथमतोविशिष्टमुत्तरोत्तरमपूर्वोपूर्वार्थप्रतिपादकंश्रुतमवगाहमानःश्रुतसामर्थ्यतस्तीव्रतीव्रत
रशुभभावनामधिरोहंत्प्रथमतःसत्उक्तंचअवगाहतेचसश्रुतजलधिंप्राप्नोतिवावधिज्ञानंमानसपर्यायंवाज्ञानंकोष्टादिबुद्धिर्वाचारणवैक्रियसर्वौषधि
ताद्यावालब्धयस्तस्यप्रादुर्भवंतिगुणतोबलानिवामानसादीनि॥अत्रसइत्यप्रमत्तसंयतःमानसपर्यायमितिमानसाःमनसःसंबंधिनःपर्यायाविषयायस्य
तज्ज्ञानमपर्यायंमनःपर्यायंमानमित्यर्थः॥कोष्ठादिबुद्धीर्वाइत्यत्रादिशब्दान्पदानुसारिबीजपरिग्रहःतिस्रोहिबुध्दयःपरमातिशयभूरूपाःप्रवचनेप्रतिपाद्यं
तेतद्यथाकोष्टबुद्धिःपदानुसारिबुद्धिबीजबुद्धिश्चतत्रकोष्टइवधान्यंयाबुद्धिराचार्यमुखाद्विनिर्गतौतदवस्थानौच सूत्रार्थौवधारयतिनकिमपितयोःकालांतरेग
लतिसाकोष्टबुद्धिःयापुनरेकमपिसूत्रपदमवधार्याशेषमश्रुतमपितदवस्थमेवश्रुतमवगाहतेसापदानुसारिणीयापुनरेकमर्थपदंतथाविधमनुसृत्यशे
षमश्रुतमपियथावस्थितंप्रभूतमर्थमवगाहतेसाबीजबुद्धिःसाचसर्वोत्तमप्रकर्षप्राप्ताभगवतांगणभृतांतेहिउत्पादादिपदत्रयमवधार्यसकलमपिद्वादशांगा
त्मकंप्रवचनमभिसूत्रयंतितथाचारणाश्चवैक्रियंचसर्वौषध्यस्तद्भावश्चारणवैक्रियसर्वौषधितातत्रचरणंगमनंतदिद्यतेयेषांतेचारणाद्योत्स्नादिपेण
इतिमत्वर्थीयोणप्रत्ययःतत्रगमनमन्येषामपिमुनीनांविद्यतेतेनतोविशेषणान्यथानुपपत्त्याचरणमिहविशिष्टंगमनमभिगृह्यतेअतएवचातिशयनेमन्वर्थी
योयथारूपवतीकन्येत्यत्रततोयमर्थः॥अतिशायिचरणसमर्थाश्चारणाःआहचभाष्यकृतभाष्यटीकायांअतिशयचरणाश्चारणाःअतिशायगमनादित्यर्थः॥
तेचद्विधाजंघाचारणाश्च।तत्रयेचारित्रतपोविशेषप्रभावतःसमुद्भूतगमनविषयलब्धिविशेषास्तेजंघाचारणाःयेपुनर्विद्यावशतःसमुत्पन्नगमनलब्ध्यतिशया
स्तेविद्याचारणोजंघाचारणाश्चरुचकवरद्वीपंयावत्गंतुंसमर्थौविद्याचारणानंदीश्वरंतत्रजंघाचारणायत्रकुत्रापिगंतुमिच्छवस्तत्ररविकरानपिनिश्रीकृ
त्यगच्छंतिविद्याचारणास्त्वेवमेवजंघाचारणश्चरुचकवरद्वीपंगच्छन्एकेनैवोत्पातेनगच्छतिनिवर्तमानस्त्वेकेनोत्पातेननंदीश्वरमायातिद्वितीयेनस्वस्था
नंयदिपुनर्मेरुशिखरंजिगमिषुस्तर्हिप्रस्तमेनैवोत्पातेनपंडकवनमभिरोहतिप्रतिनिवर्तमानस्तुप्रथमोत्पातेननंदनवनमाक्रमतिद्वितीयेनस्वस्थानमिति

जंघाचारणोहिचारित्रातिशयप्रभावतोलब्धुपजीवनेऔत्सुक्याभावतःप्रमादसंभवाच्चचारित्रातिशयनिबंधनालब्धिरपहीयतेततःप्रतिनिवर्त्तमानोद्वाभ्यामुत्पाता
भ्यांस्वमुवमायातीतिविद्याचारणःपुनःप्रथमेन्योत्पातेनमानुषोत्तरंपर्वतंगच्छतिद्वितीयेनतुनंदीश्वरंप्रतिनिवर्त्तमानास्त्वकेनैवोत्पातेनस्वस्थानमायातितथामेरुंगच्छन्
प्रथमेनोत्पातेननंदनवनंगच्छतिद्वितीयेनपंडकवनंप्रतिनिवर्तमानस्त्वेकेनैवोत्पातेनस्वस्थानमायातीतिविद्याचारणोविद्यावशतोभवतिविद्यावपरीशीलस्माना
स्फुटास्फुटतरापिजायतेअतःप्रतिनिवर्त्तमानस्यशक्त्यतिशयसंभवादेकेनोत्पातेनस्वस्थानागमनमितिउक्तंचअइसयचरणसमत्थाजंघाविद्याहिचारणामुण
उ॥जंघाहिजाइपढमोभीसकाउंरविकारवि।एगुप्पाएणगउरुयगवरंमिउनऊपडिनियत्तोबिइएणंनंदिस्सरमिहंतउएइएणं॥पढमेणंपंडगवणंबिइउप्पाएणंपंड
गवणंमिएइइहंतइएणंजोविद्याचारणोहोइतथासर्वविट्मूत्रादिकमौषधंयस्यससर्वौषधःकिमुक्तंभवति॥यस्यसूत्रंविट्श्लेष्माशरीरमलोवारोगोपशम
समर्थोभवतिससर्वौषधआद्यशब्दादामर्षौषध्यादिलब्धिपरिग्रहःएताश्चऋद्धीःप्रमत्तःसन्प्राप्यपश्चादप्रमत्तोभवतितेनेहप्रयोजनंततउक्तंइड्ढिपत्तप
मत्तसंजयेत्यादिआहमनुष्यस्याहारकशरीरमित्युक्तेसामर्थ्यादमनुष्यस्यानाहारकशरीरमित्यवसीयतेततःकस्मादुच्यतेनोअमणुस्साहारगशरीरेइत्यादिनिरर्थकत्वा
त्॥उच्यतेइहत्रिविधाविनेयास्तद्यथाउद्घटितज्ञामध्यमबुद्धयःप्रपंचितज्ञाश्चतत्रयेउद्घटितज्ञामध्यमबुद्धयोवातेयथोक्तंसामर्थ्यमवबुध्यंतेयेपुनरद्याप्यव्युत्प
न्नत्वान्नयथोक्तसमर्थावगमकुशलास्तेप्रपंचितमेवावगंतुमीशतेनान्यथाततस्तेषामनुग्रहायसामर्थ्यलब्धस्यापिविपक्षनिषेधस्याभिधानंमहायांसोहिपरमक
रुणापरीतत्वाविशेषेणसर्वेषामनुग्रहायेहोप्रवर्त्ततेतःततोनकश्चिद्दोषःजहण्णेणंदेसूणारयणीइतिआहारकशरीरस्यजघन्यतोवगाहनादेशोनाकिंचिदूनार
त्निहस्तःतथाविधप्रयत्नभावतःप्रारंभसमयेपितस्याएतावत्याएवभावात्तदेवमुक्तान्याहारकशरीरस्यविधिसंस्थानावगाहनानिसंप्रतितैजसस्यतान्यभि
धित्सुराह॥५९॥तेयगशरीरेणंभंतेइत्यादिइहतैजसशरीरंसर्वेषामवश्यंभवति॥ततोयथाएकद्वित्रिचतुरिंद्रियचतुर्गतिऔदारिकशरीरभेदोपिवक्त
व्यः॥पंचेंद्रियतैजसशरीरचिंतायांचतुर्विधपंचेंद्रियतैजसशरीरंनैरयिकतिर्यग्मनुष्यदेवभेदात्तत्रनैरयिकतैजसशरीरचिंतायांयथाप्राक्वैक्रियशरी १६६
रेपर्याप्तापर्याप्तविषयतयाद्विगतोभेदउक्तस्तथात्रापिवक्तव्यः॥सच्चैवंजानेरइयपंचेंदियतेयगशरीरेकिंरयणप्पभापुढविनेरयियपंचेंदियतेयगशरीरेजा

वकिंआहेसत्तमापुढविनेरइयपंचेंदियतेयगसरीरेगोयमारयणप्पभापुढविनेरइयपंचेंदियतेयगसरीरेविजावअहेसत्तमापुढविनेरइयपंचेंदियतेयगसरीरे
विजइरयणप्पभापुढविनेरइयपंचेंदियतेयगसरीरेकिंपज्जत्तगरयणप्पभेत्यादिपंचेंद्रियतिर्यग्योनिकानांमनुष्याणांचयथाप्रागौदारिकशरीरेउक्तस्तथात्रापि
वक्तव्यःसच्चैवंतिरिक्खजोणियपंचेंदियतेयगसरीरेणंकइविहेपण्णत्तेइत्यादिदेवानांयथावैक्रियशरीरभेदउक्तस्तथाभणितव्यःसच्चैवंपंचेंद्रियतेयगशरी
रेकिंभवणवासिदेवपंचेंदियगसरीरेइत्यादियावत्सर्वार्थसिद्धदेवसूत्रं॥उक्तोभेदःसंप्रतिसंस्थानप्रतिपादनार्थमाह॥तेयगसरीरेणंभंतेकिंसंठिएपण्णत्ते
इत्यादिसुगमंइहजीवप्रदेशानुरोधितैजसंशरीरंततोयदेवतस्यांतस्यांयोनावौदारिकशरीरानुरोधेनवैक्रियशरीरानुरोधेनवजीवप्रदेशानांसंस्थानंतदेव
तैजसशरीरस्यापीतिप्राग्उक्तमेकद्वित्रिचतुरिंद्रियतिर्यक्पंचेंद्रियमनुष्यगतमौदारिकसंस्थानंनैरयिकदेवेषुवैक्रियसंस्थानमितितद्दिष्टमितिगतंसंस्थानमधुना
वगाहनामानमाह॥५५॥जीवस्सणंभंतेइत्यादिजीवस्यनैरयिकत्वादिविशेषणाविवक्षायांसामान्यतःसंसारिणोवामितिवाक्यालंकारेमारणांतिकसमुद्घातेनवक्ष्य
माणलक्षणेनसमवहतस्यसतःकेमहालियाइतिकिंप्रमाणमहत्वाशरीरावगाहनाशरीरमौदारिकादिकमप्यस्तितआहतैजसशरीरस्यप्रज्ञप्ताभगवानाहगोत
मशरीरप्रमाणमात्राविष्कंभबाहल्येनविष्कंभश्चबाहल्यंचविष्कंभश्चबाहल्यंसमाहारोद्वंद्वस्तेनविष्कंभेनबाहल्येनचेत्यर्थः॥तत्रविष्कंभउदरादिविस्तारःबाह
ल्यमुरःपृष्ठस्थूलताआयामोदैर्घ्येनतत्रायामेनजघन्यतोंगुलस्यासंख्येयभागोंगुलासंख्येयभागप्रमाणाइयंचएकेंद्रियस्यैकेंद्रियेष्वेवोत्पद्यमानस्यद्र
ष्टव्याउत्कर्षतोलोकांतान्लोकांतःकिमुक्तंभवति॥अधोलोकांतादारभ्ययावदूर्ध्वलोकांतऊर्द्धलोकांतादारभ्यावदधोलोकांतस्तावत्प्रमाणाइतिइयंचसूक्ष्मस्यवा
दरस्यवापयेकेंद्रियस्यवेदितव्यानशेषस्यासंभवात्एकेंद्रियाहिसूक्ष्माबादराश्चयथायोगंसमस्तेपिलोकेवर्त्ततेनशेषास्ततोयदासूक्ष्मोबादरोवाएकेंद्रियोऽधो
लोकांतेवर्तमानाऊर्द्धलोकांतेसूक्ष्मतयावोत्पत्तुमिच्छतिऊर्द्धलोकांतेवावर्त्तमानःसूक्ष्मोबादरोवाअधोलोकांतेसूक्ष्मतयाबादरतयावोत्पित्सतेतदा
तस्यमारणांतिकसमुद्घातेनसमवहतस्ययथोक्तप्रमाणातैजसशरीरावगाहनाभवतिएतेनपृथिव्यप्तेजोवायुवनस्पतिसूत्राण्यपिभावितानिद्रष्टव्यानितथा
हिसूक्ष्मपृथिवीकायिकोऽधोलोकेऊर्द्धलोकेवावर्त्तमानोयदासूक्ष्मपृथिवीकायिकादितयाबादरवायुकायिकतयावाऊर्द्धलोकेअधोलोकेवासमुत्पित्सु

छतिनदाभवतितस्यमारणांतिकसमुद्घातेनसमावहतस्योत्कर्षतोलोकांतात्लोकांतयावत्तैजसशरीरावगाहनाएवमष्कायिकादिष्वपिभाव्यंद्वीं
द्रियसूत्रेयोऽयमेनजघन्यतोंऽगुलासंख्येयभागप्रमाणोयदाऽपर्याप्तोद्वींद्रियोऽगुलासंख्येयभागप्रमाणोदारिकशरीरःस्वप्रत्यासन्नप्रदेशेएकेंद्रिया
दितयोत्पद्यतेतदाअवसेयाअथवायस्मिन्शरीरेस्थितःसन्मारणांतिकसमुद्घातंकरोतितस्मान्शरीरान्मारणांतिकसमुद्घातवशाद्बहिर्विनिर्गत
तैजसशरीरस्यायामविष्कंभविस्तारैरवगाहनाचिंत्यतेनतच्छरीरसहितस्यअन्यथाभवनपत्यादिर्यज्जघन्यतोंगुलासंख्येयभागत्वंवक्ष्यतेतद्विरुध्ये
तभवनपत्यादिशरीराणांसप्तादिहस्तप्रमाणत्वात्ततोमहाकायोपिद्वींद्रियोयदास्वप्रत्यासन्नेदेशेएकेंद्रियतयोत्पद्यतेतदाप्यंगुलासंख्येयभागप्रमाणा
वेदितव्याउत्कर्षतस्तिर्यग्लोकांल्लोकांतःकिमुक्तंभवति॥तिर्यग्लोकादधोलोकांतऊर्द्ध्वलोकांतोवायावत्ताभवतितावत्प्रमाणाइत्यर्थः॥कथमेतावत्प्रमाणे
तिचेदुच्यते॥इहद्वींद्रियाएकेंद्रियेषूत्पद्यंतेएकेंद्रियाश्चसकललोकव्यापिनस्ततोयदातिर्यग्लोकस्थितोद्वींद्रियऊर्द्ध्वलोकांतेअधोलोकांतेवाए
केंद्रियतयासमुत्पद्यंते।तदाभवतितस्यमारणांतिकसमुद्घातसमवहतस्ययथोक्तप्रमाणातैजसशरीरावगाहनातिर्यग्लोकग्रहणंचप्रायस्तेषांतिर्यग्लोक
स्थानमितिख्यापनार्थंअन्यथाअधोलोकैकदेशेप्यधोलौकिकग्रामादौऊर्द्ध्वलोकैकदेशेपिपंडकवनादौद्वींद्रियःसंभवतितदपेक्षयाऽतिरिक्तापितैजसशरीरावगा
हनाद्रष्टव्याएवंद्वित्रिचतुरिंद्रियसूत्रेष्वपिभावनीयानैरयिकसूत्रेआयामेनजघन्यतोयत्सातिरेकंयोजनसहस्रंतत्तदेवपरिभावनीयं॥इहवलयामुखाद
यश्चत्वारःपातालकलशालक्षयोजनावगाहायोजनसहस्रबाहल्यठिकरिकास्तेषामधस्त्रिभागोवायुपूर्णाउपरितनस्त्रिभागउदकपूर्णोमध्यस्त्रिभागोवायुद
कयोःसरणापसरणधर्मातत्रयदाकश्चित्सीमंतकादिषुनरकेंद्रकेषुवर्त्तमानोनैरयिकःपातालकलशप्रत्यासन्नवर्त्तीस्वायुःक्षयादुद्धृत्यपातालकलशकु
ड्यंयोजनसहस्रबाहल्यंभित्त्वापातालकलशमध्येद्वितीयेतृतीयेवात्रिभागेमत्स्यतयोत्पद्यतेतदाभवतिसातिरेकयोजनसहस्रमानानैरयिकस्यमारणांति
कसमुद्घातसमवहतस्यजघन्यतोजसशरीरावगाहनाउत्कर्षतोयावदधःसप्तमीपृथिवीतिर्यक्यावत्स्वयंभूरमणसमुद्रपर्यंतऊर्द्ध्वयावत्पंडकवनेपुष्करि १९७
ण्यस्तावद्द्रष्टव्याकिमुक्तंभवतिऽधःसप्तमपृथिव्याआरभ्यतिर्यग्यावत्स्वयंभूरमणपर्यंतऊर्द्ध्वयावत्पंडकवनंपुष्करिण्यस्तावत्प्रमाणाएतावतीचतदाल्पत्व

२६७

तेयदाधःसप्तमपृथिवीनारकःस्वयंभूरमणसमुद्रपर्यंतेमत्स्यतयोत्पद्यतेपंडकवनेषुपुष्करणीषुवेतितिर्यक्पंचेंद्रियस्योत्कर्षतस्तिर्यग्लोकाल्लोकांतोऽत्रा
पिभावनाद्वींद्रियवत्कर्त्तव्यातिर्यग्यंचेंद्रियेषूत्पादसंभवात्मनुष्येसोत्कर्षतःसमयक्षेत्रात्समयप्रधानंक्षेत्रंसमयक्षेत्रंमयूरव्यंसकादित्वान्मध्यपद
लोपीसमासः॥अस्मिन्अर्द्धतृतीयद्वीपप्रमाणेसूर्यादिक्रियाव्यंग्यसमयोनामकालद्रव्यमस्तिनत्समयक्षेत्रंमानुषक्षेत्रमितिभावस्तस्मात्यावदधऊर्द्ध्वालो
कांतस्तावत्प्रमाणामनुष्यस्याप्येकेंद्रियेषूत्पादसंभवात्समयक्षेत्रग्रहणंसमयक्षेत्रादन्यत्रमनुष्यजन्मनःसंहरणस्यवासंभवेनातिरिक्तायात्रावगाहनायाअ
संभवात्॥असुरकुमारादिस्तनितकुमारपर्यवसानभवनव्यंतरज्योतिष्कसौधर्मेशानदेवानांजघन्यतोंगुलासंख्येयभागःकथमितिचेदुच्यतेएकेप्येकेंद्रियेषूत्प
द्यंतेततोयदातेस्वाभरणेमदद्विषुकुंडलादिषुवायेमणयःपद्मरागादयस्तेषुगृद्धामूर्छितास्तदध्यवसायिनस्तैश्वशरीरस्थेष्वाभरणादिषुपृथिवीकायिकत्वेना
त्पद्यंतेतदाभवतिजघन्यतोंगुलासंख्येयभागप्रमाणातैजसशरीरावगाहना॥अन्येत्वन्यथात्रभावनिकांकुर्वंतिभावनातिश्लिष्टेतिनलिखितानचदूषिताकुमा
र्गेनहितैस्तस्तुःपुनस्तमनुधावतीतिन्यायानुसरणात्उत्कर्षतोयावदधस्तनश्चरमांतःतिर्यक्यावत्स्वयंभूरमणसमुद्रस्यबाह्योवेदिकांतऊर्द्ध्वयावदिषत्प्राग्भा
गपृथिवीतावद्द्रष्टव्याकथमितिचेत्उच्यतेयदाभवनपत्यादिकोदेवस्तृतीयस्याःपृथिव्याअधस्तनंचरमांतंयावत्कुतश्चित्प्रयोजनवशाद्गतोभवतितत्रचगतः
सन्कथमपिस्वायुःक्षयान्मृत्वातिर्यक्स्वयंभूरमणसमुद्रबाह्यवेदिकांतेयदिवाईषत्प्राग्भाराभिधपृथिवीपर्यंतेपृथिवीकायिकतयोत्पद्यतेतदाभवत्युत्कर्ष
तोयथोक्तातथातैजसशरीरावगाहनासनत्कुमारपिजघन्यतोंगुलासंख्येयभागप्रमाणातैजसशरीरावगाहनाकथमितिचेत्उच्यतेइहसनत्कुमारादय
एकेंद्रियेषुविकलेंद्रियेषुवानोत्पद्यंते।तथाभवस्वाभाव्यात्किंतुतिर्यग्पंचेंद्रियेषुमनुष्येषुवाततोयदामंदरादिपुष्करिण्यादिषुजलावगाहंकुर्वतःस्वभावायुः
क्षयात्तत्रैवस्वप्रत्यासन्नेदेशेमत्स्यतयोत्पद्यंते॥तदाअंगुलासंख्येयभागप्रमाणाद्रष्टव्याअथवापूर्वसंबंधिनींमनुष्यस्त्रियंमनुष्योणोपभुक्तामुपलभ्यरागादनु
रागतोयदापरिष्वजंतेपरिष्वज्यचतद्वाच्यप्रदेशेस्वावाच्यंप्रक्षिप्यकालंकृत्वातस्याएवगर्भेपुरुषबीजेसमुत्पद्यंतेतदाल्पत्वेउत्कर्षतोऽधःपातालकलशा
नांलक्षयोजनप्रमाणावगाहानांद्वितीयत्रिभागंयावत्स्वयंभूरमणपर्यंतऊर्द्ध्वयावदच्युतकल्पस्तावद्गंतव्याकथमितिचेदुच्यतेइहसनत्कुमारादिदेवाना

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

मनुदेवनिश्रयाअच्युतकल्पंयावतूगमनंभवतिनवतत्रवाप्यादिषुमत्स्यादयःसंतिततइहतिर्यग्मनुष्येषुसतत्रयदासनत्कुमारदेवोऽन्यदेवनिश्रयाऽच्युतक
ल्पंगतोभवतितत्रसन्स्वायुःक्षयात्कालंकृत्वातिर्यक्स्वयंभूरमणसमुद्रपर्यंतेयदिवाधःपातालकलशानांद्वितीयेत्रिभागेवायूदकयोरुत्सरणापसरण
भावनिमत्स्यादितयोत्पद्यतेतदाभवतितस्यतिर्यगधोवायथोक्तप्रमाणंतैजसशरीरावगाहनेतिएवंजावसहस्सारदेवस्सत्तिएवंसनत्कुमारदेवगतेवगतेनप्र
कारेणजघन्यतउत्कर्षतश्चतैजसशरीरावगाहनातावद्वाच्यायावत्सहस्रारदेवस्यभावनापिचसर्वत्रापिचसमानाआनतदेवस्यापिजघन्यतोंऽगुलासंख्येयभा
गप्रमाणातैजसशरीरवगाहनानत्वानतादयोदेवामनुष्येष्वेवोत्पद्यंतेमनुष्याश्चमनुष्यक्षेत्रएवेतिकथमंगुलासंख्येयभागप्रमाणाऽच्यते॥इहपूर्वसंबंधि
नीमनुष्येस्त्रियमन्येनमनुष्येणोपभुज्यमानानतदेवःकश्चनाप्यवधिज्ञानतउपलभ्यासन्नमृत्युतयाविपर्यस्तभावत्वात्सत्वचरितवैचित्र्यात्कर्मगतेरचिंत्य ॥१॥
त्वात्कामवृत्तेर्मलिनत्वाच्चउक्तंच॥सत्वानांचरितंचित्रंविचित्राकर्मणांगतिःमलिनत्वंचकामानांवृत्तिःपर्यंतदारुणाइति॥ गाढानुरागादिहागत्यतकु
क्षौपरिगृहतांपर्यपद्यततदवाच्यप्रदेशेस्वावाच्यंप्रक्षिप्यातीवमूर्छितःस्वायुःक्षयात्कालंकृत्वायत्तावस्याएवगर्भेमनुष्यत्वेनोत्पद्यंतेमनुष्यबीजंचजघ
न्यतोंतर्मुहूर्तमुत्कर्षतोद्वादशमुहूर्तान्यावदवतिष्ठतेउक्तंचमणुस्सवीएणंभंतेकालतोकेवचिरंहोइगोयमाजहन्नेणंअंतोमुहुत्तंउक्कोसेणंबारसमुहुत्ता
इतितत्ताद्वादशमुहूर्तार्वाक्यंतरेउपभुक्तंपरिपद्यमतस्यतत्रैवोत्पत्तिर्मनुष्यत्वेनद्रष्टव्याउत्कर्षतोऽधोयावदधोलौकिकग्रामास्तिर्यग्यावन्मनुष्यक्षेत्रंऊर्द्ध्वंयावद
च्युतःकल्पस्तावदेवसेयाकथमितिचेदुच्यते॥इहयदानतदेवःकस्याप्यन्यस्यनिश्रयाऽच्युतकल्पंगतोभवति॥सचतत्रगतःसन्कालंकृत्वाधोलौकिक
ग्रामेषुयदिवामनुष्यक्षेत्रपर्यंतेमनुष्यत्वेनोत्पद्यंतेतदाऽभ्यतेएवंप्राणतारणाच्युतकल्पदेवानामपिभावनीयंतथाचाहएवंजावआरणदेवस्सअच्चुयदेवस्स
विएवंचेवनवरंउड्ढंजावसयाइंविमाणाइंइतिअच्युतदेवस्यापिजघन्यतउत्कर्षतश्चतैजसशरीरावगाहनाएवमेवएवंप्रमाणेवपरंसूत्रपाठेउड्ढंजावसयाइंविमाण
इंइतिवक्तव्यंनतुउड्ढंजावअच्चुओकप्पोइति॥अच्युतदेवोचिंत्यतेतदाकथमूर्द्ध्वंयावदच्युतःकल्पइतिघटतेतस्यतत्रविद्यमानत्वात्केवलमच्युतदेवोपिक १९८
दाचिदूर्द्ध्वंस्वविमानपर्यंतंयावद्गच्छतितत्रचगतःसन्कालमपिकरोति॥ततउक्तंउड्ढंजावसयाइंविमाणाइंइतिग्रैवेयकानुत्तरसुराभगवद्वंदनादिकमपि